अथ

# शृङ्गारतिलकं

बाहुप्रौढमृणालमास्यकमलं लावण्यलीलाजलं
श्रोणीतीर्थशिला च नेत्रशफरं धम्मिल्लशैवालकं ।
कान्तायाः स्तनचक्रवाकयुगलं कन्दर्पबाणानलै-
र्दग्धानामवगाहनाय विधिना रम्यं सरो निर्मितं ॥ १ ॥

आयाता मधुयामिनी यदि पुनर्नायात एव प्रभुः
प्राणा यान्तु विभावसौ यदि पुनर्जन्मग्रहं प्रार्थये ।
व्याधः कोकिलबन्धने विधुपरिध्वंसे च राहुग्रहः
कन्दर्पे हरनेत्रदीधितिरियं प्राणेश्वरे मन्मथः ॥ २ ॥

वाणिज्येन गतः स मे गृहपतिर्वार्त्तापि न श्रूयते
प्रातस्तज्जननी प्रसूततनया जामातृगेहं गता ।
बालाहं नवयौवना निशि कथं स्थातव्यमस्मद्गृहे
सायं संप्रति वर्तते पथिक हे स्थानान्तरं गम्यतां ॥ ११ ॥

यामिन्येषा बहुलजलदैर्बद्धभीमान्धकारा
निद्रां याता मम पतिरसौ क्लेशितः कर्मदुःखैः ।
बाला चाहं मनसिजभयात्प्राप्तगाढप्रकम्पा
ग्रामश्चौरैरयमुपहतः पान्थ निद्रां जहीहि ॥ १२ ॥

इयं व्याधायते बाला भ्रूरस्याः कार्मुकायते ।
कटाक्षाश्च शरायन्ते मनो मे हरिणायते ॥ १३ ॥

क्व भ्रातश्चलितोऽसि वैद्यकगृहं किं तत्र शान्त्यै रुजां
किं ते नास्ति गृहे सखे प्रियतमा सर्वं गदं हन्ति या ।
वातं चेत्कुचकुम्भमर्दनवशात्पित्तं तु वक्त्रामृतात्
श्लेष्माणं विनिहन्ति हन्त सुरतव्यापारकेलिश्रमात् ॥ १४ ॥

दृष्टिं देहि पुनर्बाले कमलायतलोचने ।
श्रूयते हि पुरा लोके विषस्य विषमौषधं ॥ १५ ॥

अन्तर्गता मदनवह्निशिखावली या
सा बाध्यते किमिति चन्दनचर्च्चितेन ।
यः कुम्भकारपवनोपरि पङ्कलेप-
स्तापाय केवलमसौ न तु तापशान्त्यै ॥ १६ ॥

यासां दृष्ट्वा नयनयुगलं रङ्कवाराङ्गनानां
देशत्यागः परमकृतिभिः कृष्णसारैरकारि ।
तासामेव स्तनयुगजिताः कुम्भिनः सन्ति मत्ताः
प्रायो मूर्खः परिभवविधौ नाभिमानं विधत्ते ॥ १७ ॥

अपूर्वो दृश्यते वह्निः कामिन्याः स्तनमण्डले ।
दूरतो दहते गात्रं गात्रलग्नः सुशीतलः ॥ १८ ॥

कथमेतत्कुचद्वन्द्वं पतितं तव सुन्दरि ।
पश्याधःखननेन मूढ गिरयो न पतन्ति किं ॥ १९ ॥

कुसुमे कुसुमोत्पत्तिः श्रूयते न च दृश्यते ।
बाले तव मुखाम्भोजे कथमिन्दीवरद्वयं ॥ २० ॥

एतत्पयोधरयुगं पतितं निरीक्ष्य
खेदं वृथा वहसि किं कमलायताक्षि ।
स्तब्धो विवेकरहितो जनतापकारी
क्ष्यत्युन्नतः प्रपततीति किमत्र चित्रं ॥ २१ ॥

अयि मन्मथचूतमञ्जरि
श्रवणाव्यायतचारुलोचने ।
अपहृत्य मनः क्व यासि मे
किमराजकमत्र वर्तते ॥ २२ ॥

कोपस्त्वया हृदि कृतो यदि पङ्कजाक्षि
सो ऽस्तु प्रियस्तव किमत्र विधेयमन्यत् ।
आश्लेषमर्पय मदर्पितपूर्वमुच्चै
रुच्चैः समर्पय मदर्पितचुम्बनं च ॥ २३ ॥

# KA'VYA-SANGRAHA.

A

## SANSCRIT ANTHOLOGY,

BEING

**A Collection of the best Smaller Poems**

IN THE

SANSCRIT LANGUAGE.

BY

DR. JOHN HÆBERLIN,

MEMBER OF THE ASIATIC SOCIETY OF BENGAL.

CALCUTTA:

W. THACKER AND CO.

1847.

# कालिदासादिमहाकविगण

# विरचितत्रिपञ्चाशत्

# उत्तमसम्पूर्णकाव्यानि ।

श्रीडाक्तरयोहनहेवर्लिनकर्तृक

समाहृतमुद्राङ्कितानि ।

श्रीरामपुरीयचन्द्रोदययन्त्रे

१८४७

## काव्यसंग्रहस्यानुक्रमणिका ।

# काव्यसंग्रहः।

नव रत्नानि।

धन्वन्तरि क्षपणकामरसिंह शंकु
बेतालभट्ट घटकर्पर कालिदासाः।
ख्यातो वराहमिहिरो नृपतेः सभायां
रत्नानि वै वररुचि र्नव विक्रमस्य।

नवरत्नं।

मित्रमर्थी तथा नीतिर्धर्म्मं कार्पण्य मूर्खकाः।
स्त्रीणां विद्वान् तयोस्तत्त्वानाम् नवरत्नमिदं क्रमात्॥

मित्रं स्वच्छतया रिपुं नयबलै र्लुब्धं धनैरीश्वरं
कार्य्येण द्विजमादरेण युवतीं प्रेम्णा समैर्बांधवान्।
अत्युग्रं स्तुतिभि र्गुरुं प्रणतिभि र्मूर्खं कथाभि र्बुधं
विद्याभीरसिकं रसेन सकलं शीलेन कुर्य्याद्वशं॥ १॥

अर्थी लाघवमुच्छ्रितो निपतनं कामातुरो लांछनं
लुब्धो ऽकीर्त्तिमसंगरः परिभवं दुष्टोऽन्यदोषे रतिं।
निःस्वो वंचनमुन्मना विकलतां शोकाकुलः संशयं
दुर्जनप्रियतां दुरोदरवशः प्राप्नोति कष्टं मुहुः॥ २॥

नीति र्भूमिभुजां नतिर्गुणवतां ह्रीरंगनानां धृति
र्दंपत्योः शिशवो गृहस्य कविता बुद्धेः प्रसादो गिरां।
लावन्यं वपुषः स्मृतिः सुमनसां शान्ति र्द्विजस्य क्षमा
सक्तस्य द्रविणं गृहाश्रमवतां स्वास्थ्यं सतां मंडनं ॥ ३॥

धर्म्मः प्रागेवचिंत्यः सचिवमतिगति र्भावनीया सदैव
ज्ञेयं लोकानुवृत्तं वरचरनयनै र्मंडलं वीक्षणीयं।
प्रच्छाद्यौ रागरोषौ मृदुपरुषगुणौ योजनीयौ च काले
आत्मा यत्नेन रक्ष्यो रणशिरसि पुनः सोपि नापेक्षणीयः ॥४॥

कार्पण्येन यशः क्रुधा गुणचयो दंभेन सत्यं क्षुधा
मर्यादा व्यसनै र्धनानि विपदा स्थैर्यं प्रमादै र्द्विजः।
पैशुन्येन कुलं मदेन विनयो दुश्चेष्टया पौरुषं
दारिद्र्येण जनादरो ममतया चात्मप्रकाशो हतः ॥ ५ ॥

मूर्खो ऽशान्तस्तपस्वी क्षितिपतिरलसो मत्सरो धर्म्मशीलो
दुःस्थो मानी गृहस्थः प्रभुरतिकृपणः शास्त्रविद्धर्म्महीनः।
आज्ञाहीनो नरेंद्रः शुचिरपि सततं यः परान्नोपभोगी
वृद्धो रोगी दरिद्रः स च युवतिपति र्धिग्विडंबप्रकारं ॥ ६॥

स्त्रीणां यौवनमर्थिनामनुगमो राज्ञां प्रतापः सतां
सत्यं स्वल्पधनस्य संचितिरसद्वृत्तस्य वाग्डम्बरः।
साचारस्य मनोदमः परिणते र्विद्या कुलस्यैकता
सेवाया धनमुन्नतेर्गुणचयः शांते र्विवेको बलं ॥ ७॥

विद्वान् संसदि पाक्षिकः परवशो मानी दरिद्रो गृही

वित्ताढ्यः कृपणः सुखी परवशो वृद्धो न तीर्थाश्रितः।
राजा दुःसचिवप्रियः कुलभवो मूर्खः पुमान् स्त्रीजितो
वेदांती हतसत्क्रियः किमपरं हास्यास्पदं भूतले ॥८॥

उत्खातान् प्रतिरोपयन् कुसुमितांश्चिन्वन् शिशून् वर्द्धयन्
प्रोत्तुंगान् नमयन् नतान् समुदयन् विश्लेषयन् संहतान्।
तीव्रान् कंटकिनो बहिर्नियमयन् ग्लानान् मुहुः सेचयन्
मालाकार इव प्रयोगनिपुणो राजा चिरं नंदतु ॥ ९ ॥

इति नवरत्नं समाप्तं।

## पंचरत्नं।

नागः पोतस्तथा वैद्यं व्याप्तिः शक्यं यथाक्रमं।
पंचरत्नमिदं प्रोक्तं विदुषामपि दुर्लभं।

नागो भाति मदेन कं जलरुहैः पूर्णेन्दुना सर्व्वरी
शीलेन प्रमदा जवेन तुरगो नित्योत्सवै मंदिरं।
वाणी व्याकरणेन हंसमिथुनै नद्यः सभा पंडितैः
सत्पुत्रेण कुलं नृपेण वसुधा लोकत्रयं विष्णुना ॥१॥

पोतो दुस्तरवारिराशितरणे दीपोऽधकारागमे
निर्वाते व्यजनं मदांधकरिणां दर्पोपशान्त्यै सृणिः।
इत्थं तत् भुवि नास्ति यस्य विधिना नोपायचिन्ता कृता
मन्ये दुर्जनचित्तवृत्तिहरणे धातास्ति भग्नोद्यमः ॥ २॥

वैद्यं पानरतं नटं कुपठितं स्वाध्यायहीनं द्विजं
युद्धे कापुरुषं हयं गतरयं मूर्खं परिव्राजकं।

राजानंच कुमन्त्रिभिः परिहृतं देशंच सोपद्रवं
भर्य्यां यौवनगर्व्वितां पररतां मुंचन्तु शीघ्रं बुधाः ॥ ३ ॥

क्षांतिश्चेत् कवचेन किं किमरिभिः क्रोधोऽस्ति चेद्देहिनां
ज्ञातिश्चेदनलेन किं यदि सुहृद् दिव्यौषधैः किं फलं
किं सर्पैर्यदि दुर्जनः किमु धनैर्विद्यानवद्या यदि
व्रीडा चेत् किमु भूषणेन कविता यद्यस्ति राज्येन किं ॥४॥

शक्यं वारयितुं जलेन हुतभुक् छत्रेण सूर्य्यातपः
नागेन्द्रो निशितांकुशेन चपलौ दंडेन गोगर्द्दभौ।
व्याधि वैद्यकभेषजैरनुदिनं मंत्रप्रभावाद् विषं
सर्व्वस्यौषधमस्ति शास्त्रविहितं मूर्खस्य नास्त्यौषधं ॥ ५ ॥

इति पंचरत्नं समाप्तं।

## षड्रत्नं।

शास्त्रं कोर्थां स्तथा मूर्खो दानं दुर्म्मन्त्रिमंतथा।
लोभोप्यस्तीति विज्ञेयं क्रमात् षड्रत्नमीरितं।

शास्त्रं सुचिंतितमथो परिचिन्तनीयम्
आराधितोपि नृपतिः परिशंकनीयः।
अंके स्थितापि युवती परिरक्षणीया
शास्त्रे नृपे च युवतौ च कुतो वशित्वं ॥ १ ॥

कोर्थान् प्राप्य न गर्वितो विषयिनः कस्यापदो नागताः
स्त्रीभिः कस्य न खंडितं भुवि मनः को नाम राज्ञां प्रियः।
कः कालस्य न गोचरान्तरगतः कोर्थी गतो गौरवं

को वा दुर्जनवागुरासु पतितः क्षेमेण यातः पुमान् ॥ २॥

मूर्खो द्विजातिःस्थविरो गृहस्थः
कामी दरिद्रो धनवान् तपस्वी ।
वेश्या कुरूपा नृपतिः कदर्य्यः
लोके षडेतानि विडम्बितानि ॥ ३ ॥

दानं दरिद्रस्य प्रभोश्च शान्तिर्यूनां तपो ज्ञानवतांच मौनं ।
इच्छानिवृत्तिश्च सुखासितानां दया च भूतेषु दिवं नयन्ति॥४॥

दुर्म्मन्त्रिणं कमुपयान्ति न नीतिदोषाः
सन्तापयन्ति कमपथ्यभुजं न रोगाः ।
कं श्रीर्न दर्पयति कं न निहन्ति मृत्युः
कं स्त्रीकृता न विषया न नु तापयन्ति॥ ५ ॥

लोभोऽप्यस्ति गुणेन किं पिशुनता यद्यस्ति किं पातकैः
सौजन्यं यदि किं परैः सुमहिमा यद्यस्ति किं मंडनैः।
सत्यं चेत्तपसा च किं शुचिमनो यद्यस्ति तीर्थेन किं
सद्विद्या यदि किं धनैरपयशो यद्यस्ति किं मृत्युना ॥ ६ ॥

इति षड्रत्नं समाप्तं ।

## सप्तरत्नं ।

वांछा राजा तथा छेदो वृत्तं वित्तेन किं तथा ।
स्वर्गो धनेन किं ज्ञेयं सप्तरत्नमिदं क्रमात् ॥

वांछा सज्जनसंगमे परगुणे प्रीति र्गुरौ नम्रता
विद्यायां व्यसनं स्वयोषिति रति र्लोकापवादाद् भयं ।

भक्तिश्चक्रिणि शक्तिरात्मदमने संसर्गमुक्तिः खले
एते यत्र वसन्ति निर्म्मलगुणास्तेभ्यो नरेभ्यो नमः ॥ १ ॥

राजा धर्म्मविना द्विजः शुचिविना ज्ञानं विना योगिनः
कान्ता सत्यविना हयो गतिविना भूषा च ज्योतिर्विना ।
योद्धा शूरविना तपो व्रतविना छन्दो विना गीयते
भ्राता स्नेहविना नरो हरिविना मुंचन्ति शीघ्रं बुधाः ॥ २॥

छेदश्चंदनचूतचम्पकवने रक्षास्ति साकोटके
हिंसा हंसमयूरकोकिलकुले काकेष नित्यादरः ।
मातंगेन खरक्रयः समतुला कर्पूरकार्पासयोः
एषा यत्र विचारणा गुणिगणे देशाय तस्मै नमः ॥ ३ ॥

वृक्षं क्षीणफलं त्यजंन्ति विहगाः शुष्कं सरः सारसाः
पुष्पं पर्य्युषितं त्यजन्ति मधुपा दग्धं वनान्तं मृगाः ।
निर्द्रव्यं पुरुषं त्यजन्ति गणिका भ्रष्टश्रियं मंत्रिणः
सर्वे कार्यवशाज्जनोभिरमते कस्यास्ति को वल्लभः ॥ ४ ॥

वित्तेन किं वितरणं यदि नास्ति दीने
किं सेवया यदि परोपकृतौ न यत्नः ।
किं संगमेन तनयो यदि नेक्षणीयः
किं यौवनेन विरहो यदि वल्लभायाः ॥ ५ ॥

स्वर्गः किं यदि वल्लभा निजवधूः किं वा विभूषा विधिः
लावन्यं यदि किं सुधाकरकरैः शृंगारगर्भा गिरः ।
मृत्युः किं यदि दुर्जनेष्ववनतिः किं धिक् यदि प्रार्थना
प्रास्तिष्टः करिकेतनो यदि भवेत् किं कल्पभूमीरुहैः ॥ ६ ॥

धनेन किं यो न ददाति याचके
बलेन किं यश्च रिपून्न वाधते ।
श्रुतेन किं यो नच धर्म्ममाचरेत्
किमात्मना यो न जितेंद्रियो भवेत् ॥ ७ ॥

इति सप्तरत्नं समाप्तं ॥

---

## अष्टरत्नं ।

अर्थो व्योम तथा नित्यं ब्रह्मा भागे शशिन्यपि ।
शशी निःस्वश्च विज्ञेयमष्टरत्नमिदं क्रमात् ॥

अर्थागमो नित्यमरोगिता च
प्रिया च भार्या प्रियवादिनी च ।
वश्यश्च पुत्रोऽर्थकरी च विद्या
षड्जीवलोकेषु सुखानि तात ॥ १ ॥

व्योमैकान्तविहारिणोपि विहगाः संप्राप्नुवंत्यापदं
वध्यन्ते निपुनैरगाधसलिलात् मत्स्याः समुद्रादपि ।
दुर्नीते हि विधौ कुतः सुचरितं कः स्थानलाभे गुणः
कालो हि व्यसनप्रसारितकरो गृह्णाति दूरादपि ॥ २ ॥

नित्यं छेदस्तृणानां क्षितिनखलिखनं पादयोरल्पपूजा
दन्तानामल्पशौचं वसनमलिनता रूक्षता मूर्द्धजानां ।
द्वे सन्ध्ये चापि निद्रा विवसनशयनं ग्रासहासातिरेकः
स्वांगे पीठे च वाद्यं हरति धनपतेः केशवस्यापि लक्ष्मीं ॥ ३ ॥

ब्रह्मा येन कुलालवन्नियमितो ब्रह्मांडभांडोदरे
विष्णु र्येन दशावतारगहने न्यस्तो महासंकटे ।
रुद्रो येन कपालपानिरटनं भिक्षाटनं कारितः
सूर्य्यो भास्यतिः नित्यमेव गगणे तस्मै मनः कर्म्मणे ॥ ४ ॥

भोगे रोगभयं कुले च्युतिभयं वित्ते नृपालाद्भयं
माने दैन्यभयं बले रिपुभयं रूपे तरुण्या भयं ।
शास्त्रे वादिभयं गुणे खलभयं काये कृतान्ताद्भयं
सर्व्वं वस्तु भयान्वितं भुवि नृणां वैराग्यमेवाभयं ॥ ५ ॥

शशिनि खलु कलंकः कंटकं पद्मनाले
युवतिकुचनिपातः पक्कता केशजाले ।
जलधिजलमपेयं पंडिते निर्धनत्वं
वयसि धनविवेको निर्विवेको विधाता ॥ ६ ॥

शशी दिवसधूषरो गलितयौवना कामिनी
सरो विगतवारिजं मुखमनक्षरं स्वाकृतेः ।
प्रभुर्धनपरायणः सततदुर्गतः सज्जनो
नृपांगणगतः खलो मनसि सप्त शैलानि मे ॥ ७ ॥

निःस्वो वष्टि शतं शती दशशतं लक्षं सहस्राधिपो
लक्षेशः क्षितिपालतां क्षितिपतिश्चक्रेशतां वांछति ।
चक्रेशः पुनरिंद्रतां सुरपति र्ब्राह्मं पदं वांछति
ब्रह्मा शैवपदं शिवो हरिपदम् आशावधिं को गतः ॥ ८ ॥

इत्यष्टरत्नं समाप्तं ॥

छन्दसां लक्षणं येन श्रुतमात्रेण बुध्यते ।
तमहं संप्रवक्ष्यामि श्रुतबोधमविस्तरं ॥ १ ॥
संयुक्ताद्यं दीर्घं सानुस्वारं विसर्गसंमिश्रं ।
विज्ञेयमक्षरं गुरु पादान्तस्थं विकल्पेन ॥ २ ॥
एकमात्रो भवेद् ह्रस्वो द्विमात्रो दीर्घ उच्यते ।
त्रिमात्रस्तु प्लुतो ज्ञेयो व्यंजनं चार्द्धमात्रकं ॥ ३ ॥
यस्याः पादे प्रथमे द्वादश मात्रास्तथा तृतीयेऽपि ।
अष्टादश द्वितीये चतुर्थके पञ्चदश सार्य्या ॥ ४ ॥
आर्यापूर्वार्द्धसमं द्वितीयमपि भवति यत्र हंसगते ।
छन्दोविदस्तदानीं गीतिंताममृतवाणि भाषन्ते ॥ ५ ॥
आर्योत्तरार्द्धतुल्यं प्रथमार्द्धमपि प्रयुक्तं चेत् ।
कामिनि तामुपगीतिं प्रतिभाषन्ते महाकवयः ॥ ६ ॥
आद्यचतुर्थं पञ्चमकं चेत् ।
यत्र गुरु स्यात् साक्षरपंक्तिः ॥ ७ ॥
अगुरुचतुष्कं भवति गुरू द्वौ ।
घनकुचयुग्मे शशिवदनासौ ॥ ८ ॥
तुर्यं पञ्चमकं चेद् यत्र स्याल्लघु बाले ।
विद्वद्भिर्मृगनेत्रे प्रोक्ता सा मदलेखा ॥ ९ ॥
श्लोके षष्ठं गुरु ज्ञेयं सर्वत्र लघु पञ्चमं ।
द्विचतुःपादयोर्ह्रस्वं सप्तमं दीर्घमन्ययोः ॥ १० ॥
आदिगतं तुर्यगतं पञ्चमकं चान्त्यगतं ।

स्यात् गुरु चेत् संकथितं मानवकाक्रीडमिदं ॥ ११ ॥
द्वितुर्यषष्ठमष्टमं गुरु प्रयोजितं यदा ।
तदा निवेदयन्ति तां बुधा नगस्वरूपिणीं ॥ १२ ॥
सर्वे वर्णा दीर्घा यस्या विश्रामः स्याद्वेदै र्वेदैः ।
विद्वद्वन्दै र्वीणावाणि व्याख्याता सा विद्युन्माला ॥ १३ ॥
तन्वि गुरु स्यादाद्यचतुर्थं पञ्चमषष्ठं चान्त्यमुपान्त्यं ।
इन्द्रियवाणै र्यत्र विरामः सा कथनीया चम्पकमाला ॥१४॥
चम्पकमाला यत्र भवेद् अंत्यविहीना प्रेमनिधे ।
छन्दसि दक्षा ये कवयस् तन्मणिमध्यं ते ब्रुवते ॥ १५ ॥
मन्दाक्रान्तान्त्ययतिरहिता सालंकारे यदि भवति या ।
सा विद्वद्भिर्ध्रुवमभिहिता ज्ञेया हंसी कमलवदने ॥ १६ ॥
ह्रस्वो वर्णो जायते यत्र षष्ठः कम्बुग्रीवे तद्वदेवाष्टमान्त्यः ।
विश्रामः स्यात् तन्वि वेदैस्तुरङ्गैः तां भाषन्ते शालिनीं
छान्दसीयाः ॥ १७ ॥
आद्यचतुर्थम पीननितम्बे सप्तमकं दशमं च तथान्त्यं ।
यत्र गुरु प्रकटाक्षरे तत् कथितं ननु दोधकवृत्तं ॥१८॥
यस्यास्त्रिषट्सप्तमम क्षरं स्यात् ह्रस्वं सुजंघे नवमं च तद्वत् ।
गत्या विलज्जीकृतहंसकान्ते तामिन्द्रवज्रां ब्रुवते
कवीन्द्राः ॥ १९ ॥
यदीन्द्रवज्रा चरणेषु पूर्वे भवन्ति वर्णा लघवः सुवर्णे ।
अमन्दमाद्यन्मदने तदानीमुपेन्द्रवज्रा कथिता
कवीन्द्रैः ॥ २० ॥

यत्र द्वयोरप्यनयोस्तु पादा भवन्ति सीमन्तिनि चन्द्रकान्ते ।
विद्वद्भिराद्यैः परिकीर्तिता सा प्रयुज्यतामित्युपजा
तिरेषा ॥ २१ ॥
आख्यानकी सा प्रकटीकृतार्थे यदीन्द्रवज्राचरणः पुरस्तात् ।
उपेन्द्रवज्राचरणास्त्रयोऽन्ये मनीषिणोक्ता विपरीत
पूर्वा ॥ २२ ॥
आद्यमक्षरमतस्तृतीयकं सप्तमं च नवमं तथान्तिमं ।
दीर्घमिंदुमुखि यत्र जायते तां वदन्ति कवयो
रथोद्धतां ॥ २३ ॥
अक्षरं च नवमं दशमं च व्यत्ययाद्भवति यत्र विनीते ।
प्राक्तनैः सुनयने यदि सैव स्वागतेति कविभिः
कथिता सा ॥ २४ ॥
सतृतीयकषष्ठमनङ्गरते नवमं विरतिप्रभवं गुरु चेत् ।
घनपीनपयोधरभारनते ननु तोटकवृत्तमिदं
कथितं ॥ २५ ॥
यदि तोटकस्य गुरु पंचमकं विहितं विलासिनि तदक्षरकं ।
रससंख्याकं गुरु न चेदबले प्रमिताक्षरेति कविभिः
कथिता ॥ २६ ॥
यदाद्यं चतुर्थं तथा सप्तमं स्यात्तथैवाक्षरं ह्रस्वमेकादशाद्यं ।
शरच्चन्द्रविद्वेषिवक्त्रारविन्दे तदुक्तं कविन्द्रैर्भुजङ्ग
प्रयातं ॥ २७ ॥
अयि कृशोदरि यत्र चतुर्थकं गुरु च सप्तमकं दशमं तथा ।

विरतिंच तथैव सुमध्यमे द्रुतविलम्बितमित्युप
दिश्यते ॥ २८ ॥

प्रथमाक्षरमाद्यतृतीययो द्रुतविलम्बितकस्य हि पादयोः ।
यदि नास्ति तदा कमलेक्षणे भवति सुन्दरि सा
हरिणीप्लुता ॥ २९ ॥

उपेंद्रवज्राचरणेषु संति चेद् उपांत्यवर्णा लघवः परे कृताः ।
मदोल्लसद्भ्रूजित कामकार्मुके वदन्ति वंशस्थविलं
बुधास्तदा ॥ ३० ॥

यस्यामशोकांकुरपाणिपल्लवे वंशस्थपादा गुरुपूर्ववर्णकाः ।
तारुण्यहेलारतिरंगलालसे तामिन्द्रवंशां कवयः
प्रचक्षते ॥ ३१ ॥

यस्यां प्रिये प्रथमकमक्षरद्वयं तुर्यं तथा गुरु नवमं दशांतिमं ।
सान्त्यं भवेद्यतिरपि चेद्युगग्रहैः सा लक्ष्यताममृतरुते
प्रभावती ॥ ३२ ॥

आद्यं चेत् त्रितयमथाष्टमं नवान्त्यं
द्वावन्त्यौ गुरुविरतौ सुभाषिते स्यात् ।
विश्रामो भवति महेशनेत्रदिग्भिर्
विज्ञेया ननु सुदति प्रहर्षिणी सा ॥ ३३ ॥

आद्यं द्वितीयमपि चेद्गुरु तच्चतुर्थं
यच्चाष्टमञ्च दशमान्त्यमुपान्त्यमन्त्यं ।
अष्टाभिरिन्दुवदने विरतिश्च षड्भिः
कान्ते वसन्ततिलकं किल तं वदन्ति ॥ ३४ ॥

प्रथममगुरु षट्कं विद्यते यत्र कान्ते
तदनु च दशमं चेदक्षरं द्वादशान्त्यं ।
गिरिभिरथ तुरङ्गैर्यत्र कान्ते विरामः
सुकविजनमनोज्ञा मालिनी सा प्रसिद्धा ॥ ३५ ॥
सुमुखि लघवः पञ्च प्राच्यास्ततो दशमान्तिमः
तदनु ललितालापे वर्णौ तृतीयचतुर्थकौ ।
प्रभवति पुनर्यत्रोपान्त्यः स्फुरत्कनकप्रभे
यतिरपि रसैर्वेदैरश्वैः स्मृता हरिणीति सा ॥ ३६ ॥
यदि प्राच्यो ह्रस्वस्तुलितकमले पञ्च गुरवस्
ततो वर्णाः पञ्च प्रकृतिसुकुमाराङ्गि लघवः ।
त्रयोऽन्ये चोपान्त्याः सुतनु जघने भोगसुभगे
रसैरीशैर्यस्यां भवति विरतिः सा शिखरिणी ॥ ३७॥
द्वितीयमलिकुन्तले गुरु षडष्टमद्वादशं
चतुर्दशमथ प्रिये गुरु गभीरनाभीह्रदे ।
सपञ्चदशमान्तिमं तदनु यत्र कान्ते यतिर्
गिरिस्फुरदणुभृत्कुलैर् भवति सुभ्रु पृथ्वीति सा ॥ ३८ ॥
चत्वारः प्राक् सुतनु गुरवो द्वौ दशैकादशौ चेन्
मुग्धे वर्णौ तदनु कुमुदामोदिनि द्वादशान्त्यौ ।
तद्वच्चान्त्यौ युगरसहयैर्यत्र कान्ते विरामो
मन्दाक्रान्तां प्रवरकवयस्तन्वि तां सङ्गिरन्ते ॥ ३९ ॥
आद्यं यत्र गुरुत्रयं प्रियतमे षष्ठं ततश्चाष्टमं
सन्त्येकादशतस्त्रयस्तदनु चेदष्टादशाद्यास्त्रयः ।

मार्तंडैर्मुनिभिश्च यैच विरतिः पूर्णेन्दुविम्बानने
तद्वृत्तं प्रवदन्ति काव्यरसिकाः शार्दूलविक्रीडितं ॥ ४० ॥
चत्वारो यत्र वर्णाः प्रथममल ?वः षष्ठकः सप्तमोऽपि
द्वौ तद्वत् षोडशाद्यौ मृगमदतिलके षोडशांत्यौ तथ।??ौ।
रम्भास्तम्भोरु कान्ते मुनिमुनिमुनिभि र्दृश्यते चेद्विरामो
बाले वंद्यैः कवीद्रैः सुतनु निगदिता स्रग्धरा सा प्रसिद्धा ॥
इति कालिदासविरचितः श्रुतबोधः सम्पूर्णः ॥ ४१ ॥

## शृंगारतीलकं ॥

बाहू द्वौ च ?णालमास्यकमलं लावन्यलीला जलं
श्रोणी तीर्थशिला च नेत्रसफरं धम्मिल्लशैवालकं ।
कान्तायास्तनचक्रवाकयुगलं कन्दर्पवाणानलैर्
दग्धानामवगाहनाय विधिना रम्यं सरो निर्म्मितं ॥१॥
अ याता मधुयामिनी यदि पुन र्नायात एव प्रभुः ।
प्राणा यान्तु विभावसौ यदि पुनर्जन्मपदं प्रार्थये
व्याधः कोकिलवन्धने विधुपरिध्वंसे च राहुग्रहः
कन्दर्पे हरनेत्रदीधितिरियं प्राणेश्वरे मन्मथः॥ २ ॥
इन्दीवरेण नयनं मुखमम्बुजेन
कुन्देन दन्तमधरं नवपल्लवेन ।
अङ्गानि चम्पकदलैः स विधाय धाता
कान्ते कथं घटितवानुपलेन चेतः ॥ ३ ॥

एकोऽपि खंजनवरो नलिनीदलस्थो
दृष्टः करोति चतुरङ्गबलाधिपत्यं।
किं मे करिष्यति भवद्वदनारविन्दे
जानामि नो नयनखंजनयुग्ममेतत्॥ ४॥
ये ये खंजनमेकमेव कमले पश्यन्ति दैवात् क्वचित्
ते सर्वे मनुजा भवन्ति सुतरां प्रख्यातभूमीभुजः।
त्वद्वक्राम्बुजनेत्रखंजनयुगं पश्यन्ति ये ये जनास्
ते ते मन्मथबाणजालविकला मुग्धे किमित्यद्भुतं। ॥५॥
झटिति प्रविश गेहं मा वहिस्तिष्ठ कान्ते
ग्रहणसमयवेला वर्तते शीतरश्मेः।
अयि सुविमलकान्तिं वीक्ष्य नूनं स राहु
ग्रसति तव मुखेन्दुं पूर्णचन्द्रं विहाय॥ ६॥
कस्तूरीवरपत्रभङ्गनिकरो भ्रष्टो न गण्डस्थले
नो लुप्तं सखि चन्दनं स्तनतटे धौतं न नेत्रां जनं।
रागो न स्खलितस्तवाधरपुटे ताम्बुलसंवर्द्धितः
किं रुष्टासि गजेन्द्रमन्दगमने किंवा शिशुस्ते पतिः ॥७॥
समायाते कान्ते कथमपि च कालेन वहुना
कथाभिर्देशानां सखि रजनिरर्द्धं गतवती।
ततो यावल्लीलाकलहकुपितास्मि प्रियतमे
सपत्नीव प्राची दिगियमभवत् तावदरुणा॥ ८॥

## मेघदूताख्यं ।

कश्चित् कान्ताविरहगुरुणा स्वाधिकारप्रमत्तः
शापेनास्तंगमितमहिमा वर्षभोग्येण भर्त्तुः ।
यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु
स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु ॥ १ ॥
तस्मिन्नद्रौ कतिचिदबलाविप्रयुक्तः स कामी
नीत्वा मासान् कनकवलयभ्रंशरिक्तप्रकोष्ठः ।
आषाढस्य प्रथमदिवसे मेघमाश्लिष्टसानुं
वप्रक्रीडापरिणतगजप्रेक्षणीयं ददर्श ॥ २ ॥
तस्य स्थित्वा कथमपि पुरः केतकाधानहेतो-
रन्तर्वाष्पश्चिरमनुचरो राजराजस्य दध्यौ ।
मेघालोके भवति सुखिनो ऽप्यन्यथावृत्ति चेतः
कंठाश्लेषप्रणयिनि जने किं पुनर्दूरसंस्थे ॥ ३ ॥
प्रत्यासन्ने नभसि दयिताजीवितालम्बनार्थी
जीमूतेन स्वकुशलमयीं हारयिष्यन् प्रवृत्तिं ।
स प्रत्यग्रैः कुटजकुसुमैः कल्पितार्घाय तस्मै
प्रीतः प्रीतिप्रमुखवचनं स्वागतं व्याजहार ॥ ४ ॥
धूमज्योतिःसलिलमरुतां सन्निपातः क्व मेघः
सन्देशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः ।
इत्यौत्सुक्यादपरिगणयन् गुह्यकस्तं ययाचे
कामार्त्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु ॥ ५ ॥

जातं वंशे भुवनविदिते पुष्करावर्त्तकानां
जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनः ।
तेनार्थित्वं त्वयि विधिवशाद् दूरबन्धुर्गतोऽहं
याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा ॥ ६ ॥
सन्तप्तानां त्वमसि शरणं तत् पयोद प्रियायाः
सन्देशं मे हर धनपतिक्रोधविश्लेषितस्य ।
गन्तव्या ते वसतिरलका नाम यक्षेश्वराणां
बाह्योद्यानस्थितहरशिरश्चन्द्रिकाधौतहर्म्या ॥ ७ ॥
त्वामारूढं पवनपदवीमुद्गृहीतालकान्ताः
प्रेक्षिष्यन्ते पथिकवनिताः प्रत्ययादाश्वसत्यः ।
कः सन्नद्धे विरहविधुरां त्वय्युपेक्षेत जायां
न स्यादन्यो ऽप्यहमिव जनो यः पराधीनवृत्तिः ॥ ८ ॥
मन्दं मन्दं नुदति पवनश्चानुकूलो यथा त्वां
वामश्चायं नदति मधुरं चातकस्ते सगर्वः ।
गर्भाधानक्षणपरिचयं नूनमाबद्धमालाः
सेविष्यन्ते नयनसुभगं खे भवन्तं बलाकाः ॥ ९ ॥
तांश्चावश्यं दिवसगणनातत्परामेकपत्नीम्
अव्यापन्नामविहतगतिर्द्रक्ष्यसि भ्रातृजायां ।
आशाबन्धः कुसुमसदृशं प्रायशो ह्यङ्गनानां
सद्यःपाति प्रणयि हृदयं विप्रयोगे रुणद्धि ॥ १० ॥
कर्त्तुं यच्च प्रभवति महीमुच्छिलीन्ध्रातपत्रां
तत् श्रुत्वा ते श्रवणसुभगं गर्ज्जितं मानसोत्काः ।

आ कैलासाद्विसाकिसलयच्छेदपाथेयवन्तः
सम्पत्स्यन्ते नभसि भवतो राजहंसाः सहायाः ॥ ११ ॥
आपृच्छस्व प्रियसखममुं तुङ्गमालिंग्य शैलं
वंद्यैः पुंसां रघुपतिपदैरंकितं मेखलासु ।
काले काले भवति भवतो यस्य संयोगमेत्य
स्नेहव्यक्तिश्चिरविरहजं मुञ्चतो वाष्पमुष्णं ॥ १२ ॥
मार्गं तावत् शृणु कथयतस्त्वत्प्रयाणानुरूपं
सन्देशं मे तदनु जलद श्रोष्यसि श्रोत्रपेयं ।
खिन्नः खिन्नः शिखरि षु पदं न्यस्य गन्तासि यत्र
क्षीणः क्षीणः प लघु पयः स्रोतसां चोपयुज्य ॥ १३ ॥
अद्रेः शृङ्गं हरति पवनः किंस्विदित्युन्मुखिभिर्
दृष्टोच्छ्रायश्चकितचकितं मुग्धसिद्धाङ्गनाभिः ।
स्थानादस्मात् सरसनिचुलादुत्पत दङ्मुखः खं
दिङ्नागानां पथि परिहरन् स्थूलहस्तावलेपान् ॥ १४ ॥
रत्नच्छायाव्यतिकरइव प्रेक्ष्यमेतत् पुरस्तात्
वल्मीकाग्रात प्रभवति धनुःखंडमाखंडलस्य ।
येन श्यामं बपुरतितरां का न्तिम ल च्यते ते
वर्हेणेव स्फुरितरुचिना गोपवेशस्य विष्णोः ॥ १५ ॥
त्वय्यायत्तं पफलमिति भ्रूविका नाभिज्ञैः
प्रीतिस्निग्धैर्जनप वधूलोचनैः पीयमानः ।
सद्यः सीरोत्कषणसुरभिक्षेत्रमारुह्य माणं
किञ्चित् पश्चात् व्रज लघुगतिः किञ्चिदेवोत्तरेण ॥ १६ ॥

अध्वक्लान्तं प्रतिमु वगतं सानुमांश्चित्रकूट
स्तुङ्गेन त्वां जलद् शिरसा वक्ष्यति श्लाघमानः ।
आसारेण त्वमपि शमयेस्तस्य नैदाघमग्निं
सद्भावार्द्रः फलति न चिरेणोपकारो महत्सु ॥ १७ ॥
त्वामासारप्रशमितवनोपप्लवं साधु मूर्ध्ना
वक्ष्यत्यध्वश्रमपरिगतं सानुमानाम्रकूटः ।
न क्षुद्रोऽपि प्रथमसुकृतापेक्षया संश्रयाय
प्राप्ते मित्रे भवति विमुखः किं पुनर्यस्तथोच्चैः ॥ १८ ॥
छन्नोपान्तः परिणतफलद्योतिभिः काननाम्रैस्
त्वय्यारूढे शिखरमचलः स्निग्धवेणीसवर्णे ।
नूनं यास्यत्यमरमिथुनप्रेक्षणीयामवस्थां
मध्ये श्यामः स्तनइव भुवः शेषविस्तारपाण्डुः ॥ १९ ॥
स्थित्वा तस्मिन् वनचरवधूभुक्तकुंजे मुहूर्त्तं
तोयोत्सर्गाद् द्रुततरगतिस्तत्परं वर्त्म तीर्णः ।
रेवां द्रक्ष्यस्युपलविषमे विंध्यपादे विशीर्णां
भक्तिच्छेदैरिव विरचितां भूतिमङ्गे गजस्य ॥ २० ॥
तस्यास्तिक्तैर्वनगजमदैर्वासितं वान्तवृष्टिर्
जम्बूकुञ्जप्रतिहतरयं तोयमादाय गच्छेः ।
अन्तःसारं घन तुलयितुं नानिलः शक्ष्यति त्वां
रिक्तः सर्वो भवति हि लघुः पूर्णता गौरवाय ॥ २१ ॥
नीपं दृष्ट्वा हरितकपिशं केशरैरर्द्धरूढैर्
आविर्भूतप्रथममुकुलाः कन्दलीश्चानुकच्छं ।

दग्ध्वारण्येष्वधिकसुरभिं गन्धमाघ्राय चोर्व्याः
सारङ्गास्ते जललवमुचः सूचयिष्यन्ति मार्गं ॥ २२ ॥
अम्भोविन्दुग्रहणरभसांश्चातकान् वीक्षमाणाः
श्रेणीभूताः परिगणनया निर्दिशन्तो बलाकाः ।
त्वामासाद्य स्तनितसमये मानयिष्यन्ति सिद्धाः
सोत्कम्पानि प्रियसहचरीसंभ्रमालिङ्गितानि ॥ २३ ॥
उत्पश्यामि द्रुतमपि सखे मत्प्रियार्थं यियासोः
कालक्षेपं ककुभसुरभौ पर्वते पर्वते ते ।
शुक्लापाङ्गैः सजलनयनैः स्वागतीकृत्य केकाः
प्रत्युद्यातः कथमपि भवान् गन्तुमाशु व्यवस्येत् ॥ २४ ॥
पाण्डुच्छायोपवनवृतयः केतकैः सूचिभिन्नैर्
नीडारम्भे गृहबलिभुजामाकुलग्रामचैत्याः ।
त्वय्यासन्ने फलपरिणतिश्यामजम्बूवनान्ताः
सम्पत्स्यन्ते कतिपयदिनस्थायिहंसा दशार्णाः ॥ २५ ॥
तेषां दिक्षु प्रथितविदिशालक्षणां राजधानीं
गत्वा सद्यः फलमविकलं कामुकत्वस्य लब्ध्वा ।
तीरोपान्तस्तनितसुभगं पास्यसि स्वादु युक्तं
सभ्रुभङ्गं मुखमिव पयो वेत्रवत्याश्चलोर्म्मि ॥ २६ ॥
नीचैराख्यं गिरिमधिवसेस्तत्र विश्रामहेतोस्
त्वत्सम्पर्कात् पुलकितमिव प्रौढपुष्पैः कदम्बैः ।
यः पण्यस्त्रीरतिपरिमलोद्गारिभिर्नागराणाम्
उद्दामानि प्रथयति शिलावेश्मभिर्यौवनानि ॥ २७ ॥

विश्रान्तः सन् व्रज नगनदीतीरजातानि सिञ्चन्
उद्यानानां नवजलकणैर्यूथिकाजालकानि ।
गण्डस्वेदापनयनरुजा क्लान्तकर्णोत्पलानां
छायादानक्षणपरिचितः पुष्पलावीमुखानां ॥ २८ ॥
वक्रः पन्था यदपि भवतः प्रस्थितस्योत्तराशां
सौधोत्सङ्गप्रणयविमुखो मा च भूरुज्जयिन्याः ।
विद्युद्दामस्फुरणचकितैस्तत्र पौराङ्गनानां
लोलापाङ्गैर्यदि न रमसे लोचनैर्वञ्चितोसि ॥ २९ ॥
वीचिक्षोभस्तनितविहगश्रेणिकाञ्चीगुणायाः
संसर्पन्त्याः स्खलितसुभगं दर्शितावर्त्तनाभेः ।
निर्विन्ध्यायाः पथि भवरसाभ्यन्तरं सन्निपत्य
स्त्रीणामाद्यं प्रणयवचनं विभ्रमो हि प्रियेषु ॥ ३० ॥
वेणीभूतप्रतनुसलिला तामतीतस्य सिन्धुः
पाण्डुच्छायातटरुहतरुभ्रंशिभिः शीर्णपर्णैः ।
सौभाग्यन्ते सुभग विरहावस्थया व्यञ्जयन्ती
कार्श्यं येन त्यजति विधिना स त्वयैवोपपाद्य ॥ ३१ ॥
प्राप्यावन्तीमुदयनकथाकोविदग्रामवृद्धां
पूर्वोद्दिष्टामनुसर पुरीं श्रीविशालां विशालां ।
स्वल्पीभूते सुचरितफले स्वर्गिणां गां गतानां
शेषैः पुण्यैर्हृतमिव दिवः कान्तिमत्खण्डमेकं ॥ ३२ ॥
दीर्घीकुर्वन् पटुमदकलं कूजितं सारसानां
प्रत्यूषेषु स्फुटितकमलामोदमैत्रीकषायः ।

तत्र स्त्रीणां हरति सुरतग्लानिम॰॰नुकूलः
सिप्रावातः प्रियतमइव प्रार्थनाचाटुकारः ॥ ३३ ॥
जालोद्गीर्णैरुपचितवपुः केशसंस्कारधूपैर्
बन्धुप्रीत्या भवनशिखिभिर्दत्तनृत्योपहारः ।
हर्म्येष्वस्याः कुसुमसुरभिष्वध्वखिन्नान्तरात्मा
त्यक्त्वा खेदं ललितवनितापादरागाङ्कितेषु ॥ ३४ ॥
भर्त्तुः कंठच्छविरितिगणैः सादरं वीक्ष्यमाणः
पुण्यं याया स्त्रिभुवनगुरो र्धाम च॰ण्डेश्वरस्य ।
धूतोद्यानं ॰वलयरजो गन्धिभिर्गन्धवत्या
स्तोयक्रीडावि॰तयुवतिस्ना॰॰ते॰ैर्मरुद्भिः ॥ ३५ ॥
अप्यन्यस्मिन् जलधर म॰॰कालमासाद्य काले
स्थातव्यं ते न॰न॰॰षयं यावदभ्येति भानुः ।
कुर्वन् सन्ध्यावलिपटहतां शूलिनः श्लाघनीया
मामन्द्राणां ॰॰॰लम॰॰कलं लप्स्यसे गर्ज्जितानां ॥ ३६ ॥
॰॰॰॰॰॰॰निततरसनास्तत्र लीलावधूतै
रत्नच्छायाखचितवलिभिश्चामरैः क्लान्तहस्ताः ।
वे॰॰॰॰॰॰॰॰ नखपदमुखान् प्राप्य वर्षाग्रविंदून्
आमोक्ष्यन्ति त्वयि मधुकरश्रेणिदीर्घान् कटाक्षान् ॥ ३७ ॥
पश्चादुच्चै र्भुजतरुवनं मण्डलेनाभिलीनः
सान्ध्यं तेजः प्रतिनवजवापुष्परक्तं दधानः ।
नृत्यारम्भे हर पशुपतेरार्द्रनागाजिनेच्छां
शान्तोद्वेगस्तिमितन॰नं दृष्टभक्तिर्भवान्या ॥ ३८ ॥

गच्छन्तीनां रमणवसतिं योषितां तत्र नक्तं
रुद्धालोके नरपतिपथे सूचिभेद्यैस्तमोभिः ।
सौदामिन्या कनकनिकषस्निग्धया दर्शयोर्वीं
तोयोत्सर्गस्तनितमुखरो मा च भूर्विक्लवास्ताः ॥ ३९ ॥
तां कस्याञ्चिद्भवनवडभौ सुप्तपारावतायां
नीत्वा रात्रिं चिरविलसनात् खिन्नविद्युत्कलत्रः ।
दृष्टे सूर्ये पुनरपि भवान् वाहयेदध्वशेषं
मन्दायन्ते न खलु सुहृदामभ्युपेतार्थकृत्याः ॥ ४० ॥
तस्मिन् काले नयनसलिलं योषितां खण्डितानां
शान्तिं नेयं प्रणयिभिरतो वर्त्म भानोस्त्यजाशु ।
प्रालेयास्रं कमलवदनात् सोऽपि हर्त्तुं नलिन्याः
प्रत्यावृत्तस्त्वयि कररुधि स्यादनल्पाभ्यसूयः ॥ ४१ ॥
गम्भीरायाः पयसि सरितश्चेतसीव प्रसन्ने
छायात्मापि प्रकृतिसुभगो लप्स्यते ते प्रवेशं ।
तस्मादस्याः कुमुदविशदान्यर्हसि त्वं न धैर्यान्
मोघीकर्त्तुं चटुलसफरोद्वर्त्तनप्रेक्षितानि ॥ ४२ ॥
तस्याः किञ्चित् करधृतमिव प्राप्तवानीरशाखं
हृत्वा नीलं सलिलवसनं मुक्तरोधोनितम्बं ।
प्रस्थानं ते कथमपि सखे लम्बमानस्य भावि
ज्ञातास्वादः पुलिनजघनां को विहातुं समर्थः ॥ ४३ ॥
त्वन्निष्यन्दोच्छ्वसितवसुधागन्धसम्पर्कपुण्यः
स्रोतोरन्ध्रध्वनितसुभगं दन्तिभिः पीयमानः ।

नीचैर्वास्यत्युपजिगमिषो देवपूर्वं गिरिन्ते
शीतो वायुः परिणमयिता काननोडुम्बराणां ॥ ४४ ॥
तत्र स्कन्दं नियतवसतिं पुष्पमेघीकृतात्मा
पुष्पासारैः स्नपयतु भवान् व्योमगङ्गाजलार्द्रैः ।
रक्षाहेतो र्नवशशिभृता वासवीनाञ्चमून म्
अत्यादित्यं हुतवहमुखे सम्भृतं तद्धि तेजः ॥ ४५ ॥
ज्योतिर्लेखावलयि गलितं यस्य वर्हं भवानी
पुत्रप्रेम्णा कुवलयदलप्रापि कर्णे करोति ।
धौतापाङ्गं हरशशिरुचा पावयेस्तं मयूरं
पश्चादद्रिग्रहणगुरुभि गर्ज्जितै र्नर्त्तयेथाः ॥ ४६ ॥
आराध्यैनं शरवनभवं देवमुल्लंघिताध्वा
सिद्धद्वन्द्वैर्जलकणभयाद्वीणिभिर्दत्तमार्गः ।
व्यालम्बेथाः सुरभितनयालम्भजां मानयिष्यन्
स्रोतोमूर्त्या भुवि परिणतां रन्तिदेवस्य कीर्त्तिं ॥ ४७ ॥
त्वय्यादातुं जलमवनते शार्ङ्गिणो वर्णचौरे
तस्याः सिन्धोः पृथुमपि तनुं दूरभावात्प्रवाहं ।
प्रेक्षिष्यन्ते गगनगतयो नूनमावर्ज्य दृष्टीर्
एकं मुक्तागुणमिव भुवः स्थूलमध्येन्द्रनीलं ॥ ४८ ॥
तामुत्तीर्य्य व्रज परिचितभ्रूलताविभ्रमाणां
पक्ष्मोत्क्षेपादुपरिविलसत्कृष्णसारप्रभाणां ।
कुन्दक्षेपानुगमधुकरश्रीयुषामात्मविम्बं
पात्री कुर्वन् दशपुरवधूनेत्रकौतूहलानां ॥ ४९ ॥

ब्रह्मावर्त्तं जनपदमधश्छायया गाहमानः
क्षेत्रं क्षत्रप्रधनपिशुनं कौरवं तद्भजेथाः ।
राजन्यानां शितशरशतैर्यत्र गाण्डीवधन्वा
धारापातैस्त्वमिव कमलान्यभ्यषिञ्चन्मुखानि ॥ ५० ॥
हित्वा हालामभिमतरसां रेवतीलोचनाङ्कां
बन्धुप्रीत्या समरविमुखो लाङ्गली याः सिषेवे ।
कृत्वा तासामभिगममपां सौम्य सारस्वतीनाम्
अन्तःशुद्धस्त्वमपि भविता वर्णमात्रेण कृष्णः ॥ ५१ ॥
तस्माद्गच्छेरनुकनखलं शैलराजावतीर्णां
जह्नोः कन्यां सगरतनयस्वर्गसोपानपंक्तिं ।
गौरीवक्त्रभ्रुकुटिरचनां या विहस्येव फेनैः
शम्भोः केशग्रहणमकरोदिन्दुलग्नोर्मिहस्ता ॥ ५२ ॥
तस्याः पातुं सुरगज इव व्योम्नि पूर्वार्द्धलम्बी
त्वं चेदच्छस्फटिकविशदं तर्कयेस्तिर्यगम्भः ।
संसर्पन्त्याः सपदि भवतः स्रोतसि च्छाययासौ
स्यादस्थानोपगतयमुनासङ्गमेनाभिरामा ॥ ५३ ॥
आसीनानां सुरभितशिलं नाभिगन्धैर्मृगाणां
तस्या एव प्रभवमचलं प्राप्य गौरं तुषारैः ।
वक्ष्यस्यध्वश्रमविनयने तस्य शृङ्गे निषण्णः
शोभां शुभ्रात्रिनयनवृषोत्खातपंकोपमेयां ॥ ५४ ॥
तं चेद्वायौ सरति सरलस्कन्धसंघट्टजन्मा
बाधेतोल्काक्षपितचमरीबालभारो दवाग्निः ।

अर्हस्येनं शमयितुमलं वारिधारासहस्रैर्
आपन्नार्त्तिप्रशमनफलाः सम्पदो ह्युत्तमानां ॥ ५५ ॥
ये त्वां मुक्तध्वनिमसहनाः स्वाङ्गभङ्गाय तस्मिन्
दर्पोत्सेकादुपरि शरभा लंघयेयुरलंघ्यं ।
तान् कुर्व्वीथास्तुमुलकरकावृष्टिहासावकीर्णान्
के वा न स्युः परिभवपदं निष्फलारम्भयत्नाः ॥ ५६ ॥
तत्र व्यक्तं दृशदि चरणन्यासमर्द्धेन्दुमौलेः
शश्वत्सिद्धैरुपचितवलिं भक्तिनम्रः परीयाः ।
यस्मिन् दृष्टे करणविगमादूर्द्धमुद्धूतपापाः
कल्पन्तेऽस्य स्थिरगणपदप्राप्तये श्रद्दधानाः ॥ ५७ ॥
शब्दायन्ते मधुरमनिलैः कीचकाः पूर्यमाणाः
संरक्ताभिस्त्रिपुरविजयो गीयते किन्नरीभिः ।
निर्ह्रादीचेन्मुरज इव ते कन्दरेषु ध्वनिः स्यात्
सङ्गीतार्थो ननु पशुपतेस्तत्र भावी समग्रः ॥ ५८ ॥
प्रालेयाद्रेरुपतटमतिक्रम्य तांस्तान्विशेषान्
हंसद्वारं भृगुपतियशो वर्त्म यत् क्रौञ्चरन्ध्रं ।
तेनोदीचीं दिशमनुसरेस्तिर्य्यगायामशोभी
श्यामः पादो बलिनियमनायोद्यतस्येव विष्णोः ॥ ५९ ॥
गत्वा चोर्द्धं दशमुखभुजोच्छ्वासितप्रस्थसन्धेः
कैलासस्य त्रिदशवनितादर्पणस्यातिथिःस्याः ।
शृङ्गोच्छ्रायैः कुमुदविशदै र्यो वितत्य स्थितः खं
राशीभूतः प्रतिदिशमिव त्र्यम्बकस्याट्टहासः ॥ ६० ॥

उत्पश्यामि त्वयि तटगते स्निग्धभिन्नाञ्जनाभे
सद्यः कृत्तद्विरददशनच्छेदगौरस्य तस्य ।
शोभामद्रेस्तिमितनयनप्रेक्षणीयां भवित्रीम्
अंशन्यस्ते सति हलभृतो मेचके वाससीव ॥ ६१ ॥
तस्मिन् हित्वा भुजगवलयं शम्भुना दत्तहस्ता
क्रीडाशैले यदि च विचरेत् पादचारेण गौरी ।
भङ्गी भक्त्या विरचितवपुस्तम्भितान्तर्जलौघः
सोपानत्वं व्रज पदसुखस्पर्शमारोहणेषु ॥ ६२ ॥
तत्रावश्यं वलयकुलिशोद्घट्टनोद्गीर्णतोयं
नेष्यन्ति त्वां सुरयुवतयो यन्त्रधारागृहत्वं ।
ताभ्यो मोक्ष्यस्तत्र यदि सखे घर्म्मलब्धस्य न स्यात्
क्रीडालोलाः श्रवणपरुषैर्गर्ज्जितैर्भाययेस्ताः ॥ ६३ ॥
हेमाम्भोजप्रसवि सलिलं मानसस्याददानः
कुर्वन् कामात् क्षणमुखपटप्रीतिमैरावतस्य ।
धुन्वन् वातैः सजलपृषतैः कल्पवृक्षांशुकानि
छायाभिन्नस्फटिकविशदं निर्विशेस्तं नगेन्द्रं ॥ ६४ ॥
तस्योत्सङ्गे प्रणयिन इव स्रस्तगङ्गादुकूलां
न त्वं दृष्ट्वा न पुनरलकां ज्ञास्यसे कामचारिन् ।
या वः काले वहति सलिलोद्गारमुच्चैर्विमानैर्
मुक्ताजालग्रथितमलकं कामिनीवाभ्रवृन्दं ॥ ६५ ॥
विद्युत्वन्तं ललितवनिताः सेन्द्रचापं सचित्राः
सङ्गीताय प्रहतमुरजाः स्निग्धगम्भीरघोषं ।

अन्तस्तोयं मणिमयभुव स्तुङ्गमभ्रंलिहाग्राः
प्रासादास्त्वां तुलयितुमलं यत्र तैस्तै र्विशेषैः ॥ ६६ ॥
हस्ते लीलाकमलमलकं बालकुन्दानुविद्धं
नीता लोध्रप्रसवरजसा पाण्डुतामाननश्रीः ।
चूडापाशे नवकुरुवकं चारुकर्णे शिरीषं
सीमन्तेऽपि त्वदुपगमजं यत्र नीपं वधूनां ॥ ६७ ॥
यस्यां यक्षाः सितमणिमयान्येत्य हर्म्यस्थलानि
ज्योतिश्छायाकुसुमरचनान्युत्तमस्त्रीसहायाः ।
आसेवन्ते मधुरतिरसं कल्पवृक्षप्रसूतं
त्वद्गम्भीरध्वनिषु शनकैः पुष्करेष्वाहतेषु ॥ ६८ ॥
गत्युत्कम्पादलकपतितै र्यत्र मन्दारपुष्पैः
कृत्तच्छेदैः कनककमलैः कर्णविभ्रंशिभिश्च ।
मुक्ताजालैः स्तनपरिसरच्छिन्नसूत्रैश्च हारैर्
नैशो मार्गः सवितुरुदये सूच्यते कामिनीनां ॥ ६९ ॥
नीवीबन्धोच्छ्वसितशिथिलं यत्र यक्षाङ्गनानां
वासः कामादनिभृतकरेष्वाक्षिपत्सु प्रियेषु ।
अर्चिस्तुङ्गानभिमुखगतान् प्राप्य रत्नप्रदीपान्
ह्रीमूढानां भवति विफला प्रेरणा चूर्णमुष्टिः ॥ ७० ॥
नेत्रानीताः सततगतिना ये विमानाग्रभूमीर्
आलेख्यानां सजलकणिकादोषमुत्पाद्य सद्यः ।
शंकास्पृष्टा इव जलमुचस्त्वादृशा यत्र जालैर्
धूमोद्गारानुकृतिनिपुणा जर्जरा निष्पतन्ति ॥ ७१ ॥

"यस्यां मत्तभ्रमरमुखराः पादपा नित्यपुष्पा
हंसश्रेणी रचितरसना नित्यपुष्पा नलिन्यः ।
केकोत्कण्ठा भवनशिखिनो नित्यभास्वत्कलापा
नित्यज्योत्स्ना प्रतिहततमोवृत्तिरम्याः प्रदोषाः" ॥ ७२ ॥
यत्र स्त्रीणां प्रियतमभुजोच्छ्वासितालिङ्गितानाम्
अङ्गग्लानिं सुरतजनितां तन्तुजालावलम्बाः ।
त्वत्संरोधापगमविशदैः प्रेरिताश्चन्द्रपादैर्
व्यालुम्पन्ति स्फुटजललवस्यन्दिनश्चन्द्रकान्ताः ॥ ७३ ॥
मत्वा देवं धनपतिसखं यत्र साक्षाद्वसन्तं
प्रायश्चापं न वहति भयान्मन्मथः षट्पदज्यं ।
सभ्रूभङ्गं प्रहितनयनैः कामिलक्ष्येष्वमोघैस्
तस्यारम्भश्चतुरवनिताविभ्रमैरेव सिद्धः ॥ ७४ ॥
तत्रागारं धनपतिगृहादुत्तरेणास्मदीयं
दूराल्लक्ष्यं सुरपतिधनुश्चारुणा तोरणेन ।
यस्योद्याने कृतकतनयः कान्तया वर्द्धितो मे
हस्तप्राप्यस्तवकनमितो बालमन्दारवृक्षः ॥ ७५ ॥
वापी चास्मिन्मरकतशिलाबद्धसोपानमार्गा
हैमैश्छन्ना कमलकुसुमैः स्निग्धवैदूर्य्यनालैः ।
यस्यास्तोये कृतवसतयो मानसं सन्निकृष्टं
न ध्यास्यन्ति व्यपगतशुचस्त्वामपि प्रेक्ष्य हंसाः ॥ ७६ ॥
तस्यास्तीरे रचितशिखरः पेशलैरिन्द्रनीलैः
क्रीडाशैलः कनककदलीवेष्टनप्रेक्षणीयः ।

मन्ये छिन्याः प्रियइति सखे चेतसा कातरेण
प्रेक्ष्योपान्तस्फुरिततडितं त्वां तमेव स्मरामि ॥ ७७ ॥
रक्ताशोकश्चलकिशलयः केशरस्तत्र कान्तः
प्रत्यासन्नः कुरुवकवृते माधवीमण्डपस्य ।
एकः सख्यास्तव सह मया वामपादाभिलाषी
कांक्षत्यन्यो वदनमदिरां दोहदच्छद्मनाऽस्याः ॥ ७८ ॥
तन्मध्ये च स्फटिकफलका काञ्चनी वासयष्टिर्
मूले बद्धा मणिभि नातिप्रौढवंशप्रकाशैः ।
तालैःसिञ्जद्वलयसुभगैर्नर्त्तितः कान्तया मे
यामध्यास्ते दिवसविगमे नीलकण्ठः सुहृद्वः ॥ ७९ ॥
एभिः साधो हृदयनिहितै र्लक्षणै र्लक्षयेथा
द्वारोपान्ते लिखितवपुषौ शंखपद्मौ च दृष्ट्वा ।
मन्दच्छायं भवनमधुना मद्वियोगेन नूनं
सूर्यापाये न खलु कमलं पुष्यति स्वामभिख्यां ॥ ८० ॥
गत्वा सद्यः कलभतनुतां तत्परिचाणहेतोः
क्रीडाशैले प्रथमकथिते रम्यसानौ निषस्सः ।
अर्हस्यन्तर्भवनपतितां कर्त्तुमल्पाल्पभासं
खद्योतालीविलसितनिभां विद्युदुन्मेषदृष्टिं ॥ ८१ ॥
तन्वी श्यामा शिखरदशना पक्वबिम्बाधरौष्ठी
मध्ये क्षामा चकितहरिणीप्रेक्षणा निम्ननाभिः ।
श्रोणीभारादलसगमना स्तोकनम्रा स्तनाभ्यां
या तत्र स्याद्युवतिविषये सृष्टिराद्यैव धातुः ॥ ८२ ॥

तां जानीयाः परिमितकथं जीवितं मे द्वितीयं
दूरीभूते मयि सहचरे चक्रवाकीमिवैकां ।
गाढोत्कण्ठां गुरुषु दिवसेषेषु गच्छत्सु बालां
जातां मन्ये शिशिरमथितां पद्मीनीं वान्यरूपां ॥ ८३ ॥
नूनं तस्याः प्रबलरुदितोच्छूनने चं प्रियाय
निश्वासानामशिशि तया भिन्नव राधरौष्ठं ।
हस्ते न्यस्तं मुखमसकलव्यक्तिलम्बालकत्वाद्
इन्दोर्दैन्यं त्वदनुसरणक्लिष्टकान्ते र्बिभर्त्ति ॥ ८४ ॥
आलोके ते निपतति पुरा सा वलिव्याकुला वा
मत्सादृश्यं विरहतनुताभावगम्यं लिखन्ती ।
पृच्छन्ती वा मधु वचनां सारिकां पञ्ज रस्थां
कच्चिद्भर्त्तुः स्मरसि निभृते त्वं हि तस्य प्रियेति ॥ ८५ ॥
उत्सङ्गे वा मलिनवसने सौम्य निक्षिप्य वीणां
मद्गोचाङ्कं विरचितपदं गेयमुद्गातुकामा ।
तन्त्रीरार्द्रां नयनसलिलैः सारयित्वा कथञ्चित्
भूयो भूयः स्वयमपि कृतां मूर्छनां विस्मरन्ती ॥ ८६ ॥
शेषान्मासान् गमनदिवसस्थापित स्यावधेर्वा
विन्यस्यन्ती भुवि गणनया देहलीमुक्तपुष्पैः ।
संयोगं वा हृदयनिहितारम्भमासादयन्ती
प्रायेणैते रमणविरहे ह्यङ्गनानां विनोदाः ॥ ८७ ॥
सव्यापारामहनि न तथा पीडयेन्मद्वियोगः
शङ्के रात्रौ गुरुतरशुचं निर्विनोदां सखीन्ते ।

मत्सन्देशैः सुखयितुमलं पश्य साध्वीं निशीथे
तामुन्निद्रामवनिशयनासन्नवातायनस्थः ॥ ८८ ॥
आधिक्षामां विरहशयने सन्निकीर्णैकपार्श्वां
प्राचीमूले तनुमिव कलामात्रशेषां हिमांशोः ।
नीता रात्रिः क्षणमिव मया सार्द्धमिच्छारतैर्या
तामेवोष्णैर्विरहजनितैरश्रुभिर्यापयन्तीं ॥ ८९ ॥
"स्निग्धाः सख्यः क्षणमपि दिवा तां न मोक्ष्यन्ती तन्वीं
एकप्रेक्ष्य भवति हि जगत्यङ्गनानां प्रवृत्तिः ।
स त्वं रात्रौ जलद शयनासन्नवातायनस्थः
कान्तां सुप्ते सति परिजने वीतनिद्रामुपेयाः" ॥ ९० ॥
निश्वासेनाधरकिसलयक्लेशिना विक्षिपन्तीं
शुद्धस्नानात् परुषमलकं नूनमागण्डलम्बं ।
मत्संयोगः कथमपि भवेत् स्वप्नजोऽपीति निद्राम्
आकांक्षन्तीं नयनसलिलोत्पीडरुद्धावकाशां ॥ ९१ ॥
आद्ये बद्धा विरहदिवसे या शिखादाम हित्वा
शापस्यान्ते विगलितशुचा सा मयोद्वेष्टनीया ।
स्पर्शक्लिष्टामयमितनखेनासकृत् सारयन्तीं
गण्डाभोगात् कठिनविषमामेकवेणीं करेण ॥ ९२ ॥
पादानिन्दोरमृतशिशिरान् जालमार्गप्रविष्टान्
पूर्वप्रीत्या गतमभिमुखं सन्निवृत्तं तथैव ।
चक्षुः खेदात् सलिलगुरुभिः पक्ष्मभिश्छादयन्तीं
साभ्रेऽह्नीव स्थलकमलिनीं न प्रबुद्धां न सुप्तां ॥ ९३ ॥

सा संन्यस्ताभरणमबला पेलवं धारयन्ती
शय्योत्सङ्गे निहितमसकृत् दुःखदुःखेन गात्रं ।
त्वामप्यश्रं नवजलमयं मोचयिष्यत्यवश्यं
प्रायः सर्व्वो भवति करुणावृत्तिरार्द्रान्तरात्मा ॥ ९४ ॥
जाने सख्यास्तव मयि मनः सम्भृतस्नेहमस्माद्
इत्थंभूतां प्रथमविरहे तामहं तर्कयामि ।
वाचालं मां न खलु सुभगंमन्यभावः करोति
प्रत्यक्षं ते निखिलमचिराद्भ्रातरुक्तं मया यत् ॥ ९५ ॥
रुद्धापाङ्गप्रसरमलकैरञ्जनस्नेहशून्यं
प्रत्यादेशादपि च मधुनो विस्मृतभ्रूविलासं ।
त्वय्यासन्ने नयनमुपरिस्पन्दि शङ्के मृगाक्ष्याः
मीनक्षोभाकुलकुवलयश्रीतुलामेष्यतीति ॥ ९६ ॥
वामश्चास्याः कररुहपदै र्मुच्यमानो मदीयैर्
मुक्ताजालं चिरपरिचितं त्याजितो दैवगत्या ।
सम्भोगान्ते मम समुचितो हस्तसम्वाहनानां
यास्यत्यूरुः कनककदलीस्तम्भगौरश्चलत्वं ॥ ९७ ॥
तस्मिन् काले जलद यदि सा लब्धनिद्रासुखा स्यात्
तच्चासीनः स्तनितविमुखो याममात्रं सहेथाः ।
मा भूदस्याः प्रणयिनि मयि स्वप्नलब्धे कथञ्चित्
सद्यः कण्ठच्युतभुजलता ग्रन्थिगाढोपगूढं ॥ ९८ ॥
तामुत्थाप्य स्वजलकणिकाशीतलेनानिलेन
प्रत्याश्वस्तां सममभिनवै र्जालकै र्मालतीनां ।

विद्युत्कम्पस्तिमितनयनां त्वत्सनाथे गवाक्षे
वक्तुं धीरस्तनितवचनै र्मानिनीं प्रक्रमेथाः ॥ ९९ ॥
भर्त्तुर्मित्रं प्रियमविधवे विद्धि मामम्बुवाहं
त्वत्सन्देशान्मनसि निहितादागतं त्वत्समीपं।
यो वृन्दानि त्वरयति पथि श्राम्यतां प्रोषितानां
मन्द्रस्निग्धै र्ध्वनिभिरबलावेणीमोक्षोत्सुकानि ॥ १०० ॥
इत्याख्याते पवनतनये मैथिलीवोन्मुखी सा
त्वामुत्कण्ठोच्छ्वसितहृदया वीक्ष्य सम्भाष्य चैवं।
श्रोष्यत्यस्मात् परमवहिता सौम्य सीमन्तिनीनां
कान्तोदन्तः सुहृदुपनतः संगमात् किञ्चिदूनः ॥ १०१ ॥
तामायुष्मन्मम च वचनादात्मनश्चोपकर्त्तुं
ब्रूया एवं तव सहचरो रामगिर्याश्रमस्थः।
अव्यापन्नः कुशलमबले पृच्छति त्वां वियुक्तां
भूतानां हि क्षयिषु करणेष्वाद्यमाश्वास्यमेतत् ॥ १०२ ॥
अङ्गेनाङ्गं सुतनु तनुना गाढतप्तेन तप्तं
साश्रेणाश्रुद्रुतमविरतोत्कण्ठमुत्कण्ठितेन।
दीर्घोच्छ्वासं समधिकतरोच्छ्वासिना दूरवर्त्ती
सङ्कल्पैस्ते विशति विधिना वैरिणा रुद्धमार्गः ॥ १०३ ॥
शब्दाख्येयं यदपि किल ते यः सखीनां पुरस्तात्
कर्णे लोलः कथयितुमभूदाननस्पर्शलोभात्।
सोऽतिक्रान्तः श्रवणविषयं लोचनाभ्यामदृश्यस्
त्वामुत्कण्ठाविरचितपदं मन्मुखेनेदमाह ॥ १०४ ॥

श्यामास्वङ्गं चकितहरिणीप्रेक्षिते दृष्टिपातान्
गण्डच्छायां शशिनि शिखिनां बर्हभावेषु केशान् ।
उत्पश्यामि प्रतनुषु नदीवीचिषु भ्रूविलासान्
हन्तैकस्थं क्वचिदपि न ते चण्डि साहश्यमास्ति ॥ १०५ ॥
धारासिक्तस्थलसुरभिणस्त्वन्मुखस्यास्य बाले
दूरीभूतं प्रतनुमपि मां पञ्चबाणः क्षिणोति ।
घर्म्मान्ते मे विगणय कथं वासराणि व्रजेयुः
दिक्संसक्तप्रविततघनव्यस्तसूर्यातपानि ॥ १०६ ॥
त्वामालिख्य प्रणयकुपितां धातुरागैः शिलायाम्
आत्मानन्ते चरणपतितं यावदिच्छामि कर्त्तुं ।
अस्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यते मे
क्रूरस्तस्मिन्नपि न सहते सङ्गमं नौ कृतान्तः ॥ १०७ ॥
मामाकाशप्रणिहितभुजं निर्दयाश्लेषहेतोर्
लब्धायास्ते कथमपि मया स्वप्नसन्दर्शनेषु ।
पश्यन्तीनां न खलु बहुशो न स्थली देवतानां
मुक्तास्थूलास्तरुकिसलयेष्वश्रुलेशाः पतन्ति ॥ १०८ ॥
भित्वा सद्यः किसलयपुटान् देवदारुद्रुमाणां
ये तत्क्षीरस्रुतिसुरभयो दक्षिणेन प्रवृत्ताः ।
आलिङ्ग्यन्ते गुणवति मया ते तुषाराद्रिवाताः
पूर्व्वं स्पृष्टं यदि किल भवेदङ्गमेभिस्तवेति ॥ १०९ ॥
संक्षिप्येत क्षणमिव कथं दीर्घयामा त्रियामा
सर्व्वावस्थास्वहरपि कथं मन्दमन्दातपं स्यात् ।

इत्थं चेतश्चटुलनयने दुर्लभप्रार्थनं मे
गाढोष्माभिः कृतमशरणं त्वद्वियोगव्यथाभिः ॥ ११० ॥
न त्वात्मानं बहु विगणयन्नात्मना नावलम्बे
तत्कल्याणि त्वमपि सुतरां मा गमः कातरत्वं ।
कस्यात्यन्तं सुखमुपगतं दुःखमेकान्ततो वा
नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण ॥ १११ ॥
शापान्तो मे भुजगशयनादुत्थिते शार्ङ्गपाणौ
मासानेतान् गमय चतुरो लोचने मीलयित्वा ।
पश्चादावां विरहगणितं तं तमात्माभिलाषं
निर्वेक्ष्यावः परिणतशरच्चन्द्रिकासु क्षपासु ॥ ११२ ॥
भूयश्चापि त्वमपि शयने कण्ठलग्ना पुरा मे
निद्रां गत्वा किमपि रुदती सत्वरं विप्रबुद्धा ।
सान्तर्हासं कथितमसकृत् पृच्छतश्च त्वया मे
दृष्टः स्वप्ने कितव रमयन् कामपि त्वं मयेति ॥ ११३ ॥
एतस्मान्मां कुशलिनमभिज्ञानदानाद्विदित्वा
मा कौलीनादसितनयने मय्यविश्वासिनी भूः ।
स्नेहानाहुः किमपि विरहव्यापदस्ते ह्यभोग्या
दृष्टे वस्तुन्युपचितरसाः प्रेमराशी भवन्ति ॥ ११४ ॥
कच्चित् सौम्य व्यवसितमिदं बन्धुकृत्यं त्वया मे
प्रत्यादेशान् न खलु भवतो धीरतां तर्कयामि ।
निःशब्दोऽपि प्रदिशसि जलं याचितश्चातकेभ्यः
प्रत्युक्तं हि प्रणयिषु सतामीप्सितार्थक्रियैव ॥ ११५ ॥

आश्वस्यैनां प्रथमविरहादुग्रशोकां सखीम्मे
शैलादस्मात् त्रिनयन[illegible]षोत्खातकूटान्निवृत्तः ।
साभिज्ञानप्रहितकुशलैस्तद्वचोभिर्ममापि
प्रातः[illegible]न्दप्रसवशिथिलं जीवितं धारयेथाः ॥ ११६ ॥
एतत् कृत्वा प्रियसमुचितं प्रार्थनं चेतसो मे
सौहार्द्दाद्वा विधुरइति वा मय्यनुक्रोशबुद्ध्या ।
इष्टान् देशान् विचर जलद प्रावृषा संभृतश्रीर्
मा भूदेवं क्षणमपि च ते विद्युता विप्रयोगः ॥ ११७ ॥
श्रुत्वा वार्त्तां [illegible]थितां तां धनेशोऽपि सद्यः
शापस्यान्ते सदयहृदयः संविधायास्तकोपः ।
संयोज्यैतौ वि[illegible]लितशुचौ दम्पती [illegible]ष्टचित्तौ
भोगानिष्टानविरतसुखं भोजयामास शश्वत् ॥ ११८ ॥

इति श्रीकालिदासकृतं मेघ[illegible]ताख्यं काव्यं
समाप्तं ।

## ऋतुसंहारे

### ग्रीष्मवर्णना ।

प्रचण्डसूर्यः स्पृहणीयचन्द्रमाः
सदावगाहक्षतवारिसंचयः ।
दिनान्तरम्योऽभ्युपशान्तमन्मथो
निदाघकालः समुपागतः प्रिये ॥ १ ॥
निशाः शशाङ्कक्षतनीलराजयः
क्वचिद्विचित्रं जलयन्त्रमन्दिरं ।
मणिप्रकाराः सरसञ्च चन्दनं
शुचौ प्रिये यान्ति जनस्य सेव्यतां ॥ २ ॥
सुवासितं हर्म्यतलं मनोरमं
प्रियामुखोच्छ्वासविकम्पितं मधु ।
सुतन्त्रिगीतं मदनस्य दीपनं
शुचौ निशीथेऽनुभवन्ति कामिनः ॥ ३ ॥
नितम्बबिम्बैः सुदुकूलमेखलैः
स्तनैः सहाराभरणैः सचन्दनैः ।
शिरोरुहैः स्नानकषायवासितैः
स्त्रियो निदाघं शमयन्ति कामिनां ॥ ४ ॥
नितान्तलाक्षारसरागलोहितैर्
नितम्बिनीनां चरणैः सनूपुरैः ।

पदे पदे हंसरुतानुकारिभिर्
जनस्य चित्तं क्रियते समन्मथं ॥ ५ ॥
पयोधराश्चन्दनपङ्कशीतलास्
तुषारगौरार्पितहारशेखराः ।
नितम्बदेशाश्च सहेममेखलाः
प्रकुर्वते कस्य मनो न सोत्सुकं ॥ ६ ॥
समुन्नतस्वेदचिताङ्गसन्धयो
विमुच्य वासांसि गुरूणि सांप्रतं ।
स्तनेषु तन्वंशुकमुन्नतस्तना
निवेशयन्ते प्रमदाः सयौवनाः ॥ ७ ॥
सचन्दनाम्बुव्यजनोद्भवानिलैः
सहारयष्टिस्तनमण्डलार्पणैः ।
सवल्लकीकाकलिगीतनिस्वनैः
प्रबुध्यते सुप्त इवाद्य मन्मथः ॥ ८ ॥
सितेषु हर्म्येषु निशासु योषितां
सुखप्रसुप्तानि मुखानि चन्द्रमाः ।
विलोक्य नियन्त्रणमुत्सुकश्चिरं
निशाक्षये याति ह्रियैव पाण्डुतां ॥ ९ ॥
असह्यवातोद्धतरेणुमण्डला
प्रचण्डसूर्यातपतापिता मही ।
न शक्यते द्रष्टुमपि प्रवासिभिः
प्रियावियोगानलदग्धमानसैः ॥ १० ॥

मृगाः प्रचण्डातपतापिता भृशं
तृषा महत्या परिशुष्कतालवः ।
वनान्तरे तोयमिति प्रधाविता
निरीक्ष्य भिन्नाञ्जनसन्निभं नभः ॥ ११ ॥
सविभ्रमैः सस्मितजिह्मवीक्षितैर्
विलासवत्यो मनसि प्रवासिनां ।
अनङ्गसन्दीपनमाशु कुर्वते
यथा प्रदोषाः शशिचारुभूषणाः ॥ १२ ॥
रवेर्मयूखैरभितापितो भृशं
विदह्यमानः पथि तप्तपांशुभिः ।
अवाङ्मुखो जिह्मगतिः श्वसन्मुहुः
फणी मयूरस्य तले निषिदति ॥ १३ ॥
तृषा महत्या हतविक्रमोद्यमः
श्वसन्मुहुर्भूरि विदारिताननः ।
न हन्त्यदूरेऽपि गजान्मृगाधिपो
विलोलजिह्वश्चलिताग्रकेशरः ॥ १४ ॥
विशुष्ककण्ठोद्गतशीकराम्भसो
गभस्तिभिर्भानुमतोऽभितापिताः ।
प्रवृद्धतृष्णोपहता जलार्थिनो
न दन्तिनः केशरिणोऽपि बिभ्यति ॥ १५ ॥
हुताग्निकल्पैः सवितुर्मरीचिभिः
कलापिनः क्लान्तशरीरचेतसः ।

न भोगिनं घ्नन्ति समीपवर्त्तिनं
कलापचक्रेषु निवेशिताननं ॥ १६ ॥
सुभद्रमुस्तं परिपाण्डुकर्द्दमं
सरः खनन्नायतपोत्रमण्डलैः ।
प्रदीप्तभासा रविणाभितापितो
वराहयूथो विशतीव भूतलं ॥ १७ ॥
विवस्वता तीक्ष्णतरांशुमालिना
सप ्तोयाल् सरसोऽभितापितः ।
उत्प्लुत्य भेकस्तृषितस्य भोगिनः
फणातपत्रस्य तले निषिदति ॥ १८ ॥
समुद्धृताशेषमृणालजालकं
विपन्नमीनं द्रुतभीतसारसं ।
परस्परोत्पीडनसंहतैर्गजैः
कृतं सरः सान्द्रविमर्द्दकर्द्दमं ॥ १९ ॥
रविप्रभो िन्नशि ामणिप्रभो
विलोलजिह्वाद्वयलीढमारुतः ।
विषाग्निसूर्यातपत पितः फणी
न हन्ति मण्डूककुलं तृषाकुलः ॥ २० ॥
सफेणलालावृतवक्त्रसंपुटं
विनिर्गतालोहितजिह्वमुन्मुखं ।
तृषाकुलं निःसृतमद्रिगह्वराद्
गवेषमाणं महिषीकुलं जलं ॥ २१ ॥

पटुतरवनदाहात् प्लुष्टशस्यप्ररोहाः
परुषपवनवेगात् क्षिप्तसंशुष्कपर्णाः ।
दिनकरपरितापात् क्षीणतोयाः समन्तात्
विदधति भयमुच्चैर्वीक्ष्यमाणा वनान्ताः ॥ २२ ॥
श्वसिति विहगवर्गः शीर्णपर्णद्रुमस्थः
कपिकुलमुपयाति क्लान्तमद्रेर्निकुञ्जं ।
भ्रमति गवययूथः सर्वतस्तोयमिच्छन्
शरभकुलमजिह्मं प्रोद्धरत्यम्बु कूपात् ॥ २३ ॥
विकचनवकुसुम्भस्वच्छसिन्दूरभासा
परुषपवनवेगोद्भूतवेगेन तूर्णं ।
तरुविटपलताग्रालिङ्गनव्याकुलेन
दिशि दिशि परिदग्धा भूमयः पावकेन ॥ २४ ॥
ध्वनति पवनविद्धः पर्वतानां दरीषु
स्फुटति पटुनिनादः शुष्कवंशस्थलीषु ।
प्रसरति तृणमध्ये लब्धवृद्धिः क्षणेन
ग्लपयति मृगयूथं प्रान्तलग्नो दवाग्निः ॥ २५ ॥
बहुतर इव जातः शाल्मलीनां वनेषु
स्फुटति कनकगौरः कोटरेषु द्रुमाणां ।
परिणतदलशाखादुत्पतत्याशु वृक्षात्
भ्रमति पवनधूतः सर्वतोऽग्निर्वनान्ते ॥ २६ ॥
गजगवयमृगेन्द्रा वह्निसन्तप्तदेहाः
सुहृद इव समेता द्वन्द्वभावं विहाय ।

हुतवहपरिखेदाद् आशु निर्गत्य कक्षाद्
विपुलपुलिनदेशान्निम्नगाम् आश्रयन्ते ॥ २७ ॥
कमलवनचिताम्बुः पाटलामोदरम्यः
सुखसलिलनिषेकः सेव्यचन्द्रांशुजालः ।
व्रजतु तव निदाघः कामिनीभिः समेतो
निशि सुललितगीतैर्हर्म्यपृष्ठे सुखेन ॥ २८ ॥

इति कालिदासकृते ऋतुसंहारे काव्ये
ग्रीष्मवर्णना समाप्ता ।

## वर्षावर्णना ।

ससीकराम्भोधरमत्तकुञ्जर-
स्तडित् पताको ऽशनिशब्दमर्द्दलः ।
समागतो राजवदुन्नतध्वनिर्
घनागमः कामिजनप्रियः प्रिये ॥ १ ॥
नितान्तनीलोत्पलपत्रकान्तिभिः
क्वचित् प्रभिन्नाञ्जनराशिसन्निभः ।
क्वचित् सगर्भप्रमदास्तनप्रभैः
समाचितं व्योम घनैः समन्ततः ॥ २ ॥
तृषाकुलैश्चातकपक्षिणां कुलैः
प्रयाचितास्तोयभरावलम्बिनः ।
प्रयान्ति मन्दं नववारिवर्षिणो
बलाहकाः श्रोत्रमनोहरस्वनाः ॥ ३ ॥

वलाहकाश्चाशनिशब्दभूषणाः
सुरेन्द्रचापं दधतस्तडिद्गुणं ।
सुतीक्ष्णधारापतनोग्रसायका
स्तुदन्ति चेतो ध्वनिभिः प्रवासिनां ॥ ४ ॥
प्रभिन्नवैदूर्यनिभैस्तृणाङ्कुरैः
समाचिता प्रोत्थितकन्दलीदलैः ।
विभाति शुक्लेतररत्नभूषिता
वराङ्गनेव क्षितिरिन्द्रगोपकैः ॥ ५ ॥
सदा मनोज्ञाम्बुदनादसोत्सुकं
विभाति विस्तीर्णकलापशोभितं ।
सविभ्रमालिङ्गनचुम्बनाकुलं
प्रवृत्तनृत्यं कुलमद्य वर्हिणां ॥ ६ ॥
विपाटयन्त्यः पतितस्तटद्रुमान्
प्रवृद्धवेगैः सलिलैरनिर्मलैः ।
स्त्रियः प्रकामा इव जातविभ्रमाः
प्रयान्ति नद्यस्त्वरितं पयोनिधिं ॥ ७ ॥
तृणोद्गमैरुद्गतकोमलाङ्कुरैर्-
चितानि नीलैर्हरिणीमुखक्षतैः ।
वनानि रम्यानि हरन्ति मानसं
विभूषितान्युद्गतपल्लवद्रुमैः ॥ ८ ॥
विलोलनेत्रोत्पलशोभिताननैर्
मृगैः समन्तादुपजातसाध्वसैः ।

समाचिता सैकतिनी वन स्थली
समुत्सुकत्वं प्रकरोति चेतसः ॥ ९ ॥
सुतीक्ष्णमुच्चैर्ध्वनतां पयोमुचां
घनान्धकारावृतशर्वरीष्वपि ।
तडित्प्रभादर्शितमार्गभूमयः
प्रयान्ति रागादभिसारिकाः स्त्रियः ॥ १० ॥
पयोधरै र्भीमगभीरनिस्वनैर्
ध्वनद्भिरुद्वेजितचेतसो भृशं ।
कृतापराधानपि योषितः प्रियान्
परिष्वजन्ते शयने निरन्तरं ॥ ११ ॥
विलोचनेन्दीवरवारिविन्दुभिर्
निषिक्तविम्बाधरचारुपल्लवाः ।
निरस्तमाल्याभरणानुलेपनाः
स्थिता निराशाः प्रमदाः प्रवासिनां ॥ १२ ॥
विपाण्डवं कीटरजस्तृणान्वितं
भुजङ्गवद्वक्रगतिप्रसर्पितं ।
ससाध्वसैर्भेककुलैर्विलोकितं
प्रयाति निम्नाभिमुखं नवोदकं ॥ १३ ॥
प्रफुल्लपत्रां नलिनीं समुत्सुका
विहाय भृङ्गाः श्रुतिहारि निस्वनाः ।
पतन्ति मूढाः शिखिनां प्रनृत्यतां
कलापचक्रेषु नवोत्पलाशया ॥ १४ ॥

वनद्विपानां नवतोयदस्वनैर्
मदान्वितानां स्वनतां मुहुर्मुहुः ।
कपोलदेशा विमलोत्पलप्रभाः
सभृङ्गयूथै र्मदवारिभिः श्रिताः ॥ १५ ॥
सतोयनम्राम्बुदचुम्बित पलाः
समाचिताः प्रस्रवणैः समन्ततः ।
प्रवृत्तनृत्यैः शिखिभिः समाकुलाः
समुत्सुकत्वं जनयन्ति भूधराः ॥ १६ ॥
कदम्बसर्जार्जुननीपकेतकीर्
विकम्पयंस्तत्कुसुमाधिवासितः ।
सशीक ।म्भोधरसङ्गशीतलः
समीरणः कं न करोति सोत्सुकं ॥ १७ ॥
शिरोरुहैः श्रोणि।तटावलम्बिभिः
कृतावतंसैः कुसुमैः सुगन्धिभिः ।
स्तनैः सुपीनैर्वदनैः सशीधुभिः
स्त्रियो रतिं सञ्जनयन्ति कामिनां ॥ १८ ॥
त।डन्ताः शक्रधनुर्विभूषिताः
पयोधरास्तोयभ ।वलम्बिनः ।
स्त्रियश्च काञ्चीमणिमेखलोज्ज्वला
हरन्ति चेतो युगपत् प्रवासिनां ॥ १९ ॥
मालाः कदम्बनवकेश केतकीभिर्
आयोजिताः शिर ि विभ्रति योषितोद्य ।

कर्णान्तरेषु ककुभद्रुममञ्ज रीभिः
श्रोत्रानुकूलरचितान्नवतंसकांश्च ॥ २० ॥

कालागुरुप्रचुरचन्दनचर्च्चिताङ्गाः
पुष्पावतंससुरभीकृतकेशपाशाः।
श्रुत्वा ध्वनिं जलमुचां त्वरितं प्रदोषे
शय्यागृहं गुरुगृहात् प्रविशन्ति नार्यः ॥ २१ ॥

कुवलयदलनीलैरुन्नतास्तोयनम्रैर्
मृदुपवनविधूतैर्मन्दमन्दं चलद्भिः।
अपहृतमिव चेतस्तोयदैः सेन्द्रचापैः
पथिकजनवधूनां तद्वियोगाकुलानां ॥ २२ ॥

मुदितइव कदम्बैर्जातपुष्पैः समन्तात्
पवनचलितशाखैः शाखिभिर्नृत्यतीव।
हसितमिव विधत्ते सूचिभिः केतकीनां
नवसलिलनिषेकाच्छिन्नतापो वनान्तः ॥ २३ ॥

शिरसि वकुलमालां मालतीभिः समेतां
विकसितवनपुष्पैर्यूथिकाकुट्मलैश्च।
विकचनवकदम्बैः कर्णपूरं वधूनां
रचयति जलदौघः कान्तवत् काल एषः ॥ २४ ॥

दधति कुचयुगाग्रैरुन्नतैर्हारयष्टिं
प्रतनुसितदुकूलान्यायतैः श्रोणिबिम्बैः।
नवजलकणसेकादुद्गतां रोमराजीं
त्रिवलिवलिविभागैर्मध्यदेशैश्च नार्यः ॥ २५ ॥

[illegible]काञ्चीततामादधानः
कुसुमभरनतानां न [illegible]कः पादपानां।
जनितसुरभिगन्धः केतकीनां रजोभिर्
अपहरति नभस्वान् प्रोषितानां मनांसि॥ २६॥
जलभरनमितानामाश्रयोऽस्माकमुच्चैर्
अयमिति जलसेकैस्तोयदास्तोयनम्राः।
[illegible]तिशयपरुषाभिर्ग्रीष्मवह्नेः शिखाभिः
समुपजनितत[illegible]पं ह्लादयन्तीव विन्ध्यं॥ २७॥
बहुगुण[illegible]मणीयो योषितां [illegible]चित्त[illegible]ारी
त[illegible]वान्धवो निर्विकारः।
जल[illegible]समय एष प्रा[illegible]नां प्राणहेतुर्
दिशतु तव [illegible]ता[illegible]न प्रायसो वांछितानि॥ २८॥

इति कालिदासकृतावृतुसंहारे वर्षावर्णना
समाप्ता।

शरद्वर्णना।

काशांशुकाविकचप[illegible]वक्त्रा
सोन्मादहंसरुतनूपुरनादरम्या।
आपक्वश[illegible]ललितातनुगात्रयष्टिः
प्राप्ता श[illegible]नवबधूरिवरम्यरूपा॥ १॥
काशैर्मही शिशिरदीधितिना रजन्यो
हंसैर्जलानि सरितां कुमुदैः सरांसि।

सप्तच्छदैः कुसुमभारनतैर्वनान्ताः
शुक्लीकृतान्युपवनानि च मालतीभिः ॥ २ ॥
चञ्चन्मनोज्ञशफरीरसनाकलापाः
पर्यन्तसंस्थितसिताण्डजपंक्तिहाराः ।
नद्यो विशालपुलिनोरुनितम्बविम्बा
मन्दं प्रयान्ति समदाः प्रमदा इवाद्य ॥ ३ ॥
व्योम क्वचिद्रजतशंखमृणालगौरैस्
त्यक्ताम्बुभिर्लघुतया शतशः प्रयातैः ।
उत्प्रेक्ष्यते पवनवेगचलैः पयोदै
राजेव चामरशतैरभिवीज्यमानः ॥ ४ ॥
भिन्नाञ्जनप्रचयकान्ति नभो मनोज्ञं
बन्धूकपुष्परजसारुणिता च भूमिः ।
वप्राश्च पक्वकलमावृतभूमिभागा
उत्कण्ठयन्ति न मनो भुवि कस्य यूनः ॥ ५ ॥
मन्दानिलाकुलितचारुविशालशाखः
पुष्पोद्गमप्रचयकोमलपल्लवाग्रः ।
मत्तद्विरेफपरिपीतमधुप्रसेकश्
चित्तं विदारयति कस्य न कोविदारः ॥ ६ ॥
तारागणप्रचुरभूषणमुद्वहन्ती
मेघोपरोधपरिमुक्तशशाङ्कवक्त्रा ।
ज्योत्स्नादुकूलममलं रजनी दधाना
वृद्धिं प्रयात्यनुदिनं प्रमदेव बाला ॥ ७ ॥

कारण्डवाननविघट्टितवीचिमालाः
कादम्बसारसकुलाकुलतीरदेशाः ।
कुर्वन्ति हंसविरुतैः परितो जनस्य
प्रीतिं सरोरुहरजोरुणितास्तु नद्यः ॥ ८ ॥
नेत्रोत्सवो हृदयहारिमरीचिमालः
प्रह्लादकः शिशिरशीकरवारिवर्षी ।
पत्युर्वियोगविषदिग्धशरक्षतानां
चन्द्रो दहत्यनुदिनं तनुमङ्गनानां ॥ ९ ॥
आकम्पयन् फलभरानतशालिजालान्
आनर्त्तयन् कुरुवकान् कुसुमावनम्रान् ।
प्रोत्फुल्लपङ्कजवनां नलीनिं विधुन्वन्
यूनां मनो मदयति प्रसभं नभस्वान् ॥ १० ॥
सोन्मादहंसमिथुनैरुपशोभितानि
स्वच्छानि फुल्लकमलोत्पलभूषितानि ।
मन्दप्रचारपवनोद्गतवीचिमालान्य्
उत्कण्ठयन्ति हृदयं सहसा सरांसि ॥ ११ ॥
नष्टं धनुर्बलभिदो जलदोदरेषु
सौदामिनी स्फुरति नाद्य वियत्पताका ।
धुन्वन्ति पक्षपवनैर्न नभोबलाकाः
पश्यन्ति नोन्नतमुखा गगणं मयूराः ॥ १२ ॥
नृत्यप्रयोगरहितान् शिखिनो विहाय
हंसानुपैति मदनो मधुरप्रगीतान् ।

त्यक्त्वा क[illegible]टजार्जुनसर्जनीपान्
सप्तच्छदानुपगता कुसुमोद्गमश्रीः ॥ १३ ॥
शेफालिकाकुसुमगन्धमनो[illegible]णि
स्वच्छ[illegible]लिनादितानि ।
पर्यन्तसंस्थितमृ[illegible]
प्रोत्कण्ठयन्त्युपवनानि मनांसि पुंसां ॥ १४ ॥
कह्लारपद्म[illegible]सुमानि मुहुर्विधुन्वन्
तत्सङ्गमादधिक[illegible]मुपेत्य ।
सोत्कां करोति वनितां पवनः प्रभाते
पत्रान्तलग्नतुहिनानि हरंस्तरूणां ॥ १५ ॥
सम्पन्नशालिनिचयावृतभूतलानि
सुस्थास्थितप्रचुरगो[illegible]लशोभितानि ।
हंसैश्च सारसकुलैः प्रतिनादितानि
सीमान्तराणि [illegible] जनप्रमोदं ॥ १६ ॥
हं[illegible] [illegible] गते [illegible]नानाम्
अम्भोरुहै विकसितै मुखच[illegible] कान्तिः ।
नीलोत्पलै[illegible]दचलानि विलोचनानि
भ्रूविभ्रमाश्च सरितां तनुभिस्तरङ्गैः ॥ १७ ॥
[illegible]यामा लताः कुसुमभारनतप्रवालाः
स्त्रीणां हरन्ति धृतभूषणबा[illegible]कान्तिं ।
दन्तावभासविशदस्मितवक्त्रकान्तिं
बन्धूकपुष्परचिता नवमालती च ॥ १८ ॥

केशान्नितान्तघननीलवि[illegible]ञ्चिताग्रान्
[illegible]न्ति वनिता नवमालतीभिः ।
कर्णेषु च प्रचलकाञ्चन[illegible]ण्डलेषु
नीलोत्पलानि विकचानि निवेशयन्ते ॥ १९ ॥
हारैः सचन्दनरसैः [illegible]नम[illegible]ण्डलानि
श्रोणीतटं सुविपुलं रसनाकलापैः ।
पादाम्बुजानि वरनूपुरशेखरैश्च
नार्यः प्र[illegible]ष्टमनसोऽद्य विभूषयन्ति ॥ २० ॥
स्फुटकुमुदचितानां राजहंसाश्रितानां
म[illegible]कतमणिभासा वारिणा भूषितानां ।
श्रियमतिशय[illegible]पां व्योमतोयाशयानां
वहति विगतमेघश्चन्द्रतारावकीर्णं ॥ २१ ॥
दिवसकरमयूखैर्बोध्यमानं प्रभाते
वरयुवतिमुखाभं पङ्कजं जृम्भतेऽद्य ।
कुमुदमपि गतेऽस्तं लीयते चन्द्रबिम्बे
[illegible]सितमिव वधूनां प्रोषितेषु प्रियेषु ॥ २२ ॥
शरदि कुमुदसङ्गाद्वायवो वान्ति शीता
विगतजलदवृन्दा दिग्विभागा मनोज्ञाः ।
[illegible]गतकलुषमम्भः शालिपक्वा धरित्री
विमलकिर[illegible]न्द्रं व्योम ताराविचित्रं ॥ २३ ॥
असितनयनल[illegible]ीं लक्षयित्वोत्पलेषु
क्वणितकनककाञ्चीं मत्तहंसस्वनेषु ।

अधररुचिरशोभां बन्धुजीवे प्रियायाः
पथिकजन इदानीं रोदिति भ्रान्तचित्तः ॥ २४ ॥
स्त्रीणां निधाय वदनेषु शशाङ्कलक्ष्मीं
हास्ये विशुद्धवदने कुमुदाकरश्रीं ।
बन्धूककान्तिमधरेषु मनोहरेषु
क्वापि प्रयाति सुभगा शरदागमश्रीः ॥ २५ ॥
विकचकमलवक्त्रा फुल्लनीलोत्पलाक्षी
कुसुमितनवकाशा व्या[illegible]लाम्बिवासा ।
कुमुदरुचिरहासा कामिनीवोन्मदेयं
उपदिशतु शरद्वश्चेतसः प्रीतिमग्रां ॥ २६ ॥

इति कालिदासकृतावृतुसंहारे शरद्वर्णना
समाप्ता ।

---

## हेमन्तवर्णना ।

नवप्रवालोद्गमपुष्परम्यः
प्रफुल्ललोध्रः परिपक्वशालिः ।
विलीनपद्मः प्रपतत्तुषारो
हेमन्तकालः समुपागतः प्रिये ॥ १ ॥
मनोहरैश्चन्दनरागगौरै
तुषारकुन्देन्दुनिभैश्च हारैः ।
विलासिनीनां स्तनशालिनीनां
नालंक्रियन्ते [illegible]नि ॥ २ ॥

न बाहुयुग्मेषु विलासिनीनां
प्रयान्ति सङ्गं वलयाङ्गदानि ।
नितम्बबिम्बेषु नवं दुकूलं
तन्वंशुकं पीनपयोधरेषु ॥ ३ ॥
काञ्चीगुणैः काञ्चन रत्नचित्रैर्
न भूषयन्ति प्रमदा नितम्बान् ।
न नूपुरैर्हंसरुतं भजद्भिः
पादाम्बुजान्यम्बुजकान्तिभाञ्जि ॥ ४ ॥
गात्राणि कालीयकचर्च्चितानि
सपत्रलेखानि मुखाम्बुजानि ।
शिरांसि कालागुरुधूपितानि
कुर्वन्ति नार्यः सुरतोत्सवाय ॥ ५ ॥
रतिश्रमक्षामविपाण्डुवक्त्राः
प्राप्तेऽपि हर्षाभ्युदये तरुण्यः ।
हसन्ति नोच्चैर्दशनाग्रभिन्नान्
प्रभिन्नरागानधरानवेक्ष्य ॥ ६ ॥
पीनस्तनोरःस्थलभागशोभाम्
आपद्य तत्पीडनजातखेदः ।
तृणाग्रलग्नैस्तुहिनैः पतद्भिर्
आक्रन्दतीवोषसि शीतकालः ॥ ७ ॥
प्रभूतशालिप्रसवैश्चितानि
मृगाङ्गनायूथविभूषितानि ।

मनोहरक्रौञ्चनिनादितानि
सीमान्तराण्युत्सुकयन्ति चेतः ॥ ८ ॥
प्रफुल्लनीलोत्पलशोभितानि
[illegible]विघट्टितानि ।
प्रसन्नतोयानि सशैवलानि
सरांसि चेतांसि हरन्ति यूनां ॥ ९ ॥
"मार्गं समीक्ष्यातिनिरस्तनीरं
प्रवासखिन्नं पतिमुद्वहन्त्यः ।
प्रवेक्ष्यमाणा हरिणेक्षणाक्ष्यः
प्रबोधयन्तीव मनोरथानि" ॥ १० ॥
पाकं व्रजन्ती हिमसङ्गशीतैर्
आधूयमाना सततं मरुद्भिः ।
प्रिये प्रियङ्गुप्रियविप्रयुक्ता
विपाण्डुतां याति विलासिनीव ॥ ११ ॥
पुष्पासवामोदसुगन्धिवक्त्रो
निःश्वासवातैः सुरभीकृतास्यः ।
परस्पराङ्गव्यतिसङ्गशायी
शेते जनः कामशरानुविद्धः ॥ १२ ॥
दन्तच्छदैर्दन्तविघातचिह्नैः
स्तनैश्च पाण्यग्रकृताभिलेखैः ।
संसूच्यते निर्दयमङ्गनानां
रतोपभोगो नवयौवनानां ॥ १३ ॥

काचिद्विभूषयति दर्पणसक्तहस्ता
बालातपेषु वनिता वदनारविन्दं ।
दन्तच्छदं प्रियतमेन निपीतसारं
दन्ताग्रभिन्नमपकृष्य निरीक्षते च ॥ १४ ॥
अन्याः प्रकामसुरतश्रमखिन्नदेहा
रात्रिप्रजागरविपाटलनेत्रपद्माः ।
शय्यान्तदेशलुलिताकुलकेशपाशाः
निद्रां प्रयान्ति मृदुसूर्यकराभितप्ताः ॥ १५ ॥
निर्माल्यदाम परिभुक्तमनोज्ञगन्धं
मूर्ध्नोपनीय घननीलशिरोरुहान्ताः ।
पीनोन्नतस्तनभरानतगात्रयष्ट्यः
कुर्वन्ति केशरचनामपरास्तरुण्यः ॥ १६ ॥
अन्या प्रियेण परिभुक्तमवेक्ष्य गात्रं
हर्षान्विता विरचिताधरगण्डशोभा ।
रक्तांशुकं परिदधाति नवं नताङ्गी
व्यालम्बिनी विलुलितालककुञ्चिताक्षी ॥ १७ ॥
अन्याश्चिरं सुरतकेलिपरिश्रमेण
खेदं गताः प्रशिथिलीकृतगात्रयष्ट्यः ।
संपीड्यमानविपुलोरुपयोधरार्त्ता
अभ्यञ्जनं विदधति प्रमदाः सुशोभाः ॥ १८ ॥
बहुगुणरमणीयो योषितां चित्तहारी
परिनतबहुशालिव्याकुलग्रामसीमः ।

विनिपतिततुषारः क्रौञ्चनादोपगीतः
प्रदिशतु हिमयुक्तः कालएष प्रियं वः ॥ १९ ॥

इति कालिदासकृतावृतुसंहारे
हेमन्तवर्णना समाप्ता ।

---

शिशिरवर्णना ।

प्ररूढशालीक्षुचयावृतक्षितिं
सुस्थस्थितक्रौञ्चनिनादशोभितं ।
प्रकामकामं प्रमदाजनप्रियं
वरोरु कालं शिशिराह्वयं शृणु ॥ १ ॥

निरुद्धवातायनमन्दिरोदरं
हुताशनो भानुमतो गभस्तयः ।
गुरूणि वासांस्यबलाः सयौवनाः
प्रयान्ति कालेऽत्र जनस्य सेव्यतां ॥ २ ॥

न चन्दनं चन्द्रमरीचिशीतलं
न हर्म्यपृष्ठं शरदिन्दुनिर्मलं ।
न वायवः सान्द्रतुषारशीतला
जनस्य चित्तं रमयन्ति साम्प्रतं ॥ ३ ॥

तुषारसंघातनिपातशीतलाः
शशाङ्कभाभिः शिशिरीकृताः पुनः ।
विपाण्डुतारागणचारुभूषणाः
जनस्य सेव्या न भवन्ति रात्रयः ॥ ४ ॥

गृहीततांबूलविलेपनस्रजः
पुष्पासवामोदितवक्त्रपङ्कजाः ।
प्रकामकालागुरुधूपवासितं
विशन्ति शय्यागृहमुत्सुकाः स्त्रियः ॥ ५ ॥
कृतापराधान् बहुशोऽभितर्जितान्
सवेपथून् साध्वसमन्दचेतसः ।
निरीक्ष्य भर्तॄन् सुरताभिलाषिणः
स्त्रियोऽपराधान् समदा विसस्मरुः ॥ ६ ॥
प्रकामकामैः युवभिः सुनिर्दयं
निशासु दीर्घास्वभिभाविताश्चिरं ।
धमन्ति मन्दं श्रमखेदितोरवः
क्षपावसाने नवयौवनाः स्त्रियः ॥ ७ ॥
पयोधरैः कुङ्कुमरागपिञ्जरैः
सुखोपसेव्यैर्नवयौवनोष्मवः ।
विलासिनीनां परिपीडितोरसः
स्वपन्ति शीतं परिभूय कामिनः ॥ ८ ॥
मनोज्ञकूर्पासकपीडितस्तनाः
स्वरागकौशेयविभूषितोरवः ।
निवेशितान्तःकुसुमैः शिरोरुहैर्
विभूषयन्तीव हिमागमं स्त्रियः ॥ ९ ॥
सुगन्धिनिःश्वासविकम्पितोत्पलं
मनोहरं [illegible]तिप्रबोधनं ।

निशासु हृष्टाः सह कामिभिः स्त्रियः
पिबन्ति मद्यं मदनीयमुत्तमं ॥ १० ॥
अपगतमदरागा योषिदेका प्रभाते
कृतविनत[illegible]ग्रा पत्युरालिङ्गनेन ।
प्रियतमपरिभुक्तं वीक्षमाणा स्वदेहं
व्रजति शयनवासाद्वासमन्यं [illegible]सन्ती ॥ ११ ॥
अगुरुसुरभिधूपा मोदितं केशपाशं
गलितकुसुममालं कुञ्चिताग्रं वहन्ती ।
त्यजति गुरुनितम्बा निम्नन[illegible]भिः सुमध्या
उषसि शयनवासं कामिनी कामशोभा ॥ १२ ॥
कनककमलकान्तैः सद्यएवाम्बुधौतैः
श्रवणतटनिषक्तैः प[illegible]न्तनेत्रैः ।
उषसि [illegible]म्बैरंशसंयुक्तकेशैः
श्रियइव गृहमध्ये संस्थिता योषितोऽद्य ॥ १३ ॥
[illegible]थुजघनभर[illegible]ताः किञ्चिदानम्रमध्याः
स्तनभरप[illegible]खे[illegible]न्मन्दमन्दं व्रजन्त्यः ।
सुरतशयनवेषं नैशमन्यत् प्रहाय
दधति [illegible]न्यं वेषमेतास्तरुण्यः ॥ १४ ॥
नखपदक्षतभङ्गान् वीक्षमाणाः स्तनान्तान्
अध किसलयाग्रं दन्तभिन्नं स्पृशन्त्यः ।
अभिमत[illegible]तवेशं नन्दयन्त्यस्तरुण्यः
सवितुरुदयकाले भूषयन्त्याननानि ॥ १५ ॥

प्रचुरगुडविकारस्वा - शालीक्षुरम्यः
प्रबलसुरतकेलिर्जातकन्दर्प - पः ।
प्रियजन हितानां चित्तसन्तापहेतुः
शिशिरसमय एष श्रेयसे वोऽस्तु नित्यं ॥ १६ ॥

इति कालिदासकृतावृतुसंहारे
शिशि वर्णना समाप्ता ।

वसन्तवर्णना ।

प्रफुल्लचूताङ्कुरती - शायका
द्विरे फमालाविलसद्धनुर्गुणः ।
मनांसि भेत्तुं सुरतप्रसा - ना
वसन्तयोधः समुपागतः प्रिये ॥ १ ॥
द्रुमाः सपुष्पाः सलिलं सपद्मं
स्त्रियः सकामाः पवनः सुगन्धिः ।
सुखाः प्रदोषा दिवसाश्च रम्याः
सर्वं प्रिये चारुतरं वसन्ते ॥ २ ॥
"ईषत्तुषारैः कृतशीतहर्म्यः
सुवासितं चारु शिरः सचम्पकैः ।
कुर्वन्ति नार्योऽपि वसन्तकाले
स्तनं सहारं कुसुमै र्मनोहरैः" ॥ ३ ॥
वापीजलानां म णिमेखलानां
शशाङ्कभासां प्रमदाजनानां ।

चूतद्रुमाणां कुसुमान्वितानां
ददाति सौरभ्यमयं वसन्तः ॥ ४ ॥
स्तनेषु हाराः सितचन्दनार्द्रा
भुजेषु कम्बूवलयाङ्गदानि ।
प्रयान्ति निःशङ्कमनङ्गसौख्यं
नितम्बिनीनां जघनेषु काञ्च्यः ॥ ५ ॥
कुसुम्भरागारुणितैर्दुकूलैर्
नितम्बविम्बानि विलासिनीनां ।
तन्वंशुकैः कुङ्कुमरागगौरैर्
अलं क्रियन्ते स्तनमण्डलानि ॥ ६ ॥
कर्णेषु योग्यं नवकर्णिकारं
स्तनेषु हारा अलकेष्वशोकः ।
शिखासु माला नवमल्लिकायाः
प्रयान्ति शोभां प्रमदाजनस्य ॥ ७ ॥
सपत्रलेखेषु विलासिनीनां
वक्त्रेषु हेमाम्बुरुहोपमेषु ।
स्तनान्तरे मौक्तिकसङ्गजातः
स्वेदोद्गमो विस्तरतामुपैति ॥ ८ ॥
उच्छ्वासयन्त्यः श्लथबन्धनानि
गात्राणि कन्दर्पसमाकुलानि ।
समीपवर्त्तिष्वपि कामुकेषु
समुत्सुका एव भवन्ति नार्यः ॥ ९ ॥

तनूनि पाण्डूनि म ालसानि
मुहुर्मुहुर्जृम्भनतत्पराणि ।
अङ्गान्यनङ्गः प्रमदाजनस्य
करोति लावण्यरसोत्सुकानि ॥ १० ॥
नेत्रेषु लोलो मदिरालसेषु
गण्डेषु पाण्डुः कठिनः स्तनेषु ।
मध्येषु नम्रो जघनेषु पीनः
स्त्रीणामनङ्गो बहुधा स्थितोऽद्य ॥ ११ ॥
अङ्गानि निद्रालसविह्वलानि
वाक्यानि किञ्चिन्मदिरालसानि ।
भ्रूक्षेपजिह्मानि च वीक्षितानि
चकार कामः प्रमदाजनानां ॥ १२ ॥
प्रियङ्गुकालीयककुङ्कुमानि
स्तनाङ्गरागेषु विसर्जितानि ।
आलिप्यते चन्दनमङ्गनाभिर्
मदालसाभिर्मृगनाभियुक्तं ॥ १३ ॥
गुरूणि वासांसि विहाय तूर्णं
तनूनि लाक्षारसरञ्जितानि ।
सुगन्धिकालागुरुधूपितानि
धत्ते जनः कामशरानुविद्धः ॥ १४ ॥
पुंस्कोकिलश्चूतरसेनमत्तः
प्रियामुखं चुम्बति सादरोयं ।

गुञ्जन् द्विरेफोऽप्ययमम्बुजस्थः
क्षिप्रं प्रियायाः प्रकरोति चाटुं ॥ १५ ॥
ताम्रप्रवालस्तवकावनम्राश्
चूतद्रुमाः पुष्पितचारुशाखाः ।
कुर्वन्ति कान्ते पवनावधूताः
समुत्सुकम्मानसमङ्गनानां ॥ १६ ॥
आमूलतो विद्रुमरागताम्राः
सपल्लवं पुष्पचयं दधानाः ।
कुर्वन्त्यशोका हृदयं सशोकं
निरीक्ष्यमाणा नवयौवनानां ॥ १७ ॥
मत्तद्विरेफपरिचुम्बितचारुपुष्पा
मन्दानिलाकुलितचारुमृदुप्रवालाः ।
कुर्वन्ति कामिमनसां सहसोत्सुकत्वं
बालातिमुक्तलतिकाः समवेक्ष्यमाणाः ॥ १८ ॥
कान्ताननद्युतिमुषामचिरोद्गतानां
शोभां परां कुरुवकद्रुममञ्जरीणां ।
दृष्ट्वा प्रिये हि पथिकस्य भवेन्नकस्य
कन्दर्पबाणनिकरैर्व्यथितं हि चेतः ॥ १९ ॥
आदीप्तवह्निसदृशैर्मरुतावधूतैः
सर्वत्र किंशुकवनैः कुसुमावनम्रैः ।
सद्यो वसन्तसमये समुपागते हि
रक्तांशुका नवबधूरिव भाति भूमिः ॥ २० ॥

किं किंशुकैः शुकमुखच्छविभि र्न दग्धं
किं कर्णिकारकुसुमै र्न हृतं मनोज्ञैः ।
यत्कोकिलाः पुनरमी मधुरैर्वचोभिर्
यूनां मनः सुवदने नियतं हरन्ति ॥ २१ ॥
पुंस्कोकिलैः फलरसैः समुपात्तहर्षैः
कूजद्भिरुन्मदकलानि वचांसि धीरं ।
लज्जान्वितं सविनयं हृदयं क्षणेन
पर्य्याकुलं कुलगृहेऽपि कृतं बधूनां ॥ २२ ॥
आकम्पयन् कुसुमिताः सहकारशाखा
विस्तारयन् परभृतस्य वचांसि दिक्षु ।
वायुर्विवाति हृदयानि हरन् बधूनां
नीहारपातविगमात् सुभगो वसन्ते ॥ २३ ॥
कुन्दैः सविभ्रमबधूहसितावदातैर्
उद्द्योतितान्युपवनानि मनोहराणि ।
चित्तं मुनेरपि हरन्ति निवृत्तरागं
प्रायेण रागचलितानि मनांसि पुंसां ॥ २४ ॥
प्रालम्बिहेमरसना स्तनसक्तहाराः
कन्दर्पदर्पशिथिलीकृतगात्रयष्ट्यः ।
मासे मधौ मधुरकोकिलभृङ्गनादै
रामा हरन्ति हृदयं प्रसभं नराणां ॥ २५ ॥
नानामनोज्ञकुसुमद्रुमभूषिताग्रान्
हृष्टान्यपुष्टनिनदाकुलसानुदेशान् ।

शैलेयजालपरिणद्धशिलागुहान्तान्
दृष्ट्वा जनः क्षितिभृतो मुदमेति सर्वः ॥ २६ ॥
नेत्रे निमीलयति रोदिति याति मोहं
घ्राणं करेण वि ·णद्धि विरौति चोच्चैः ।
कान्तावियोगपरिखेदितचित्त·ित्तर्
दृष्ट्वाध्वगः कुसुमित न् सहकारवृक्षान् ॥ २७ ॥
समदमधुकराणां कोकिलानाञ्च नादैः
कुसुमितसहकारैः कर्णिकारैश्च रम्यैः ।
इषुभिरिव सुतीक्ष्णै र्मानसं मानिनीनां
तुदति कुसुमवाणो मन्मथोद्दीपनाय ॥ २८ ॥
रुचिरकनककान्तीन् मुञ्चतः पुष्पराशीन्
मृदुपवनविधूतान् पुष्पितांश्चूतवृक्षान्
अभिमुखमभिवीक्ष्य क्षामदेहोऽपि मार्गे
मदनशरनिघातै र्मोहमेति प्रवासी ॥ २९ ॥
पर·तकलगात्रै र्ह्लादिभिः सहर्षांसि
स्मितदशनमयूखान् कुन्दपुष्पप्रभाभिः ।
क ।किसलयकान्तिं पल्लवैर्विद्रुमाभैर्
उपहसति वसन्तः क[illegible]नामि नीं ॥ ३० ॥
कनककमलक न्तै ाननः पाण्डुगण्डैर्
उपरिनिहितहारैश्चन्दनार्द्रै स्तनान्तैः ।
मदनजनिविलासै र्दृष्टिपातै र्मुनी[illegible]न्
स्तनभरनतनार्य्यः कामयन्ति प्रशान्तान् ॥ ३१ ॥

मधुसुरभिमुखाब्जं लोचने लोध्रताम्रे
नवकुरुवकपूर्णः केशपाशो मनोज्ञः ।
गुरुतरकुचयुग्मं श्रोणिबिम्बं तथैव
न भवति किमिदानीं योषितां मन्मथाय ॥ ३२ ॥
आकम्पितानि हृदयानि मनस्विनीनां
वातैः प्रफुल्लसहकारकृताधिवासैः ।
संबाधितं परभृतस्य मदाकुलस्य
श्रोत्रप्रियैर्मधुकरस्य च गीतनादैः ॥ ३३ ॥
रम्यः प्रदोषसमयः स्फुटचन्द्रभासः
पुंस्कोकिलस्य विरुतं पवनः सुगन्धिः ।
मत्तालियूथविरुतं निशि शीधुपानं
सर्वं रसायनमिदं कुसुमायुधस्य ॥ ३४ ॥
छायां जनो समभिवांछति पादपानां
नक्तं तथेच्छति पुनः किरणं सुधांशोः ।
हर्म्यं प्रयाति शयितुं सुखशीतलञ्च
कान्ताञ्च गाढमुपगूहति शीतलत्वात् ॥ ३५ ॥
मलयपवनविद्धः कोकिलेनाभिरम्यो
सुरभिमधुनिषेकाल्लब्धगन्धप्रबन्धः ।
विविधमधुपयूथैर्वेष्ट्यमानः समन्ताद्
भवतु तव वसन्तः श्रेष्टकालः सुखाय ॥ ३६ ॥

इति श्रीकालिदासकृतऋतुसंहारकाव्ये
वसन्तवर्णना समाप्ता ।

## गीतगोविन्दे

## सामोददामोदरः ।

### I.

मेघैर्मेदुरमम्बरं वनभुवः श्यामास्तमालद्रुमैर्
नक्तं भीरुरयं त्वमेव तदिमं राधे गृहं प्रापय ।
इत्थं नन्दनिदेशतश्चलितयोः प्रत्यध्वकुञ्जद्रुमं
राधामाधवयोर्जयन्ति यमुनाकूले रहः केलयः ॥ १ ॥

वाग्देवताचरितचित्रितचित्तसद्मा
पद्मावतीचरणचारणचक्रवर्त्ती ।
श्रीवासुदेवरतिकेलिकथासमेतम्
एतं करोति जयदेवकविः प्रबन्धं ॥ २ ॥

यदि हरिस्मरणे सरसं मनो
यदि विलासकलासु कुतूहलं ।
मधुरकोमलकान्तपदावलीं
शृणु तदा जयदेवसरस्वतीं ॥ ३ ॥

वाचः पल्लवयत्युमापतिधरः सन्दर्भशुद्धिङ्गिरां
जानीते जयदेवएव शरणः श्लाघ्यो दुरूहद्रुते ।
शृङ्गारोत्तरसत्प्रमेयरचनैर् आचार्यगोवर्द्धनः
स्पर्द्धी कोऽपि न विश्रुतः श्रुतिधरो धोयी कविक्ष्मापतिः ॥४॥

II.

मालवगौडरागेण रूपकतालेन गीयते ॥

प्रलयपयोधिजले धृतवानसि वेदं ।
विहितवहित्रचरित्रमखेदं ॥
केशव धृतमीनशरीर जय जगदीश हरे । ध्रुवं ॥ १ ॥
क्षितिरतिविपुलतरे तव तिष्ठति पृष्ठे ।
धरणिधरणकिणचक्रगरिष्ठे ॥
केशव धृतकच्छपरूप जय जगदीश हरे ॥ २ ॥
वसति दशनशिखरे धरणी तव लग्ना ।
शशिनि कलङ्ककलेव निमग्ना ॥
केशव धृतशूकररूप जय जगदीश हरे ॥ ३ ॥
तव करकमलवरे नखमद्भुतशृङ्गं ।
दलितहिरण्यकशिपुतनुभृङ्गं ॥
केशव धृतनरहरिरूप जय जगदीश हरे ॥ ४ ॥
छलयसि विक्रमणे बलिमद्भुतवामन ।
पदनखनीरजनितजनपावन ॥
केशव धृतवामनरूप जय जगदीश हरे ॥ ५ ॥
क्षत्रियरुधिरमये जगदपगतपापं ।
स्नपयसि पयसि शमितभवतापं ॥
केशव धृतभृगुपतिरूप जय जगदीश हरे ॥ ६ ॥
वितरसि दिक्षु रणे दिक्पतिकमनीयं ।
दशमुखमौलिबलिं रमणीयं ॥

केशव धृतरामशरीर जय जगदीश हरे॥७॥
वहसि वपुषि विशदे वसनं जलदाभं।
हलहतिभीतिमिलितयमुनाभं॥
केशव धृतहलधररूप जय जगदीश हरे॥८॥
निन्दसि यज्ञविधेरहह श्रुतिजातं।
सदयहृदय दर्शितपशुघातं॥
केशव धृतबुद्धशरीर जय जगदीश हरे॥९॥
म्लेच्छनिवहनिधने कलयसि करवालं।
धूमकेतुमिव किमपि करालं॥
केशव धृतकल्किशरीर जय जगदीश हरे॥१०॥
श्रीजयदेवकवेरिदमुदितमुदारं।
शृणु शुभदं सुखदं भवसारं॥
केशव धृतदशविधरूप जय जगदीश हरे॥११॥
वेदानुद्धरते जगन्निवहते भूगोलमुद्बिभ्रते
दैत्यन्दारयते बलिं छलयते क्षत्रक्षयं कुर्वते।
पौलस्त्यं जयते हलं कलयते कारुण्यमातन्वते
म्लेच्छान्मूर्च्छयते दशाकृतिकृते कृष्णाय तुभ्यन्नमः॥१२॥

III.

गुर्जरीरागनिःसारतालाभ्यां गीयते॥

श्रितकमलाकुचमण्डल धृतकुण्डल ए।
कलितललितवनमाल जय जय देव हरे। ध्रुं॥१॥
दिनमणिमण्डलमण्डन भवखण्डन ए।

मुनिजनमानसहंस जय जय देव हरे ॥ २ ॥
कालियविषधरगञ्जन जनरञ्जन ए ।
यदु ‍ ्लनलिनदिनेश जय जय देव हरे ॥ ३ ॥
मधुमुरन कविनाशन ग ड़ासन ए ।
सुर ्लकेलिनिदान जय जय देव हरे ॥ ४ ॥
अमलकमलदललोचन भवमोचन ए ।
त्रिभुवनभवननिधान जय जय देव हरे ॥ ५ ॥
जनकसुताक्वतभूषण जितदूषण ए ।
समरशमितदशकण्ठ जय जय देव हरे ॥ ६ ॥
अभिनवजलधरसुन्दर धृतमन्दर ए ।
श्रीमुखचन्द्रचकोर जय जय देव हरे ॥ ७ ॥
तव चरणे प्रणता वयमिति भावय ए ।
कुरु कुशलं प्रणतेषु जय जय देव हरे ॥ ८ ॥
श्रीजयदेवकवेरिदं कुरुते मुदम् ए ।
मङ्गलमुज्ज्वलगीति जय जय देव हरे ॥ ९ ॥
पद्मापयोधरतटीपरिरम्भलग्न
काश्मीरमुद्रितमुरो मधुसूदनस्य ।
व्यक्तानुरागमिव खेलदनङ्गखेद
स्वेदाम्बुपूरमनुपूरयतु प्रियं वः ॥ १० ॥

IV.

वसन्ते वासन्तीकुसुमसुकुमारैरवयवैर्
भ्रमन्ती कान्तारे बहुविहितकृष्णानुसरणां ।

अमन्दं कन्दर्पज्वरजनितचिन्ताकुलतया
वलद्बाधां राधां सरसमिदमूचे सहचरी ॥ १ ॥

वसन्तरागयतितालाभ्यां गीयते ॥

ललितलवङ्गलतापरिशीलनकोमलमलयसमीरे ।
मधुकरनिकरकरम्बितकोकिलकूजितकुञ्जकुटीरे ॥
विहरति हरिरिह सरसवसन्ते ।
नृत्यति युवतिजनेन समं सखि विरहिजनस्य
दुरन्ते ॥ ध्रुं ॥ २ ॥
उन्मदमदनमनोरथपथिकवधूजनजनितविलापे ।
अलिकुलसंकुलकुसुमसमूहनिराकुलबकुलकलापे ॥
विहरति० ॥ ३ ॥
मृगमदसौरभरभसवशंवदनवदलमालतमाले ।
युवजनहृदयविदारणमनसिजनखरुचिकिंशुकजाले ॥
विहरति० ॥ ४ ॥
मदनमहीपतिकनकदण्डरुचिकेशरकुसुमविकासे ।
मिलितशिलीमुखपाटलिपटलकृतस्मरतूणविलासे ॥
विहरति० ॥ ५ ॥
विगलितलज्जितजगदवलोकनतरुणकरुणकृतहासे ।
विरहिनिकृन्तनकुन्तमुखाकृतिकेतकिदन्तुरिताशे ॥
विहरति० ॥ ६ ॥
माधविकापरिमलललिते नवमालतिजातिसुगन्धौ ।
मुनिमनसामपि मोहनकारिणि तरुणाकारणबन्धौ ॥

विहरति० ॥ ७ ॥

स्फुरदतिमुक्तलतापरिरम्भणमुकुलितपुलकितचूते ।
वृन्दावनविपिने परिसरपरिगतयमुनाजलपूते ॥

विहरति० ॥ ८ ॥

श्रीजयदेवभणितमिदमुदयति हरिचरणस्मृतिसारं ।
सरसवसन्तसमयवनवर्णनमनुगतमदनविकारं ॥

विहरति० ॥ ९ ॥

दरविदलितमल्लीवल्लिचञ्चत्पराग
प्रकटितपटवासैर्वासयन् काननानि ।
इह हि दहति चेतः केतकीगन्धबन्धः
प्रसरदसमवाणप्राणवद्गन्धवाहः ॥ १० ॥

उन्मीलन्मधुगन्धलुब्धमधुपव्याधूतचूताङ्कुर
क्रीडत्कोकिलकाकलीकलकलैरुद्गीर्णकर्णज्वराः ।
नीयन्ते पथिकैः कथं कथमपि ध्यानावधानक्षण
प्राप्तप्राणसमासमागम सोल्लासैरमी वासराः ॥ ११ ॥

V.

अनेकनारीपरिरम्भसम्भ्रम
स्फुरन्मनोहारि विलासलालसं ।
मुरारिमारादुपदर्शयन्त्यसौ
सखी समक्षं पुनराह राधिकां ॥ १ ॥

॥ रामकिरीरागेण यतितालाभ्यां गीयते ॥

चन्दनचर्चितनीलकलेवरपीतवसनवनमाली ।

केलिचलन्मणिकुण्डलमण्डितगण्डयुगस्मितशाली ॥
हरिरिह मुग्धबधूनिकरे ।
विलासिनि विलसति केलिपरे ॥ ध्रुं ॥ २ ॥
पीनपयोधरभारभरेण हरिं परिरभ्य सरागं ।
गोपबधूरनुगायति काचिदुदञ्चितपञ्चमरागं ॥
हरिरिह० ॥ ३ ॥
कापि विलासविलोलविलोचनखेलनजनितमनोजं ।
ध्यायति मुग्धबधूरधिकं मधुसूदनवदनसरोजं ॥
हरिरिह० ॥ ४ ॥
कापि कपोलतले मिलिता लपितुं किमपि श्रुतिमूले ।
चारु चुचुम्ब नितम्बवती दयितं पुलकैरनुकूले ॥
हरिरिह० ॥ ५ ॥
केलिकलाकुतुकेन च काचिदमुं यमुनजलकूले ।
मञ्जुलवञ्जुलकुञ्जगतं विचकर्ष करेण दुकूले ॥
हरिरिह० ॥ ६ ॥
करतलतालतरलवलयावलिकलितकलस्वनवंशे ।
रासरसे सहनृत्यपरा हरिणा युवतिः प्रशशंसे ॥
हरिरिह० ॥ ७ ॥
श्लिष्यति कामपि चुम्बति कामपि कामपि रमयति रामां ।
पश्यति सस्मितचारुपरामपरामनुगच्छति बामां ॥
हरिरिह० ॥ ८ ॥
श्रीजयदेवभणितमिदमद्भुतकेशवकेलिरहस्यं ।

वृन्दावनविपिने ललितं वितनोतु शुभानि यशस्यं ॥
हरिरिह० ॥ ९ ॥

विश्वेषामनुरञ्जनेन जनयन्नानन्दमिन्दीवर
श्रेणीश्यामलकोमलैरुपनयन्नङ्गैरनङ्गोत्सवं ।
स्वच्छन्दं व्रजसुन्दरीभिरभितः प्रत्य.ङ्गमालिङ्गितः
शृङ्गारः सखि मूर्त्तिमानिव मधौ मुग्धोहरिः क्रीडति ॥१०॥
अद्योत्सङ्गवसद्भुजङ्गकवलक्लेशादिवेशाचलं
प्रालेयप्लवनेच्छयानुसरति श्रीखण्डशैलानिलः ।
किञ्च स्निग्धरसालमौलिमुकुलान्यालोक्य हर्षोदयाद्
उन्मीलन्ति कुहूः कुहूरितिकलोत्तालाः पिकानांगिरः ॥११॥
रासोल्लासभरेण विभ्रमभृतामाभीरवामभ्रुवाम्
अभ्यर्णे परिरभ्य निर्भरमुरः प्रेमान्धया राधया ।
साधु त्वद्वदनं सुधामयमिति व्याहृत्य गीतस्तुति
व्याजादुद्भटचुम्बितः स्मितमनोहारी हरिः पातु वः ॥१२॥

इति श्रीगीतगोविन्दे सामोददामोदरो नाम
प्रथमः सर्गः ॥ १ ॥

अक्लेशकेशवः ।

I.

विहरति वने राधा साधारणप्रणये हरौ
विगलितनिजोत्कर्षादीर्ष्यावशेन गतान्यतः ।
क्वचिदपि लताकुञ्जे गुञ्जन्मधुव्रतमण्डली

मुखरमधीरं त्यज मञ्जीरं रिपुमिव केलिसुलोलं। ... ॥

मुखरसंख्वरे लीना दीनाप्युवाच रहः सखीं ॥१॥

गुर्जरीरागेण यतितालेन च गीयते ॥

सञ्चरदधरसुधामधुरध्वनिमुखरितमोहनवंशं।
चलितदृगञ्चलचञ्चलमौलिकपोलविलोलवतंसं॥
रासे हरिमिह विहितविलासं।
स्मरति मनो मम कृतपरिहासं॥ ध्रुवं ॥२॥
चन्द्रकचारुमयूरशिखण्डकमण्डलवलयितकेशं।
प्रचुरपुरन्दरधनुरनुरञ्जितमेदुरमुदिरसुवेशं॥
रासे० ॥३॥
गोपकदम्बनितम्बवतीमुखचुम्बनलम्भितलोभं।
बन्धुजीवमधुराधरपल्लवमुल्लसितस्मितशोभं॥
रासे० ॥४॥
विपुलपुलकभुजपल्लववलयितबल्लवयुवतिसहस्रं।
करचरणोरसि मणिगणभूषणकिरणविभिन्नतमिस्रं॥
रासे० ॥५॥
जलदपटलचलदिन्दुविनिन्दकचन्दनतिलकललाटं।
पीनपयोधरपरिसरमर्दननिर्दयहृदयकपाटं॥
रासे० ॥६॥
मणिमयमकरमनोहरकुण्डलमण्डितगण्डमुदारं।
पीतवसनमनुगतमुनिमनुजसुरासुरवरपरिवारं॥
रासे० ॥७॥
विशदकदम्बतले मिलितं कलिकलुषभयं शमयन्तं।

मामपि किमपि तरङ्गदनङ्गदृशा मनसा रमयन्तं ॥
रासे० ॥ ८ ॥

श्रीजयदेवभणितमतिसुन्दरमोहनमधुरिपुरूपं ।
हरिचरणस्मरणं प्रति संप्रति पुण्यवतामनुरूपं ॥
रासे० ॥ ९ ॥

II.

गणयति गुणग्रामं भ्रामं भ्रमादपि नेहते
वहति च परितोषं दोषं विमुञ्चति दूरतः ।
युवतिषु वलत्तृष्णे कृष्णे विहारिणि मां विना
पुनरपि मनो वामं कामं करोति करोमि किं ॥ १ ॥

मालवगौडरागेण एकतालीतालेन च गीयते ॥

निभृतनिकुञ्जगृहं गतया निशि रहसि निलीय वसन्तं ।
चकितविलोकितसकलदिशा रतिरभसभरेण हसन्तं ॥
सखि हे केशिमथनमुदारं ।
रमय मया सह मदनमनोरथभावितया
सविकारं ॥ ध्रु ॥ २ ॥

प्रथमसमागमलज्जितया पटुचाटुशतैरनुकूलं ।
मृदुमधुरस्मितभाषितया शिथिलीकृतजघनदुकूलं ॥
सखि हे० ॥ ३ ॥

किशलयशयननिवेशितया चिरमुरसि ममैव शयानं ।
कृतपरिरम्भणचुम्बनया परिरभ्य कृताधरपानं ॥
सखि हे० ॥ ४ ॥

अलसनिमीलितलोचनया पुलकावलिललितकपोलं ।
श्रमजलसिक्तकलेवरया वरमदनमदादतिलोलं ॥
सखि हे० ॥ ५ ॥

कोकिलकलरवकूजितया जितमनसिजतन्त्रविचारं ।
श्लथकुसुमाकुलकुन्तलया नखलिखितघनस्तनभारं ॥
सखि हे० ॥ ६ ॥

चरणरणितमणिनूपुरया परिपूरितसुरतवितानं ।
मुखरविशृंखलमेखलया सकचग्रहचुम्बनदानं ॥
सखि हे० ॥ ७ ॥

रतिसुखसमयरसालसया दरमुकुलितनयनसरोजं ।
निःसहनिपतिततनुलतया मधुसूदनमुदितमनोजं ॥
सखि हे० ॥ ८ ॥

श्रीजयदेवभणितमिदमतिशयमधुरिपुनिधुवनशीलं ।
सुखमुत्कण्ठितगोपवधूकथितं वितनोतु सलीलं ॥
सखि हे० ॥ ९ ॥

हस्तस्रस्तविलासवंशमनृजुभ्रूवल्लिमद्बल्लवी
वृन्दोत्सारिदृगन्तवीक्षितमतिस्वेदार्द्रगण्डस्थलं ।
मामुद्वीक्ष्य विलक्षितस्मितसुधामुग्धाननं कानने
गोविन्दं व्रजसुन्दरीगणवृतं पश्यामि हृष्यामि च ॥ १० ॥

दुरालोकस्तोकस्तवकनवकाशोकलतिका
विकाशः कासारोपवनपवनोऽपि व्यथयति ।
अपि भ्राम्यद्भृङ्गीरणितरमणीया न मुकुल

प्रसूतिश्चूतानां सखि शिखरिणीयं सुखयति ॥११॥

साकूतस्मितमाकुला ःलगलद्धम्मिल्लमुल्लासित
भ्रूवल्लीकमलीक- र्शितभुजाबालार्द्धहस्तस्तनं ।
गोपीनां निभृतं निरीक्ष्य ःथिताकांक्षश्चिरं चिन्तयन्
अन्तर्मुग्धमनोहरो हरतु वः क्लेशं नवः केशवः ॥१२॥

इति श्री ीतगोविन्दे ऽक्लेशकेशवो नाम
द्वितीयः सर्गः ॥२॥

---

## मुग्धमधुसूदनः

कंसारिरपि संसा वासनाबन्धशृंखलां ।
राधामाधाय हृदये तत्य ज व्रजसुन्दरीः ॥१॥

इतस्ततस्तामनुसृत्य राधिकाम्
अनङ्गबाणव्रणखिन्नमानसः ।
कृतानुतापः स कलिन्दनन्दि-ी
तटान्तकुञ्जे निषसाद माधवः ॥२॥

गुर्जरीरागेण यतितालेन च गीयते ॥

मामियं चलिता विल क्य वृतं बधूनिचयेन ।
साप ।धतया मयापि न वा। तातिभयेन ॥
हरि हरि हता रतया गता सा कुपितेव । ध्रुं ॥३॥

कि क ष्यति किं वदिष्यति सा चिरं ।वहेण ।
किं धनेन जनेन किं मम जीवितेन गृहेण ॥
हरि हरि० ॥४॥

चिन्तयामि तदाननं कुटिलभ्रु कोपभरेण ।
शोणपद्ममिवोपरिभ्रमताकुलं भ्रमरेण ॥
हरि हरि० ॥ ५ ॥

तामहं हृदि सङ्गतामनिशं भृशं रमयामि ।
किं वनेऽनुसरामि तामिह किं वृथा विलयामि ॥
हरि हरि० ॥ ६ ॥

तन्वि खिन्नमसूयया हृदयं तव कलयामि ।
तन्न वेद्मि कुतो गतासि न तेन तेऽनुनयामि ॥
हरि हरि० ॥ ७ ॥

दृश्यसे पुरतो गतागतमेव मे विदधासि ।
किं पुरेव ससंभ्रमं परिरम्भणं न ददासि ॥
हरि हरि० ॥ ८ ॥

क्षम्यतामपरं कदापि तवेदृशं न करोमि ।
देहि सुन्दरि दर्शनं मम मन्मथेन दुनोमि ॥
हरि हरि० ॥ ९ ॥

वर्णितं जयदेवकेन हरेरिदं प्रवणेन ।
किन्दुविल्वसमुद्रसम्भवरोहिणीरमणेन ॥
हरि हरि० ॥ १० ॥

हृदि विपलताहारो नायं भुजङ्गमनायकः
कुवलयदलश्रेणी कण्ठे न सागरलद्युतिः ।
मलयजरजो नेदं भस्म प्रियारहिते मयि
प्रहर न हरभ्रान्त्यानङ्ग क्रुधा किमु धावसि ॥ ११ ॥

पाणौ मा कुरु चूतसायकममुं मा चापमारोपय
क्रीडानिर्जितविश्व मूर्छितजनाघातेन किं पौरुषं।
तस्या एव मृगीदृशो मनसिज प्रेंखत्कटाक्षाशुग
श्रेणीजर्जरितं मनागपि मनो नाद्यापि सन्धुक्षते॥१२॥
भ्रूपल्लवं धनु[illegible]तानि
बाणा गुणः श्रवणपालिरिति स्मरेण।
तस्यामन[illegible]मदेवतायाम्
अस्त्राणि निर्जितजग[illegible] किमर्पितानि॥१३॥
भ्रूचापे निहितः कटाक्षविशिखो निर्मातु मर्मव्यथां
[illegible]त्मा कुटिलः करोतु कवरीभारोऽपि मारोद्यमं।
मोहं त[illegible]दयञ्च तन्वि तनुतां बिम्बाधरो रागवान्
सद्वृत्तस्तनम[illegible]डलस्तव कथं प्राणैर्मम क्रीडति॥१४॥
तानि स्पर्शसुखानि ते च तरलाः स्निग्धा दृशो विभ्रमास्
तद्वक्त्राम्बुजसौरभं स च सुधास्यन्दी गिरां वक्रिमा।
सा बिम्बाधरमाधुरीति [illegible]ऽपि चेन्मानसं
तस्यां लग्नसमाधि हन्त विरहव्याधिः कथं वर्त्तते॥१५॥
तिर्यक्कण्ठविलोलमौलित[illegible]लोत्तंसस्य [illegible]रद्
गीत[illegible]नलक्षैर्न संलक्षिताः।
संमुग्धं मधुसूदनस्य मधुरे राधामुखेन्दौ मृदु
स्पन्दं [illegible] दधतु वः क्षेमं कटाक्षोर्मयः॥१६॥

इति श्रीगीतगोविन्दे मुग्धमधुसूदनो नाम
तृतीयः सर्गः॥३॥

स्निग्धमधुसूदनः ।

यमुनातीरवानीरनिकुञ्जे मन्दमास्थितं ।
प्राह प्रेमभरोद्भ्रान्तं माधवं राधिकासखी ॥ १ ॥

कर्णाटरागैकतालीतालाभ्यां गीयते ॥

निन्दति चन्दनमिन्दुकिरणमनुविन्दति खेदमधीरं ।
व्यालनिलयमिलनेन गरलमिव कलयति मलयसमीरं ॥
सा विरहे तव दीना ।
माधव मनसिजविशिखभयादिव भावनया त्वयि
लीना । ध्रुं ॥ २ ॥

अविरलनिपतितमदनशरादिव भवदवनाय विशालं ।
स्वहृदयमर्म्मणि वर्म करोति सजलनलिनीदलजालं ॥
सा विरहे० ॥ ३ ॥

कुसुमविशिखशरतल्पमनल्पविलासकलाकमनीयं ।
व्रतमिव तव परिरम्भसुखाय करोति कुसुमशयनीयं ॥
सा विरहे० ॥ ४ ॥

वहति च वलितविलोचनजलधरमाननकमलमुदारं ।
विधुमिव विकटविधुन्तुददन्तदलनगलितामृतधारं ॥
सा विरहे० ॥ ५ ॥

विलिखति रहसि कुरङ्गमदेन भवन्तमसमशरभूतं ।
प्रणमति मकरमधो विनिधाय करे च शरं नवचूतं ॥
सा विरहे० ॥ ६ ॥

प्रतिपदमिदमपि निगदति माधव तव चरणे पतिताहं ।

त्वयि विमुखे मयि सपदि सुधानिधिरपि तनुते तनुदाहं ॥
सा विरहे० ॥ ७ ॥

ध्यानलयेन पुरः परिकल्प्य भवन्तमतीव दुरापं ।
विलपति हसति विषीदति रोदिति चञ्चति मुञ्चति तापं ॥
सा विरहे० ॥ ८ ॥

श्रीजयदेवभणितमिदमधिकं यदि मनसा नटनीयं ।
हरिविरहाकुलबल्लवयुवतिसखीवचनं पठनीयं ॥
सा विरहे० ॥ ९ ॥

आवासो विपिनायते प्रियसखीमालापि जालायते ।
तापोऽपि श्वसितेन दावदहनज्वाला कलापायते ॥
सापि त्वद्विरहेन हन्त हरिणीरूपायते हा कथं ।
कन्दर्पोऽपि यमायते विरचयन् शार्दूलविक्रीडितं ॥ १० ॥

देशागरागैकतालीतालाभ्यां गीयते ॥

स्तनविनिहितमपि हारमुदारं ।
सा मनुते कृशतनुरिव भारं ॥
राधिका तव विरहे केशव । ध्रुं ॥ ११ ॥

सरसमसृणमपि मलयजपङ्कं ।
पश्यति विषमिव वपुषि सशङ्कं ॥ राधिका० ॥ १२ ॥

श्वसितपवनमनुपमपरिणाहं ।
मदनदहनमिव वहति सदाहं ॥ राधिका० ॥ १३ ॥

दिशि दिशि किरति सजलकणजालं ।
नयननलिनमिव विगलितनालं ॥ राधिका० ॥ १४ ॥

नयनविषयमपि किशलयतल्पं ।
गणयति विहितहुताशविकल्पं ॥ राधिका० ॥ १५ ॥
त्यजति न पाणितलेन कपोलं ।
ब लशशिनामेव सायमलीलं ॥ राधिका० ॥ १६ ॥
हरिरिति हरिरिति जपति सकामं ।
विरहविहितमर[illegible] निकामं ॥ राधिका० ॥ १७ ॥
श्रीजयदेवभणितमिति गीतं ।
सुखयतु केशवपदमुपनीतं ॥ राधिका० ॥ १८ ॥
सा रोमाञ्चति सीत्करोति विलपत्युत्कम्पते ताम्यति
ध्यायत्युद्भ्रमति प्रमीलति पतत्युद्याति मूर्च्छत्यपि ।
एतावत्यतनुज्वरे वरतनुर्जीवेन्न किं ते रसात्
स्वर्वै[illegible] [illegible]सि यदि त्यक्तोऽन्यथा हस्तकः ॥ १९ ॥
स्मरातुरां दैवतवैद्यहृद्य
त्वदङ्गसङ्गामृतमात्रसाध्यां ।
विमुक्तबाधां कुरुषे न राधाम्
उपेन्द्रवज्रादपि दारुणोऽसि ॥ २० ॥
कन्दर्पज्वरसंज्वरातुरतनोराश्चर्यमस्याश्चिरं
चेतश्चन्दनचन्द्रमःकमलिनी[illegible]सु संताम्यति ।
किन्तु क्षान्तिवशेन शीतलतनुं त्वामेकमेव प्रियं
ध्यायन्ती रहसि स्थिता कथमपि क्षीणा क्षणं प्राणिति ॥ २१ ॥
क्षणमपि विरहः पुरा न सेहे ।
नयननिमीलनखिन्नया यया ते ॥

श्वसिति कथमसौ रसालशाखां ।
चिरविरहेण विलोक्य पुष्पिताग्रां ॥ २२ ॥
दृष्टिव्याकुलगोकुलावनवशादुद्धृत्य गोवर्द्धनं
बिभ्रद्वल्लवबल्लभाभिरधिकानन्दाच्चिरं चुम्बितः ।
दर्प्पेणैव तदर्पिताधरतटीसिन्दूरमुद्राङ्कितो
बाहुर्गोपतनोस्तनोतु भवतां श्रेयांसि कंसद्विषः ॥ २३ ॥

इति श्रीगीतगोविन्दे स्निग्धमधुसूदनो नाम
चतुर्थः सर्गः ॥ ४ ॥

साकांक्षपुण्डरीकाक्षः ।

अहमिह निवसामि याहि राधां
अनुनय मद्वचनेन चानयेथाः ।
इति मधुरिपुणा सखी नियुक्ता
स्वयमिदमेत्य पुनर्जगाद राधां ॥ १ ॥

देशीवराडीरागेण रूपकतालेन गीयते ॥

वहतिमलयसमीरे मदनमुपनिधाय ।
स्फुटति कुसुमनिकरे विरहिहृदयदलनाय ॥
तव विरहे वनमाली. सखी सीदति । ध्रुं ॥ २ ॥
दहति शिशिरमयूखे मरणमनुकरोति ।
पतति मदनविशिखे विलपति विकलतरोऽति ॥
तव विरहे० ॥ ३ ॥
ध्वनति मधुपसमूहे श्रवणमपिदधाति ।

मनसि वलितविरहे निशि निशि रुजमुपयाति ॥
तव विरहे० ॥ ४ ॥
वसति विपिनविताने त्यजति ललितधाम ।
लुठति धरणिशयने बहु विलपति तव नाम ॥
तव विरहे० ॥ ५ ॥
भणति कविजयदेवे विरहविलसितेन ।
मनसि रभसविभवे हरिरुदयतु सुकृतेन ॥
तव विरहे० ॥ ६ ॥
पूर्वं यत्र समं त्वया रतिपतेरासादिताः सिद्धयस्
तस्मिन्नेव निकुञ्जमन्मथमहातीर्थे पुनर्माधवः ।
ध्यायं त्वामनिशं जपन्नपि तवैवालापमन्त्रावलीं
भूयस्त्वत्कुचकुम्भनिर्भरपरीरम्भामृतं वांछति ॥ ७ ॥

गुर्जरीरागेण एकतालीतालेन गीयते ॥

रतिसुखसारे गतमभिसारे मदनमनोहरवेशं ।
न कुरु नितम्बिनि गमनविलम्बनमनुसर तं हृदयेशं ॥
धीरसमीरे यमुनातीरे वसति वने वनमाली । ध्रु ॥ ८ ॥
नामसमेतं कृतसङ्केतं वादयते मृदु वेणुं ।
बहु मनते तनु ते तनुसङ्गतपवनचलितमपि रेणुं ॥
धीरसमीरे० ॥ ९ ॥
पतति पतत्रे विचलति पत्रे शङ्कितभवदुपयानं ।
रचयति शयनं सचकितनयनं पश्यति तव पन्थानं ॥
धीरसमीरे० ॥ १० ॥

मुखरमधीरं त्यज मञ्जीरं रिपुमिव केलिसुलोलं ।
चल सखि कुञ्जं सतिमि पुञ्जं शीलय नीलनिचोलं ॥
धीरसमी० ॥ ११ ॥

उरसि मुरारे रुपहितहारे घनइव तरलबलाके ।
तडिदिव पीते रतिविपरीते राजसि सुकृतविपाके ॥
धीरसमीरे० ॥ १२ ॥

विगलितवसनं परिहृतरसनं घटय जघनमपिधानं ।
किशलयशयने पङ्कजनयने निधिमिव हर्षनिधानं ॥
धीरसमी० ॥ १३ ॥

हरिरभिमानी रजनिरिदानी मियमपि याति विरामं ।
कुरु मम वचनं सत्वररचनं पूरय मधुरिपुकामं ॥
धीरसमीरे० ॥ १४ ॥

श्रीजयदेवे कृतहरिसेवे भणति परमरमणीयं ।
प्रमुदितहृदयं हरिमतिसदयं नमत सुकृतकमनीयं ॥
धीरसमीरे० ॥ १५ ॥

विकिरति मुहुः श्वासानाशाः पुरो मुहुरीक्षते
प्रविशति मुहु कुञ्जं गुञ्जन्मुहुर्बहु ताम्यति ।
रचयति मुहुः शय्यां पर्याकुलं मुहुरीक्षते
मदनकदनक्लान्तः कान्ते प्रियस्तव वर्त्तते ॥ १६ ॥

त्वद्वाम्येन समं समग्रमधुना तिग्मांशुरस्तं गतो
गोविन्दस्य मनो येन च समं प्राप्तं तमः सान्द्रतां ।
कोकानां करुणस्वनेन सदृशी दीर्घा मदभ्यर्थना

तन्मुग्धे विफलं । [illegible]मसौ रम्योऽभिसारक्षणः ॥ १७ ॥
आश्लेषादनु चुम्बनादनु नखोल्लेखा नु स्वान्तज
प्रोद्बोधादनु सम्भ्रमादनु रतारम्भादनु प्रीतयोः ।
अन्यार्थं गतयोर्भ्रमान्मिलितयोः सम्भाष[illegible]तोर्
दम्पत्योरिह को न को न तमसि व्रीडाविमिश्रो रसः ॥१८॥
सभयचकितं विन्यस्यन्तीं दृशौ तिमिरे पथि
प्र[illegible]तत[illegible] मुहुः स्थित्वा मन्दं पदानि [illegible]वत[illegible]तीं ।
कथमपि रहः प्राप्तामङ्गैरनङ्गतरङ्गिभिः
सुमुखि सुभगः पश्यन् स त्वामुपैतु कृतार्थां ॥ १९ ॥
राधामुग्धमुखारविन्दमधुपस्त्रैलोक्यमौलिस्थली
नेपथ्योचितन[illegible]ल[illegible]मवनीभारावतारान्तकः ।
स्वच्छन्दं व्रजसुन्दरीजनमनस्तो[illegible]श्चिरं
कंसध्वंसनधूमकेतुरवतु त्वां देवकीनन्दनः ॥ २० ॥

इति श्रीगीतगोवि[illegible]ऽभिसारिकावर्णने
साका[illegible]पुण्डरीकाक्षो नाम
पञ्चमः सर्गः ॥ ५ ॥

---

धृष्टवैकुण्ठः ।

अथ तां गन्तुमशक्तां चिरमनुरक्तां लतागृहे दृष्ट्वा ।
तच्चरितं गोविन्दे मनसिजमन्दे सखी प्राह ॥ १ ॥

गोण्ड[illegible]करी [illegible]रागेण रूपकतालेन गीयते ॥

पश्यति दिशि दिशि रहसि भवन्तं ।

तदधरमधुरमधूनि पिबन्तं ॥
नाथ हरे सीदति राधा वासगृहे ॥ ध्रुं ॥ २ ॥
त्वदभिसरणरभसेन वलन्ती ।
पतति पदानि कियन्ति चलन्ती ॥ नाथ हरे० ॥ ३ ॥
विहितविशदबिसकिसलयवलया ।
जीवति परमिह तव रतिकलया ॥ नाथ हरे० ॥ ४ ॥
मुहुरवलोकितमण्डललीला ।
मधुरिपुरहमिति भावनशीला ॥ नाथ हरे० ॥ ५ ॥
त्वरितमुपैति न कथमभिसारं ।
हरिरिति वदति सखीमनुवारं ॥ नाथ हरे० ॥ ६ ॥
श्लिष्यति चुम्बति जलधरकल्पं ।
हरिरुपगत इति तिमिरमनल्पं ॥ नाथ हरे० ॥ ७ ॥
भवति विलम्बिनि विगलितलज्जा ।
विलपति रोदिति वासकसज्जा ॥ नाथ हरे० ॥ ८ ॥
श्रीजयदेवकवेरिदमुदितं ।
रसिकजनं तनुत मतिमुदितं ॥ नाथ हरे० ॥ ९ ॥
विपुलपुलकपालिः स्फीतसीत्कारमन्तर्
जनितजडिम काकुव्याकुलं व्याहरन्ती ।
तव कितव विधायामन्दकन्दर्पचिन्तां
रसजलधिनिमग्ना ध्यानलग्ना मृगाक्षी ॥ १० ॥
अङ्गेष्वाभरणं करोति बहुशः पत्रेऽपि सञ्चारिणि
प्राप्तं त्वां परिशङ्कते वितनते शय्यां चिरं ध्यायति ।

इत्याकल्पविकल्पतल्परचनासङ्कल्पलीलाशत
व्यासक्तापि विना त्वया वरतनुर्नैषा निशां नेष्यति ॥११॥
किं विश्राम्यसि कृष्णभोगिभवने भाण्डीरभूमीरुहि
भ्रातर्याहि न दृष्टिगोचरमितः सानन्दनन्दास्पदं ।
राधाया वचनं तदध्वगमुखान्न-।।न्तिके गोपतो
गोविन्दस्य जयन्ति सायमतिथेः सुस्निग्धगर्भा गिरः ॥१२॥

इति श्रीगीतगोविन्दे वासकसज्जावर्णने धृष्टवैकुण्ठो नाम षष्ठः सर्गः ॥ ६ ॥

नागरनारायणः ।

अत्रान्तरे च कुलटाकुलवर्त्मपात
सञ्ज तपातक इव स्फुटलांछनश्रीः ।
वृन्दावनान्तरमदीपयदंशुजालैर्
दिक्सुन्दरीवदनचन्दनबिन्दुरिन्दुः ॥ १ ॥
प्रसरति शशधरबिम्बे विहितविलम्बे च माधवे विधुरा ।
वि चितविविधविलापं सा परितापं चकारोच्चैः ॥ २ ॥

मालवरागयतितालाभ्यां गीयते ॥

कथितसमयेऽपि हरिरहह न ययौ वनं ।
मम ि फलमिदममल रूपमपि यौवनं ॥
यामि हे कमिह शरणं ।
सखीजन चनवञ्चिता ॥ ध्रुं ॥ ३ ॥
यदनुगमनाय निशि गहनमपि शीलितं ।

तेन मम हृदयमिदमसमशरकीलितं ॥
यामि हे० ॥ ४ ॥

मम मरणमेव वरमतिवितथकेतना ।
किमिह विषहामि विरहानलमचेतना ॥
यामि हे० ॥ ५ ॥

मामहह विधुरयति मधुरमधुयामिनी ।
कापि हरिमनुभवति कृतसुकृतकामिनी ॥
यामि हे० ॥ ६ ॥

अहह कलयामि वलयादिमणिभूषणं ।
हरिविरहदहनवहनेन बहुदूषणं ॥
यामि हे० ॥ ७ ॥

कुसुमसुकुमारतनुमतनुशरलीलया ।
स्रगपि हृदि हन्ति मामतिविषमशीलया ॥
यामि हे० ॥ ८ ॥

अहमिह निवसामि नगणितवनवेतसा ।
स्मरति मधुसूदनो मामपि न चेतसा ॥
यामि हे० ॥ ९ ॥

हरिचरणशरणजयदेवकविभारती ।
वसतु हृदि युवतिरिव कोमलकलावती ॥
यामि हे० ॥ १० ॥

तत् किं कामपि कामिनीमभिसृतः किं वा कलाकेलिभिर्
बद्धो बन्धुभिरन्धकारिणि वनाभ्यर्णे किमुद्भ्राम्यति ।

कान्तः कान्तमना मनागपि पथि प्रस्थातुमेवाक्षमः
सङ्केतीकृतमञ्जुवञ्जुललता कुञ्जेऽपि यन्नागतः ॥ ११ ॥
अथागतां माधवमन्तरेण सखीमियं वीक्ष्य विषादमूकां ।
विशङ्कमाना रमितं कयापि जनार्दनं दृष्टवदेतदाह ॥१२॥

वसन्तरागयतितालाभ्यां गीयते ॥

स्मरसमरोचितविरचितवेशा ।
गलितकुसुमदरविलुलितकेशा ॥
कापि मधुरिपुणा ।
विलसति युवतिरधिकगुणा ॥ १३ ॥
हरिपरिरम्भणवलितविकारा ।
कुचकलशोपरितरलितहारा ॥ कापि० ॥ १४ ॥
विचलदलकललिताननचन्द्रा ।
तदधरपान भसङ्गततन्द्रा ॥ कापि० ॥ १५ ॥
चञ्चलकुण्डलदलितकपोला ।
मुखरितरसनजघनगतिलोला ॥ कापि० ॥ १६ ॥
दयितविलोकितलज्जितहसिता ।
बहुविधकूजितरतिरसरसिता ॥ कापि० ॥ १७ ॥
विपुलपुलकपृथुवेपथुभङ्गा ।
श्वसितनिमीलितविकसदनङ्गा ॥ कापि० ॥ १८ ॥
श्रमजलकणभरसुभगशरीरा ।
परिपतितोरसि रतिरणधीरा ॥ कापि० ॥ १९ ॥
श्रीजयदेवभणितहरिरमितं ।

कामकलुषं जनयतु परिश्रमितं ॥ कापि० ॥ २० ॥
विरहपाण्डुमुरारिमुखाम्बुज
द्युतिरयं तिरयन्नपि वेदनां ।
विधुरतीव तनोति मनोभुवः
सुहृदये हृदये मदनव्यथां ॥ २१ ॥

गुर्जरीरागैकतालीतालेन गीयते ॥

समुदितमदने रमणीवदने चुम्बनवलिताधरे ।
मृगमदतिलकं लिखति सपुलकं मृगमिव रजनीकरे ॥
रमते यमुनापुलिनवने ।
विजयी मुरारिरधुना ॥ ध्रुं ॥ २२ ॥
घनचयरुचिरे रचयति चिकुरे तरलिततरुणानने ।
कुरुवककुसुमं चपलासुषमं रतिपतिमृगकानने ॥
रमते० ॥ २३ ॥
घटयति सुघने कुचयुगगगने मृगमदरुचिरूषिते ।
मणिसरममलं तारकपटलं नखपदशशिभूषिते ॥
रमते० ॥ २४ ॥
जितविसशकले मृदुभुजयुगले करतलनलिनीदले ।
मरकतवलयं मधुकरनिचयं वितरति हिमशीतले ॥
रमते० ॥ २५ ॥
रतिगृहजघने विपुलापघने मनसिजकनकासने ।
मणिमयरसनं तोरणहसनं विकिरति कृतवासने ॥
रमते० ॥ २६ ॥

चरणकिशलये कमल[illegible]लये नखमणिगणपूजिते।
वहिरपवरणं यावकभरणं जनयति हृदि योजिते॥
रमते० ॥ २७ ॥

रमयतिसुदृशं कामपिसुभृशं [illegible]लधरसोदरे।
किमफलमवसं चिरमिह विरसं वद सखि विटपोदरे॥
रमते० ॥ २८ ॥

इह रसभणने कृतहरिगुणने मधुरिपुपदसेवके।
कलियुगचरितं न वसतु दुरितं कविन्टपजयदेवके॥
रमते० ॥ २९ ॥

नायातः सखि निर्दयो यदि शठस्त्वं दूति किं दूयसे
स्वच्छन्दं बहु वल्लभः स रमते किं तत्र ते दूषणं।
पश्याद्य प्रियस[illegible]माय दयितस्याकृष्यमाणं गुणैर्
उत्कण्ठार्तिभरादिव स्फुटदिदं चेतः स्वयं यास्यति॥ ३०॥

देशवराडीरागेण [illegible]पकतालेन गीयते॥

अ[illegible]नलतर[illegible]वलयनयनेन।
तपति न सा किशलयशयनेन॥
सखि या [illegible] वनमालिना ॥ ध्रुं ॥ ३१॥
विकासतस सिजललितमुखेन।
स्फुटति न सा मनसिजविशिखेन॥ सखि या० ॥ ३२॥
अमृतमधुरमृदु[illegible]वचनेन।
ज्वलति न सा मलयजपवनेन॥ सखि या० ॥ ३३॥
स्थलजलरुहरुचिकरचरणेन।

लुठति न सा हिमकरकिरणेन ॥ सखि या० ॥ ३४ ॥
सजलजलदसमुदयरुचिरेण ।
दलति न सा हृदि विरहभरेण ॥ सखि या० ॥ ३५ ॥
कनकनिकषरुचिशुचिवसनेन ।
श्वसिति न सा परिजनहसनेन ॥ सखि या० ॥ ३६ ॥
सकलभुवनजनवरतरुणेन ।
वहति न सा रुजमतिकरुणेन । सखि या० ॥ ३७ ॥
श्रीजयदेवभणितवचनेन ।
प्रविशतु हरिरपि हृदयमनेन ॥ सखि या० ॥ ३८ ॥
मनोभवानन्दन चन्दनानिल
प्रसीद रे दक्षिण मुञ्च वामतां ।
क्षणं जगत्प्राण विधाय माधवं
पुरो मम प्राणहरो भविष्यसि ॥ ३९ ॥
रिपुरिव सखीसंवासोऽयं शिखीव हिमानिलो
विषमिव सुधारश्मिर्यस्मिन् दुनोति मनो गते ।
हृदयमये तस्मिन्नेवं पुनर्वलते बलात्
कुवलयदृशां वामः कामो निकामनिरङ्कुशः ॥ ४० ॥
बाधां विधेहि मलयानिल पञ्चबाण
प्राणान् गृहाण न गृहं पुनराश्रयिष्ये ।
किं ते कृतान्तभगिनि क्षमया तरङ्गैर्
अङ्गानि सिञ्च मम शाम्यतु देहदाहः ॥ ४१ ॥
सान्द्रानन्दपुरन्दरादिदिविषद्वृन्दैरमन्दादराद्

आनम्रैर्मुकुटेन्द्रनीलमणिभिः सन्दर्शितेन्दीवरं।
स्वच्छन्दं मकरन्दसुन्दरगलन्मन्दाकिनीमेदुरं
श्रीगोविन्दपदारविन्दमशुभस्कन्दाय वन्दामहे ॥४२॥
इति श्रीगीतगोविन्दे विप्रलब्धावर्णने नागरनारायणो
नाम सप्तमः सर्गः ॥७॥

विलक्षलक्ष्मीपतिः।

अथ कथमपि यामिनीं विनीय
स्मरशरजर्जरितापि सा प्रभाते।
अनुनयवचनं वदन्तमग्रे
प्रणतमपि प्रियमाह साभ्यसूयं ॥१॥

भैरवीरागयतितालाभ्यां गीयते॥

रजनिजनितगुरुजागररागकषायितमलसनिमेषं।
वहति नयनमनुरागमिव स्फुटमुदितरसाभिनिवेशं॥
हरिहरि याहि माधव याहि केशव मा वद कैतववादं।
तामनुसर सरसीरुहलोचन या तव हरति विषादं ॥२॥
कज्जलमलिनविलोचनचुम्बनविरचितनीलिमरूपं।
दशनवसनमरुणं तव कृष्ण तनोति तनोरनुरूपं॥
हरिहरि याहि० ॥३॥
वपुरनुहरति तव स्मरसङ्गरखरनखरक्षतरेखं।
मरकतसकलकलितकलधौतलिपेरिव रतिजयलेखं॥
हरिहरि याहि० ॥४॥

चरणकमलगलदलक्तसिक्तमिदं तव हृदयमुदारं।
दर्शयतीव वहिर्मदनद्रुमनवकिशलयपरिवारं॥
हरिहरि याहि० ॥ ५ ॥

दशनपदं भवदधरगतं मम जनयति चेतसि खेदं।
कथयति कथमधुनापि मया सह तव वपुरेतदभेदं॥
हरिहरि याहि० ॥ ६ ॥

वहिरिव मलिनतरं तव कृष्ण मनोऽपि भविष्यति नूनं।
कथमथ वञ्चयसे जनमनुगतमसमशरज्वरदूनं॥
हरिहरि याहि० ॥ ७ ॥

भ्रमति भवानबलाकवलाय वनेषु किमत्र विचित्रं।
प्रथयति पूतनिकैव बधूबधनिर्दयबालचरित्रं॥
हरिहरि याहि० ॥ ८ ॥

श्रीजयदेवभणितरतिवञ्चितखण्डितयुवतिविलापं।
शृणुत सुधामधुरं विबुधा विबुधालयतोऽपि दुरापं॥
हरिहरि याहि० ॥ ९ ॥

तवेदं पश्यन्त्याः प्रसरदनुरागं वहिरिव
प्रियापादालक्तच्छुरितमरुणच्छायहृदयं।
ममाद्य प्रख्यातप्रणयभरभङ्गेन कितव
त्वदालोकः शोकादपि किमपि लज्जां जनयति ॥ १० ॥

प्रातर्नीलनिचोलमच्युतमुरः संवीतपीतांशुकं
राधायाश्चकितं विलोक्य हसति स्वैरं सखीमण्डले।
व्रीडाचञ्चलमञ्चलं नयनयोराधाय राधानने

स्मेरः स्मेरमुखोऽयमस्तु जगदानन्दाय नन्दात्मजः ॥ ११ ॥

इति श्रीगीतगोविन्दे खण्डितावर्णने विलक्ष्यलक्ष्मीपतिर्
नाम अष्टमः सर्गः ॥ ८ ॥

मुग्धमुकुन्दः ।

अथ तां मन्मथखिन्नां रतिरसभिन्नां विषादसम्पन्नां ।
अनुचिन्तितहरिचरितां कलहान्तरितामुवाच रहः
सखी ॥ १ ॥

रामकिरीरागयतितालाभ्यां गीयते ॥

हरिरभिसरति वहति मधुपवने ।
किमपरमधिकसुखं सखि भवने ॥
माधवे मा कुरु मानिनि मानमये । ध्रुं ॥ २ ॥
तालफलादपि गुरुमतिसरसं ।
किं विफलीकुरुषे कुचकलसं ॥ माधवे० ॥ ३ ॥
कति न कथितमिदमनुपदमचिरं ।
मा परिहर हरिमतिशयरुचिरं ॥ माधवे० ॥ ४ ॥
किमिति विषीदसि रोदिषि विकला ।
विहसति युवतिसभा तव सकला ॥ माधवे० ॥ ५ ॥
सजलनलिनिदलशीलितशयने ।
हरिमवलोकय सफलय नयने ॥ माधावे० ॥ ६ ॥
जनयसि मनसि किमिति गुरुखेदं ।
शृणु मम वचनमनीहितभेदं ॥ माधवे० ॥ ७ ॥

हरिरुपयातु वदतु बहुमधुरं ।
किमिति करोषि हृदयमतिविधुरं ॥ माधवे० ॥ ८ ॥
श्रीजयदेवभणितमतिललितं ।
सुखयतु रसिकजनं हरिचरितं ॥ माधवे० ॥ ९ ॥
स्निग्धे यत्परुषासि यत्प्रणमति स्तब्धासि यद्रागिणि
द्वेषस्थासि यदुन्मुखे विमुखतां यातासि तस्मिन् प्रिये ।
तद्युक्तं विपरीतकारिणि तव श्रीखण्डचर्चा विषं
शीतांशुस्तपनो हिमं हुतवहः क्रीडामुदो यातनाः ॥ १० ॥
अन्तर्मोहनमौलिघूर्णनचलन्मन्दारविस्रंसन
स्तब्धाकर्षणदृष्टिहर्षणमहामन्त्रः कुरङ्गीदृशां ।
दृप्यद्दानवदूयमानदिविषद्दुर्वारदुःखापदां
भ्रंशः कंसरिपोर्व्यपोहतु स वोऽश्रेयांसि वंशीरवः ॥ ११ ॥

इति श्रीगीतगोविन्दे कलहान्तरितावर्णने
मुग्धमुकुन्दो नाम नवमः सर्गः ॥ ९ ॥

## चतुरचतुर्भुजः ।

अत्रान्तरे मसृणरोषवशामसीम
निःश्वासनिःसहमुखीं सुमुखीमुपेत्य ।
सव्रीडमीक्षितसखीवदनां दिनान्ते
सानन्दगद्गदपदं हरिरित्युवाच ॥ १ ॥

देशवराडीरागाष्टतालाभ्यां गीयते ॥

वदसि यदि किञ्चिदपि दन्तरुचिकौमुदी

हरति दरतिमिरमतिघोरं ।
स्फुरदधरसीधवे तव वदनचन्द्रमा
रोचयति लोचनचकोरं ॥
प्रिये चारुशीले मुञ्च मयि मानमनिदानं ।
सपदि मदनानलो दहति मम मानसं
देहि मुखकमलमधुपानं । प्रि ॥ २ ॥
सत्यमेवासि यदि सुदति मयि कोपिनी
देहि खरनयनशरघातं ।
घटय भुजबन्धनं जनय रदखण्डनं
येन वा भवति सुखजातं । प्रिये० ॥ ३ ॥
त्वमसि मम भूषणं त्वमसि मम जीवनं
त्वमसि मम भवजलधिरत्नं ।
भवतु भवतीह मयि सततमनुरोधिनी
तत्र मम हृदयमतियत्नं ॥ प्रिये० ॥ ४ ॥
नीलनलिनाभमपि तन्वि तव लोचनं
धारयति कोकनदरूपं ।
कुसुमशरवाणभावेन यदि रञ्जयसि
कृष्णमिदमेतदनुरूपं ॥ प्रिये० ॥ ५ ॥
स्फुरतु कुचकुम्भयोरुपरि मणिमञ्जरी
रञ्जयतु तव हृदयदेशं ।
रसतु रसनापि तव घनजघनमण्डले
घोषयतु मन्मथनिदेशं ॥ प्रिये० ॥ ६ ॥

स्थलकमलगञ्जनं मम हृदयरञ्जनं
जनितरतिरङ्गपरभागं ।
भण मसृणवाणि करवाणि चरणद्वयं
सरसलसदलक्तकरागं ॥ प्रिये० ॥ ७ ॥
स्मरगरलखण्डनं मम शिरसि मण्डनं
देहि पदपल्लवमुदारं ।
ज्वलति मयि दारुणो मदनकदनानलो
हरतु तदुपाहितविकारं ॥ प्रिये० ॥ ८ ॥
इति चटुलचाटुपटुचारु मुरवैरिणो
राधिकामधि वचनजातं ।
जयति पद्मावतीरमणकविभारती
जयदेव भणितमतिशातं ॥ प्रिये० ॥ ९ ॥
परिहर कृतातङ्के शङ्कां त्वया सततं घन
स्तनजघनयाक्रान्ते स्वान्ते परानवकाशिनि ।
विशति वितनोरन्यो धन्यो न कोऽपि ममान्तरं
स्तनभरपरीरम्भारम्भे विधेहि विधेयतां ॥ १० ॥
मुग्धे विधेहि मयि निर्दयदन्तदंश
दोर्वल्लिबन्धनिविडस्तनपीडनानि ।
चण्डि त्वमेव मुदमञ्चय पञ्चबाण
चाण्डालकाण्डदलनादसवः प्रयान्ति ॥ ११ ॥
शशिमुखि तव भाति भङ्गुरभ्रू
युवजनमोहकरालकालसर्पः ।

तदुदितभयभञ्जनाय यूनां
त्वदधरसीधुसुधैव सिद्धमन्त्रः ॥ १२ ॥
व्यथयति वृथा मौनं तन्वि प्रपञ्चय पञ्चमं
तरुणि मधुरालापैस्तापं विनोदय दृष्टिभिः ।
सुमुखि विमुखीभावं तावद्विमुञ्च न मञ्च मां
स्वयमतिशयस्निग्धे मुग्धे प्रियोऽहमुपस्थितः ॥ १३ ॥
बन्धूकद्युतिबान्धवोऽयमधरः स्निग्धो मधूकच्छविर्
गण्डश्चण्डि चकास्ति नीलनलिनश्रीमोचनं लोचनं ।
नासाभ्येति तिलप्रसूनपदवीं कुन्दाभदन्ति प्रिये
प्रायस्त्वन्मुखसेवया विजयते विश्वं स पुष्पायुधः ॥ १४ ॥
दृशौ तव मदालसे वदनमिन्दुसन्दीपकं
गतिर्जनमनोरमा विजितरम्भमूरुद्वयं ।
रतिस्तव कलावती रुचिरचित्रलेखे भ्रुवाव्
अहो विबुधयौवतं वहसि तन्वि पृथ्वीगता ॥ १५ ॥
प्रीतिं वस्तनुतां हरिः कुवलयापीडेन सार्द्धं रणे
राधापीनपयोधरस्मरणकृत्कुम्भेन सम्भेदवान् ।
यत्र स्विद्यति मीलति क्षणमथ क्षिप्ते द्विपे तत्क्षणात्
कंसस्यालमभूज्जितं जितमिति व्यामोहकोलाहलः ॥ १६ ॥

इति श्रीगीतगोविन्दे मानिनीवर्णने चतुरचतुर्भुजो
नाम दशमः सर्गः ॥ १० ।

सानन्ददामोदरः ।

सुचिरमनुनयेन प्रीणयित्वा मृगाक्षीं
गतवती कृतवेशे केशवे कुञ्जशय्यां ।
रचितरुचिरभूषां दृष्टिमोषे प्रदोषे
स्फुरति निरवसादां कापि राधां जगाद ॥ १ ॥

वसन्तरागयतितालाभ्यां गीयते ॥

विरचितचाटुवचनरचनं चरणे रचितप्रणिपातं ।
संप्रति मञ्जुलवञ्जुलसीमनि केलिशयनमनुयातं ॥
मुग्धे मधुमथनमनुगतमनुसर राधिके । ध्रुं ॥ २ ॥
घनजघनस्तनभारभरे दरमन्थरचरणविहारं ।
मुखरितमणिमञ्जीरमुपैहि विधेहि मरालविकारं ॥
मुग्धे० ॥ ३ ॥
शृणु रमणीयतरं तरुणीजनमोहनमधुरिपुरावं ।
कुसुमशरासनशासनवन्दिनि पिकनिकरे भज भावं ॥
मुग्धे० ॥ ४ ॥
अनिलतरलकिसलयनिकरेण करेण लतानिकुरम्बं ।
प्रेरणमिव करभोरु करोति गतिं प्रतिमुञ्च विलम्बं ॥
मुग्धे० ॥ ५ ॥
स्फुरितमनङ्गतरङ्गवशादिव सूचितहरिपरिरम्भं ।
पृच्छ मनोहरहारविमलजलधारममुं कुचकुम्भं ॥
मुग्धे० ॥ ६ ॥
अधिगतमखिलसखीभिरिदं तव वपुरपि रतिरणसज्जं ।

चण्डि रणितरसनारवडिण्डिममभिसर सरसमलज्जं ॥
मुग्धे० ॥ ७ ॥

स्मरशरसुभगनखेन करेण सखीमवलम्ब्य सलीलं।
चलवलयक्वणितैरवबोधय हरिमपि निजगतिशीलं ॥
मुग्धे० ॥ ८ ॥

श्रीजयदेवभणितमधरीकृतहारमुदासितवामं ।
हरिविनिहितमनसामधितिष्ठतु कण्ठतटीमविरामं ॥
मुग्धे० ॥ ९ ॥

सा मां द्रक्ष्यति वक्ष्यति स्मरकथां प्रत्यङ्गमालिङ्गनैः
प्रीतिं यास्यति रंस्यते सखि समागत्येति चिन्ताकुलः ।
स त्वां पश्यति कम्पते पुलकयत्यानन्दति स्विद्यति
प्रत्युद्गच्छति मूर्छति स्थिरतमः पुञ्जे निकुञ्जे प्रियः ॥ १० ॥

अक्ष्णोर्निक्षिपदञ्जनं श्रवणयोस्तापिच्छगुच्छावलीं
मूर्ध्नि श्यामसरोजदाम कुचयोः कस्तूरिकापत्रकं ।
धूर्तानामभिसारसत्वरहृदां विश्वङ्निकुञ्जे सखि
ध्वान्तं नीलनिचोलचारु सुदृशां प्रत्यङ्गमालिङ्गति ॥ ११ ॥

काश्मीरगौरवपुषामभिसारिकाणां
आबद्धरेखमभितो रुचिमञ्जरीभिः ।
एतत्तमालदलनीलतमं तमिस्रं
तत्प्रेमहेमनिकषोपलतां तनोति ॥ १२ ॥

हारावलीतरलकाञ्चनकाञ्चिदाम
केयूरकङ्कणमणिद्युतिदीपितस्य ।

द्वारे निकुञ्जनिलयस्य हरिं निरीक्ष्य
व्री ।वतीमथ सखी निजगाद राधां ॥ १३ ॥

वराडीरागरूपकतालाभ्यां गीयते ॥

मञ्जुतरकुञ्जतलकेलिसदने ।
प्रविश राधे माध मीपमिह
 रतिरभसहासतव ने ॥ १४ ॥

नवभवदशोकदलशयनसारे ।
प्रविश राधे माधवसमीपमिह
विलस चकलसतरलहारे ॥ १५ ॥

कुसुमचयरचितशुचिवासगे ।
प्रविश राधे माधवसमीपमिह
विलस कुसुमसुकुमारदेहे ॥ १६ ॥

चलमलयवनपवनसुरभिशीते ।
प्रविश राधे माधवसमीपमिह
विलस रतिव लित लितग ते ॥ १७ ॥

 ततब वाल्लिनवपल्लवघने ।
प्रविश राधे माधवसमीपमिह
विलस चिरमलसपीनजघने ॥ १८ ॥

मधुमु तमधुप लकालितरावे ।
प्रविश राधे माधवसमीपमिह
विलस मदनरभसरसभावे ॥ १९ ॥

मधुतरलपिकनिकरनिन मुखरे ।

प्रविश राधे माधवसमीपमिह
विलस दशनरुचिरुचिरशिखरे ॥ २० ॥
विहितपद्मावतीसुखसमाजे ।
कुरु मुरारे मङ्गलशतानि
भणति जयदेवकविराजराजे ॥ २१ ॥
त्वां चित्तेन चिरं वहन्नयमिति श्रान्तो भृशं तापितः
कन्दर्पेण च पातुमिच्छति सुधा संबाधबिम्बाधरं ।
अस्याङ्कं तदलं कुरु क्षणमिह भ्रूक्षेपलक्ष्मीलव
क्रीते दासइवोपसेवितपदाम्भोजे कुतः सम्भ्रमः ॥ २२ ॥
सा ससाध्वसमानन्दं गोविन्दे लोललोचना ।
सिञ्जाना मञ्जु मञ्जीरं प्रविवेश निवेशनं ॥ २३ ॥

वराडीरागयतितालाभ्यां गीयते ॥

राधावदनविलोकनविकासितविविधविकारविभङ्गं ।
जलनिधिमिव विधुमण्डलदर्शनतरलिततुङ्गतरङ्गं ॥
हरिमेकरसं [illegible]विलासं ।
सा ददर्श गुरुहर्षवशम्वदवदनमनङ्गविकाशं । ध्रुं ॥ २४ ॥
हारममलतरतारमुरसि दधतं परि[illegible] विदूरं ।
स्फुटतरफेनकदम्बकरम्बितमिव यमुनाजलपूरं ॥
हरिमेकरसं० ॥ २५ ॥
श्यामलमृदुलकलेवरमण्डलमधिगतगौरदुकूलं ।
नीलनलिनमिव पीतपरागपटलभरवलयितमूलं ॥
हरिमेकरसं० ॥ २६ ॥

तरलदृगञ्चलचलनमनोहरवदनजनितरतिरागं ।
स्फुटकमलोदरखेलितखञ्जनयुगमिव शरदि तडागं ॥
हरिमेकरसं० ॥ २७ ॥

वदनकमलपरिशीलनमिलितमिहिरसमकुण्डलशोभं ।
स्मितरुचिरुचिरसमुल्लसिताधरपल्लवकृतरतिलोभं ॥
हरिमेकरसं० ॥ २८ ॥

शशिकिरणच्छुरितोदरजलधरसुन्दरसकुसुमकेशं ।
तिमिरोदितविधुमण्डलनिर्मलमलयजतिलकनिवेशं ॥
हरिमेकरसं० ॥ २९ ॥

विपुलपुलकभरदन्तुरितं रतिकेलिकलाभिरधीरं ।
मणिगणकिरणसमूहसमुज्ज्वलभूषणसुभगशरीरं ॥
हरिमेकरसं० ॥ ३० ॥

श्रीजयदेवभणितविभवद्विगुणीकृतभूषणभारं ।
प्रणमत हृदि विनिधाय हरिं सुचिरं सुकृतोदयसारं ॥
हरिमेकरसं० ॥ ३१ ॥

अतिक्रम्यापाङ्गं श्रवणपथपर्यन्तगमन
प्रयासेनैवाक्ष्णोस्तरलतरतारं गमितयोः ।
इदानीं राधायाः प्रियतमसमालोकसमये
पपात स्वेदाम्बुप्रसर इव हर्षाश्रुनिकरः ॥ ३२ ॥
भजन्त्यास्तल्पान्तं कृतकपटकण्डूतिपिहित
स्मिते याते गेहाद्बहिरवहितालीपरिजने ।
प्रियास्यं पश्यन्त्याः स्मरशरवशाकूतसुभगं

सलज्जा लज्जापि व्यगमदिव दूरं मृगदृशः ॥ ३३ ॥
जयश्रीविन्यस्तैर्महित इव मन्दारकुसुमैः
स्वयं सिन्दूरेण द्विपरणमुदा मुद्रित इव ।
भुजापीडक्रीडाहतकुवलयापीडकरिणः
प्रकीर्णासृग्बिन्दुर्जयति भुजदण्डो मुरजितः ॥ ३४ ॥
इति श्रीगीतगोविन्दे राधिकामिलने सानन्ददामोदरो
नाम एकादश सर्गः ॥ ११ ॥

सुप्रितपीताम्बरः ।

गतवति सखीवृन्दे मन्दत्रपाभरनिर्भर
स्मरशरवशाकूतस्फीतस्मितस्नपिताधरां ।
सरसमनस दृष्ट्वा राधां मुहुर्नवपल्लव
प्रसवशयने निक्षिप्ताक्षीमुवाच हरिः प्रियां ॥ १ ॥

विभासरागैकतालीतालाभ्यां गीयते ॥

किशलयशयनतले कुरु कामिनि चरणनलिनविनिवेशं ।
तव पदपल्लववैरिपराभवमिदमनुभवतु सुवेशं ॥
क्षणमधुना नारायणमनुगतमनुसर राधिके । ध्रुं ॥ २ ॥
करकमलेन करोमि चरणमहमागमितासि विदूरं ।
क्षणमुपकुरु शयनोपरि मामिव नूपुरमनुगतिशूरं ॥
क्षणमधुना० ॥ ३ ॥
वदनसुधानिधिगलितममृतमिव रचय वचनमनुकूलं ।
विरहमिवापनयामि पयोधररोधकमुरसि दुकूलं ॥

क्षणमधुना० ॥ ४ ॥

प्रियपरिरम्भणरभसवलितमिव पुलकितमतिदुरवापं ।
मदुरसि कुचकलशं विनिवेशय शोषय मनसिजतापं ॥

क्षणमधुना० ॥ ५ ॥

अधरसुधारसमुपनय भामिनि जीवय मृतमिव दासं ।
त्वयि विनिहितमनसं विरहानलदग्धवपुषमविलासं ॥

क्षणमधुना० ॥ ६ ॥

शशिमुखि मुखरय मणिरसनागुणमनुगुणकण्ठनिनादं ।
श्रुतियुगले पिकरुतविकले शमय मम चिरादवसादं ॥

क्षणमधुना० ॥ ७ ॥

मामतिविफलरुषा विकलीकृतमवलोकितुमधुनेदं ।
मीलितलज्जितमिव नयनं तव विरम विसृज रतिखेदं ॥

क्षणमधुना० ॥ ८ ॥

श्रीजयदेवभणितमिदमनुपदनिगदितमधुरिपुमोदं ।
जनयतु रसिकजनेषु मनोरमरतिरसभावविनोदं ॥

क्षणमधुना० ॥ ९ ॥

प्रत्यूहः पुलकाङ्कुरेण निविडाश्लेषे निमेषेण च
क्रीडाकूतविलोकितेऽधरसुधापाने कथाकेलिभिः ।
आनन्दाधिगमेन मन्मथकलायुद्धेऽपि यस्मिन्नभूद्
तद्भूतः स तयोर्बभूव सुरतारम्भः प्रियम्भावुकः ॥ १० ॥

दोर्भ्यां संयमितः पयोधरभरेणापीडितः पाणिजैर्
आविद्धो दशनैः क्षताधरपुटः श्रोणीतटेनाहतः ।

हस्तेनानमितः कचेऽधरमधुस्यन्देन सम्मोहितः
कान्तः कामपि तृप्तिमाप तदहो कामस्य वामा गतिः ॥११॥
मारा‌ङ्के तिकेलिसङ्कुल ारम्भे तया साहस
प्रायं कान्तजयाय किञ्चिदुपरि प्रारम्भि यत्सम्भ्रमात्।
निष्पन्दा जघनस्थली शिथिलिता दोर्वल्लिरुत्कम्पितं
वक्षो मीलितमक्षि पौरुषरसः स्त्रीणां कुतः सिद्ध्यति ॥१२॥
तस्याः पाटलपाणिजाङ्किकितमुरो निद्राकषाये दृशौ
निर्धूतोऽधरशोणिमा विलुलितस्रस्तस्रजो मूर्धजाः।
काञ्चीदाम दरश्लथाञ्चलमिति प्रातर्निखातैर्दृशोर्
एभिः कामशरैस्तदद्भुतमभूत्पत्युर्मनः कीलितं ॥१३॥
त्वामप्राप्य मयि स्वयंवरपरां क्षीरोदतीरोदरे
शङ्के सुन्दरि कालकूटमपिबन्मूढो मृडानीपतिः।
इत्थं पूर्वकथाभिरन्यमनसो निक्षिप्य वामाञ्चलं
राधायाः स्तनकोरकोपरि चलन्नेत्रो हरिः पातु वः ॥१४॥
व्यालोलः केशपाशस्तरलितमलकैः स्वेदलोलौ कपोलौ
स्पष्टा दष्टाधरश्रीः कुचकलशरुचा हारिता हारयष्टिः।
काञ्ची काञ्चिद्गताशां स्तनजघनपदं पाणिनाच्छाद्य सद्यः
पश्यन्ती चात्मरूपं तदपि विलुलितस्रग्धरेयं धिनोति ॥१५॥
ईषन्मीलितदृष्टि मुग्धहसितं शीत्कारधारावशाद्
अव्यक्ताकुलकेलिकाकुविकसद्दन्तांशुधौताधरं।
श्वासोत्कम्पपयोधरोपरिपरिष्वङ्गात् कुरङ्गीदृशो
हर्षोत्कर्षविमुक्तिनिःसहतनोर्धन्यो धयत्याननं ॥१६॥

अथ सहसा सन्तुष्टं सुरतान्ते सा नितान्तखिन्नाङ्गी ।
राधा जगाद सादरमिदमानन्देन गोविन्दं ॥ १७ ॥

रामकिरीरागयतिताल्याभ्यां गीयते ॥

कुरु यदुनन्दन चन्दनशिशिरतरेण करेण पयोधरे ।
मृगमदपत्रकमत्र मनोभवमङ्गलकलससहोदरे ॥
निजगाद सा यदुनन्दने क्रीडति हृदयानन्दने ॥ १८ ॥

अलिकुलगञ्जनमञ्जनकं रतिनायकसायकमोचने ।
त्वदधरचूम्बनलम्बितकज्जलमुज्जलय प्रिय लोचने ॥
निजगाद सा० ॥ १९ ॥

नयनकुरङ्गतरङ्गविकाशनिरासकरे श्रुतिमण्डले ।
मनसिजपाशविलासधरे शुभवेश निवेशय कुण्डले ॥
निजगाद सा० ॥ २० ॥

भ्रमरचयं रचयन्तमुपरि रुचिरं सुचिरं मम सम्मुखे ।
जितकमले विमले परिकर्मय नर्मजनकमलकं मुखे ॥
निजगाद सा० ॥ २१ ॥

मृगमदरसवलितं ललितं कुरु तिलकमलिकरजनीकरे ।
विहितकलङ्ककलं कमलानन विश्रमितश्रमशीकरे ॥
निजगाद सा० ॥ २२ ॥

मम रुचिरे चिकुरे कुरु मानद मानसजध्वजचामरे ।
रतिगलिते ललिते कुसुमानि शिखण्डिशिखण्डकडामरे ॥
निजगाद सा० ॥ २३ ॥

सरसघने जघने मम शम्बरदारणवारणकन्दरे ।

मणिरसनावसनाभरणानि शुभाशय वासय सुन्दरे ॥
निजगाद सा० ॥ २३ ॥
श्रीजयदेववचसि जयदे हृदयं सदयं कुरु मण्डने ।
हरिचरणस्मरणामृतकृतकलिकलुषज्वरखण्डने ॥
निजगाद सा० ॥ २४

रचय कुचयोः पत्रं चित्रं कुरुष्व कपोलयोर्
घटय जघने काञ्चीमञ्च स्रजा कवरीभरं ।
कलय वलयश्रेणीं पाणौ पदे कुरु नूपुराव्
इति निगदितः प्रीतः पीताम्बरोऽपि
तथाकरोत् ॥ २
पर्यङ्कीकृतनागनायकफणाश्रेणीमणीनां गणे
संक्रान्तप्रतिबिम्बसंवलनया विभ्रद्विभुप्रक्रियां ।
पादाम्भोरुहधारिवारिधिसुतामक्ष्णां दिदृक्षुः शतैः
कायव्यूहमिवाचरन्नुपचितीभूतो हरिः
पातु वः ॥ २६ ॥
यद्गान्धर्वकलासु कौशलमनुध्यानं च यद्वैष्णवं
यच्छृङ्गारविवेकतत्त्वमपि यत् काव्येषु लीलायितं ।
तत् सर्वं जयदेवपण्डितकवेः कृष्णैकतानात्मनः
सानन्दाः परिशोधयन्तु सुधियः
श्रीगीतगोविन्दतः ॥२७॥
श्रीभोजदेवप्रभवस्य रामादेवीसुतश्रीजयदेवकस्य ।

पराशरादिप्रियवर्गकण्ठे श्रीगीतगोविन्द
कवित्वमस्तु ॥ २८ ॥

इति श्रीगीतगोविन्दे स्वाधीनभर्तृकावर्णने
सुप्रीत पीताम्बरो नाम
द्वादशः सर्गः ॥ १२॥

## नलोदयः ।

हृदय सदायादवतः पापाटव्या दुरासदाय[illegible]वत्सः ।
अरिसमुदयाद्वतारेवजयभाया ः स्मरेणदयाद्वत ः ॥
योजनिनागोपीतश्चचारयोव[illegible]वांगनागोपीतः ।
भूर्येनागोपीतः कंसाद्यो द्वेषमेव नागोपीतः ॥
यद्दरिषु सन्नामानस्थितयो यन्नुन्नमुद्गलसन्नामानः ।
यच्च ससन्नामानः स्युर्भवभाजश्च पठितसन्नामानः ॥
समनि[illegible]नवनाश्राञ्जनतालिकुलं यथैवदानवन श्रमं ।
विरदाद्दानवनाशंजगच्चलभतेयतः सदानवनाश्रमं ॥
अस्ति सराजानीते रामाख्यो यो गतीपराजानीते ।
यस्य [illegible]राजानीते रत्नानि जनः कुले ध[illegible]ाजानीते ॥
यः सेनानावारिप्रकरनदीः शरमयं धुनानावारि ।
अतरन्नानावारि व्यसनै यद्भुवि वनञ्च नानावारि ॥
अपि यो दायादाय क्षयप्रदोऽहसि सतां यदाया[illegible]यः ।
करमादायादाय श्रियोब्धिरधिराजमसिगदाया[illegible]यः ॥
अविदूराजादित्या क्षताल्पभेदैवभूः सराजादित्या ।

येन सराजादित्या चिदिवात्संयुक्तशत्रुराजादित्या ॥
खलसेनानावेद्यः खांहोब्धौ भुविच यस्य नानावेद्यः ।
स्निग्धजनानावेद्य प्रयतेस्य सुकाव्यविरचनानावेद्यः ॥
अथ निजराज्यन्तेन प्राशासि नलेन शत्रुराज्यन्तेन ।
येनाराज्यन्तेन श्रियादिशो यस्य विहृतिराज्यन्तेन ॥
मूर्तिं मारसमानां योदधदायुः सहस्रमारसमानाम् ।
रुद्रकुमारसमानामजयद्द्विषताम्पंक्तिमारसमानाम् ॥
साश्वनियामानयतः श्रेष्ठाविद्यास्तदाश्रयामानयतः ।
अधिकायामानयतः शत्रावपियस्यधीर्दयामानयतः ॥
अजितानामायस्य त्राता यःशरणगामिनामायस्य ।
गतनानामायस्य श्रुतः पिता वीरसेननामायस्य ॥
भुव्यतनोदन्तेन द्विषतां सयशांसि शोभनोदन्तेन ।
नीतानोदन्तेन क्षितिमभजन्नहितदन्तिनोदन्तेन ॥
सचिवगिरागोपायन्नलःसपृथिवीं निरस्तरागोपायम् ।
शत्रोरागोपायं नीत्वा नेमु र्महत्तरागोपायम् ॥
योऽदम्भीमान्यायादधिकोथ रपुर्यमेत्य भीमान्यायात् ।
वैदर्भीमान्यायाच्चिजगति कन्या बभूव भीमान्यायात् ॥
महिततमारम्भाभिर् दमयन्ती सद्गुमारमारम्भाभिः ।
दधती मारम्भाभिर् ववृधे सोरुद्वये समारम्भाभिः ॥
सारत्नंनारीणां नलःश्रियामजनि निलयनंनारीणामं ।
यस्यानन्नारीणां मरुभुवमापद्घटावनंनारीणामं ॥
चकमे साराजन्यश्रेष्ठन्तन्तां स तेजसाराजन्यः ।

आत्तविसाराजन्यश्रियोऽधितयया जिताःससाराजन्यः ॥
नार्तिर् नोद्यानेन प्रभाविहीनेन शोभनोद्यानेन ।
स्मरजा नोद्यानेन स्फुटमितिगतिभि नलोतनोद्यानेन ॥
सोहितहन्तापततः कांश्चिदपश्यन्नय हन्तापततः ।
सस्नेहन्तापततस्तान्यदमी तोषमावहन्तापततः ॥
तन्तरसारसमानः सविहंगगणोब्रवीत्ससारसमानः ।
गतहिंसारसमानस्तुद लभ्योनिष्कयः स्वसारसमानः ॥
त्वंझषकेत्वङ्गत्वादधिको भैम्यास्तुमोन्तिकेत्वङ्गत्वा ।
सातेङ्केत्वङ्गत्वासक्ता लल तत्सकाशकेत्वङ्गत्वा ॥
इतिहंसारामाया निकटंयामयक्तेव सारामाया ।
जग्मुःसारामाया जगदुश्चालीभिरभिससारामाया ॥
श्रीसंकाशास्यस्य त्वम्भैमिनलस्य शशिनिकाशास्यस्य ।
अरिलोकाशास्यस्य यदि भार्यास्याःकुमारिकाशास्यस्य ॥
इतिहांसेनोदितया गणेन भैम्या मुदारसेनोदितया ।
नवभासेनोदितया स्मरेण सपुनर्लोकसेनोदितया ॥
तावहुधावायस्य श्रेण्यःपुनरस्य सन्निधावायस्य ।
[illegible]धावायस्य व्यनुवंस्तुलन य न विबुधावायस्य ॥
इति सविनामानितया जज्ञेभैम्यानलोपि नामानितया ।
खारस्थ्यंनामानितय श्रियेचविचिन्त्यतस्यनामानितया ॥
अथ ससमुद्रागस्य क्ष्मान्तस्यालंकृतेः समुद्राग [illegible] ।
[illegible]ौवनमुद्रागस्य स्वसुतारत्नस्य सादमुद्रागस्य ॥
दृष्ट्वा राजातनुत स्वयंवरं विधिवदिन्दिराजातनुतः ।

यस्यजराजातनुतः पृथगव्यथासीजनाद्रराजातनुतः ॥
तं ह्रासेनापालिः स्वयंवरं क्षितिभुजां ससेनापालिः ।
न बभासेनापालिः स्वगेषु यैःशिरसि या रसेन पाले ॥
तां गां सेनाराजिः स्वर्गसदां यैः सदारसेनाराजि ।
आयासेनाराजिक्षयितरिपौ चलति विबुधसेनाराजि ॥
सोथ परमहस्तेन प्रापि नलेनोत्सवः परमहस्तेनः ।
स्फुरितपरमहस्तेन प्रवेशितोवतत्पुरं परमहस्तेन ॥
क्षिप्तलसन्नालीकान्तिेषु मुखेन्दुतुलितसन्नालीकान् ।
राज्ञः स्वलोकान् कान्तिर्विबुधांश्चनाहसन्नालीकान् ॥
अजानेकलाप यन्तंस्वयशोऽनिजकंमहःकलापास्यन्तं ।
शचुकलापायन्तम्प्रेक्ष्य नलंसुरततिःकलापास्यन्तमं ॥
स्वर्निलयानामनलंक्षतमपिजेतुन्ततिःश्रियानामनलं ।
यमजेयानामनलम्प्रोचेशक्रस्तमरिचयानामनलमं ॥
वद कामायासन्न त्वम्भैम्यै यद्गुणाः श्रमायासन्नः ।
श्रेष्ठतमायासन्नस्त्वान्द्रष्टा ननु जनः स्वमायासन्नः॥ ३५ ॥
इति सरवेकेहास्तन्यस्य समुकुलं सुरप्रवेकेहास्त ।
तामविवेकेहास्तः श्रयति स्त्रीतच पार्थिवेकेहास्त ॥
हरिपवमानयमानान्दूतोऽस्मिनलोमहारमानयमानान् ।
भवतींमानयमानान्भैमिसुरान्विद्धिमहमिमानयमानान्॥
तुल्येप्सरसादेहिप्रभवो मग्नाः स्मर प्रसरसादेहि ।
तानभिसरसादेहि स्वजघ्नाकात्सुखघ्नसरसादेहि ॥
इति क्षतसामारवतः सुरलोकात्तन्मुखेन सामारवतः ।

नरिरंसामारवत स्थलादिव नलोऽकमानसामारवतः ॥
साविरराज्ञायतया वीक्ष्य दृशा तं स्मरातुराजायतया ।
स्थितिरचाजायतयाद्युसदाम्बाभाषिनिषधराजायतया ॥
तस्या देवाद्यस्य प्रणम्य च ललेन धीः पदेवाद्यस्य ।
सति निनदेवाद्यस्य स्वयं प्रियायाः पदं मुदेवाद्यस्य ॥
अथ तरसारङ्ग्येन्नृपतिगणोऽस्थित पदेषु सारङ्गेयं ।
चञ्चलसारङ्गेयन्दमयन्ती चाक्षितुलितसारङ्गेयं ॥
व्यधुरवनामान्येषु प्रजा नृपेष्वथ निवेद्य नामान्येषु ।
सूतैर्नामान्येषु प्रकीर्त्यमान्येषु शोभनामान्येषु ॥
साङ्केननलसमानाननलसमानानमुचकतिचित्पुरुषान् ।
प्रैक्षत ननलसमानाननलसमानानभून्न तेषाम्भेदः ॥
रुचिक्षतनासत्यागाःस्फुरतु नलोयदिचव[illegible]नासत्यागाः ।
अपि दीनासत्यागान्यायन्युतेनैव वर्त्मनासत्यागा ॥
यदि वाभावन्यस्य स्थितास्मि न[illegible]व नरविभावन्यस्य ।
देवसभावन्यस्य द्विपस्य वपुषो भवेद्विभावन्यस्य ॥
क्षतभावासावनितानितिभुवमैक्षत्सुरान्सुवासावनिता ।
स्वपतिं वासावनिताचिह्नं धार्मिकजने ध्रुवासावनिता ॥
स्वरिरंसादेवाल्याकुलया दृष्ट्यार्थितापि सादेवाल्या ।
वपुषि ससादेवाल्याददृत्तनलमुपस्थितं रसादेवाल्या ॥
सत्सदसोमाननया रुद्रसमोयः स्वतेजसोमाननया ।
प्रवृतः सोमाननया नलोवभौ भुविगुणेन सोमाननया ॥
मदद्म्भावरमस्यज्ज्ञात्वाथमनोगुरुप्रभावरमस्य ।

सुरहृषभावरमस्य प्रदिश्य जग्मुतर्गतप्रभावरमस्य ॥
गुरुमहिमापरमायास्तम्भी नलएषसतिमापरमायाः ।
प्रिययामापरमायाः स्वपुरमगुर्यच तं क्षमापरमायाः ॥
शशिना समहासमहा नगरेजनतासमहास्तमुदं ।
अतिभासुरयासुरयाव्यहरद्यतनोत्सुरयासुरयागमपि ॥

इति श्रीकालिदासकृते नलोदये सत्काव्ये
प्रथमोल्लासः ।

## घटकर्पर ।

निचितं खमुपेत्य नीरदैः ।
प्रियहीना हृदयावनीरदैः ॥
सलिलैर्निहितं रजः क्षितौ ।
रविचन्द्रावपि नोपलक्षितौ ॥ १ ॥
हंसा नदन्मेघभयाद् द्रवन्ति ।
निशामुखान्यद्यनचन्द्रवन्ति ॥
नवाम्बुमत्ताः शिखिनो नदन्ति ।
मेघागमे कुन्दसमानदन्ति ॥ २ ॥

मेघावृतं निशि न भाति नभो वितारं।
निद्राभ्युपैति च हरिं सुखसेवितारं॥
सेन्द्रायुधश्च जलदोधरसन्निभानां।
संरम्भमावहति भूधरसन्निभानां॥ ३॥
सत[illegible]ज्जलदार्पितं नगेषु।
स्वनदम्भोधरभीतपन्नगेषु॥
परिधीररवं जलं दरीषु।
प्रपतत्यद्भुतरूपसुन्दरीषु॥ ४॥
क्षिप्रं प्रसादयति सम[illegible]ते कोपितानि।
कान्तामुखानि रतिविग्रहकोपितानि॥
उत्कण्ठयन्ति पथिकान् जलदाः स्वनन्तः।
शोकः समुद्भवति तद्वनितास्वनन्तः॥ ५॥
छादिते दिनकरस्य भावने।
खाज्जले पतति शोकभावने॥
मन्मथे च हृदि हन्तुमुद्यते।
प्रोषितप्रमदयेदमुच्यते॥ ६॥
सर्वकालमवलंघ्य तोयदा।
आगता स्थ दयितो गतो यदा॥
निर्घृणेन परदेशसेविना।
मार[illegible] हतेन मां विना॥ ७॥
ब्रूत तं पथिकपां[illegible]लं घनाः।
यूयमेव पथि शीघ्रलंघनाः॥

अन्यदेशरतिरद्य मुच्यतां ।
साथ वा तव बधूः किमुच्यतां ॥ ८ ॥
हंसपंक्तिरपि नाथ सम्प्रति ।
प्रस्थिता वियति मानसं प्रति ॥
चातकोपि तृषितोऽम्बु याचते ।
दुःखिता पथिक सा प्रिया च ते ॥ ९ ॥
नीलशष्पमभिभाति कोमलं ।
वारि विन्दति च चातकोमलं ॥
अम्बुदैः शिखिगणो विनाद्यते ।
का रतिर्दयितया विनाद्य ते ॥ १० ॥
मेघशब्दमुदिताः कलापिनः ।
प्रोषिताहृदयशोकलापिनः ॥
तोयद[illegible] साद्य ते ।
दुर्धरेण मदनेन सा[illegible]ते ॥ ११ ॥
किं कृपापि तव नास्ति कान्तया ।
पाण्डुग[illegible]डपातितालकान्तया ॥
शोकसागरजलेऽद्य पातितां ।
त्वद्गुणस्मर[illegible] पाति तां ॥ १२ ॥
कुसुमितकुटजेषु काननेषु ।
[illegible]प्रथ[illegible]हितेषु समुत्सकाननेषु ॥
वहति च कलुषे जले नदीनां ।
किमिति च मां समवेक्षसे न दीनां ॥ १३ ॥

मार्गेषु मेघसलिलेन विनाशितेषु ।
कामे धनुः स्पृशति तेन विनाशितेषु ॥
गम्भीरमेघरसितव्यथिता कदाहं ।
जह्यां सखि प्रियवियोगजशोकदाहं ॥१४॥
सुसुगन्धतया वनेजितानां ।
स्वनदम्भोधरवायुवीजितानां ॥
मदनस्य कृते निकेतकानां ।
प्रतिभान्त्यद्य वनानि केतकानां ॥१५॥
तत् साधु यत् त्वां सुतरु ससर्ज ।
प्रजापतिः कामनिवास सर्ज ॥
त्वं मञ्जरीभिः प्रवरो वनानां ।
नेत्रोत्सवश्चासि सयौवनानां ॥१६॥
नवकदम्ब शिरोऽवनतास्मि ते ।
वसति यन्मदनः कुसुमस्मिते ॥
कुटज किं कुसुमैरुपहस्यते ।
निपतितास्मि सुदुःप्रसहस्य ते ॥१७॥
तरुवर विनतास्मि ते सदाहं ।
हृदयं मे प्रकरोषि किं सदाहं ॥
तव कुसुमनिरीक्षणे पदेहं ।
विसृजेयं सहसैव नोपदेहं ॥१८॥
कुसुमैरुपशोभितां सितैर् ।
घनमुक्ताम्बुलवप्रकासितैः ॥

मधुनः समवेक्ष्य कालतां ।
भ्रमरश्चुम्बति यूथिकालतां ॥ १९ ॥
तासामृतुः सफल एव हि या दिनेषु ।
सेन्द्रायुधाम्बुधरगर्जितदुर्दिनेषु ॥
रत्युत्सवं प्रियतमैः सह मानयन्ति ।
मेघागमे प्रियसखीश्च समानयन्ति ॥ २० ॥
एतां निशम्य विरहानलपीडितायास्
तस्या वचः खलु दयालुरपीडितायाः ॥
स्वं स्वारवेण कथितं जलदैरमोघैः ।
प्रत्याययौ स गृहमूनदिनैरमोघैः ॥ २१ ॥
आलम्ब्य चाम्बु तृषितः करकोषपेयं ।
भावानुरक्तवनितासुरतैः शपेयं ॥
जीयेय येन कविना यमकैः परेण ।
तस्मै वहेयमुदकं घटकर्परेण ॥ २२ ॥

इति श्रीघटकर्परकविकृतं यमककाव्यं समाप्तं ॥

## अमरुशतकं ।

ज्याकृष्टिबद्धखटकामुखपाणिपृष्ठ-
प्रेंखन्नखांशुचयसंवलितोऽम्बिकायाः ।
त्वां पातु मञ्जरितपल्लवकर्णपूर-
लोभभ्रमद्भ्रमरविभ्रमभृत्कटाक्षः ॥ १ ॥
क्षिप्तोहस्तावलग्नः प्रसभमभिहतोऽप्याददानोंशुकान्तं
गृह्णन् केशेष्वपास्तश्चरणनिपतितो नेक्षितः संभ्रमेण ।
आलिङ्गन् योऽवधूतस्त्रिपुरयुवतिभिः साश्रुनेत्रोत्पलाभिः
कामीवार्द्रापराधः स दहतु दुरितं शाम्भवो वः शराग्निः ॥२॥
आलोलामलकावलीं विलुलितां बिभ्रच्चलत्कुण्डलं
किञ्चिन्मृष्टविशेषकं तनुतरैः स्वेदाम्भसः शीकरैः ।
तन्व्या यत् सुरतान्ततान्तनयनं वक्त्रं रतिव्यत्यये
तत् त्वां पातु चिराय किं हरिहरब्रह्मादिभिर्दैवतैः ॥ ३ ॥
अलसवलितैः प्रेमार्द्रार्द्रैर्मुहुर्मुकुलीकृतैः
क्षणमभिमुखैर्लज्जालोलैर्निमेषपराङ्मुखैः ।
हृदयनिहितं भावाकूतं वमद्भिरिवेक्षणैः
कथय सुकृती कोयं मुग्धे त्वयाद्य विलोक्यते ॥ ४ ॥
दत्तोऽस्याः प्रणयस्त्वयैव भवता चेयं चिरं लालिता
दैवादद्य किलत्वमेव कृतवानस्या नवं विप्रियं ।
मन्युर्दुःसहएष यात्युपशमं नो शान्त्ववादैः स्फुटं
हे निस्त्रिंश विमुक्तकण्ठकरुणं तावत् सखी रोदिति ॥ ५ ॥

लिखन्नास्ते भूमिं वहिरवनतः प्राणदयितो
निराहाराः सख्यः सततरुदितोच्छूननयनाः ।
परित्यक्तं सर्वं हसितपठितं पञ्जरशुकैस्
तवावस्था चेयं विसृज कठिने मानमधुना ॥ ६ ॥
नार्यस्तन्वि हठाद्धरन्ति रमणं तिष्ठन्ति नो वारिताः
तत् किं ताम्यसि किञ्च रोदिषि मुधा तासां प्रियं मा कृथाः ।
कान्तः केलिरुचिर्युवा सहृदयस्तादृक् पतिः कातरे
किन्नो वर्करकर्करैः प्रियशतैराक्रम्य विक्रीयते ॥ ७ ॥
कोपात् कोमललोलबाहुलतिकापाशेन वद्धा दृढं
नीत्वा केलिनिकेतनं दयितया सायं सखीनां पुरः ।
भूयोऽप्येवमिति स्खलन् मृदुगिरा संसूच्य दुश्चेष्टितं
धन्यो हन्यत एव निह्नुतिपरः प्रेयान् रुदत्या हसन् ॥ ८ ॥
प्रहरविरतौ मध्ये वाह्नस्ततोपि परेऽथवा
किमुत सकले जाते वाह्नि प्रिय त्वमेष्यसि ।
इति दिनशतप्राप्यं देशं प्रियस्य यियासतो
हरति गमनं वालालापैः सवाष्पगलज्जलैः ॥ ९ ॥
याताः किन्न मिलन्ति सुन्दरि पुनश्चिन्ता त्वया मत्कृते
नो कार्या नितरां कृशासि कथयत्येवं सवाष्पे मयि ।
लज्जामन्थरतारकेण निपतद्धाराश्रुणा चक्षुषा
दृष्ट्वा मां हसितेन भाविमरणोत्साहस्तया सूचितः ॥ १० ॥
धीरं वारिधरस्य वारि किरतः श्रुत्वा निशीथे ध्वनिं
दीर्घोच्छ्वासमुदश्रुणा विरहिणीं वालां चिरं ध्यायता ।

अध्वन्येन विमुक्तकण्ठमखिलां रात्रिं तथा क्रन्दितं
ग्रामीणैर्व्रजतो जनस्य वसति र्ग्रामे निषिद्धा यथा ॥ ११ ॥
कथमपि सखि क्रीडाकोपाद् व्रजेति मयोदिते
कठिनहृ[illegible]क्त्वा शय्यां बलाद्गतएव सः ।
इति सरभसं ध्वस्तप्रेम्णि व्यपेतघृणे जने
पुनरपि हतव्रीडं चेतः [illegible]ते करोमि किं ॥ १२ ॥
दम्पत्यो र्निशि जल्पतो र्गृहशुकेनाकर्णितं यद्वचस्
तत् प्रातर्गुरुसन्निधौ निगदतस्तस्योपहारं बधूः ।
कर्णालङ्कृतिपद्मरागशकलं विन्यस्य चञ्चूपुटे
व्रीडार्ता प्रकरोति दालिमफलव्याजेन वाग्बन्धनं ॥ १३ ॥
अज्ञानेन पराङ्मुखीं परिभवादाश्लिष्य मां दुःखितां
किं लब्धं चटुल त्वयेह नयता सौभाग्यमेतां दशां ।
प[illegible]यता [illegible]व्यातकरोन्मृष्टाङ्गरागारुणं
वक्षस्ते मलतैलपङ्कशवलै र्वेणीपदैरङ्कितं ॥ १४ ॥
एकत्रासनसंस्थितिः परिहृता प्रत्युद्गमाद्दूरतस्
ताम्बूलानयनच्छलेन रभसाश्लेषोपि संविघ्नितः ।
आलापोपि न विश्रुतः परिजनं व्यापारयन्त्यान्तिके
कान्तं प्रत्युपचारतश्चतुरया कोपः कृतार्थीकृतः ॥ १५ ॥
दृष्ट्वैकासनसंस्थिते प्रियतमे पश्चादुपेत्यादराद्
एकस्या नयने पिधाय विहितक्रीडानुबन्धच्छलः ।
ईषद्वक्रिमकन्धरः सपुलकः प्रेमोल्लसन्मानसम्
अन्तर्हासलसत्कपोलफलकं धूर्तोऽपरां चुम्बति ॥ १६ ॥

चरणपतनप्रत्याख्यानात् प्रसादपराङ्मुखे
निभृतकितवाचारेत्युक्त्वा रुषा परुषीकृते ।
व्रजति रमणे निःश्वस्योच्चैः स्तनस्थितहस्तया
नयनसलिलच्छन्नादृष्टिः सखीषु निवेशिता ॥ १७ ॥
काञ्च्या गाढतरावरुद्धवसनप्रान्ता किमर्थं पुनर्
मुग्धाक्षी स्वपतीति तत्परिजनं स्वैरं प्रिये पृच्छति ।
मातः सुप्तमपीह वारयति मामित्याहितक्रोधया
पर्यस्य स्वपितिच्छलेन शयने दत्तोऽवकाशस्तया ॥ १८ ॥
एकस्मिन् शयने पराङ्मुखतया वीतोत्तरं ताम्यतोर्
अन्योन्यस्य हृदि स्थितेऽप्यनुनये संरक्षतो गौरवं ।
दम्पत्योः शनकैरपाङ्गवलनान् मिश्रीभवच्चक्षुषोर्
भग्नो मानकलिः सहासरभसं व्यासक्तकण्ठग्रहं ॥ १९ ॥
पश्यामो मयि किं प्रपद्यत इति स्थैर्यं मयालम्बितं
किं मामालपतीत्ययं खलु शठः कोपस्तयाप्याश्रितः ।
इत्यन्योन्यविलक्षदृष्टिचतुरे तस्मिन्नवस्थान्तरे
सव्याजं हसितं मया धृतिहरो वाष्पस्तु मुक्तस्तया ॥ २० ॥
परिम्लाने माने मुखशशिनि तस्याः करधृते
मयि क्षीणोपाये प्रणिपतनमात्रैकशरणे ।
तया पक्ष्मप्रान्तव्रजपुटनिरुद्धेन सहसा
प्रसादो वाष्पेण स्तनतटविशीर्णेन कथितः ॥ २१ ॥
तस्याः सान्द्रविलेपनस्तनतटप्रश्लेषमुद्राङ्कितं
किं वक्षश्चरणानतिव्यतिकरव्याजेन गोपाय्यते ।

इत्युक्ते क्व तदित्युदीर्य सहसा तत् संप्रमाष्टुं मया
साश्लिष्टा रभसेन तत्सुखवशात् तन्व्यापि तद्विस्मृतं ॥ २२॥
त्वं मुग्धाक्षि विनैव कञ्चुलिकया धत्से मनोहारिणीं
लक्ष्मीमित्यभिधायिनि प्रियतमे तद्वीटिकां संस्पृशि ।
शय्योपान्तनिविष्टसस्मितसखीनेत्रोत्सवानन्दितो
निर्यातः शनकैरलीकवचनोपन्यासमाली जनः ॥ २३ ॥
भ्रूभङ्गे रचितेपि दृष्टिरधिकं सोत्कण्ठमुद्वीक्षते
कार्कश्यं गमितेपि चेतसि तनूरोमाञ्चमालम्बते ।
रुद्धायामपि वाचि सस्मितमिदं दग्धाननं जायते
दृष्टे निर्वहणं भविष्यति कथं मानस्य तस्मिन् जने ॥ २४ ॥
कान्ते कत्यपि वासराणि गमय त्वं मीलयित्वा दृशौ
स्वस्ति स्वस्ति निमीलयामि नयने यावन्न शून्या दिशः ।
आयाता वयमागमिष्यति सुहृद्वर्गस्य भाग्योदयैः
सन्देशो वद कस्तवाभिलषितस्तीर्थेषु तोयाञ्जलिः ॥ २५ ॥
सा पत्युः प्रथमापराधसमये सख्योपदेशं विना
नो जानाति सविभ्रमाङ्गवलनावक्रोक्तिसंसूचनं ।
स्वच्छैरच्छकपोलमूलगलितैः पर्यस्तनेत्रोत्पला
बाला केवलमेव रोदिति लुठल्लोलालकैरश्रुभिः ॥ २६ ॥
भवतु विदितं भव्यालापैरलं खलु गम्यतां
तनुरपि न ते दोषोऽस्माकं विधिस्तु पराङ्मुखः ।
तव यदि तथा भूतं प्रेमप्रपन्नमिमां दशां
प्रकृतितरले का नः पीडा गते हतजीविते ॥ २७ ॥

उरसि निहितस्तारो हारः कृता जघने घने
कलकलवती काञ्ची पादौ क्वणन्मणिनूपुरौ ।
प्रियमभिसरसि मुग्धे त्वं समाहतडिण्डिमा
यदि किमधिकत्रासोत्कम्पं दिशः समुदीक्षसे ॥ २८ ॥

प्रातः प्रातरुपागतेन जनिता निर्निद्रता चक्षुषोर्
मन्दायां मयि गौरवव्यपगमादुत्पादितं लाघवं ।
किं मुग्धे न मया कृतं रमणधीर्मुक्ता त्वया गम्यतां
दुःस्थं तिष्ठसि यच्च पथ्यमधुना कर्तास्मि तत् श्रोष्यसि ॥२९॥

सा बाला वयमप्रगल्भमनसः सा स्त्री वयं कातराः
सा पीनोन्नतिमत् पयोधरयुगं धत्ते सखेदा वयं ।
साक्रान्ता जघनस्थलेन गुरुणा गन्तुं न शक्ता वयं
दोषैरन्यजनाश्रितैरपटवो जाताः स्म इत्यद्भुतं ॥ ३० ॥

प्रस्थानं वलयैः कृतं प्रियसखैरस्रैरजस्रं गतं
धृत्या न क्षणमासितं व्यवसितं चित्तेन गन्तुं पुरः ।
यातुं निश्चितचेतसि प्रियतमे सर्वे समं प्रस्थिता
गन्तव्ये सति जीवितप्रियसुहृत्सार्थः किमु त्यज्यते ॥३१॥

सन्दष्टाधरपल्लवा सचकितं हस्ताग्रमाधुन्वती
मामामुञ्च शठेति कोपवचनैरानर्तितभ्रूलता ।
शीत्काराञ्चितलोचना सरभसं यैश्चुम्बिता मानिनी
प्राप्तं तैरमृतं मुधैव मथितो मूढैः सुरैः सागरः ॥ ३२ ॥

सुप्तोयं सखि सुप्यतामिति गताः सख्यस्ततोऽनन्तरं
प्रेमावासितया मया सरलया न्यस्तं मुखं तन्मुखे ।

ज्ञातेऽलीकनिमीलने नयनयोर्धूर्तस्य रोमाञ्चतो
लज्जासीन्मम तेन साप्यपहृता तत्कालयोग्यैः क्रमैः ॥३३॥
कोपो यत्र भ्रुकुटिरचना निग्रहो यत्र मौनं
यत्रान्योन्यस्मितमनुनयो यत्र दृष्टिः प्रसादः ।
तस्य प्रेम्णस्तदिदमधुना वैषमं पश्य जातं
त्वं पादान्ते लुठसि नहि मे मन्युमोक्षः खलायाः ॥ ३४ ॥
सुतनु जहिहि कोपं पश्य पादानतं मां
न खलु तव कदाचित् कोप एवंविधोऽभूत् ।
इति निगदति नाथे तिर्यगामीलिताक्ष्या
नयनजलमनल्पं मुक्तमुक्तं न किञ्चित् ॥ ३५ ॥
गाढालिङ्गनवामनीकृत[illegible]चप्रोद्भिन्नरोमोद्गमा
सान्द्रस्नेहरसातिरेकविगलत्श्रीमन्नितम्बाम्बरा ।
मामामानद मातिमामलमितिक्षामाक्षरोल्लापिनी
सुप्ता किन्नु मृता नु किं मनसि मे लीना विलीना नु
पटालग्ने पत्यौ नमयति मुखं ज[illegible] [ किं ॥३६॥
हठाश्लेषं वांछत्यपहरति गात्राणि निभृतं ।
न शक्नोत्याख्यातुं [illegible]
ह्रिया ताम्यत्यन्तः प्रथमपरिहासे नववधूः ॥ ३७ ॥
गते प्रेमाबन्धे प्रणयब[illegible]माने विगलिते
निवृत्ते सद्भावे जन इव जने गच्छति पुरः ।
तदुत्प्रेक्ष्योत्प्रेक्ष्य प्रियसखि गतांस्तांश्च दिवसान्
न जाने को हेतुर्दलति शतधा यन्न हृदयं ॥ ३८ ॥

चिरविरहिणोरुत्कण्ठार्त्तिश्लथीकृतगात्रयोर्
नवमिव जगज्जातं भूयश्चिरादभिनन्दतोः।
कथमपि दिने दीर्घे याते निशामधिरूढयोः
प्रसरति कथा बह्वी यूनोर्यथा न तथा रतिः॥ ३९॥

दीर्घा वन्दनमालिका विरचिता दृष्ट्यैव नेन्दीवरैः
पुष्पाणां प्रकरः स्मितेन रचितो नो कुन्दजात्यादिभिः।
दत्तः स्वेदमुचा पयोधरयुगे नार्घ्यो न कुम्भाम्भसा
स्वैरेवावयवैः प्रियस्य विशतस्तन्व्या कृतं मङ्गलं॥ ४०॥

कान्ते सागसि शायिते प्रियसखीवेशं विधायागते
भ्रान्त्यालिङ्ग्य मया रहस्यमुदितं तत्सङ्गमाकाङ्क्षया।
मुग्धे दुष्करमेतदित्यतितरामुक्त्वा सहासं बलाद्
आलिङ्ग्य छलितास्मि तेन कितवेनाद्य प्रदोषागमे॥ ४१॥

आशङ्क्य प्रणतिं पटान्तपिहितौ पादौ करोत्यादरात्
व्याजेनागतमावृणोति हसितं न स्पष्टमुद्वीक्षते।
मय्यालापवति प्रतीपवचनं सख्या सहाभाषते
तस्यास्तिष्ठतु निर्भरप्रणयिता मानोपि रम्योदयः॥ ४२॥

सा यावन्ति पदान्यलीकवचनैरालीजनैः शिक्षिता
तावन्त्येव कृतागसो द्रुततरं व्याहृत्य पत्युः पुरः।
प्रारब्धा पुरतो यथा मनसिजस्याज्ञा तथा वर्तितुं
प्रेम्णोमौग्ध्यविभूषणस्य सहजः कोप्येष कान्तः क्रमः॥४३॥

दूरादुत्सुकमागते विवलितं सम्भाषिणि स्फारितं
संश्लिष्यत्यरुणं गृहीतवसने किञ्चिन्नतभ्रूलतं।

मानिन्याश्चरणानतिव्यतिकरे वाष्पाम्बुपूर्णेक्षणं
चक्षुर्जातमहो प्रपञ्चचतुरं जातागसि प्रेयसि ॥ ४४ ॥
अङ्गानामतितानवं कथमिदं कम्पश्च कस्मात् कुतो
मुग्धे पाण्डुकपोलमाननमिति प्राणेश्वरे पृच्छति ।
तन्व्या सर्वमिदं स्वभावजमिति व्याहृत्य पक्ष्मान्तर-
व्यापी वाष्पभरस्तया चलितया निःश्वस्य मुक्तोन्यतः ॥४५॥
पुरस्तन्व्या गोत्रस्खलनचकितोऽहं नतमुखः
प्रवृत्तो वैलक्ष्यात् किमपि लिखितुं दैवहतकः ।
स्फुटो रेखान्यासः कथमपि स तादृक् परिणतो
गता येन व्यक्तिं पुनरवयवैः सैव तरुणी ॥ ४६ ॥
कठिनहृदये मुञ्च भ्रान्तिं व्यलीककथ श्रितां
पिशुनवचनैर्दुःखं नेतुं न युक्तमिमं जनं ।
किमिदमथवा सत्यं मुग्धे त्वया विनिश्चितं
यदभिरुचितं तन्मे कृत्वा प्रिये सुखमास्यतां ॥ ४७ ॥
मन्दं मुद्रितपांशवः परिपतज्झंकारझंझामरुद्-
वेगध्वस्तकुटीरकान्तरगलच्छिद्रेषु लब्धान्तराः ।
कर्मव्यग्रकुटुम्बिनीकुचतटस्वेदाम्बुदः प्रावृषः
प्रारम्भे निपतन्ति कन्दलदलोल्लासाः पयोविन्दवः ॥४८॥
पीतस्तुषारकिरणो मधुनैव सार्द्धम्
अन्तः प्रविश्य चषके प्रतिविम्बवर्ती ।
मानान्धकारमपि मानवतीजनस्य
नूनं बिभेद यदसौ प्रससाद सद्यः ॥ ४९ ॥

नभसि जलदलक्ष्मीं संभृतां वीक्ष्य दिष्ट्या
प्रसरसि यदि कान्तेत्यर्द्धमुक्ता कथञ्चित् ।
मम पटमवलम्ब्य प्रोल्लिखन्ती धरित्रीं
तदनुकृतवती सा यत्र वाचो निवृत्ताः ॥ ५० ॥
इयमसौ तरलायतलोचना गुरुसमुन्नतपीनपयोधरा ।
पृथुनितम्बभरालसगामिनी प्रियतमा मम जीवित-
सालक्तकेन नवपल्लवकोमलेन [हारिणी ॥ ५१ ॥
पादेन नूपुरवता मदनालसेन ।
यस्ताड्यते दयितया प्रणयापराधात्
सोऽङ्गीकृतो भगवता मकरध्वजेन ॥ ५२ ॥
बालेनाथ विमुञ्च मानिनि रुषं रोषान्मया किं कृतं
खेदोस्मासु न मेऽपराध्यति भवान् सर्वेऽपराधा मयि ।
तत् किं रोदिषि गद्गदेन वचसा कस्याग्रतो रुद्यते
नन्वेतन् मम का तवास्मि दयिता नास्मीत्यतो रुद्यते ॥ ५३॥
नीत्वोच्चैर्विक्षिपन्तः कृततुहिनकणासारसङ्गान् परागान्
कौन्दानानन्दताली नतिततरसुरभीन् भूरिशो दिङ्मुखेषु ।
एते ते कुङ्कुमाक्तस्तनकलसभरास्फालनादुच्छलन्तः प्रीत्वा
पीत्वाश्वासान् सुदत्या शिशुहरिणदृशां हैमना वांतिवाताः ॥ ५४॥
श्रुत्वा तन्व्या निशीथे नवघनरसितं विस्लथाङ्गं पतित्वा
शय्यायां भूमिपृष्ठे करतलधृतया दुःखितालीजनेन ।
सोत्कण्ठं मुक्तकण्ठं कठिनकुचतटाघातशीर्णाश्रुबिन्दु
स्मृत्वा२ प्रियस्य स्खलितमृदुवचो रुद्यते पान्थवध्वा ॥ ५५ ॥

श्लिष्टः कण्ठे किमिति न मया मूढया प्राणनाथश्
चुम्बत्यस्मिन् वदनविधुतिः किं कृता किन्न दृष्टः ।
नोक्तः कस्मादिति नववधूचेष्टितं चिन्तयन्ती
पश्चात्तापं वहति तरुणी प्रेम्णि जाते रसज्ञा ॥ ५६ ॥

श्रुत्वा नामापि यस्य स्फुटघनपुलकं जायतेऽङ्गं समन्तात्
दृष्ट्वा यस्याननेन्दुं भवति वपुरिदं चन्द्रकान्तानुकारि ।
तस्मिन्नागत्य कण्ठग्रहणसरभसस्थायिने प्राणनाथे
भग्नामानस्य चिन्ता भवति मम पुनर्वज्रमय्याः कदा नु ॥ ५७ ॥

रामाणां रमणीयवक्त्रशशिनः स्वेदोदबिन्दुप्लुतो
व्यालोलालकवल्लरीं प्रचलयन् धुन्वन् नितम्बाम्बरं ।
प्रातर्वाति मधौ प्रकामविकशद्राजीवराजीरजो-
जालामोदमनोहरो रतिरसग्लानिं हरन्मारुतः ॥ ५८ ॥

अङ्गं चन्दनपाण्डुपल्लवमृदुस्ताम्बूलताम्राधरो
धारायन्त्रजलाभिषेककलुषे धौताञ्जने लोचने ।
अन्तः पुष्पसुगन्धिरार्द्रकवरी सर्वाङ्गलग्नाम्बरं
रामाणां रमणीयतां विदधति ग्रीष्मापराह्णागमे ॥ ५९ ॥

वरमसौ दिवसो न पुनर्निशा ननु निशैव वरं न पुनर्दिवा ।
उभयमेतदुपैत्वथवा क्षयं प्रियजनेन न यत्र समागमः ॥ ६०

लोलैर्लोचनवारिभिः सशपथैः पादप्रणामैः प्रियै-
रन्यास्ता विनिवारयन्ति कृपणाः प्राणेश्वरं प्रस्थितं ।
पुण्याहं व्रजमङ्गलं सुदिवसं प्रातः प्रयातस्य ते
यत् स्नेहोचितमीहितं प्रियतम त्वं निर्गतः श्रोष्यसि ॥ ६१ ॥

लग्ना नांशुकपल्लवे भुजलता न द्वारदेशेऽर्पिता
नोवा पादतले तया निपतितं तिष्ठेति नोक्तं वचः ।
काले केवलमम्बुदातिमलिने गन्तुं प्रवृत्तः शठः
तन्व्या बाष्पजलौघकल्पितनदीपूरेण बद्धः प्रियः ॥ ६२ ॥

न जाने संमुखायाते प्रियाणि वदति प्रिये ।
सर्वाण्यङ्गानि मे यान्ति श्रोत्रतां किमु नेत्रतां ॥ ६३ ॥

विरहविषमः कामो वामस्तनुं कुरुते तनुं
दिवसगणनादक्षश्चासौ व्यपेतघृणो यमः ।
त्वमपि वशगो मानव्याधेर्विचिन्तय नाथ हे
किशलयमृदुर्जीवेदेवं कथं प्रमदाजनः ॥ ६४ ॥

पादासक्ते सुचिरमिहते वामता कैव कान्ते
सन्मार्गस्थे प्रणयिनि जने कोपने कोऽपराधः ।
इत्थं तस्याः परिजनकथा कोपवेगोपशान्तौ
बाष्पोद्भेदैस्तदनु सहसा न स्थितं न प्रयातं ॥ ६५ ॥

पुराभूदस्माकं नियतमविभिन्ना तनुरियं
ततो नु त्वं प्रेयान् वयमपि हताशाः प्रियतमाः ।
इदानीं नाथस्त्वं वयमपि कलत्रं किमपरं
मयाप्तं प्राणानां कुलिशकठिनानां फलमिदं ॥ ६६ ॥

मुग्धे मुग्धतयैव नेतुमखिलः कालः किमारभ्यते
मानं धत्स्व धृतिं बधान ऋजुतां दूरे कुरु प्रेयसि ।
सख्यैवं प्रतिबोधिता प्रतिवचस्तामाह भीतानना
नीचैः शंस हृदि स्थितो ननु स मे प्राणेश्वरः श्रोष्यति ॥ ६७ ॥

पीतो यतःप्रभृति कामपिपासितेन
तस्या मयाधररसः प्रचुरः प्रियायाः।
तृष्णा ततःप्रभृति मे द्विगुणत्वमेति
लावण्यमस्ति बहु तत्र किमत्र चित्रं॥ ६८॥
क्व प्रस्थितासि करभोरु घने निशीथे
प्राणाधिको वसति यत्र जनः प्रियो मे।
एकाकिनी वद कथं न बिभेषि बाले
नन्वस्ति पुंखितशरो मदनः सहायः॥ ६९॥
लीलातामरसाहतोऽन्यवनितानिःशङ्कदष्टाधरः
कश्चित् केसरदूषितेक्षण इव व्यामील्य नेत्रे स्थितः।
मुग्धा कुड्मलिताननेन दधती वायुं स्थिता तस्य सा
भ्रान्त्या धूर्ततया च वेपथुमती तेनानिशं चुम्बिता॥ ७०॥
स्फुटतु हृदयं कामः करोतु तनुं तनुं
न सखि चटुलप्रेम्णा कार्यं पुनर्दयितेन मे।
इति सरभसं मानोद्रेकादुदीर्य वचस्तया
रमणपदवी शारङ्गाक्ष्या ससंभ्रममुद्वीक्षिता॥ ७१॥
पश्चाश्लेषविशीर्णचन्दनरजःपुञ्जप्रकर्षादियं
शय्या सम्प्रति कोमलाङ्गि कठिनेत्यारोप्य मां वक्षसि।
गाढोरःप्रपीडनाकुलतया पादाग्रसंदंशके-
नाकृष्याम्बरमात्मनो यदुचितं धूर्तेन तत् प्रस्तुतं॥ ७२॥
कथमपि प्रत्यावृत्ते प्रिये स्खलितोत्तरे
विरहकृशया कृत्वा व्याजं प्रकल्पितमश्रुतं।

अस .नसखीश्रोत्रप्राप्तिप्रमादससंभ्रमं
प्रचलितदृशा शून्ये गेहे समुच्छ्वसितं पुनः ॥ ७३ ॥
आदृष्टिप्रसरं प्रियस्य पदवीमुद्वीक्ष्य निर्विणया
विच्छिन्नेषु पथिष्वऽहः परिणतौ ध्वान्ते समुन्मीलति ।
दत्त्वैकं सशुच गृहं प्रतिपदं पान्थस्त्रियास्मिन् क्षणे
सोऽभूदागत इत्यमन्दवलितग्रीवं पुनर्वीक्षितः ॥ ७४ ॥
आयाते दयिते मनोरथशतैर्नीत्वा कथाञ्चिद्दिनं
वैदग्ध्याऽपगमाज्जडे परिजने दीर्घां कथां कुर्वति ।
दष्टास्मीत्यभिधाय सत्वरतरं व्याधूय चीनांशुकं
तन्व्यङ्ग्या रतिकातरेण मनसा नीतः प्रदीपः शमं ॥ ७५ ॥
अनालोच्य प्रेम्णः परिणतिमनादृत्य सुहृदस्
त्वया मुग्धे मानः किमिति सरले प्रेयसि कृतः ।
समाकृष्टा ह्येते प्रलयदहनोद्भासुरशिखाः
स्वहस्तेनाङ्गारास्तदलमधुनारण्यरुदितैः ॥ ७६ ॥
शून्यं वासगृहं विलोक्य शयनादुत्थाय किञ्चिच्छनैर्
निद्राव्याजमुपागतस्य सुचिरं निर्वर्ण्य पत्युर्मुखं ।
विश्रब्धं परिचुम्ब्य जातपुलकामालोक्य गण्डस्थलीं
लज्जानम्रमुखी प्रियेण हसता बाला चिरं चुम्बिता ॥ ७७ ॥
जाता नोत्कलिका स्तनौ न लुलितौ गात्रं न रोमाञ्चितं
वक्त्रं स्वेदकणाञ्चितं न सहसा यावत् शठेनामुना ।
दृष्टेनैव मनोहृतं धृतिमुषा प्राणेश्वरेणाद्य मे
तत्केनापि निरूप्य माननिपुणो मानः समाधीयतां ॥ ७८ ॥

दृष्टः कातरनेत्रया ।चिरत बध्वाञ्जलिं याचितः
पश्चादंशुकपल्लवेन विधृतो निर्व्याजमालिंगितः ।
इत्याक्षिप्य यदा समस्तमघृणो गन्तुं प्रवृत्तः शठः
पूर्वंप्राणपरिग्रहो दयितया मुक्तस्ततो वल्लभः ॥ ७९ ॥
अङ्गुल्यग्रनखेन वाष्पसलिलं निक्षिप्य निक्षिप्य किं
तूष्णीं रोदिषि कोपने बहुतरं फुत्कृत्य रोदिष्यसि ।
यस्यास्ते पिशुनोपदेशवचनै र्मानेऽतिभूमिं गते
निर्विण्णोऽनुनयं प्रति प्रियतमो मध्यस्थतामेष्यति ॥ ८० ॥
तद्वक्राभिमुखं मुखं विनमितं दृष्टिः कृता पादयोः
तस्यालापकुतूहलाकुलतरे श्रोत्रे निरुद्धे मया ।
पाणिभ्याञ्च तिरस्कृतः सपुलकः स्वेदोद्गमोगण्डयोः
सख्यः किं करवाणि यान्ति शतधा यत्कञ्चुके सन्धयः ॥८१॥
कृतो दूरादेव स्मितमधुरमभ्युद्गमविधिः
शिरस्याज्ञा न्यस्ता प्रतिवचनमु ैः प्रणमितं ।
न दृष्टेः शैथिल्यं मिलन इति चेतो दहति मे
निगूढान्तःकोपात् कठिणहृदये संवृतिरियं ॥ ८२ ॥
एकस्मिन् शयने विपक्षरमणीनामग्रहे मुग्धया
सद्यः कोपपराङ्मुखं शयितया चाटूनि कुर्वन्नपि ।
आवेगादवधीरितः प्रियतमस्तूष्णीं स्थितस्तत्क्षणात्
माभूत् सुप्तइवैष मन्दवलितग्रीवं पुनर्वीक्षितः ॥ ८३ ॥
मलयमरुतां व्राता गता विकासितमल्लिका-
परिमलभरो भग्नो ग्रीष्मस्त्वमुत्सहसे यदि ।

घन घटयितुं निःस्नेहं यएव निवर्तने
प्रभवति गवां किन्नश्छिन्नं सएव धनञ्जयः ॥ ८४ ॥

स्वं दृष्ट्वा करजक्षतं मधुमदक्षीबा[illegible]र्ष्यया
गच्छन्ती क्व नु गच्छसीति विधृता बाला पटान्ते मया ।
प्रत्यावृत्तमुखी सवाष्पनयना मां मुञ्च मुञ्चेति सा
कोपात् प्रस्फुरिताधरा यदवदत्तत् केन विस्मर्यते ॥ ८५ ॥

सालक्तकं शतदलाधिककान्तिरम्यं
रत्नौघधामनिकरारुणनूपुरञ्च ।
क्षिप्तं भृशं कुपितया तरलोत्पलाक्ष्या
सौभाग्यचिह्नमिव मूर्द्धि पदं विरेजे ॥ ८६ ॥

कपोले पत्त्रालीकरतलनिरोधेन [illegible]
निपीतो निःश्वासैरयममृतहृद्योऽधररसः ।
मुहुः कण्ठे लग्नस्तरलयति वाष्पस्तनतटं
प्रियो मन्युर्जातस्तव निरनुरोधे न तु वयं ॥ ८७ ॥

लाक्षालक्ष्मललाटपट्टमभितः केयूरमुद्रा गले
वक्त्रे कज्जलकालिमा नयनयोस्ताम्बूलरागोदयः ।
दृष्ट्वा कोपविधायि मण्डनमिदं प्रातश्चिरं प्रेयसो
लीलातामरसोदरे मृगदृशः श्वासाः समाप्तिं गताः ॥ ८८ ॥

तप्ते महाविरहवह्निशिखावलीभिर्
आपाण्डुरस्तनतटे हृदये प्रियायाः ।
रथ्यालिवीक्षणनिवेशितलोलदृष्टेर्
नूनं छनच्छनिति वाष्पकणाः पतन्ति ॥ ८९ ॥

चिन्तामोहविनिश्चलेन मनसा मौनेन पादानतः
प्रत्याख्यानपराङ्मुखः प्रियतमो गन्तुं प्रवृत्तोऽधुना।
सव्रीडैरलसै निरन्तरलुठ[illegible]कुलैर्लोचनैः
श्वासोत्कम्पकुचं निरीक्ष्य सुचिरं जीवाशया वारितः ॥९०॥
तन्वङ्ग्या गुरुसन्निधौ नयनजं यद्वारि संस्तम्भितं
तेनान्तर्गलितेन मन्मथशिखी सिक्तोऽनुषङ्गोद्भवः।
मन्ये तस्य निरस्यमानकिरणस्यैषा मुखेनोद्गता
श्वासामोदसमा[illegible]लालिनि[illegible] व्याजेन धूमावलिः॥९१॥
भ्रूभेदो रचितः चिरं नयनयोरभ्यस्तमामीलनं
रोद्धुं शिक्षितमादरेण हसितं मौनेभियोगः कृतः।
धैर्यं कर्तुमपि स्थिरीकृतमिदं चेतः कथञ्चिन्मया
वद्धोमानपरिग्रहे परिकरः सिद्धिस्तु दैवे स्थिता॥९२॥
देशैरन्तरिता शतैश्च सरितामुर्वीभृतां काननैर्
यत्नेनापि न याति लोचनपथं [illegible] जानन्नपि।
उद्ग्रीवश्चरणार्द्धरुद्धवसुधः कृत्वाश्रुपूर्णौ दृशौ तामाशां
पथिकस्तथापि किमपि ध्यायन्मुहुः [illegible]॥९३॥
कोपस्त्वया हृदि कृतो यदि पङ्कजाक्षि
सोऽस्तु प्रियस्तव किमद्य विधेयम[illegible]त्।
आश्लेषमर्पय मदर्पितपूर्वमुच्चैः
मह्यं समर्पय मदर्पितचुम्बनंच॥९४॥
ऊरुद्वयं मृगदृशः कदलस्य काण्डौ
मध्यञ्च वेदिरतुलं स्तनयुग्ममस्याः।

लावण्यवारिपरिपूरितशातकुम्भ-
कुम्भौ मनोजनृपतेरभिषेचनाय ॥ ९५ ॥

चपलहृदये किं स्वातन्त्र्यात्तथा गृहमागतः
[illegible]तः प्रेमार्द्रार्द्रैः प्रियः समुपेक्षितः ।
त[illegible]धुना य[illegible]वं निर[illegible]सुखोदया
रुदितशरणा दुर्जातीनां सहस्व रुषां फलं ॥ ९६ ॥

रात्रौ वारिभरालसाम्बुदरवोद्विग्नेन जाताश्रुणा
पान्थेनात्ममनोजदुःखपिशुनं गीतं तथोत्कण्ठया ।
आस्तां जीवितहारिणः प्रवसनालापस्य संकीर्तनं
मानस्यापि जलाञ्जलिः सरभसं लोकेन [illegible] ॥ ९७ ॥

हारो जलार्द्रवसनं नलिनीदलानि
प्रालेयशीकरमुचस्तुहिनांशुभासः ।
यस्येन्धनानि सरसानि च चन्दनानि
निर्वाणमेष्यति कथं स मनोभवाग्निः ॥ ९८ ॥

तन्वी शरत्त्रिपथगा [illegible] कपोलौ
लोले दृशौ रुचि चञ्चलखञ्जरीटौ ।
तद्बन्धनाय सुचिरार्पितसुभ्रुचाप-
चाण्डालपाशयुगलाविव शून्यकर्णौ ॥ ९९ ॥

हारोयं हरिणाक्षीणां लुठति स्तनमण्डले ।
मुक्तानामप्यवस्थेयं के वयं स्मरकिङ्कराः ॥ १०० ॥

इत्यमरुशतकं परिपूर्णं ॥

## शृङ्गारशतकं ।

शम्भुस्वयम्भुहरयो हरिणेक्षणानां
येनाक्रियन्त सततं गृहकर्मदासाः ।
वाचामगोचरचरित्रविचित्रताय
तस्मै नमो भगवते कुसुमायुधाय ॥ १ ॥
स्मितेन भावेन च लज्जया भिया
पराङ्मुखैरर्द्धकटाक्षवीक्षणैः ।
वचोभिरीर्ष्याकलहेन लीलया
समस्तभावैः खलु बन्धनं स्त्रियः ॥ २ ॥
भ्रूचातुर्याकुञ्चिताक्षाः कटाक्षाः
स्निग्धा वाचो लज्जिताश्चैव हासाः ।
लीलामन्दं प्रस्थितं च स्थितञ्च
स्त्रीणामेतत् भूषणञ्चायुधञ्च ॥ ३ ॥
क्वचित्सुभ्रूभङ्गैः क्वचिदपि च लज्जापरिणतैः
क्वचिद्भीतित्रस्तैः क्वचिदपि च लीलाविलसितैः ।
नवोढानामेभिर्वदनकमलैर्नेत्रचलितैः
स्फुरल्लीलालीनाप्रकरपरिपूर्णाइव दृशः ॥ ४ ॥
वक्त्रं चन्द्रविकासि पङ्कजपरीहासक्षमे लोचने
वर्णःस्वर्णमपाकरिष्णुरलिनीजिष्णुः कचानाञ्चयः ।
वक्षोजाविभकुम्भसम्भ्रमहरौ गुर्वी नितम्बस्थली
वाचां हारि च मार्दवं युवतिषु स्वाभाविकं मण्डनं ॥ ५ ॥

स्मितं किञ्चिद्वक्त्रे सरलतरलो दृष्टिविभवः।
परिस्पन्दो वाचामभिनवविलासोक्तिसरसः ॥ ६ ॥
गतीनामारम्भः किसलयितलीलापरिकरः।
स्पृशन्त्यास्ता ...थं किमिह नहि रम्यं मृगदृशः ॥ ७ ॥
द्रष्टव्येषु किमुत्तमं मृगदृशां प्रेमप्रसन्नं मुखं।
घ्रातव्येष्वपि किन्तदास्यपवनः श्राव्येषु किन्तद्वचः ॥ ८ ॥
किं खाद्येषु तदोष्ठपल्लवरसः स्पृश्येषु किं तत्तनुः।
ध्येयं किन्नवयौवनं सहृदयैः सर्वच तद्विभ्रमः ॥ ९ ॥
एताः स्खलद्वलयसंहतिमेखलोत्थ
झङ्कारनूपुररवाहृतराजहंसाः।
कुर्वन्ति कस्य न मनो विवशं तरुण्यो
विश्वस्तमुग्धहरिणीसदृशैः कटाक्षैः ॥ १० ॥
कुङ्कुमपङ्ककलङ्कितदेहा गौ...रकम्पितहारा।
नूपु हंसरणत्पदपद्मा कन्न वशीकुरुते भुवि रामा ॥ ११ ॥
नूनं हि ते कविवरा विपरीतबोधा
ये नित्यमाहुरबलाइति कामिनीनां।
याभिर्विलोलतरतारकदृष्टिपातैः
शक्रादयोपि विजितास्त्वबलाः कथन्ताः ॥ १२ ॥
नूनमाज्ञाकरस्तस्याः सुभ्रुवो मकरध्वजः।
यतस्तन्नेचसञ्चारसूचितेषु प्रवर्तते ॥ १३ ॥
केशाः संयमिनः ...पे परं पारं गते लोचने
अन्तर्वक्त्रमपि स्वभ...वशुचिभिः कीर्णं द्विजानां गणः।

मुक्तानां सतताधिवासरुचिरं वक्षोजकुम्भद्वयम्
इत्थं तन्वि वपुः प्रशान्तमपि ते
क्षोभं करोत्येव नः ॥ १४ ॥
मुग्धे धनुष्मती केयमपूर्वापि च दृश्यते ।
यथाविध्यसि चेतांसि गुणैरेव न शायकैः ॥ १५ ॥
सति प्रदीपे सत्यग्नौ सत्सु तारारवीन्दुषु ।
विना मे मृगशावाक्ष्या तमोभूतमिदं जगत् ॥ १६ ॥
यद्वृत्तस्तनभार एष तरले नेत्रे चले भ्रूलते
रागान्धेषु तदोष्ठपल्लवमिदं कुर्वन्तु नाम व्यथां ।
सौभाग्याक्षरपंक्तिरेव लिखिता पुष्पायुधेन स्वयं
मध्यस्थापि करोति तापमधिकं रोमावली
केन सा ॥ १७ ॥
गुरुणा स्तनभारेण मुखचन्द्रेण भास्वता ।
शनैश्चराभ्यां पादाभ्यां रेजे ग्रहमयीव सा ॥ १८ ॥
तस्याः स्तनौ यदि घनौ जघनं विहारि
वक्त्रं च चारु तव चित्त किमाकुलत्वं ।
पुण्यं कुरुष्व यदि तेषु तवास्ति वांछा
पुण्यैर्विना न हि भवन्ति समीहितार्थाः ॥ १९ ॥
मात्सर्यमुत्सार्य विचार्य कार्यम्
आर्याः समर्यादमिदं वदन्तु ।
सेव्या नितम्बाः किमु भूधराणाम्
उत स्मरस्मेरविलासिनीनां ॥ २० ॥

मुखेन चन्द्रकान्तेन महानीलैः शिरोरुहैः ।
पाणिभ्यां पद्मरागाभ्यां रेजे रत्नमयीव सा ॥ २२ ॥
संमोहयन्ति मदयन्ति विडम्बयन्ति
निर्भर्त्सयन्ति रमयन्ति विषादयन्ति ।
एताः प्रविश्य सदयं हृदयं नराणां
किन्नाम वामनयना न समाचरन्ति ॥ २३ ॥
विश्रम्य विश्रम्य वनद्रुमाणां
छायासु तन्वी विचचार काचित् ।
स्तनोत्तरीयेण करोद्धृतेन
निवारयन्ती शशिनो मयूखान् ॥ २४ ॥
अदर्शने दर्शनमात्रकामा
दृष्टा परिष्वङ्गरसैकलोला ।
आलिङ्गितायां पुनरायताक्ष्याम्
आशास्महे विग्रहयोरभेदं ॥ २५ ॥
मालती शिरसि जृम्भणोन्मुखी
चन्दनं वपुषि कुङ्कुमाविलं ।
वक्षसि प्रियतमा मनोहरा
स्वर्गएष परिशिष्टआगतः ॥ २६ ॥

ऋतुवर्णनं तत्रादौ वसन्तः॥

परिमलभृतो वाताः शाखानवाङ्कुरकोटयो
मधुरविरतोत्कण्ठा वाचः प्रियाः पिकपक्षिणां।
विरलसुरतस्वेदोद्गमा बधूवदनेन्दवः
प्रसरति मधौ रात्र्याञ्जातो न
कस्य गुणोदयः॥ ३५॥
मधुरयं मधुरैरपि कोकिला
कलकलैर्मलयस्य च वायुभिः।
विरहिणः प्रणिहन्ति शरीरिणो
विपदि हन्त सुधापि विषायते॥ ३६॥
आवासः किल किञ्चिदेव
दयितापार्श्वे विलासालसः
कर्णे कोकिलकाकलीकल
रवस्मेरो लतामण्डपाः।
गोष्ठीसत्कविभिः समङ्कतिपयैः
सेव्याः शितांशोः कराः
केषाञ्चित्सुखयन्ति नेत्रहृदये
चैत्रे विचित्राः क्षपाः॥ ३७॥

पान्थस्त्रीविरहानिलाहुति
कलामातन्वती मञ्जरी ।
मा कुन्देषु पिकाङ्गनाभिरधुना
सोत्कण्ठमालोक्यते ॥ ३८ ॥
अप्येते नवपाटलाः परिमलाः
प्राग्भारपाटच्चरा ।
वान्तिक्लन्तिनतानवक्षताः
श्रीखण्डशैलानिलाः ॥ ३९ ॥
सहकारकुसुमकेसरनिकरभरा
मोदमूर्छिता दिगन्ते ।
मधुरमधुविधुरमधुपे मधौ
भवेदुत्कण्ठा ॥ ४० ॥

### ग्रीष्मः ॥

अच्छाच्छचन्दनरसार्द्रकरामृगाक्ष्यो
धारागृहाणि कुसुमानि च कौमुदी च ।
मन्दोमरुत्सुमनसः शुचि हर्म्यपृष्ठं
ग्रीष्मे मदञ्च मदनञ्च विवर्द्धयन्ति ॥ ४१ ॥

स्रजो हृद्यामोदाव्यजनपवनश्चन्द्रकिरणाः
परागः कासारी मलयजरजः सिन्धुविशदं ।
सुचिः सौधोत्सङ्गः प्रतनु वसनं पङ्कजदृशो
निदाघे तुर्णं तत्सुखमुपलभन्ते सुकृतिनः ॥ ४२ ॥

सुधाशुभ्रन्धाम स्फुरदमलरश्मिः शशधरः
प्रियावक्त्राम्भोजं मलयजरजश्चातिसुरभिः ।
स्रजो हृद्यामोदास्तदिदमखिलं रागिनि जने
करोत्यन्तः क्षोभं नतु विषयसंसर्गविमुखे ॥ ४३ ॥

### वर्षासमयः ।

तरुणीवेषोद्दीपितकामा विकसज्जातीपुष्पसुगन्धिः ।
उन्नतपीनपयोधरभारा प्रावृट् कुरुते कस्य न हर्षं ॥ ४४ ॥

वियदुपचितमेघम्भूमयः कन्दलिण्यो
नवकुटजकदम्बामोदिनो गन्धवाहाः ।
शिखिकुलकलकेका एव रम्या वनान्ताः
सुखिनमसुखिनं वा सर्वमुत्कण्ठयन्ति ॥ ४५ ॥

उपरि घनं घनपटलन्तिर्य्यग्गिरयोपि नर्तितमयराः ।

वसुधा कन्दलधवला दृष्टिं पथिकः क्व पातयतु ॥ ४६ ॥

इतोविद्युद्वल्ली विलसितमितः केतकितरो
स्फुरद्गन्धः प्रोद्यज्जलदनिनदस्फूर्जितमितः ।
इतः केकीक्रीडाकलकलरवः पक्ष्मलदृशां
कथं यास्यन्त्येते विरहदिवसाः सम्भृतरसाः ॥ ४७ ॥

असूचीसंचारे त्वमसि नभसि प्रौढजलद
ध्वनिप्रासे तस्मिन् पतति दृषदां तीरनिचये ।
इदं सौदामिन्याः कनककमनीयं विलसितं
मुदश्च ग्लानिश्च प्रथयति पथिष्वेव सुदृशां ॥ ४८ ॥

आसारेषु न हर्म्यतः प्रियतमैर्यातुं यदा शक्यते
शीतोत्कम्पनिमित्तमायतदृशीगाढं समालिङ्ग्यते ।
जाताः शीतलशीकराश्च मरुतोवात्यन्तखेदछिदो
धन्यानां वत दुर्दिनं सुदिनतां याति प्रियासङ्गमे ॥ ४९ ॥

## शरदः ॥

अर्द्धं नीत्वा निशायाः सरभससुरतायासखिन्नश्लथाङ्गः
प्रोद्भूतासह्यतृष्णा मधुमदनिरतोहर्म्यपृष्ठे विविक्ते ।
सम्भोगक्लान्तकान्ता शिथिलभुजलता तर्जितं कर्करान्तो
ज्योत्स्नाभिन्नाधरांशं पिवति न सलिलं शारदं मन्दभाग्यः
हेमन्ते दधिदुग्धसर्पिरशनामाञ्जिष्ठवासोभृताः [ ॥५०॥
काश्मीरद्रवसान्द्रदिग्धवपुषः खिन्ना विचित्रैरतैः ।
पीनोरस्थलकामिनीजनकृताश्लेषा गृहाभ्यन्तरे

ताम्बूलीदलपूगपूरितमुखा धन्याः सुखं शेरते ॥ ५१ ॥

शिशिरः ॥

चुम्बन्तोगण्डभित्तीरलकवति मुखे शीत्कृतान्यादधाना
वक्षस्युत्कञ्चुकेषु स्तनभरपुलकोद्भेदमापादयन्तः ।
उरूनाकम्पयन्तः पृथुजघनतटात्स्रंसयन्तोंशुकानि व्यक्तं
कान्ताजनानां विटचरितकृतः शैशिरावान्ति वाताः ॥५२॥
केशानाकलयन् दृशोमुकुलयन्वासोबलादाक्षिपन्
आतन्वन् पुलकोद्गमं प्रकटयन्नालिङ्ग्य कम्पं शनैः ।
वारम्बारमुदारशीत्कृतकृतोदन्तच्छदान् पीडयन्
प्रायः शैशिरएषसम्प्रति मरुत् कान्तासु कान्तायते ॥५३॥
आसाराः सन्ततोमी विरति विरसायासविषया
जुगुप्सन्तां यद्वा ननु सकलदोषास्पदमिति ।
तथाप्यन्तस्तत्वे प्रणिहितधियामप्यतिबलस्
तदीयो नाख्येयः स्फुरति हृदये कोपि महिमा ॥ ५४ ॥
भवन्तोवेदान्तप्रणिहितधियां सन्तु गुरवो
विदग्धालापानां वयमपि कवीनामनुचराः ।
तथाप्येतद्भूमौ नहि परहितात् पुण्यमधिकं
न चास्मिन् संसारे कुवलयदृशो रम्यमपरं ॥ ५५ ॥
किमिह वहुभिरुक्तैर्युक्तिशून्यैः प्रलापैर्
दयमिह पुरुषाणां सर्वदासेवनीयं ।
अभिनवमदलीलालालसं सुन्दरीणां

स्तनभरपरिखिन्नं यौवनं वा वनं वा ॥ ५६ ॥
सत्यं जना वच्मि न पक्षपाताल्
लोकेषु सर्वेषु च तथ्यमेतत् ।
नान्यन्मनोहारि नितम्बिनीभ्यो
दुःखैकहेतुर्न च कश्चिदन्यः ॥ ५७ ॥

## दुर्विरक्तप्रशंसा ॥

तावदेव कृतिनामपि स्फुरत्येष निर्मलविवेकदीपकः ।
यावदेव न कुरङ्गचक्षुषां ताड्यते चपललोचनांचलैः ॥ ५८ ॥
वचसि भवति सङ्गत्यागमुद्दिश्य वार्ता
श्रुतिमुखरमुखानां केवलं पण्डितानां ।
जघनमरुणरत्नग्रन्थिकाञ्चीकलापं
कुवलयनयनानां कोविहातुं समर्थः ॥ ५९ ॥
स्वपरप्रतारकोसौ निन्दति
योऽलीकं पण्डितो युवतीः ।
यस्मात्तपसोपि फलं स्वर्गः
स्वर्गस्यापि फलं तथा सरसः ॥ ६० ॥
मत्तेभकुम्भदलने भुवि संति शूराः
केचित्प्रचण्डमृगराजबधेपि दक्षाः ।
किन्तु ब्रवीमि बलिनां पुरतः प्रसह्य
कन्दर्पदर्पदलने विरला मनुष्याः ॥ ६१ ॥
सन्मार्गे तावदास्ते प्रभवति च नरस्तावदेवेन्द्रियाणां

लज्जान्तावद्विधत्ते विनयमपि समालम्बते ताव-ेव ।
भ्रूचापाकृष्टमुक्ताः श्रवणपथगता नीलपक्ष्माण एते
यावल्लीलावतीनां न हृदि धृतिमुषो दृष्टिवाणाः पतन्ति
उन्मत्तप्रेमसंरम्भादारभन्ते यदङ्गनाः । [ ॥ ६२ ॥
तत्र प्रत्यूहमाधातुं ब्रह्मापि खलु कातरः ॥ ६३ ॥
तावन्महत्वं पा। ण्डित्यं कुलीनत्वं विवेकता ।
यावज्ज्वलति नाङ्गेषु स्वतः पञ्चेषुपावकः ॥ ६४ ॥
शास्त्रज्ञोपि प्रथितविनयोप्यात्मबोधोपि वाढं
संसारेस्मिन् भवति विरलो भाजनं सद्गतीनां ।
येनैत।स्मन्निरयनग द्वारमुद्घ टयन्ती
वामाक्षीणां भवति ः।टल। भ्रूलता कुञ्चिकेव ॥ ६५ ॥
कृशः काणः खञ्जः श्रवणरहितः पुच्छ[illegible]
व्रणी पूयक्लिन्नः कृमि ।लशतैरावृततनुः ।
क्षुदाक्षामो जीर्णः पिवरककपालार्पितगलः
शुनीमन्वेति श्वा हतमपि निहन्त्येव मदनः ॥ ६६ ॥
स्त्रीमुद्रां झषकेतनस्य जननीं सर्वार्थसंपत्करीं
ये मूढाः प्रविहाय यान्ति कुधियो मिथ्याफलान्वेषिणः ।
ते तेनैव निहत्य निर्दयतरं नग्नी[illegible] मुण्डिताः
केचित्पञ्चशिखीकृताश्च जाटल ः कापालिकाश्चापरे ॥ ६७ ॥
विश्वामित्रपराशर प्रभृतयो वाताम्बुपर्णाशना
स्तेपि स्त्रीमुखपङ्कजं सुललितं दृष्ट्वैव मोहं गताः ।
शाल्यन्नं सघृतं पयोदधियुतं ये भुञ्जन्ते मानवास्

[illegible]न्द्रियनिग्रहो यदि भवेद्विन्ध्यस्तरेत्सागरं ॥ ६८ ॥

## [illegible] परित्यागप्रशंसा ॥

संसारेस्मिन्नसारे कुन्टपतिभवनद्वारसेवावलम्ब
व्यासङ्गव्यस्तधैर्याः कथम[illegible]धियो मानसं संविदध्युः ।
यद्येताः प्रोद्यदिन्दुद्यु[illegible]भृतो न स्युरम्भोजनेत्राः
प्रें[illegible]त्काञ्चीकलापाः स्तनभ[illegible] विनमन्मध्यभागास्तरुण्यः
सिद्धाध्यासितकन्दरे हरवृषस्कन्धावगाढद्रुमे [ ॥ ६९ ॥
गङ्गाधौतशिलातले हिमवतः स्थाने स्थितः श्रेयसि ।
कः कुर्वीत शिरःप्र[illegible]ममालिनं मानं मनस्वी जनो
यद्यत्रस्त[illegible]रङ्गशावनयना न स्युः स्मरास्त्रस्त्रियः ॥ ७० ॥
संसार तव निस्ता[illegible] न दवीयसी ।
अन्तरा [illegible] स्तरा न स्युर्यदि रे मदिरेक्षणाः ॥ ७१ ॥

## यौवनप्रसंशा ॥

राजन् [illegible]शेर्न हि जगति गतः कश्चिदेवावसानं
को वार्थोत्थैः प्रभूतैः स्ववपुषि गलिते यौवने सानुरागे ।
गच्छामः सद्म यावद्विकसितकुमुदेन्दीवरालोकनीनाम्
आक्रम्या[illegible]रूपं झटिति न जरया लुप्यते प्रेयसीनां ॥ ७२ ॥
रागस्या[illegible] मेकं नरकशतमहादुःखसंप्राप्तिहेतुर्
मोहस्योत्पत्ति[illegible]जं जलधरपटलं ज्ञानताराधिपस्य ।
कन्दर्पस्यैकमित्रं प्रकटितविविधस्पष्टदोषप्रबन्धं

लोकेस्मिन्न प्रदीप्तं निजकुलदहनं गोत्रादन्यदस्ति ॥७३॥
शृङ्गारद्रुमनीरदे वहुतरक्रीडा सस्त्रोतसि
प्रद्युम्नप्रियबान्धवे चतुरतामुक्ताफलोदन्वति ।
तन्वीनेत्रचकोरपारणविधौ सौभाग्यलक्ष्मीनिधौ
धन्यः कोपि न विक्रियां कलयति प्राप्ते नवे यौवने ॥७४॥

## कामिनीगर्हणं ॥

कान्तेत्युत्पललोचनेति विपुलश्रोणीभरेत्युत्सुकः
पीनोत्तुङ्गपयोधरेति सुमुखाम्भोजेति सुभ्रूरिति ।
दृष्ट्वा माद्यति मोदतेऽतिरमते प्रस्तौति जानन्नपि
प्रत्यक्षाशुचिपुत्रिकां स्त्रियमहो मोहस्य दुश्चेष्टितं ॥७५॥
श्रुता भवति तापाय दृष्टा चोन्मादवर्द्धिनी ।
स्पृष्टा भवति मोहाय सा नाम दयिता कथं ॥ ७६ ॥
तावदेवामृतमयी यावल्लोचनगोचरा ।
चक्षुःपथादपगता विषादप्यतिरिच्यते ॥ ७७ ॥
नामृतं न विषं किञ्चिदेकां मुक्त्वा नितम्बिनीं ।
सेवामृतलता रक्ता विरक्ता विषवल्लरी ॥ ७८ ॥
आवर्तः संशयानामविनयभवनं पत्तनं साहसानां
दोषाणां सन्निधानं कपटशतमयं क्षेत्रमप्रत्ययानां ।
स्वर्गद्वारस्य विघ्नो नरकपुरमुखं सर्वमायाकरण्डं
स्त्रीयन्त्रं केनसृष्टं विषममृतमयं प्राणिनां मोहपाशः ॥७९॥
न सत्येन शशाङ्क एष वदनीभूतो नवेन्दीवर

द्वन्द्वे लोचनताङ्गते न कनकैरप्यङ्गयष्टिः कृता ।
किन्त्वेवं कविभिः प्रतारितमनास्तत्त्वं विजानन्नपि
त्वङ्मांसास्थिमयं वपुर्मृगदृशां मन्दो जनः सेवते ॥ ८० ॥
लीलावतीनां सहजा विलासास्
ताएव मूढस्य हृदि स्फुरन्ति ।
रागो नलिन्या हि निसर्गसिद्धस्
तत्र भ्रमत्येव मुदा षडंघ्रिः ॥ ८१ ॥
यदेतत्पूर्णेन्दुद्युतिहरमुदाराकृतिवरं
मुखाब्जं तन्वङ्ग्याः किल वसति तत्राधरमधु ।
इदन्तावत्पाकं द्रुमफलमिवातीव विरसं
व्यतीतेस्मिन् काले विषमिव भविष्यत्यसुखदं ॥ ८२ ॥
उन्मीलत्त्रिवलीतरङ्गनिलया प्रोत्तुङ्गपीनस्तन
द्वन्द्वेनोद्यतचक्रवाकमिथुनाकाराम्बुजोल्लासिनी ।
कान्ताकारधरा नदीयमभितः क्रूराशया नेष्यते
संसारार्णवमज्जनं यदि जना दूरात् परं त्यज्यतां ॥ ८३ ॥
जल्पन्ति सार्द्धमन्येन पश्यन्त्यन्यं सविभ्रमाः ।
हृदये चिन्तयन्त्यन्यं प्रियः को नाम योषितां ॥ ८४ ॥
मधु तिष्ठति वाचि योषितां हृदि हालाहलमेव केवलं ।
अतएव निपीयतेधरो हृदयं मुष्टिभिरेव ताड्यते ॥ ८५ ॥
अपसर सखे दूरमस्मात् कटाक्षविशिखानलात्
प्रकृतिविषमाद्योषित्सर्पाद्विलासफणाभृतः ।
इतरफणिना दष्टाः शक्याश्चिकित्सितमौषधयश्

चतुरवनिताभोगैश्वर्यं त्यजन्ति हि मन्त्रिणः ॥ ८६ ॥

विस्तारितं मकरकेतनधीवरेण
स्त्रीसंज्ञितं वडिशमत्र भवाम्बुराशौ ।
येनाचिरात्तदधरामिषलोलमर्त्य
मत्स्यान् विकृष्य पचतीत्यनुरागवह्नौ ॥ ८७ ॥

कामिनीकायकान्तारे कुचपर्वतदुर्गमे ।
मा संचर मनः पान्थ तत्रास्ते स्मरतस्करः ॥ ८८ ॥

आदीर्घेण चलेन वक्रगतिना [illegible] भोगिना
नीलाब्जद्युतिनाहिना वरमहं दष्टोन तच्चक्षुषा ।
धन्याः सन्ति चिकि[illegible] दिशि प्रायेण धर्मार्थिनो
मुग्धाक्षीक्षणवीक्षितस्य न हि मे वैद्या न चाप्यौषधं॥८९॥

इह हि मधुरगीतं नृत्यमेतद्रसोपि
स्फुरति परि[illegible] स्पर्शएष स्तनानां ।
इति हतपरमार्थैरिन्द्रियैर्भ्राम्यमाणैर्
अहितकरणदक्षैः पञ्चभिर्वञ्चितोसि ॥ ९० ॥

न गम्योमन्त्राणां न च भवति भैषज्यविषयो
न चापि प्रध्वंसं व्रजति विविधैः शान्तिक[illegible]तैः ।
भ्रमावेशादङ्गे [illegible]मपि विदध[illegible]थमसम
स्मरापस्मारोयम्भ्रमयति दृशं घूर्णयति च ॥ ९१ ॥

जात्यन्धाय च [illegible]र्मुखाय च जराजीर्णाखिला[illegible]यच
ग्रामीणाय च दुष्कुल[illegible]य च गलत्कुष्ठाभिभूताय च ।
यच्छन्तीष मनोहरं निजवपुर्ल[illegible]लवश्रद्धया

पण्यस्त्रीषु विवेककल्पलतिकाशस्त्रीषु रज्येत कः ॥ ९२॥
वेश्यासौ मदनज्वालारूपेन्धनसमेधिता।
कामिभिर्यत्र हूयन्ते यौवनानि धनानि च ॥ ९३॥
कश्चुम्बति कुलपुरुषोवेश्याधरपल्लवमनोज्ञमपि।
चारभटचौरचेटकनटविटनिष्ठीवनशरावं ॥ ९४॥

सुचरित्रप्रशंसा ॥

धन्यास्तएव तरलायतलोचनानां
तारुण्यपूर्णघनपीनपयोधराणां।
क्षामोदरोपरिलसन्त्रिवलीलतानां
दृष्ट्वाकृतिं विकृतिमेति मनो न येषां ॥ ९५॥
बाले लीलामुकुलितममी सुन्दरा दृष्टिपाताः
किं क्षिप्यन्ते विरम विरम व्यर्थएषः श्रमस्ते।
संप्रत्यन्ये वयमुपरतं बाल्यमास्था वनान्ते
क्षान्तोमोहस्तृणमिवजगज्जालमालोकयामः ॥ ९६॥
इयं बाला मां प्रत्यनवरतमिन्दीवरदलं
प्रभा चौरं चक्षुः क्षिपति किमभिप्रेतमनया।
गतोमोहोस्माकं स्मरसमरवाणव्यतिकर
ज्वरज्वालाशान्तास्तदपि न वराकी विरमति ॥ ९७॥
शुभ्रं सद्रसविभ्रमायुवतयः श्वेतातपत्रोज्ज्वला
लक्ष्मीरित्यनुभूयते स्थिरमिव स्फीते शुभे कर्मणि।
विच्छिन्ने नितरामनङ्गकलहक्रीडात्रुटत्तन्तु किं

मुक्ताजालमिव प्रयाति झटिति भ्रश्यद्दृशोदृश्यतां ॥ ९८ ॥
सदा योगाभ्यासव्यसनवशयोरात्ममनसोर्
अविच्छिन्ना मैत्री स्फुरति यमिनस्तस्य किमु तैः ।
प्रियाणामालापैरधरमधुभिर्वक्त्रविधुभिः
सनिश्वासामोदैः सकुचकलशाश्लेषसुरतैः ॥ ९९ ॥
किं कन्दर्प करं कदर्थयसि किं कोदण्डझङ्कारितैः
रे रे कोकिल कोमलङ्कलरवङ्किन्त्वं वृथा भाषसे ।
मुग्धस्निग्धविदग्धमुग्धमधुरैर्लोलैः कटाक्षैरलं
चेतश्चुम्बति चन्द्रचूडचरणध्यानामृते वर्त्तते ॥ १०० ॥
यदासीदज्ञानं स्मरतिमिरसञ्चारजनितं
तदा सर्वं नारीमयमिदमशेषं जगदभूत् ।
इदानीमस्माकं पटुतरविवेकाञ्जनदृशां
समीभूता दृष्टिस्त्रिभुवनमपि ब्रह्म मनुते ॥ १०१ ॥

इति श्रीभर्तृहरिविरचितं शृङ्गारशतकं समाप्तं ॥

यां चिन्तयामि सततं मयि सा विरक्ता
सा चान्यमिच्छति जनं स जनोन्यरक्तः ।
अस्मत्कृतेपि परितुष्यति काचिदन्या
धिक् ताञ्च तञ्च मदनञ्च इमाञ्च माञ्च ॥ १ ॥
अज्ञः सुखमाराध्यः सुखतरमाराध्यतेऽशेषज्ञः ।
ज्ञानलवदुर्विदग्धं ब्रह्मापि नरं नरञ्जयति ॥ २ ॥
लभेत सिकतासु तैलमपि यत्नतः पीडयन्
पिबेच्च मृगतृष्णिकासु सलिलं पिपासार्दितः ।
कदाचिदपि पर्यटन् शशविषाणमासादयेन्
नतुप्रतिनिविष्टमूर्खजनचित्तमाराधयेत् ॥ ३ ॥
प्रसह्य मणिमुद्धरेन्मकरवक्त्रदंष्ट्रांकुरात्
समुद्रमपि संतरेत् चपलमुर्मिमालाकुलं ।
भुजङ्गमपि कोपितं शिरसि पुष्पवद्धारयेन्
नतुप्रतिनिविष्टमूर्खजनचित्तमाराधयेत् ॥ ४ ॥
शशी दिवसधूसरोगलितयौवना कामिनी
सरोविगतवारिजं मुखमनक्षरं स्वाकृतेः ।
प्रभुर्धनपरायणः सततदुर्गतः सज्जनो
नृपाङ्गणगतः खलोमनसि सप्त शल्यानि मे ॥ ५ ॥
मणिः शाणालीढः समरविजयी हेतिनिहतो
मदक्षीणोनागः शरदि सरितः श्यामपुलिनाः ।

कलाशेषश्चन्द्रः सुरतमृदिता बालवनिता
न निम्नाः शोभन्ते गलितविभवाश्चार्थिषु जनाः ॥ ६ ॥
परिक्षीणः कश्चित् स्पृहयति यवानां प्रसृतये
स पश्चात्संपूर्णो गणयति धरित्रीं तृणसमां ।
अतश्चानेकान्ता गुरुलघुतयार्थेषु धनिनाम्
अवस्था वस्तूनि प्रथयति च सङ्कोचयति च ॥ ७ ॥
शास्त्रोपस्कृतशब्दसुन्दरगिरः शिष्याः प्रदेयागमा
विख्याताः कवयो वसन्ति विषये यस्य प्रभोर्निर्धनाः ।
तज्जाड्यं वसुधाधिपस्य सुधियो ह्यर्थं विनापीश्वराः
कुत्साः स्युः कुपरीक्षकैर्हि मणयो यैरर्थतः पातिताः ॥ ८ ॥
विपदि धैर्यमथाभ्युदये क्षमा
सदसि वाक्पटुता युधि विक्रमः ।
यशसि चाभिरुचिर्व्यसनं श्रुतौ
प्रकृतिसिद्धमिदं हि महात्मनां ॥ ९ ॥
निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु
लक्ष्मीः समाविशतु गच्छतु वा यथेष्टं ।
अद्यैव वा मरणमस्तु युगान्तरे वा
न्याय्यात्पथः प्रविचलन्ति पदं न धीराः ॥ १० ॥
हर्तुर्याति न गोचरं किमपि संपुष्णाति यत्सर्वदा
प्यर्थिभ्यः प्रतिपाद्यमानमनिशं प्राप्नोति वृद्धिं परां ।
कल्पान्तेष्वपि न प्रयाति निधनं विद्याख्यमन्तर्धनं
येषां तान् प्रति मानमृच्छति नृपः कस्तैः सह स्पर्धते ॥ ११ ॥

अधिगतपरमार्थान् पण्डितान्मावमंस्था
स्तृणमिव लघुलक्ष्मीर्नैव तान् संरुणद्धि ।
अभिनवमदलेखाश्यामगण्डस्थलानां
न भवति विशतन्तुर्वारणं वारणानां ॥ १२ ॥
क्षुत्क्षामोपि जराकृशोपि शिथिलप्राणोपि कष्टान्दशाम्
आपन्नोपि विपन्नदीधितिरपि प्राणेषु नश्यत्स्वपि ।
उन्मत्तेभविभिन्नकुम्भकवलग्रासैकवद्धस्पृहः
किं जीर्णं तृणमत्ति मानमहतामग्रेश्वरः केशरी ॥ १३ ॥
असन्तो नाभ्यर्थ्याः सुहृदपि न याच्यः कृशधनः
प्रिया न्याय्या वृत्तिर्मलिनमसुभङ्गेप्यसुकरं ।
विपद्युच्चैः स्थेयं पदमनुविधेयञ्च महतां
सताङ्केनोद्दिष्टं विषममसिधाराव्रतमिदं ॥ १४ ॥
मनसि वचसि काये पुण्यपीयूषपूर्णा
स्त्रिभुवनमुपकारश्रेणिभिः प्रीणयन्तः ।
परगुणपरमानुं पर्वतीकृत्य नित्यं
निजहृदि विकशन्तः सन्ति सन्तः कियन्तः ॥ १५ ॥
इतः स्वपिति केशवः कुलमितस्तदीयद्विषाम्
इतश्च शरणार्थिनः शिखरिपत्त्रिणः शेरते ।
इतश्च वडवानलः सह समस्तसंवर्तकैर्
अहो विततमूर्जितम्भरसहञ्च सिन्धोर्वपुः ॥ १६ ॥
उदन्वच्छिन्ना भूः स च निधिरपां योजनशतं
सदा पान्थः पूषा गगणपरिमाणं कलयति ।

इति प्रायो भावाः स्फुरदवधिमुद्रामुकुलिताः
सतां प्रज्ञोन्मेषः पुनरयमसीमा विजयतां ॥ १७ ॥

क्वचिद्भूमीशय्यः क्वचिदपि च पर्यङ्कशयनः
क्वचिच्छाकाहारः क्वचिदपि च शाल्योदनरुचिः ।
क्वचित्कन्थाधारी क्वचिदपि च दिव्याम्बरधरो
मनस्वी कार्यार्थी न गणयति दुःखन्नच सुखं ॥ १८ ॥

ये सन्तोषसुखप्रमोदमुदितास्तेषान्न भिन्ना मुदो
ये त्वन्ये धनलोभसङ्कुलधियस्तेषान्न तृष्णा हता ।
इत्थं कस्य कृते कृतः स विधिना तादृक् पदं सम्पदां
स्वात्मन्येव समाप्तहेममहिमा मेरुर्न मे रोचते ॥ १९ ॥

नमस्यामो देवाननु हत विधेस्तेपि वशगा
विधिर्वन्द्यः सोपि प्रतिनियतकर्मैकफलदः ।
फलङ्कर्मायत्तं यदि किममरैः किञ्च विधिना
नमस्तत्कर्मभ्यो विधिरपि न येभ्यः प्रभवति ॥ २० ॥

दौर्मन्त्र्यान्नृपतिर्विनश्यति यतिः सङ्गात्सुतोलालनात्
विप्रोऽनध्ययनात्कुलं कुतनयाच्छीलं खलोपासनात् ।
ह्रीर्मद्यादनवेक्षणादपि कृषिः स्नेहः प्रवासाश्रयात्
मैत्री चाप्रणयात्समृद्धिरणयात्त्यागात्प्रमादाद्धनं ॥ २१ ॥

रक्तत्वं कमलानां सुपुरुषाणां परोपकारित्वं ।
असताञ्च निर्दयत्वं स्वभावसिद्धन्त्रिषु त्रितयं ॥ २२ ॥

जाड्यं ह्रीमति गण्यते व्रतरुचौ दम्भः शुचौ कैतवं
शूरे निर्घृणता ऋजौ विमतिता दैन्यं प्रियालापिनि ।

तेजस्विन्यवलिप्तता मुखरता वक्तर्यशक्तिः स्थिरे
तत्कोनाम गुणोभवेत्सुगुणिनां येदुर्जनैर्नाङ्कितः ॥ २३ ॥
जातिर्यातु रसातलं गुणगणास्तस्याप्यधोगच्छतां
शीलं शैलतटात्पतत्वभिजनः सन्दह्यतां वह्निना ।
शौर्ये वैरिणि वज्रमाशु पततु त्वर्थस्तु न केवलं
येनैकेन विना गुणास्तृणलवप्रायाः समस्ताइमे ॥ २४ ॥
भग्नाशस्य करण्डपीडिततनोर्म्लानेन्द्रियस्य क्षुधा
कृत्वाखुर्विवरं स्वयं निपतितो नक्तं मुखे भोगिनः ।
तृप्तस्तत्पिशितेन सत्वरमसौ तेनैव यातः पथा
स्वस्थास्तिष्ठत दैवमेव हि नृणां वृद्धौ क्षये कारणं ॥ २५ ॥
पतितोपि कराघातैरुत्पतत्येव कन्दुकः ।
प्रायेण साधुवृत्तीनामस्थायिन्यो विपत्तयः ॥ २६ ॥
प्रायः कन्दुकपातेन पतत्यार्यः पतन्नपि ।
तथा त्वनार्यः पतति मृत्पिण्डपतनं यथा ॥ २७ ॥
प्रीणाति यः सुचरितैः पितरं स पुत्रो
यद्भर्तुरेव हितमिच्छति तत्कलत्रं ।
तन्मित्रमापदि सुखे च समं प्रयाति
एतत्त्रयं जगति पुण्यकृतो लभन्ते ॥ २८ ॥
सम्पत्सु महतां चित्तम्भवेदुत्पलकोमलं ।
आपत्सु च महाशैलशिलासंघातकर्कशं ॥ २९ ॥
दुर्जनः परिहर्तव्यो विद्ययापि समन्वितः ।
मणिनालङ्कृतः सर्पः किमसौ न भयङ्करः ॥ ३० ॥

क्षीरेणात्मगतोदकाय हि गुणा दत्ता पुरातेऽखिलाः
क्षीरे तापमवेक्ष्य तेन पयसा ह्यात्मा कृशानौ हुतः ।
गन्तुं पावकमुन्मदन्तदभवद्दृष्ट्वा तु मित्रापदं
युक्ता तेन जलेन सम्प्रति सतां मैत्री पुनस्त्वीदृशी ॥ ३१ ॥
या साधून् हि खलान् करोति विदुषो मूर्खान् हितान्
द्वेषिणः प्रत्यक्षं कुरुते परोक्षममृतं हालाहलं तत्क्षणात् ।
तामाराधय शङ्करीम्भगवतीन्द्राचीं फलं वाञ्छितं हे
साधो त्वमतो गुणेषु विफलेष्वास्थां वृथा मा कृथाः ॥३२॥
कृमिकुलचितं लालाक्लिन्नं विगन्धि जुगुप्सितं
निरुपमरसप्रीत्या खादन् नरास्थि निरामिषं ।
सुरपतिमपि श्वा पार्श्वस्थं विलोक्य न शङ्कते
न हि गणयति क्षुद्रो जन्तुः परिग्रहफलफल्गुतां ॥ ३३ ॥
स्वल्पं स्नायुवशावशेषमलिनं निर्मांसमप्यस्थिकं
श्वा लब्ध्वा परितोषमेति न च तत्तस्य क्षुधाशान्तये ।
सिंहो जम्बुकमङ्कमागतमपि त्यक्त्वा निहन्ति द्विपं
सर्वः कृच्छ्रगतोऽपि वाञ्छति जनः सत्त्वानुरूपं फलं ॥ ३४ ॥
पापान्निवारयति योजयते हिताय
गुह्यानि गूहति गुणान् प्रकटी करोति ।
आपन्नतञ्च न जहाति ददाति काले
सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः ॥ ३५ ॥
मृगमीनसज्जनानां तृनजलसंतोषविहितवृत्तीनां ।
लुब्धकधीवरपिशुना निष्कारणवैरिणो जगति ॥ ३६ ॥

संतप्तायसि संस्थितस्य पयसोनामापि न ज्ञायते
मुक्ताकारतया तदेव नलिनीपत्रे स्थितं राजते ।
स्वात्यां सागरसुक्तिमध्यपतितं मुक्ताफलं जायते
प्रायेणाधममध्यमोत्तमगुणः संसर्गतोजायते ॥ ३७॥
ब्रह्मा येन कुलालवन्नियमितोब्रह्माण्डभाण्डोदरे
विष्णुर्येन दशावतारगहने क्षिप्तोमहासङ्कटे ।
रुद्रो येन कपालपाणिपुटके भिक्षाटनङ्कारितः
सूर्यो भ्राम्यति नित्यमेव गगणे तस्मै नमः कर्मणे ॥३८॥
कुसुमस्तवकस्येव द्वे वृत्ती तु मनस्विनः ।
सर्वलोकस्य वा मूर्द्ध्नि विशीर्येत वनेथवा ॥ ३९ ॥
मौनान्मूकः प्रवचनपटुर्वातुलोजल्पकोवा
क्ष्यान्त्या भीरुर्यदि न सहते प्रायसो नाभिजातः ।
धृष्टः पार्श्वे स भवति जनो दूरतश्चाप्रगल्भः
सेवाधर्मः परमगहनो योगिनामप्यगम्यः ॥ ४० ॥
नम्रत्वेनोन्नमन्तः परगुणनुतिभिः स्वान्गुणान् ख्यापयन्तः
स्वार्थान् सम्पादयन्तोविनतपृथुतरारम्भयन्तः परार्थे ।
क्षान्त्येवाक्षेपरुक्षाक्षरमुखरमुखान्दुर्मुखान्दूषयन्तः
सन्तःसाश्चर्यचर्याजगति वहुमताः कस्य नाभ्यर्थनीयाः॥४१
लोभश्चास्ति गुणेन किं पिशुनता यद्यस्ति किम्पातकैः
सत्यञ्चेत्तपसा च कि शुचिमनो यद्यस्ति तीर्थेन किं ।
सौजन्यं यदि किन्निजैः स्वमहिमा यद्यस्ति किम्मण्डणैः
सद्विद्या यदि किं धनैरपयशो यद्यस्ति किं मृत्यना ॥ ४२ ॥

अम्भोजिनीवननिवासविलासहेतुं
हंसस्य हन्तुमपरामपि तां विधाता।
नो तस्य दुग्धजलभेदविधौ प्रशस्तां
वैदग्धकीर्तिमपहन्तुमसौ समर्थः॥ ४३॥
खल्वाटोदिवसेश्वरस्य किरणैः सन्तापिते मस्तके
वांछन्देशमनातपं विधिवशाद्विल्वस्य मूलङ्गतः।
तत्राप्यस्य महाफलेन पतता भग्नं सशब्दं शिरः
प्रायो गच्छति यत्र भाग्यरहितस्तत्रैव यान्त्यापदः॥ ४४॥
नैवाकृतिः फलति नैव कुलं न शीलं
विद्यापि नैव न च यत्नकृतापि सेवा।
भाग्यानि पूर्वतपसा किल सञ्चितानि
काले फलन्ति पुरुषस्य यथैव वृक्षाः॥ ४५॥
ऐश्वर्यस्य विभूषणं सुजनता शौर्यस्य वाक्संयमो
ज्ञानस्योपशमः शमस्य विनयो वित्तस्य पात्रे व्ययः।
अक्रोधस्तपसः क्षमा प्रभवितुर्धर्मस्य निर्व्याजता
सर्वेषामपि सर्वकालनियमं शीलं परम्भूषणं॥ ४६॥
एते सत्पुरुषाः परार्थघटकाः स्वार्थं परित्यज्य ये
सामान्यास्तु परार्थमुद्यमभृतः स्वार्थाविरोधेन ये।
तेमी मानुषराक्षसाः परहितं स्वार्थाय विघ्नन्ति ये
ये तु घ्नन्ति निरर्थकं परहितं ते के न जानीमहे॥ ४७॥
जाड्यं धियोहरति सिञ्चति वाचि सत्यं
मानोन्नतिं दिशति पापमपाकरोति।

चेतः प्रसादयति दिक्षु तनोति कीर्तिं
सत्सङ्गतिः कथय किं न करोति पुंसां ॥ ४८ ॥
वांछा सज्जनसङ्गमे गुणिगणे प्रीतिर्गुरौ नम्रता
विद्यायां व्यसनं स्वयोषिति रतिर्लोकापवादाद्भयं ।
भक्तिः शूलिनि शक्तिरात्मदमने संसर्गमुक्तिः खले
एते यत्र वसन्ति निर्मलगुणास्तेभ्योनरेभ्योनमः ॥ ४९ ॥
अग्राह्यं हृदयन्तथैव वदनं यद्दर्पणान्तर्गतं
भावः पर्वतसूक्ष्ममार्गविषमः स्त्रीणान्न विज्ञायते ।
चित्तं पुष्करपत्रतोयतरलं विद्वद्भिराशंसितं
नारी नाम विषाङ्कुरैरिव लतादोषैः समंवर्धिता ॥ ५० ॥
तृष्णां छिन्धि भज क्षमाञ्जहि मद पापे रतिम्मा कृथाः
सत्यं ब्रूह्यनुयाहि साधु पदवीं सेवस्व विद्वज्जनान् ।
मान्यान्मानय विद्विषोप्यनुनय प्रच्छादय स्वान् गुणान्
कीर्तिं पालय दुःखिते कुरु दयामेतत्सताञ्चेष्टितं ॥ ५१ ॥
गुणवदगुणवद्वा कुर्वता कार्यजातं
परिणतिरवधार्या यत्नतः पण्डितेन ।
अतिरभसकृतानाङ्कर्मणामाविपत्तेर्
भवति हृदयदाही शल्यतुल्यो विपाकः ॥ ५२ ॥
एको देवः केशवो वा शिवो वा
एकं मित्रं भूपतिर्वा यतिर्वा ।
एको वासः पत्तने वा वने वा
एका भार्या सुन्दरी वा दरी वा ॥ ५३ ॥

वने रणे शत्रुजलाग्निमध्ये
महार्णवे पर्वतमस्तके वा ।
सुप्तं प्रमत्तं विषमस्थितं वा
रक्षन्ति पुण्यानि पुरा कृतानि ॥ ५४ ॥
भीमं वनम्भवति तस्य पुरं प्रधानं
सर्वो जनः सुजनतामुपयाति तस्य ।
कृत्स्ना च भूर्भवति सन्निधिरत्नपूर्णा
यस्यास्ति पूर्वसुकृतं विपुलं नरस्य ॥ ५५ ॥
यन्नागा मदभिन्नगण्डकरटास्तिष्ठन्ति निद्रालसा
द्वारे हेमविभूषणाश्चतुरगा वल्गन्ति यद्दर्पिताः ।
वीणावेणुमृदङ्गशंखपटहैः सुप्तस्तु यद्बोध्यते
तत्सर्वं सुरलोकदेवसदृशं धर्मस्य विस्फुर्जितं ॥ ५६ ॥
मज्जत्वम्भसि यातु मेरुशिखरं शत्रुञ्जयत्वाहवे
वानिज्यं कृषिसेवनादिसकल विद्याः कलाः शिक्षतु ।
आकाशं विपुलं प्रयातु खगवत् कृत्वा प्रयत्नम्परं
नाभाव्यम्भवतीह कर्मवशतो भाव्यस्य नाशः कुतः ॥५७॥
वरं पक्षच्छेदः समदमघवन्मुक्तकुलिश
प्रहारैरुद्गच्छद्बहुलदहनोद्गारगुरुभिः ।
तुषाराद्रेः सूनोरहह पितरि क्लेशविवसे
न चासौ सम्पातः पयसि पयसां पत्युरुचितः ॥ ५८ ॥
नेता यत्र बृहस्पतिः प्रहरणं वज्रं सुराः सैनिकाः
स्वर्गो दुर्गमनुग्रहः खलु हरेरैरावतो वाहनं ।

इत्यैश्वर्यसमन्वितोपि वलभिङ्गग्नः परैः सङ्गरे
तद्युक्तं ननु दैवमेव शरणं धिग्धिग् वृथा पौरुषं ॥ ५९ ॥
कर्मायत्तं फलं पुंसां बुद्धिः कर्मानुसारिणीम ।
तथापि सुधिया भाव्यं सुविचार्यैव कुर्वता ॥ ६० ॥
आलस्यं हि मनुष्याणां श [illegible] महारिपुः ।
नास्त्युद्यमसमो बन्धुः कृत्वा यन्नावसीदति ॥ ६१ ॥
वरङ्गहनदुर्गेषु भ्रान्तं वनचरैः सह ।
न मूर्खजनसंसर्गः सुरेन्द्रभवनेष्वपि ॥ ६२ ॥
दानम्भोगो [illegible]ो गतयोभवन्ति वित्तस्य ।
यो न ददाति न भुंक्ते तस्य तृतीया गतिर्भवति ॥ ६३ ॥
यस्यास्ति वित्तं स नरः कुलीनः
सएव वक्ता सच दर्शनीयः ।
स पण्डितः स श्रुतवान् गुणज्ञः
सर्वे गुणाः काञ्चनमाश्रयन्ति ॥ ६४ ॥
रत्नैर्म[illegible]र्हैस्तुतुषुर्न देवा
न भेजिरे भीमविषेण भीतिं ।
सुधाम्बिना न प्रययुर्विरामं
विनिश्चितार्था[illegible]विरमन्ति धीराः ॥ ६५ ॥
सन्त्यन्येपि [illegible]स्पातिप्रभृतयः सम्भाविताः पञ्चषा
स्तान् प्रत्येष विशेषविक्रम [illegible]चो राहुर्न वैरायते ।
द्वावेव ग्रसते दिनेश्वरनिशाप्राणेश्वरौ भास्वरौ
भ्रातः पर्वणि पश्य दानवपतिः शीर्षावशेषीकृतः ॥ ६६ ॥

इयत्येतस्मिन् वा निरवधिचमत्कृत्यतिशये
वराहो वा राहुः प्रभवति चमत्कारविषयः।
महीमेको मग्नां यदयमवहद्दन्तसलिलैः
शिरःशेषः शत्रुर्निगिलति परं सन्त्यजति च ॥ ६७ ॥
श्रोत्रं श्रुतेनैव न कुण्डलेन
दानेन पाणिर्न च कङ्कनेन।
आभाति कायः करुणापराणां
परोपकारेण न चन्दनेन ॥ ६८ ॥
जयन्ति ते सुकृतिनो रसवैद्याः कवीश्वराः।
नास्ति येषां यशः काये जरामरणजन्मभिः ॥ ६९ ॥
यद्धाता निजभालपट्टलिखितं स्तोकं महद्वा फलं
तत्प्राप्नोति मरुस्थलेपि नियतं मेरौ च नातोधिकं।
तद्धीरो भव वित्तवत्सु कृपणां वृत्तिं वृथा मा कृथाः
कूपे पश्य पयोनिधावपि घटा गृह्णन्ति तुल्यञ्जलं ॥ ७० ॥
लाङ्गूलचालमधश्चरणावपातं
भूमौ निपत्य वदनोदरदर्शनञ्च।
श्वा पिण्डदस्य कुरुते गजपुङ्गवस्तु
धीरम्बिलोकयति चाटुशतैश्च भुंक्ते ॥ ७१ ॥
राजन् दुधुक्षसि यदि क्षितिधेनुमेतां
तेनाद्य वत्समिव लोकमिमं पुषाणं।
तस्मिंश्च सम्यगनिशम्परिपोष्यमाने
नानाफलैः फलति कल्पलतेव भूमिः ॥ ७२ ॥

सत्यानृता च परुषा प्रियवादिनी च
हिंस्रा दयालुरपि चार्थपरा वदान्या ।
नित्यव्यया प्रचुरनित्यधनागमा च
वाराङ्गनेव नृपनीतिरनेकरूपा ॥ ७३ ॥
न कश्चिच्चण्डकोपानामात्मीयोनाम भूभुजां ।
होतारमपि जुह्वन्तं स्पृष्टो दहति पावकः ॥ ७४ ॥
विपदि महतान्धैर्यध्वंसं यदीक्षितुमीहसे
विरम विरसायासाद्दुराध्यवसायतः ।
अपि जडविधेः कल्पापाये व्यपेत निजक्रमः
कुलशिखरिणः क्षुद्रा नैते न वा जलाशयः ॥ ७५ ॥
अकरुणत्वमकारणविग्रहः
परधनाय रतिः परयोषिति ।
सुजनबन्धुजनेष्वसहिष्णुता
प्रकृतिसिद्धमिदं हि दुरात्मनां ॥ ७६ ॥
कान्ताकटाक्षविशिखा न खनन्ति यस्य
चित्तं न निर्दहति कोपकृशानुतापः ।
कर्षन्ति भूरिविषयाश्च न लोभपाशा
लोकत्रयं जयति कृत्स्नमिदं स वीरः ॥ ७७ ॥
आरम्भगुर्वक्षयिणी क्रमेण
लघ्वी पुरा वृद्धिमती च पश्चात् ।
दिनस्य पूर्वार्द्धपरार्द्धभिन्ना
छायेव मैत्री खल सज्जनानां ॥ ७८ ॥

प्रदानं प्रच्छन्नं गृहमुपगते सम्भ्रमविधिः
प्रियं कृत्वा मौनं सदसि कथनञ्चाप्युपकृतेः ।
अनुत्सेकोलक्ष्म्यानिरभिभवसाराः परकथाः
सतां केनोद्दिष्टं विषममसिधाराव्रतमिदं ॥ ७९ ॥
छिन्नोपि रोहति तरुः क्षीणोप्युपचीयते पुनश्चन्द्रः ।
इति विमृशन्तः सन्तः सन्तप्यन्ते न ते विपदा ॥ ८० ॥
भवन्ति नम्रास्तरवः फलोद्गमैर्
नवाम्बुभिर्भूमिविलम्बिनोघनाः ।
अनुद्धताः सत्पुरुषाः समृद्धिभिः
स्वभावएवैष परोपकारिणां ॥ ८१ ॥
कदर्थितस्यापि हि धैर्यवृत्तेर्
बुद्धेर्विनाशो न हि शङ्कनीयः ।
अधःकृतस्यापि तनूनपातो
नाधःशिखा याति कदाचिदेव ॥ ८२ ॥
अप्रियवचनदरिद्रैः प्रियवचनाढ्यैः स्वदारपरितुष्टैः ।
परपरिवादनिवृत्तैः क्वचित्क्वचिन्मण्डिता वसुधा ॥ ८३ ॥
पद्माकरान्दिनकरोविकचीकरोति
चन्द्रोविकाशयति कैरवचक्रवालं ।
नाभ्यर्थितोपि जलदः सलिलन्ददाति
सन्तः स्वयं परहितेषु कृताभियोगाः ॥ ८४ ॥
एकेनापि हि शूरेण पादाक्रान्तं क्षमातलं ।
क्रियते भास्करेणेव स्फारं स्फुरिततेजसा ॥ ८५ ॥

वरं तुङ्गात् शृङ्गाद्गुरुशिखरिणः क्वापि पुलिने
पतित्वायङ्कायः कठिनदृषदन्तर्विदलितः ।
वरं न्यस्तोहस्तः फणिपतिमुखे तीव्रदशने
वरं वह्नौ पातस्तदपि न कृतः शीलविलयः ॥ ८६ ॥
वह्निस्तस्य जलायते जलनिधिः कूपायते तत्क्षणात्
मेरुः स्वल्पशिलायते मृगपतिः सद्यः कुरङ्गायते ।
व्यालोमाल्यगुणायते विषरसः पीयूषवर्षायते
यस्याङ्गेखिललोकवल्लभतमं शीलं समुन्मीलति ॥ ८७ ॥
यदचेतनोपि पादैः स्पृष्टः प्रज्वलति सवितुरतिकान्तः ।
तत्तेजस्वी पुरुषः परकृतनिकृतङ्कथं सहते ॥ ८८ ॥
आज्ञा कीर्तिः पालनं ब्राह्मणानां
दानम्भोगोमित्रसंरक्षणञ्च ।
येषामेते षड्गुणा न प्रवृत्ताः
कोऽर्थस्तेषां पार्थिवोपाश्रयेण ॥ ८९ ॥
व्यालम्बालमृणालतन्तुभिरसौ रोद्धुं समुज्जृम्भितं
छेत्तुम्वज्रमणिं शिरीषकुसुमप्रान्तेन सन्नह्यति ।
माधुर्यं मधुविन्दुना रचयितुं क्षाराम्बुधेरीहते
नेतुम्वांछति यः सतां पथि खलान् सूक्तैः सुधास्यन्दिभिः
स्वायत्तमेकान्तहितं विधात्रा [ ॥ ९० ॥
विनिर्मितं छादनमज्ञतायाः ।
विशेषतः सर्वविदां समाजे
विभूषणं मौनमपण्डितानां ॥ ९१ ॥

उद्भासिताखिलखलस्य विशृंखलस्य
प्राग्जातविस्मृतनिजाधमकर्मवृत्तेः ।
दैवादवाप्तविभवस्य गुणद्विषोस्य
नीचस्य गोचरगतैः सुखमास्यते कैः ॥ ९२ ॥
विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तन्धनं
विद्या भोगकरी यशः सुखकरी विद्या गुरूणां गुरुः ।
विद्या बन्धुजनोविदेशगमने विद्या परन्दैवतं
विद्या राजसु पूजिता शुचि धनं विद्याविहीनः पशुः ॥ ९३॥
दाक्षिण्यं स्वजने दया परिजने शाठ्यं सदा दुर्जने
प्रीतिः साधुजने क्षमा गुरुजने नारीजने धूर्तता ।
शौर्यं शत्रुजने स्मयः खलजने विद्वज्जने चार्जवं
ये त्वेवं पुरुषाः कलासु कुशलास्तेष्वेव लोकस्थितः ॥ ९४ ॥
करे श्लाघस्त्यागः शिरसि गुरुपादप्रणयिता
मुखे सत्या वाणी विजयभुजयोर्वीर्यमतुलं ।
हृदि स्वेछा वृत्तिः श्रुतमधिगतञ्च श्रवणयोर्
विनाप्यैश्वर्येण प्रकृतिमहतां मण्डनमिदं ॥ ९५ ॥
वहति भुवनश्रेणीं फणी फणाफलकस्थितां
कमठपतिना मध्येपृष्ठं सदा सच धार्यते ।
तमपि कुरुते क्रोडाधीनं पयोनिधिरनादराद्
अहह महतां निस्सिमानश्चारित्रविभूतयः ॥ ९६ ॥
स्पृहयति भुजयोरन्तरमायतकरवालकर ।
रुहदोर्सां विजयश्रीर्वीराणां मत्तप्रौढवनिते व ॥ ९७ ॥

स जातो येन जातेन याति वंशः समुन्नतिं ।
परिवर्तिनि संसारे मृतः को वा न जायते ॥ ९८ ॥

लज्जां गुणौघजननीं जननीमिवस्वाम्
अत्यन्तशुद्धहृदयामनुवर्तमानाः ।
तेजस्विनः सुखमसूनपि सन्त्यजन्ति
सत्यव्रतव्यसनिनो न पुनः प्रतिज्ञां ॥ ९९ ॥

सिंहः शिशुरपि निपतति मदमलिनकपोलभित्तिषु ।
प्रकृतिरियं सत्ववतां न खलु वयस्तेजसो हेतुः ॥ १०० ॥

किङ्कूर्मस्य भरव्यथा न वपुषि क्ष्मां न क्षिपत्येष यत्
किं वा नास्ति परिश्रमो दिनपतेरस्तेन यन्निश्चलः ।
किन्त्वङ्गीकृतमुत्सृजन्न मनसा श्लाघ्यो जनो लज्जते
निर्वाहः प्रतिपन्नवस्तुषु सतामेतद्धि गोत्रव्रतं ॥ १०१ ॥

दूरादर्थं घटयति नवन्दूरतश्चापशब्दं
त्यक्त्वा भूयो भवति नियतं सत्सभारञ्जनेषु ।
मन्दम्मन्दं रचयति पदं लोकचित्तानुवृत्त्या
कामं मन्त्री कविरिव सदा खेदभारैरमुक्तः ॥ १०२ ॥

दैवेन प्रभुणा स्वयं जगति यद्यस्य प्रमाणीकृतं
तत्तस्योपनयेन्मनागपि महान्नैवाश्रयः कारणं ।
सर्वाशापरिपूरके जलधरे वर्षत्यपि प्रत्यहं
सूक्ष्माएव पतन्ति च तकमुखे द्विचाः पयोविन्दवः ॥ १०३ ॥

अभिमुखनिहतस्य सतो विहतु तावज्जयो थवा स्वर्गः ।
उभयवलसाधुवादः श्रवणसुखस्यैव तात्पर्यं ॥ १०४ ॥

को न याति वशं लोके मुखे पिण्डेन पूरितः ।
मृदङ्गो मुखलेपेन करोति मधुरध्वनिं ॥ १०५ ॥
केयूरा न विभूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वला
न स्नानं न विलेपनं सुकुसुमं नालङ्कृता मूर्द्धजाः ।
वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते
क्षीयन्ते खलु भूषणानि सततं वाग्भूषणम्भूषणं ॥ १०६ ॥
यदि नाम दैवगत्या जगदसरोजं कदाचिदपि जातं ।
अवकरनिकरं विकिरति तत्किंकृकवाकुरिव हंसः ॥१०७॥
परिचरितव्याः सन्तो यद्यपि कथयन्ति न सदुपदेशं ।
यास्त्वेषां स्वैरं कथास्ताएव भवन्ति शास्त्राणि ॥ १०८ ॥
कमठकुलाचलदिग्गजफणिपतिविधृतापि चलति वसुधेयं ।
प्रतिपन्नममलमनसां न फलति पुंसां युगान्तेपि ॥१०९॥

इति श्रीभर्तृहरिविरचितं नीतिशतकं समाप्तं ॥

## वैराग्यशतकं ।

चूडोत्तंसितचारुचन्द्रकलिकाचञ्चच्छिखाभासुरो
लीलादग्धविलोलकामशलभः श्रेयोदशाग्रे स्फुरन् ।
अन्तस्फुर्जदपारमोहतिमिरप्राग्भारमुच्चाटयन्
चेतः सद्मनि योगिनां विजयते ज्ञानप्रदीपो हरः ॥ १ ॥

### तृष्णादूषणं ॥

बोद्धारो मत्सरग्रस्ताः प्रभवः स्मयदूषिताः ।
अबोधोपहताश्चान्ये जीर्णमङ्गे सुभाषितं ॥ २ ॥
न संसारोत्पन्नं चरितमनुपश्यामि कुशलं
विपाकः पुण्यानां जनयति भयं मे विमृशतः ।
महद्भिः पुण्यौघैश्चिरमपि गृहीताश्च विषया
महान्तो जायन्ते व्यसनमिव दातुं विषयिणां ॥ ३ ॥
भ्रान्तन्देशमनेकदुर्गविषमं प्राप्तं न किञ्चित्फलं
त्यक्त्वा जातिकुलाभिमानमुचितं सेवा कृता निष्फला ।
भुक्तं मानविवर्जितं परगृहेष्वाशङ्कया काकवत्
तृष्णे जृम्भसि पापकर्मपिशुने नाद्यापि सन्तुष्यसि ॥ ४ ॥
उत्खातन्निधिशङ्कया क्षितितलं ध्माता गिरेर्धातवो
निस्तीर्णस्सरिताम्पतिर्न्नृपतयो यत्नेन सन्तोषिताः ।
मन्त्राराधनतत्परेण मनसा नीताः श्मशाने निशाः

प्राप्तः काणवराटकोपि न मया तृष्णेऽधुना मुञ्च मां ॥५॥
खलोल्लापाः सोढाः कथमपि तदाराधनपरैर्
निगृह्यान्तर्वास्यं हसितमपि शून्येन मनसा ।
कृतश्चित्तस्तम्भः प्रतिहतधियामञ्जलिरपि
त्वमाशे मोघाशे किमु परमतो नर्तयसि मां ॥ ६ ॥
अमीषां प्राणानां तुलितबिसिनीपत्रपयसां
कृते किन्नास्माभिर्विगलितविवेकैर्व्यवसितं ।
यदाढ्यानामग्रे द्रविणमदनिःसंज्ञमनसां
कृतं वीतव्रीडैर्निजगुणकथापातकमपि ॥ ७ ॥
भोगा न भुक्ता वयमेव भुक्तास्तपो न तप्तं वयमेव तप्ताः ।
कालो नयातोवयमेव यातास्तृष्णा न जीर्णा वयमेवजीर्णाः
वलिभिर्मुखमाक्रान्तं पलितैरङ्कितं शिरः । [॥ ८ ॥
गात्राणि शिथिलायन्ते तृष्णैका तरुणायते ॥ ९ ॥
निवृत्ता भोगेच्छा पुरुषबहुमानोपि गलितः
समानाः स्वर्याताः सपदि सुहृदो जीवितसमाः ।
शनैर्यष्ट्युत्थानं घनतिमिररुद्धे च नयने
अहो दुष्टः कायस्तदपि मरणापायचकितः ॥ १० ॥
आशा नाम नदी मनोरथजला तृष्णातरङ्गाकुला
रागग्राहवती वितर्कविहगा धर्मद्रुमध्वंसिनी ।
मोहावर्तसुदुस्तरातिगहना प्रोत्तुङ्गचिन्तातटी
तस्याः पारगता विशुद्धमनसो नन्दन्ति योगीश्वराः ॥११॥

विषयपरित्यागविडम्बना ॥

अवश्यं यातारश्चिरतरमुषित्वापि विषया
वियोगे को भेदस्त्यजति न जनो यत्स्वयममून् ।
व्रजन्तः स्वातन्त्र्यादतुलपरितापाय मनसः
स्वयन्त्यक्तास्त्वेते शममुखमनन्तं विदधति ॥ १२ ॥
ब्रह्मज्ञानविवेकनिर्मलधियः कुर्वन्त्यहो दुष्करं
यन्मुञ्चन्त्युपभोगभाञ्ज्यपि धनान्येकान्ततो निस्पृहाः ।
सम्प्राप्तानि पुरा न संम्प्रति न च प्राप्तौ दृढप्रत्ययो
वांछामात्रपरिग्रहाण्यपि परित्यक्तुन्न शक्तावयं ॥ १३ ॥
धन्यानां गिरिकन्दरेषु वसतां ज्योतिः परं ध्यायताम्
आनन्दाश्रुकणान्पिबन्ति शकुना निःशङ्कमङ्केशयाः ।
अस्माकं तु मनोरथोपरचितप्रासादवापीतट
क्रीडाकाननकेलिकौतुकजुषामायुः परं क्षीयते ॥ १४ ॥
स्तनौ मांसग्रंन्थी कनककलशावित्युपमितौ
मुखं श्लेष्मागारं तदपि च शशाङ्केन तुलितं ।
स्रवन्मूत्रक्लिन्नं करिवरकरस्पर्द्धि जघनं
मुहुर्निन्द्यं रूपं कविवरविशेषैर्गुरु कृतं ॥ १५ ॥
भिक्षाशनं तदपि नीरसमेकवारं
शय्या च भूः परिजनो निजदेहमात्रं ।
वस्त्रं च जीर्णशतखण्डमलीनकन्था
हाहा तथापि विषयान्न परित्यजन्ति ॥ १६ ॥

अजानन्माहात्म्यं पतति शलभस्तीव्रदहने
समीनोप्यज्ञानाद्बडिशयुतमश्नाति पिशितं ।
विजानन्तोप्येते वयमिह विपज्जालपटलान्
न मुञ्चामः कामानहह गहनो मोहमहिमा ॥ १७ ॥
तुङ्गं वेश्म सुताः सतामभिमताः संख्यातिगाः संपदः
कल्याणी दयिता वयश्च नवमित्यज्ञानमूढो जनः ।
मत्वा विश्वमनश्वरन्निविशते संसारकारागृहे
संदृश्य क्षणभङ्गुरं तदखिलं धन्यस्तु संन्यस्यति ॥ १८ ॥

## याञ्चादैन्यदूषणं ॥

दीनादीनमुखैः स्वकीयशिशुकैराकृष्टजीर्णाम्बरां
क्रोशद्भिः क्षुधितैर्निरन्नजठरां दृश्येत चेद्गेहिनीं ।
याच्ञाभङ्गभयेन गद्गदगलत्त्रुट्यद्विलीनाक्षरं
कोदेहीति वदेत्स्वदग्धजठरस्यार्थे मनस्वी पुमान् ॥ १९ ॥
अभिमतमहामानग्रन्थिप्रभेदपटीयसी
गुरुतरगुणग्रामाम्भोजस्फुटोज्ज्वलचन्द्रिका ।
विपुलविलसल्लज्जावल्लीविदारकुठारिका
जठरपिठरी दुष्पूरेयं करोति विडम्बनं ॥ २० ॥
पुण्यग्रामे वने वा महति शितपटच्छन्नपालीकपालीम्
आदाय न्यायगर्भं द्विजहुतहुतभुग्धूमधूम्रोपकण्ठं ।
द्वारं द्वारं प्रविष्टो वरमुदरदरीपूरणाय क्षुधार्तो
मानीप्राणीसनाथो नपुनरनुदिनं तुल्यकुल्येषुदीनः ॥ २१ ॥

गङ्गातरङ्गकणशीकरशीतलानि
विद्याधराध्युषितचारुशिला तलानि ।
स्थानानि किं हिमवतः प्रलयं गतानि
यत्सापमानपरपि [illegible]रता मनुष्याः ॥ २२ ॥
किं कन्दाः कन्दरेभ्यः [illegible]नैर्झरा वा गिरिभ्यः
प्रध्वस्ताः किं महीजाःसरसफलभृतो [illegible] शाखाः ।
वीक्ष्यन्ते किं मुखानि प्रसभमपगतप्रश्रयाणां खलानां
दुः[illegible]ोपात्ताल्पवित्तस्मयपवनवशान्नर्तितभ्रूलतानि ॥२३॥
पुण्यैर्मूलफलप्रियप्रणयनीं प्रीतिं कुरुष्वाधुना
भूशय्या नवप[illegible]वैरकृपणैरुत्तिष्ठ यामो वनं ।
क्षुद्राणामविवेकमूढमनस तत्रेश्वराणां सदा
[illegible]धिविकारविह्वलगिरां नामापि न श्रूयते ॥ २४ ॥
फलं स्वेच्छालभ्यं प्रतिवनमखेदं क्षितिरुहां
पयः स्थाने स्थाने शिशिरमधुरं पुण्यसरितां ।
मृ[illegible] स्पर्शी शय्या सुललितलता पल्लवमयी
स[illegible]न्ते सन्तापं तदपि धनिनां द्वारि कृपण[illegible]: ॥ २५ ॥
ये वर्द्धन्ते धनपतिपुरःप्रार्थनादुःखभाजो
ये चाल्पत्वं दधति विषया[illegible]पपर्यस्तबुद्धेः ।
तेषामन्तःस्फु[illegible]त[illegible]सितं वासराणां स्मरेयं
ध्यानच्छेदे शिख[illegible]रग्रावशय्यानिषण्णः ॥ २६ ॥
भिक्षाहारम[illegible]न्यमप्रतिहतं भीतिच्छिदं सर्वदा
दुम[illegible]भिमानमथनं दुःखौघविध्वंसनं ।

सर्वत्रान्वहमप्रयत्नसुलभं साधुप्रियं पावनं
शम्भोः सत्रमवार्यमक्षयनिधिं शंसन्ति योगीश्वराः ॥२७॥
भोगे रोगभयं कुले च्युतिभयं वित्ते नृपालाद्भयं
माने दैन्यभयं बले रिपुभयं रूपे तरुण्याभयं ।
शास्त्रे वादिभयं गुणे खलभयं काये कृतान्ताद्भयं
सर्वं वस्तु भयान्वितं भुवि नृणां वैराग्यमेवाभयं ॥ २८ ॥
आक्रान्तं मरणेन जन्मजरसा यात्युत्तमं यौवनं
सन्तोषोधनलिप्सया शमशुखं प्रौढाङ्गनाविभ्रमैः ।
लोकैर्मत्सरिभिर्गुणावनभुवोव्यालैर्नृपादुर्जनैर्
अस्थैर्येण विभूतयोप्युपहता ग्रस्तं न किङ्केन वा ॥ २९ ॥
आधिव्याधिशतैर्जनस्य विविधरारोग्यमुन्मूल्यते
लक्ष्मीर्यत्र पतन्ति तत्र विवृतद्वाराइव प्रापदः ।
जातं जातमवश्यमासु विवशं मृत्युः करोत्यात्मसात्
तत्किङ्केन निरङ्कुशेन विधिना यन्निर्मितं सुस्थिरं ॥३०॥
भोगास्तुङ्गत ङ्गतुल्यतरलाः प्राणाः क्षणध्वंसिनः
स्तोकान्येव दिनानि यौवनसुखं स्फुर्तिः [illegible]सु स्थिता ।
तत्संसारमसारमेव निखिलं बुध्वा बुधा बोधका
लोकानुग्र पेशलेन मनसा यत्नः समाधीयतां ॥३१॥
भोगा मेघवितानमध्यविलसत्सौदामिनीचञ्चला
आयुर्वायुविघट्टिताभ्रपटली[illegible]म्बुवद्भङ्गुरं ।
लोला यौवनलालसास्तनुभृतामित्याकलय्य द्रुतं
योगे धैर्यसमाधिसिद्धिसुलभे बुद्धिं विधद्ध्व बुधाः ॥ ३२ ॥

आयुः कल्लोललोलं कतिपयदिवसस्थायिनी यौवनश्रीर्
अर्थाः सङ्कल्पकल्पा घनसमयतडिद्विभ्रमा भोगपूगाः ।
कण्ठाश्लेषोपगूढं तदपि च न चिरं यत्प्रियाभिः प्रणीतं
ब्रह्मण्यासक्तचित्ता भवत भवभयाम्भोधिपारं तरन्तः ॥३३॥
कृच्छ्रेणामेध्यमध्ये नियमिततनुभिः स्थीयते गर्भवासे
कान्ताविश्लेषदुःखव्यतिकरविषमे यौवने चोपभोगः ।
वामाक्षीणामवज्ञाविहसितवसतेर्वृद्धभावोप्यसाधुः
संसारे रे मनुष्या वदत यदि सुखं स्वल्पमप्यस्ति किञ्चित् ॥३४॥
व्याघ्रीव तिष्ठति जरा परितर्जयन्ती
रोगाश्च शत्रवइव प्रहरन्ति देहे ।
आयुः परिस्रवति भिन्नघटादिवाम्भो
लोकस्तथाप्यहितमाचरतीति चित्रं ॥३५॥
भोगा भङ्गुरवृत्तयो बहुविधास्तैरेव चायं भवस्
तत्कस्येहकृते परिभ्रमत हे लोकाः कृतं चेष्टितं ।
आशापाशशतोपशान्तिविशदं चेतः समाधीयतां
काम्योत्पत्तिवशे स्वधामनि यदि श्रद्धेयमस्मद्वचः ॥३६॥
ब्रह्मेन्द्रादिमरुद्गणांस्तृणगणान् यत्र स्थितो मन्यते
यत्स्वादाद्विरसा भवन्ति विभवास्त्रैलोक्यराज्यादयः ।
बोधः कोपि सएकएव परमो नित्योदितो जृम्भते
भोःसाधो क्षणभङ्गुरे तदितरे भोगे रतिं मा कृथाः ॥३७॥

## कालमहिमा ॥

सा रम्या नगरी महान् स नृपतिः सामन्तचक्रञ्च तत्
पार्श्वे तस्य च सा विदग्धपरिषत्ताश्चन्द्रबिम्बाननाः ।
उन्मत्तः स च राजपुत्त्रनिवहस्ते वन्दिनस्ताः कथाः
सर्वं यस्य वशादगात् स्मृतिपथं कालाय तस्मै नमः ॥३८॥

यत्रानेकः क्वचिदपि च गृहे तत्र तिष्ठत्यथैको
यत्राप्येकस्तदनु बहवस्तत्र नैकोपि चान्ते ।
इत्थञ्चेमौ रजनिदिवसौ दोलयन् द्वाविवक्षौ
कालः काल्या भुवनफलके क्रीडति प्राणिसारैः ॥ ३९ ॥

आदित्यस्य गतागतैरहरहः संक्षीयते जीवनं
व्यापारैर्बहुनार्यभारगुरुभिः कालो न विज्ञायते ।
दृष्ट्वा जन्मजराविपत्तिमरणं त्रासश्च नोत्पद्यते
पीत्वा मोहमयीं प्रमादमदिरामुन्मत्तभूतं जगत् ॥ ४० ॥

रात्रिः सैव पुनः सएव दिवसो मत्वा मुधा जन्तवो
धावन्त्युद्यमिनस्तथैव निभृतं प्रारब्धतत्तत्क्रियाः ।
व्यापारैः पुनरुक्तभूतविषयैरित्थं विधेनामुना
संसारेण कदर्थिता वयमहो मोहं न जानीमहे ॥ ४१ ॥

न ध्यातं पदमीश्वरस्य विधिवत्संसारविच्छित्तये
स्वर्गद्वारकपाटपाटनपटुर्धर्मोपि नोपार्जितः ।
नारीपीनपयोधरोरुयुगलं स्वप्नेपि नालिङ्गितं
मातुः केवलमेव यौवनवनच्छेदे कुठारा वयं ॥ ४२ ॥

नाभ्यस्ता भुवि वादिवृन्ददमनी विद्या विनीतोचिता

खड्गाग्रैः करिकुम्भपीठदमनैर्नाके न नीतं यशः ।
कान्ताकोमलपल्लवाधररसः पीतो न चन्द्रोदये
तारुण्यङ्गतमेव निष्फलमहो शून्यालये दीपवत् ॥ ४३ ॥
विद्या नाधिगता कलङ्करहिता वित्तं च नोपार्जितं ।
शुश्रूषापि समाहितेन मनसा पित्रोर्न संपादिता ॥ ४४ ॥
आलोलायतलोचनायुवतयः स्वप्नेपि नालिङ्गिताः ।
कालोयं परपिण्डलोलुपतया काकैरिव प्रेषितः ॥ ४५ ॥
वयं येभ्यो जाताश्चिरपरिगताएव खलु ते
समायेषां वृद्धाःस्मृतिविषयतां तेपि गमिताः ।
[illegible]दानीमेतेस्मत्प्रातदिवसमापन्नपतना
गता तुल्यावस्थां सिकतिनिनदीतीरतरुभिः ॥ ४६ ॥
आयुर्वर्षशत नृणां परिमितं रात्रौ तदर्द्धं गतं
तस्यार्द्धस्य परस्य चार्द्धमपरं बालत्व[illegible]योः ।
शेषं व्याधिवियोगदुःखसहितं सेवादिभिर्नीयते
जीवे वारितरङ्गचञ्चलतरे सौख्यं कुतः प्राणिनां ॥ ४७ ॥
क्षणं बालो भूत्वा क्षणमपि युवा कामरसिकः
क्षणं वित्तैर्हीनः क्ष[illegible] च संपूर्णविभवः ।
[illegible]रङ्गैर्नटइव वलीमण्डिततनुः
नरः संसारान्ते विशति यमधानीयवनिकां ॥ ४८ ॥

## यतिनृपतिसम्वादः ॥

त्वं राजा वयमप्युपसितगुरुः प्रज्ञाभिमानोन्नगाः

ख्यातस्त्वं विभवैर्यशांसि कवयो दिक्षु प्रतन्वन्ति च ।
इत्थं मानधनातिदूरमुभयोरप्यावयोरन्तरं
यद्यस्मासु पराङ्मुखोसि वयमप्येकान्ततोनिस्पृहाः ॥४९॥
अहौ वा हारे वा बलवति रिपौ वा सुहृदि वा
मणौ वा लोष्टे वा कुसमशयने वा दृशदि वा ।
तृणे वा स्त्रैणे वा मम समदृशो यान्ति दिवसाः
क्वचित्पुण्येऽरण्ये शिवशिवशिवेति प्रलपतः ॥५०॥
एकाकी निस्पृहः शान्तः पाणिपात्रोदिगम्बरः ।
कदा शम्भो भविष्यामि कर्मनिर्मूलनक्षमः ॥५१॥
पाणिं पात्रयतां निसर्गशुचिना भैक्षेण सन्तुष्यतां
यत्र क्वापि निषीदतां बहुतृणं विश्वं मुहुः पश्यतां ।
अत्यागेपि तनोरखण्डपरमानन्दावबोधस्पृहां
मर्त्यः कोपि शिवप्रसादसुलभां संपत्स्यते योगिनां ॥५२॥
अर्थानामीशिषे त्वं वयमपि च गिरामीश्महे यावदर्थं
शूरस्त्वं वादिदर्पज्वरशमनविधावक्षयं पाटवं ते ।
सेवन्ते त्वां धनाढ्यामतिमलहतये मामपि श्रोतुकामा
मय्यप्यास्था न ते चेत्त्वयि मम नितरामेव राजन् गतासीत्
वयमिह परितुष्टा वल्कलैस्त्वं दुकूलैः [ ॥५३॥
समइह परितोषो निर्विशेषो विशेषः ।
सतु भवतु दरिद्रो यस्य तृष्णा विशाला
मनसि च परितुष्टे कोर्थवान् को दरिद्रः ॥५४॥
फलमलमशनाय स्वादु पानाय तोयं

शयनमवनिपृष्ठे वाससी वल्कले च ।
धनलवमधुपानभ्रामिसर्वेन्द्रियाणाम्
अविनयमनुमन्तुं नोत्सहे दुर्जनानां ॥ ५५ ॥
अश्नीमहि वयं भिक्षामाशावासो वसीमहि ।
शयीमहि महीपृष्ठे कुर्वीमहि किमीश्वरैः ॥ ५६ ॥
न नटा न विटा न गायका न च सभ्येतरवादिचञ्चवः ।
नृप संसदि तेच के वयं स्तनभारानमितान योषितः
विपुलहृदयैरीशैः कैश्चिज्जगज्जनितं पुरा [ ॥५७॥
विधृममपरैर्दत्तं चान्यैर्विजित्य तृणं यथा ।
इह हि भुवनान्यन्ये धीराश्चतुर्दश भुञ्जते
कतिपयपुरस्वाम्ये पुंसां कएष मदनज्वरः ॥ ५८ ॥
अभुक्तायां यस्यां क्षणमपि न यातं नृपशतैर्
भुवस्तस्या लाभे कइह वहुमानः क्षितिभृतां ।
तदंशस्याप्यंशे तदवयवलेशेपि पतयो
विषादे कर्तव्ये विदधति जडाः प्रत्युत मुदं ॥ ५९ ॥
परेषां चेतांसि प्रतिदिवसमाराध्य वहुधा
प्रसादं किन्नेतुं विशसि हृदयक्लेशविफलं ।
प्रसन्ने त्वय्यन्तः स्वयमुदितचिन्तामणिगुणे
विविक्ते सङ्कल्पे किमभिलषितं पुष्यति न ते ॥ ६० ॥
परिभ्रमसि किं वृथा क्व च न चित्त विश्रम्यतां
स्वयम्भवति यद्यथा भवति नान्यथा तत्तथा ।
अतीतमपि न स्मरन्नपि च भाव्यसङ्कल्पयन

न तर्कितगमागमाननु भवस्व भोगानिह ॥ ६१ ॥
एतस्माद्विरमेन्द्रियार्थगहनादायासकादाश्रयात्
श्रेयोमार्गमशेषदुःखशमनव्यापारदक्षं क्षणात् ।
आत्मीभावमुपैहि सन्त्यज निजां कल्लोललोलां मतिं
मा भूयो भज भङ्गुरांभवरतिं चेतः प्रसीदाधुना ॥ ६२ ॥
मोहं मार्जय तामुपाश्रय रतिं चन्द्रार्द्धचूडामणौ
चेतः स्वर्गतरङ्गिणीतटभुवि व्यासङ्गमङ्गी कुरु ।
कोवा वीचिषु वुद्बुदेषु च तडिल्लेखासु च श्रीषु च
ज्वालाग्रेषु च पन्नगेषु च सरिद्वेगेषु च प्रत्ययः ॥ ६३ ॥
चेतश्चिन्तय मा रमां सकृदिमामास्थायिनीमास्थया
भूपालभ्रुकुटीकुटीरविहरव्यापारपण्याङ्गनां ।
कन्थाकञ्चुकितः प्रविश्य भवनद्वारानि वाराणसी
रथ्यापंक्तिषु पाणिपात्रपतितां भिक्षामपेक्षामहे ॥ ६४ ॥
अग्रे गीतं सरसकवयः पार्श्वयो र्दाक्षिणात्याः
पश्चाल्लीलावलयरणितं चामरग्राहिणीनां ।
यद्यस्त्येवं कुरु भवरसास्वादने लम्पटत्वं
नोचेच्चेतः प्रविश सहसा निर्विकल्पे समाधौ ॥ ६५ ॥
प्राप्ताः श्रियः सकलकामदुघास्ततः किं
न्यस्तं पदं शिरसि विद्विषतां ततः किं ।
संपादिताः प्रणयिनोविभ वास्ततः किं
कल्पस्थितास्तनुभृतस्तनवस्ततः किं ॥ ६६ ॥
भक्तिर्भवे मरणजन्मभयं हृदिस्थं

स्नेहीन बन्धुषु च मन्मथजा विकाराः ।
संसर्गदोषरहिताविजना वनान्ता
वैराग्यमस्ति किमतः परमर्थनीयं ॥ ६७ ॥
तस्मादनन्तमजरं परमाविकासि
तद्ब्रह्म चिन्तय किमेभिरसद्विकल्पः ।
यस्यानुषङ्गिणइमे भुवनाधिपत्य
भोगादयः कृपणलोकमता भवन्ति ॥ ६८ ॥
पातालमाविशसि यासि नभोविललंघ्य
दिङ्मण्डलं भ्रमसि मानस चापलेन ।
भ्रान्त्यापि जातु विमलं कथमात्मलीनं
न ब्रह्म संस्मरसि निर्वृतिमेसि केन ॥ ६९ ॥

## नित्यानित्यविचारः ॥

किं वेदैः स्मृतिभिः पुराणपठनैः शास्त्रैर्महाविस्तरैः
स्वर्गग्रामकुटीनिवासफलदैः कर्मक्रियाविभ्रमैः ।
मुक्त्वैकं भवदुःखभाररचनाविध्वंसकालानलं
स्वात्मानन्दपदप्रकाशकलनं शेषा वणिग्वृत्तयः ॥ ७० ॥
गात्रं सङ्कुचितं गतिर्विगलिता भ्रष्टा च दन्तावली
दृष्टिं नश्यति वर्द्धते वधिरता वक्त्रं च लालायते ।
वाक्यं नाद्रियते च बान्धवजनोभार्या न शुश्रूषते
हा कष्टं पुरुषस्य जीर्णवयसः पुत्त्रोप्यमित्रायते ॥ ७१ ॥
वर्णं सितं समववीक्ष्य शिरोरुहाणां

स्थानं जरापरिभवस्य तदेव पुंसां ।
आरोपितास्थिकलशं परिहृत्य यान्ति
चाण्डालकूपमिव दूरतरं तरुण्यः ॥ ७२ ॥
यावत्स्वस्थमिदं शरीरमरुजं यावज्जरा दूरतो
यावच्चेन्द्रियशक्तिरप्रतिहता यावत् क्षयोनायुषः ।
आत्मश्रेयसि तावदेव विदुषा कार्यः प्रयत्नो महान्
सन्दीप्ते भवने तु कूपखननं प्रत्युद्यमः कीदृशः ॥ ७३ ॥
तपस्यन्तः सन्तः किमधिनिवसामः सुरनदीं
गुणोदारान्दारानुत परिचरामः सविनयं ।
पिवामः शास्त्रौघानुत विविधकाव्यामृतरसान्
न विद्मः किं कुर्मः कतिपयनिमेषायुषि जने ॥ ७४ ॥
दुराराध्यः स्वामी तुरगचलचित्ताः क्षितिभुजो
वयञ्च स्थूलेछा सुमहति पदे वद्धमनसः ।
जरादेहे मृत्युर्हरति दयितं जीवितमिदं
सखे नान्यच्छ्रेयोजगति विदुषामच तपसः ॥ ७५ ॥
रम्यं हर्म्यतलं न किं वसतये श्राव्यं नगेयादिकं
किं वा प्राणसमासमागमसुखं नैवाधिकं प्रीतये ।
किन्तु भ्रान्तपतङ्गपक्षपवनव्यालोलदीपांकुर
छायाचञ्चलमाकलय्य सततं सन्तो वनान्तङ्गताः ॥ ७६ ॥

## शिवार्चनपद्धतिः ॥

आसंसारं त्रिभवनमिदं चिन्वतां तातताहृङ्

नैवास्माकं नयनपदवीं श्रोचमार्गं गतोवा ।
योयं धत्ते विषयकरिणीगाढगूढाभिमानः
क्षीवस्यान्तःकरणकरिणः संयमालानलीलां ॥ ७७ ॥
जीर्णाएव मनोरथाश्च हृदये यातं च तद्यौवनं
हंताङ्गेषु गुणाश्च बन्ध्यफलतां याता गुणज्ञैर्विना ।
किं युक्तं सहसाभ्युपैति बलवान् कालः कृतान्तोऽक्षमी
ह्यज्ञातं मदनान्तकांघ्रियुगलं मुक्तास्तिनान्यागतिः ॥ ७८ ॥
महेश्वरे वा जगतामधीश्वरे
जनार्दने वा जगद[illegible]न ।
न वस्तुतो मे प्रतिपत्तिरस्ति
तथापि भक्तिस्तरुणेन्दुशेखरे ॥ ७९ ॥
स्फुरत्स्फारज्योत्स्नाधवलिततले क्वापि पुलिने
सुखासीनाः शान्तध्वनिषु रजनीषु द्युसरितः ।
भवाभोगोद्विग्नाः शिवशिवशिवेत्युच्चवचसः
कदा यास्यामोऽन्तर्गतवहुलवास्याकुलदृशः ॥ ८० ॥
वितीर्णे सर्वस्वे तरुणकरुणापूर्णहृदयास्
तरन्तः संसारं विरसपरिणामावधिगतं ।
कदा पुण्यारण्ये परिगतश[illegible]रणास्
चियामा नेष्यामोहरचरणाचत्तैकश[illegible]णाः ॥ ८१ ॥
कदा वाराणस्याममरतटिनीरोधसि वसन्
वसानः कौपीने शि[illegible]से निदधानोञ्जलिपुटं ।
अये गौरीनाथ चिपुरहरशम्भो चिणयन

प्रसीदेत्याक्रोशन्निमिषमिव नेष्यामि दिवसान् ॥ ८२ ॥
स्नात्वा गाङ्गैः पयोभिः शुचिकुसुमफलैरर्चयित्वा विभो त्वां
ध्येये ध्यानं निवेश्य क्षितिधरकुहरग्रावशय्यानिषण्णः ।
आत्मारामः फलाशी गुरुवचनरतस्त्वत्प्रसादात् स्मरारे
दुःखं मोक्ष्ये कदाहं समकरचरणे पुंसि सेवासमुत्थं ॥ ८३ ॥
मही शय्या शय्या विपुलमुपधानं भुजलता
वितानं चाकाशं व्यजनमनुकूलोयमनिलः ।
स्फुरद्दीपश्चन्द्रो विरतिवनितासङ्गमुदितः
सुखं शान्तः शेते मुनिरतनुभूतिर्नृपइव ॥ ८४ ॥

अवधूतचर्या ॥

कौपीनं शतखण्डजर्जरतरं कन्था पुनस्तादृशी
नैश्चिन्त्यं निरपेक्ष्य भैक्षमशनं निद्रा श्मशाने वने ।
स्वातन्त्र्येण निरङ्कुशं विहरणं स्वान्तं प्रशान्तं सदा
स्थैर्यं योगमहोत्सवेपि च यदि त्रैलोक्यराज्येन किं ॥ ८५ ॥
भूः पर्यंको निजभुजलता कन्दुकः खं वितानं
दीपश्चन्द्रो विरतिवनितालब्धसङ्गप्रमोदः ।
दिक्कान्ताभिः पवनचमरैर्वीज्यमानः समन्तात्
भिक्षुः शेते नृपइव भुवि त्यक्तसर्वस्पृहोपि ॥ ८६ ॥
ब्रह्माण्डो मण्डलीमात्रं को लोभोयं मनस्विनः ।
शफरीस्फुरितेनाब्धेः क्षुब्धता जातु जायते ॥ ८७ ॥
यदासीदज्ञानं स्मरतिमिरसंस्कारजनितं

तदा दृष्टं नारीमयमिदमशेषं जगदिति।
इदानीमस्माकं पटुतरविवेकाञ्जनजुषां
समीभूता दृष्टिस्त्रिभुवनमपि ब्रह्म मनुते॥ ८८॥
रम्याश्च—द्रमरीचयस्तृणवती रम्या वनान्तस्थली
रम्यं साधुसमागमसुखं काव्येषु रम्याः कथाः।
कोपोपाहितवाष्पविन्दुतरलं रम्यं प्रियाया मुखं
सर्वं रम्यमनित्यतामधिगते चित्ते न किञ्चित्तु न॥ ८९॥
भिक्षाशी जनमध्यसङ्गरहितः स्वायत्तचेष्टः सदा
हानादानविभिन्नवर्णरहितः कश्चित्तपस्वी स्थितः।
रथ्याकीर्णविशीर्णजीर्णवसनैरास्यूतकन्थाधरो
निर्मानो निरहंकृतिः समसुधाभोगैकबद्धस्पृहः॥ ९०॥
मातर्मेदिनि तात मारुत सखे ज्योतिः स्वबन्धो जल
भ्रातर्व्योम निबद्ध एष भवतामग्रे प्रणामाञ्जलिः।
युष्मत्सङ्गवशोपजातसुकृतोद्रेकस्फुरन्निर्मल
ज्वालापास्तसमस्तमोहमहिमा लीये परब्रह्मणि॥ ९१॥
स्वादिष्ठं मधुनो घृताच्च रसवद्यत् प्रस्रवत्यक्षरं
दैवीवागमृतात्मनो रसवतस्तेनैव तृप्ता वयं।
कुक्षौ यावदिमे भवन्ति धृतये भिक्षाहृताः सक्तवः
तावद्दास्यकृतार्जनैर्नहि धनैर्वृत्तिं समीहामहे॥ ९२॥
निवृत्ता भोगेच्छा पुरुषबहुमाना विगलिताः
समानाः स्वर्याताः सपदि सुहृदो जीवितसमाः।
शनैर्यष्ट्युत्थानं घनतिमिररुद्धे च नयने

अहो भ्रष्टः कायस्तदपि मरणोपायचकितः ॥ ९३ ॥

हिंसाशून्यमयत्नलभ्यमशनं वायुः कृतो वेधसा
व्यालानां पशवस्तृणाङ्कुरभुजः पुष्टाः स्थलीशायिनः ।
संसारार्णवलंघनक्षमधियां वृत्तिः कृता सा नृणां
यामन्वेषयतां प्रयान्ति सहसा सर्वे समाप्तिं गुणाः ॥ ९४ ॥

कृशः काणः खञ्जः श्रवनरहितः पुच्छविकलो
व्रणी पूयक्लिन्नः कृमिकुलशतैरावृततनुः ।
क्षुधाक्षामो जीर्णः पिठरन्ककपालार्दितगलः
शुनीमन्वेति श्वा तमपि निहन्त्येव मदनः ॥ ९५ ॥

मृत्पिण्डो जलरेखया वलयितः सर्वोप्ययं नन्वणुः
स्वाशीःकृत्य तमेव संयुगशतैराज्ञां गणा भुञ्जते ।
दद्यन्ते ददतोथवा किमपरे क्षुद्रा दरिद्रा भृशं
धिग्धिक्तापुरुषाधमान्धनलवन्तेभ्योपि वांछन्ति ये ॥ ९६ ॥

ददतु ददतु गालीर्गालिमन्तो भवन्तो
वयमपि तदभावाद्गालिदानेऽसमर्थाः ।
जगति विदितमेतद्दीयते विद्यमानं
नहि शशकविषाणं कोपि कस्मै ददाति ॥ ९७ ॥

पुरा वि[illegible]त्तासीदमलिनधियां क्लेशहतये
गता कालेनासौ विषयसुखसिद्धौ विषयिणां ।
इदानीं संप्रेक्ष्य क्षितितलभुजः शास्त्रविमुखा
अहो कष्टं सापि प्रति[illegible]धोधः प्रविशति ॥ ९८ ॥

स जातः कोप्यासीन्मदनरिपुणा मूर्ध्नि धवलं

कपालं यस्योच्चैर्विनि ितमलङ्कारविधये ।
न्टभिः प्रा  प्रवणमतिभिः कैश्चिदधुना
नमद्भिः कः पुंसामयमतुलदर्पज्वरभरः ॥ ९९ ॥
यदा किञ्चिज्ज्ञो ं द्विपइव मदान्धः समभवं
तदा सर्वज्ञोस्मीत्यभवदवलिप्तं मम मनः ।
यदा कि त्किञ्चिद्गुरुजनसकाशादधिगतं
तदा मू र्वोस्मीति ज्वरइव मदो मे व्यपगतः ॥ १०० ॥
माने म्लायिनि खण्डिते च वसुनि व्यर्थे प्रयातेऽर्थिनि
क्षीणे बन्धुजने गते परिजने नष्टे शनैर्यौवने ।
युक्तं केवलमेत व सुधियां यज्जह्नुकन्यापयः
पू  े निवासः क्वचित् ॥१०१

इति श्रीभर्तृहरिविरचितं वैराग्यशतकं समाप्तं ॥

## सूर्यशतकं ।

### रश्मिवर्णनं ॥

जम्भारातीभकुम्भोद्भवमिव दधतः सान्द्रसिन्दूररेणुं
रक्ताः सक्तैरिवौघैरुदयगिरितटीधातुधाराद्रवस्य ।
आयान्त्या तुल्यकालं कमलवनरुचेवारुणा वो विभूत्यै
भूयासुर्भासयन्तो भुवनमभिनवा भानवो भानवीयाः ॥१॥
भक्तिप्रह्वाय दातुं मुकुलपुटकुटीकोटरक्रोडलीनां
लक्ष्मीमाक्रष्टुकामाइव कमलवनोद्घाटनं कुर्वते ये ।
कालाकारान्धकारानननपतितजगत्साध्वसध्वंसकल्याः
कल्याणं वः क्रियासुः किसलयरुचयस्ते करा भास्करस्य ॥२॥
गर्भेष्वम्भोरुहाणां शिखरिषु च शिताग्रेषु तुल्यं पतन्तः
प्रारम्भे वासरस्य व्युपरतिसमये चैकरूपास्तथैव ।
निष्पर्यायं प्रवृत्तास्त्रिभुवनभवनप्राङ्गणे पान्तु युष्मान्
उष्माणं सन्तताध्वश्रमजमिव भृशं बिभ्रतो ब्रध्नपादाः ॥३॥
प्रभ्रस्यत्युत्तरीयत्विषि तमसि समुद्वीक्ष्य वीतावृतीन् प्राग्
जन्तूंस्तन्तून्यथा यानतनु वितनुते तिग्मरोचिर्मरीचीन् ।
ते सान्द्रीभूय सद्यः क्रमविशददशाशादशालीविशालं
शश्वत्सम्पादयन्तोऽम्बरममलमलं मङ्गलं वो दिशन्तु ॥४॥
न्यक् कुर्वन्नोषधीशे मुषितरुचि शुचेवौषधीः प्रोषिताभा
भास्वद्ग्रावोद्गतेन प्रथममिव कृताभ्युद्गतिः पावकेन ।

गल्लोल्लाघासृक्सुत व हृश्दो दर्शयन् प्रातरद्रेर्
स्य आ ताम्रस्तीव्रभानोरनभिमतनुदे स्ताद्गभस्त्युद्गमो वः॥५॥
शीर्णघ्राणाङ्घ्रिपाणीन् व्रणिभिरपघनैर्घर्घराव्यक्तघोषान्
दीर्घाघ्रातानघौघैः पुनरपि घटयत्येक उल्लाघयन् यः ।
घर्मांशोस्तस्य वोऽन्तर्द्विगुणघनघृणानिघ्ननिर्विघ्नवृत्तेर्
दत्तार्घाः सिद्धसंघैर्विदधतु घृणयः शीघ्रमंघोविघातं ॥ ६ ॥
बिभ्राणा वामनत्वं प्रथममथ तथैवांशवः प्रांशवो वः
क्रान्ताकाशान्तरालास्तदनु दश दिशः पूरयन्तस्ततोपि ।
ध्वान्तादाच्छिद्य देवद्विष इव बलितो विश्वमाश्वश्नुवानाः
कृच्छ्राण्युच्छ्रायहेलावहसितहरयो हारिदश्वा हरन्तु ॥ ७ ॥
उद्गाढेनारुणिम्ना विदधति बहुलं येऽरुणस्यारुणत्वं
मूर्द्धोद्धूतौ खलीनक्षतरुधिररुचो ये रथाश्वाननेषु ।
शैलानां शेखरत्वं श्रितशिखरिशिखास्तन्वते ये दिशन्तु
प्रेंखन्तः खे खरांशोः खचितदिङ्मुखास्ते मयूखाः सुखं वः॥८॥
कान्तानन्दाः प्रजानां समुचितसमयसंसृष्टैः पयोभिः
पूर्वाह्णे विप्रकीर्णा दिशि दिशि विरमत्यह्नि संहारभाजः ।
दीप्तांशोर्दीर्घदुःखप्रभवभवभयोदन्वदुत्तारनावो
गावो वःपावनानां परमपरिमितां प्रीतिमुत्पादयन्तु ॥९॥
बन्धध्वंसैकहेतुं शिरसि नतिवशाबद्धसन्ध्याञ्जलीनां
लोकानां ये प्रबोधं विदधति विपुलाम्भोजषण्डाशयेव ।
ते युष्माकं स्वचित्तप्रथिमपृथुतरप्रार्थनाकल्पवृक्षाः
कल्पन्तां निर्विकल्पं दिनकरकिरणाः केतवः कल्मषस्य१०॥

धारा रायोऽधनायापदेसपदि करलग्नभूताः प्रपाते
तत्वालोकैकदीपास्त्रिदिवपतिपुरप्रस्थिता वीथ्य एव ।
निर्वाणोद्योगियोगिप्रगमनिजतनुद्वारि वेत्रायमाणा
स्त्रायन्तां तीव्रभानोर्दिवसमुखसुखारश्मयः कल्मषाद्वः ॥११॥
प्राचि प्रागाचरन्त्योऽनतिचिरमचले चारुचूडामणित्वं
मुञ्चन्त्यो रोचणाम्बुप्रचुरमिव दिशामुच्चकैश्चर्चनाय ।
चाटूत्कैश्चक्रनाम्नां चतुरमविचलैर्लोचनैरर्च्यमानाश्
चेष्टन्तां चिन्तितानामुचितमचरमाश्चण्ड रोचीरुचो वः ॥१२॥
एकं ज्योतिर्दृशौ द्वे त्रिजगति गदितान्यब्जजास्यैश्चतुर्भिर्
भूतानां पञ्चमं यान्यलमृतुषु तथा षट्सु नानाविधानि ।
युष्माकं तानि सप्तत्रिदशमुनिनुतान्यष्टदिग्भाञ्जि भानोर्
यान्ति प्राह्णे नवत्वं दश दधतु शिवं दीधितीनां शतानि १३॥
शान्त्यत्तिभ्रान्तविश्वाः श्रममिव दधतः शोषिणः स्वोष्मणेव
ग्रीष्मे दावाग्नितप्ता इव रसमसकृद्ये धरित्र्या धयन्ति ।
ते प्रावृष्यात्तपानातिशयरुज इवोद्वान्ततोया मयूखा
मार्त्तण्डस्य प्रचण्डाश्चिरमशुभभिदे भीषवो वो भवन्तु॥१४॥
तन्वाना दिग्वधूनां समधिकमधुरालोकरम्यामवस्था
मारूढप्रौढलेशोत्कलितकपिलिमालङ्कृतिः केवलैव ।
उज्जृम्भाम्भोजनेत्रद्युतिनि दिनमुखे किञ्चिदुद्भिद्यमाना
श्मश्रुश्रेणीव तासां दिशतु दशशती शर्म घर्मत्विषो वः ॥१५॥
मौलीन्दोर्मैंवमोषीद्युतिमिति वृषभाङ्केन यः शङ्कितेव
प्रत्यग्राद्घाटिताम्भोरुहकुहरगुहासुस्थितेनेव धात्रा ।

क्षणेण ध्वान्तक्षण्णस्वतनुपा भवचलुनेव स्तुतोस्तं
त्राणायस्ताक्तनीयानपितिमिररिपोःसत्विषामुद्गमोवः१६॥
विस्तीर्णं व्य ... दीर्घाः सपदिदश दिशोव्यस्तवेलाम्भसोब्धीन्
कुर्वद्भिर्दृ यमानां नगनगरगणाभोगपृथ्वीञ्च पृथ्वीं ।
पद्मिन्युच्छास्यते यैरुषसि जगदपि ध्वंसयित्वातमिस्रा
मुस्राविस्रंसयन्तु द्रुतमनभिमतं ते सहस्रत्विषो वः ॥१७॥
अस्तव्यस्तत्वशून्यो निज ... चिर ... नशानश्वरः कर्तुमीशो
विश्वं वेश्मेव दीपः प्रतिहततिमिरं यः प्रदेशे स्थितोपि ।
दिक्कालापेक्षयासौ त्रिभुवणमटत ... भानोर्नवाख्यां
यातःशातक्रतव्यां दिशिदिशतु शिवंसोर्चिषामुद्गमोवः १८॥
मागान्म्लानिं मृणालीमृदु रितिदययेवाप्रविष्टोहिलोकं
लोकालोकस्य पार्श्वं प्रतपति न परं यस्तदाख्यार्थमेव ।
ऊर्द्धं ब्रह्माण्डखण्डस्फुटनभयपरित्यक्तदैर्घ्योद्युसीम्नि
स्वेच्छावश्यावकाशावधिरवतु सवस्तापनो रोचिरोघः ॥१९॥
अश्यामः कालएको न भवति भुवनान्तेपि वीतेऽन्धकारे
सद्यः प्रालेयपादो न विलयमचल ... न्द्रसाश्वाभ्युपैति ।
बद्धःसिद्धांजलीनां नहि कुमुदवनस्यापि यत्रोज्जिहाने
त ... तः प्रेक्षणीयं दिशतु ... धाम क ... धकं वः ॥२०॥
... पंकज नां न हरति कुरुते प्रत्युताधिक्यरम्यां
नोधत्ते तारकाभां तिरयति नितरामाशु यन्नित्यमेव ।
कर्तुंनालं निमेषांद ... रं यत्तदेकं त्रिलोक्याश्
चक्षुः सामान्यचक्षुर्विसदृशमघभिद्भास्वतस्तान्महोवः ॥२१॥

क्ष्मां क्षेपीयः क्षपांभःशिशिरतरजलस्पर्शतर्षाद्दृतेव
द्रागाशानेतुमाशाद्विरदकरसरःपुष्कराणीव बोधं ।
प्रातः प्रोल्लंघ्य विष्णोः पदमपि घृणये वातिवेगाद्दवीय
स्युद्दामद्योतमाना दहतु दिनपतेर्दुर्निमित्तं द्युतिर्वः ॥२२॥
नोकल्पापायवायोरदयरयदलक्ष्माधरस्यापि गम्या
गाढोद्गीर्णोज्ज्वलश्रीरहनि न रहिता नो तमः कज्जलेन ।
प्राप्तोत्पत्तिः पतङ्गान्न पुनरुपगता मोषमुष्णत्विषो वो
वर्तिः सैवान्यरूपा सुखयतु निखिलद्वीपदीपस्य दीप्तिः
निःशेषाशावपूरप्रवणगुरुगुणश्लाघनीयस्वरूपा [ ॥२३॥
पर्याप्तं नेत्ल्यादौ दिनगमसमयोपप्लवेऽप्युन्नतेव ।
अत्यन्तं यानभिज्ञा क्षणमपि तमसा साकमेकत्र वस्तुं
ब्रध्नस्येद्धा रुचिर्वो रुचिरिव रुचितस्याप्तये वस्तुनोऽस्तु ॥२४॥
विभ्राणः शक्तिमाशु प्रशमितवलवत्ता कौर्जित्यगुर्वीं
कुर्वाणो लीलयाधः शिखिनमपि लसच्चन्द्रकान्तावभासं।
आदध्यादन्धकारे रतिमतिशयिनीमाव न् वीक्षणानां
बालो लक्ष्मीमपारामपरइव गुहोऽहर्पतेरातपो वः ॥२५॥
ज्योत्ःांशाक्रत्सपाण्डुद्युतितिमिरमसीशेषकल्माषमीषज्
जृम्भोद्भूतेन पिङ्गं सरसिजरजसा सन्ध्यया शोणशोचिः ।
प्रातः प्रारम्भकाले सकलमिव जगच्चित्रमुन्मीलयन्तो
कान्तिस्तीक्ष्णत्विषोक्ष्णांमुदमुपनयतान्तूलिकेवातत्तांवः॥२६॥
आयान्ती किं सुमेरोः सरणिररुणिता पद्मरागैःपरागैर्
आहोस्वित् स्वस्य माहा जनिविराचिता वैजयन्ती रथस्य ।

माञ्जिष्ठी प्रष्ठवाह्यावलिविधृतशिरश्चामरालीनु लोकौर्
आशङ्क्यालोकितैवं सवितुरघनुदे स्तात् प्रभाते
प्रभा वः ॥२७॥

ध्वान्तध्वंसं विधत्ते न तपति नितरां नातिरूपं व्यनक्ति
न्यक्त्वं नीत्वापि नक्तं न वितरतितरां तावदह्नस्त्विषं यः ।
स प्रातर्माव्यरंसीदसकलपटिमा पूरयन् युष्मदाशा
आशाकाशावकाशावतरणतरुणप्रक्रमोऽर्कप्रकाशः ॥२८॥

तीव्रं निर्वाणहेतुर्यदपि च विपुलं यत् प्रकर्षेण चाथ
प्रत्यक्षं यत् परोक्षं यदिह यदपरं नश्वरं शाश्वतञ्च ।
यत् सर्वस्य प्रसिद्धं जगति कतिपये योगिनो यद्विदन्ति
ज्योतिस्तद्विप्रकारं सवितुरवतु वो वाह्यमाभ्यन्तरञ्च ॥२९॥

रत्नानां मण्डलाय प्रभवति नियते देशलब्धावकाशं
वह्नेर्दावादिदग्धं निजजडिमतया कर्तुमानन्दमिन्दोः ।
यत्तु त्रैलोक्यभूषाविधिरघदहनं ह्लादि दृश्याशु तद्वो
वाहुल्योत्पाद्य कार्याधिकतरमवतादेकमेवार्कतेजः ॥३०॥

मीलच्चक्षुर्विजि श्रुतिजडरसनं विघ्नितघ्राणवृत्ति
स्वव्यापाराक्षमत्वक् परिमुषितमनःश्वासमात्रावशेषं ।
विस्रस्ताङ्गं पतित्वा स्वपदपहरतादश्रियं वोऽर्कजन्मा
कालव्यालावलीढं जगदगदइवोत्थापयन् प्राक् प्रतापः
निःशेषं नैशमम्भः प्रसभमपनुदन्नश्रुलेशानुकारि [ ॥३१॥

स्तोकस्तोक पनीतारुणरुचिरचिरादस्तदोषानुषङ्गः ।
दाता दृष्टिं प्रसन्नां त्रिभवननयनस्याशु युष्मद्विरुद्धं

वध्याद् ब्रध्नस्य सिद्धाञ्जनविधिरपरः प्राक्तनोर्चिः
प्रचारः॥३२॥
भूत्वा जम्भस्य भेत्तुः ककुभि परिभवारम्भभूः शुभ्रभानोर्
विभ्राणा बभ्रुभावं प्रसभमभिनवांभोजजृम्भा प्रगल्भा ।
भूयाभूरिष्ठशोभात्रिभुवनभवनस्याशुवैभाकरी प्राग्
विभ्रान्तिभ्राजमाना बिभवतु विभवोद्भूतये सा विभा वः
संसक्तं सिक्तमूलादभिनवभुवनोद्यानकौतूहलिन्या [॥३३॥
यामिन्या कन्यये... तकरकलशावर्जितेनामृतेन ।
अर्कालोकः क्रियाद्वो मुदमुदयशिरश्चक्रवालालवाल द्
उद्यन्बालप्रवालप्रतिमरुचिरहःपादपप्राक्प्रवालः ॥ ३४ ॥
भिन्नं भासारुणस्य क्वचिदभिनवया विद्रुमाणां त्विषेव
भिन्नं नक्षत्ररत्नद्युतिनिकरकरालान्तरालं क्वचिच्च ।
अन्तर्निःशेषकृष्णप्रियमुदधिमिव ध्वान्तराशिं पिवंस्ता
दौर्वःपूर्वो ... पूर्वोऽग्निरिव भवदघप्लुष्टयेर्कावभासः ॥३५॥
गन्धर्वैर्गद्यपद्यव्यतिकरित... चो हृद्यमातोद्यवाद्यैर्
यो देवो नारदाद्यैर्मुनिभिरभिनुतो वेदवेद्यैर्विभिद्य ।
आसाद्यापाद्यते यं पुनरपि च जग...वनं सद्य उद्यन्
उद्योतोद्योतितद्यौर्द्यतु दिवसकृतो सावबद्यानि वोऽद्य॥३६॥
आवानैश्चं न्द्रकान्तैश्च्युततिमिरतया भानवात्तारकाणाम्
एणाङ्कालोकलोपादुपहतमहसामोषधीनां लयेन ।
आरादुत्प्रेक्ष्यमाणाक्षणमुदयतटान्तर्हितस्याहिमांशोर्
आभाप्राभातकीवोऽवतनतु नितरां तावदाविर्भवन्ती॥३७॥

सानौ सा नौदयेनारुणितदलपुनर्यौवनानां वनानाम्
आलीमालीढपूर्वा परिहृतकुहरोपान्तनिम्नातनिम्ना।
भावोभावोपशांतिं दिशतु दिनपतेर्भासमाना समाना
राजी राजीवरेणोः समसमयमुदेतीव यस्या वयस्या॥३८॥
उज्जृंभाम्भोरुहाणां प्रभवति पयसां या श्रिये नोष्णतायै
पुष्णात्यालोकमात्रं नतु दिशति दृशां दृश्यमाना विघातं।
पूर्वाद्रेर्वपूर्वा[illegible]मनु च पुनः पावनी दिङ्मुखानाम्
एनांस्येनीविभासौनुदतुनुतिपदैकास्पदं प्राक्तनीवः॥३९॥
वाचां वाचस्पतेरप्यचलभिदुचिता चार्यकाणां प्रपंचैर्
वैरिंच्यानां तथोच्चारितरुचिरऋचामाननानां चतुर्णां।
उच्येतार्चासु वाच्यच्युतिशुचिचरितं यस्य नोच्चैर्विविच्य
प्राच्यं वर्चश्चकासच्चिरमुपचिनुतात्तस्य चंडार्चिषो वः॥४०॥
मूर्ध्न्यद्रेर्धातुरागस्तरुषु किशलयो विद्रुमौघः समुद्रे
दिङ्मातंगोत्तमाङ्गेष्वभिनवनिहितः सान्द्रसिन्दूररेणुः।
सीम्नि व्योम्नश्च हेम्नः सुरशिखरिभुवो जायते यः प्रकाशः
शोणिम्नाऽसौखरांशोरुषसि दिशतु वः शर्म शोभैकदेशः॥४१॥
अस्ताद्रीशोत्तमांगे श्रितशशिनि तमः [illegible] निपीते
याति व्यक्तिं पुरस्ताद[illegible] प्रत्युषः पारिजाते।
उद्यंत्यार[illegible]म्बरविशदतरोद्दीक्षिता तीक्ष्णभानोर्
लक्ष्मीर्लक्ष्मीरिवास्तु स्फुटकमलपुटापाश्रया श्रेयसे वः॥४२॥
नोदन्वान् जन्मभूमिर्णतदुदरभुवो वान्धवाः कौस्तुभाद्या
यस्याः पाणौ न पद्मं नच नरकरिपूर[illegible]श्म।

तेजोरूपा परैव त्रिषु भुवनतटेष्वादधाना व्यवस्थां
साश्रीश्रेयांसिदिश्यादशिशिरमहसोमण्डलाग्रोद्गतावः ४३॥

अश्ववर्णना ।

रक्षन्त्वक्षुण्णहे[illegible]मलं लाघवादुत्पतन्तः
पातङ्गाः पङ्गुवन्नाजितपवनजवा वाजिनस्ते जगंति ।
येषां वीतान्यचिह्नोन्वयमपि वहतां मार्गमाख्याति मेरा
वुद्यनुद्दामदीप्तिद्युमणिमणिशिलावेदिकाजातवेदाः ॥४४॥
प्लुष्टा पुष्टैंशुपातैरतिनिकटतया दत्तदाहातिरेकैर्
एकाहाक्रांतकृत्स्नत्रिदिवपथपृथुश्वासशोषाः श्रमेण ।
तीव्रोदन्यास्त्वरंतामहितविहतये सप्तयः सप्तसप्ते
रभ्यासाकाशगङ्गाजलशरलगलावर्जितग्राननना वः ॥४५॥
मत्वाऽन्यान् पार्श्वतोऽश्वान् स्फटिकतटदृशद्दृ[illegible]देहा द्रवन्ती
व्यक्तेऽह्न्यस्तसन्ध्येयमिति मृदुपदा प[illegible]पलेषु ।
सादृश्यादृश्यमूर्तिर्मरकतकटके क्लिष्टसूता सुमेरोर्
मूर्द्धन्यावृत्तिलघ्वध्रुवगतिरवतु ब्रघ्नवाहावली वः ॥४६॥
हेलालोलं वहन्ती विषधरदमनस्याग्रजेनावकृष्टां
स्वर्वाहिण्याः सुदूरं जनितज[illegible]पयाःस्यन्दन[illegible] स्यदेन ।
निर्व्याजं तायमाने हरितिमणिनिजे स्फीतफेनाद्धितश्रीर्
अश्रेयांस्यश्वपङ्क्तिःसमयतु यमुनेवापरा [illegible] वः ४७॥
मार्गोपान्ते सुमेरोर्नुवतिकृतनतौ नाकधाम्नां निकाये
वीक्ष्य व्रीडावतीनां प्रतिकुहरमुखं किन्नरीणां मखानि ।

सूते सूय पीषज्जडगतिवहतां कन्धरा विहाङ्गर्
वानांव्य चताद्धः सममसमहरद्व्रेषितं लमपाणि ४८॥
धुन्वन्तो नीरदालीर्निजरुचिहरिताः पार्श्वयोः पक्षतुल्या
स्तानूत्तानैः खलीनैः खचितमुखरुचश्च्योतता लोहितेन ।
उड्डीयेव व्रजन्तो वियति गतिवशादर्कवाहाः क्रियासुः
क्षेमं हेमाद्रिहृद्यद्रुमशिखरशिरःश्रेणिशा वाशुका वः ॥४९॥

## सारथिवर्णना ।

प्रातः शैलाग्ररङ्गे रजनिजवनिकापायसंलक्ष्य लक्ष्मीर्
विक्षिप्यापूर्वपुष्पाञ्जलिमुडुनिकरं सूत्रधारः पुरो यः ।
यामेष्वङ्केष्विवाह्नः क्षतरुचिषु चतुर्ष्वेव यातः प्रतिष्ठाम्
व्यात् प्रस्तावयन् वो जगदटनमहानाटकं सूर्यसूतः ॥५०॥
आक्रान्त्यावाह्यमानं पशुमिव हरिणा वाहकोऽग्र्योहरीणां
भ्राम्यन्तं पक्षपाताज्जगति समरुचिः सर्वकर्मैकसाक्षी ।
शक्तुं नेत्रश्रुतीनामवजयति वयोज्येष्ठभावे समेपि
स्थाम्ना भ्रान्तेनधियः सभवन्नुदे नूतनस्तादनूरुः ॥५१॥
दत्तार्घैर्दूरनम्रैर्वियति विनयतो वीक्षितः सिद्धसंघैः
सानाथ्यं सारथ्यैः स दशशतरुचेःसातिरेकं करोतु ।
आपीय प्रातरेव प्रततहिमपयः स्यन्दनीरिन्दुभासो
यःकाष्ठादीपनोग्रे जगदिव भृशं सेवते पृष्ठतोऽर्कं ॥५२॥
मुञ्चन्नश्मीन् दिनादौ दिनगमसमये संहरंश्च स्वतन्त्र
स्तोत्रप्रख्यातवीर्यो विरतहरिपदाक्रान्तिवद्धाभियोगः ।

कालोत्कर्षाल्लघुत्वं प्रसभमधिपतौ योजयन् यो द्विजानां
सेव प्रीतेन पूष्णा स्वसम इवकृतस्त्व यतां सोऽरुणोवः ॥५३॥
शातः [illegible]यामालतायाः परशुरिव [illegible] वह्नेरिवार्चिः
[illegible]च्यग्रे प्रागग्र[illegible]तं ग्रहकुमुदवनं प्रागुदस्तो ग्रहस्तः ।
ऐक्यं भिन्दन् द्युभूम्योरवधिरिव विधातेव विश्वप्रबोधं
वाहानां वोविनेता व्यपनयतु विपन्नाम धामाधिपस्य॥५४॥
पौरस्त्यस्तोयदर्त्तोः पवनइव पतन् पावकस्येव धूमो
विश्वस्येवादिसर्गः प्रणवइव परं पावनं वेदराशेः ।
सन्ध्यान्त्योत्सवेच्छोरिव मदनरिपोर्नन्दिनान्दी[illegible]दः
सौरस्याग्रेसुखंवो वितरतु विनतानन्दनः स्यन्दनस्य ॥५५॥
पर्याप्तं तप्तठामीकरकटकतटीश्लिष्टशीतेतराङ्शा
रासीदत् स्यन्दनाश्वानुकृतिमरकते पद्मरागायमाणः ।
यःसोत्कर्षां विभूषां कुरुतइव कुलक्ष्माभृदीशस्य मेरोर्
एनांस्यच्छाय दूरं समयतु स गुरुः काद्रवेयद्विषो वः ॥५६॥
नीत्वाश्वान् सप्तकक्षाइव [illegible]मवशं वेत्रकल्पप्रतोद
स्तूर्णं ध्वान्तस्य र[illegible]रजन[illegible]वोत्सारिते दूरभाजि ।
पूर्वं प्रष्ठो रथस्य क्षितिभृदधिपतीन् दर्शयंस्त्रायतां व
स्त्रैलोक्यास्थानदानोद्यतदिवसपतेः प्राक् प्रतीहार
पालः ॥५७॥

वज्रिन् जातं [illegible]ीक्षणकमलवनं भासिनो भासि वह्ने
तातं नत्वाश्वपार्श्वान्नय यम ह्रियं राक्षसा वीक्षिताःस्थ ।
सप्तीन् सिञ्च प्रचेतः पवन भज जयं [illegible] ये[illegible]तत्त्वं

वन्देशश्चैति जल्पन् प्रतिदिशमधिपान् पातु पूष्णो
ग्रणीर्वः ॥ ५८ ॥

पाशानाशान्तपालाद्रुण वरुणतो मा ग्रहीः प्रग्रहार्थं
तृष्णां कृष्णास्य चक्रे जहि हि न हि रथो याति मे नैकचक्रः ।
योक्तुं युग्यं किमुच्चैःश्रवसमभिलषस्यष्टमं हृचश्चोस्
त्यक्तान्यापेक्षविश्वोपकृतिरिति रविः शास्ति यं
सोऽवताद्वः ॥ ५९ ॥

नोमूर्च्छा छिन्नवाञ्छः श्रमविवशवपुर्नैवमप्यास्य शोषी
पान्थः पथ्येतराणि क्षपयतु भवतां भास्वतोऽग्रेसरः सः ।
यः संश्रित्य त्रिलोकीमटति पटुतरैः स्थाप्यमानो मयूखैर्
आरादादामलेखामिवहरितमणिश्यामलामश्वपंक्तिं ॥ ६० ॥

शीदन्तोन्तर्नि-ज्झज्झडखुरमुषलाः सैकते नाकनद्याः
स्कन्दन्तः कन्दरालीः कनकशिखरिणो मेखलासु स्खलन्तः ।
दूरं दूर्वास्थलोत्का मरकतदृशदिस्थासुरो यत्र याताः
पूष्णोश्वाः पू र्यंस्तैस्तदवतु जवनैर्हूंकृतेनाग्रगोवः ॥ ६१ ॥

पीनोरःप्रेरिताभ्रैश्चरमखुरपुटप्रस्थितैः प्रातरह्रा
वादीर्घाङ्घ्रीरुदस्तो हरिभिरुपगतासङ्गनिःशब्दच-ः ।
उत्तानानूरुमूर्द्धावनतिहठभवा-त्तीपप्रणामः
प्राह्णे श्रेयो विधत्तां सवितुरवतरन् व्योमवीथीं रथो वः ६२ ॥

उत्कीर्णस्व र्णरेणुद्रुतखुरदलितापार्श्वयोः शश्वदश्वैर्
-श्रान्तभ्रान्तचक्रक्रमनिखिलमिलन्नेमि निम्नाभरेण ।
मेरोर्मूर्द्धन्यघं वो विघटयत रवेरेकवीथी रथस्य

स्वोष्णोदस्ताम्बुरिक्तप्रकटितपुलिनोड्डूषरा स्वर्धुनीवः॥६३॥

ध्वान्तौघध्वंसदीक्षाविधिगुरु वहता प्राक् सहस्रं कराणाम्
अर्यम्णा यो गरिम्णः पदमतुलमुपानीयताध्यासनेन ।
सम्भ्रान्तानां नितान्तं भरगुरु मरुतामक्षमाणां विषोढुं
स्कन्धात् स्कन्धं व्रजन् वो वृजिनविहतये भास्वतः
स्यन्दनोऽस्तु ॥ ६४ ॥

योक्त्रीभूतान् युगस्य ग्रसितुमिव पुरो दन्दशूकान् दधानो
द्वेधाव्यस्ताम्बुवाहावलिविहितबृहत्पक्षविक्षेपशोभः ।
सावित्रः स्यन्दनोऽसौ निरतिशय यशोनितानूरुरेनः
क्षेपी यो वो गरुत्मानिव हरतु हरीच्छाविधेयप्र
चारः ॥६५॥

धूर्ध्वस्ताग्रग्रहाणि ध्वजपटपवनान्दोलितेन्दूनि दूरं
राहौ ग्रासाभिलाषादनुसरति पुनर्दत्तचक्रव्यथानि ।
श्रान्ताश्वश्वासहेलाधुतविबुधधुनीनिर्झराम्भांसि भद्रं
देयासुर्वो दवीयो दिवि दिवसपतेःस्यन्दनप्रान्तगानि ॥६६॥

अक्षेरक्षां निवध्य प्रतिसवनलयैर्योजयन्त्यो युगाग्रं
धूस्तम्भे दग्धधूपाः प्रतिहतसुमनो गोचरे कूवरस्य ।
चर्चाश्चक्रे ददत्यो मलयजरजसा सिद्धसाध्यस्त्रिसंध्यं
वन्दन्ते यं द्युमार्गे स दहतु दुरितान्यंशुमत्स्यन्दनो वः॥६७॥

नन्तुं नाकालयानामनिशमुपनताम्पद्धतिः पंक्तिरेव
क्षोदे नक्षत्रराशेरक्षशरयमिलञ्चक्रपिष्टस्य धूलिः ।
हेषाह्रादो हरीणां सुरशिखरिदरीः पूरयन्नेमिनादो

यस्याव्यात्तीव्रभानोः स दिवि भुवि यथा व्यक्तचिह्नो
रथोवः॥६८॥

एकाह्नेनैव दीर्घां त्रिभुवनपदवीं लंघयन् यो लघिष्ठः
पृष्ठे मेरोर्गरीयान् दलितमणिदृशत्त्वींषि पिंषन् शिरांसि ।
यः सर्वस्योपरिष्टादथच पुनरधस्तादिवास्ताद्रिमूर्ध्नि
ब्रध्नस्याव्यात्स एवं दुरधिगमपरिष्यन्दनः स्यन्दनोवः॥६९॥

निष्यन्दानां विमानावलिविततदिवां देववृन्दारकानां
वृन्दैरानन्दसान्द्रोद्यममपि वहतां विन्दतां वन्दितुं नो ।
मन्दाकिन्याममन्दः पुलिनभृति मृदुर्मन्दरे मन्दराभे
मन्दारैर्मण्डितारं दधदविदिनकृत्स्यन्दनस्तान्मुदे वः ७०॥

चक्री चक्रारपंक्तिं हरिरपि च हरीन् धूर्जटिर्धूर्ध्वजाग्रान्
अक्षं नक्षत्रनाथोरुणमपि वरुणः कूवराग्रं कुवेरः ।
रंहः संघः सुराणां जगदुपकृतये नित्यमुक्तस्य यस्य
स्तौति प्रीतिप्रसन्नोन्व महिमरुचेः सोवतात्स्यन्दनोवः ७१॥

नेत्राहीनेन मूले विहितपरिकरः सिद्धसाध्यैर्मरुद्भिः
पादोपान्ते स्तुतोऽलं वलि रिरभसाकर्षनावद्धवेगः ।
भ्राम्यन् व्योमोम्बुराशावशिशिरकिरणस्यन्दनः सन्ततं वो
दि श्रीमतुल्यामतुनितमहिमेवोपरोम न्दराद्रिः
[॥ ७२॥

## मण्डलवर्णना ।

यज्ज्यायो वीजमह्नामप ततिमिरं चक्षुषामञ्जनं यत्
यद्द्वारं मुक्तिभाजां यदखिलभुवनज्योतिषामेकमोकः ।

यद्दृष्यम्भोनिधानं धरणिरससुधापानपात्रं महद्यद्
दिश्याद्दीशस्य भासां तदविकलमलं मण्डलं
मङ्गलं वः ॥७३॥

वेलावर्द्धिष्णुसिन्धोः पयइव खमिवाद्रौन्नतोग्रग्रहौड्
स्तोकोङ्झिन्नस्वचिह्नप्रसवमिव मधोरास्यमस्यन् महांसि ।
प्रातः पुष्णोऽशुभानि प्रशमयतु शिरःशेखरीभूतमद्रेः
पौरस्त्यस्योन्नभस्तेस्तिमिततमतमःखण्डनंमण्डलं वः ॥७४॥

प्रत्युप्तस्तप्तहेमोज्ज्वलरुचिरचलः पद्मरागेन येन
ज्यायःकिञ्जल्कपुञ्जं यदलिकुलसितेरम्बरेन्दीवरस्य ।
कालव्यालस्य चिह्नं महिततममहोमूर्द्धि रत्नं महत्तत्
दीप्तांशोःप्रातरव्यात्तदविकलजगन्मण्डणं मङ्गलं वः ॥७५॥

कस्त्राता तारकानां पतति तनुरवश्यायविन्दुर्यथेन्दु
र्विभ्राणा दृक् स्मरारेरुरसि मधुरिपोः कौस्तुभो नोगभस्तिः ।
वह्नेः सापह्नुतेव द्युतिरुदयगते यत्र तन्मण्डलं वो
मार्तण्डीयं पुनीयाद्दिवि भुवि च तमांसीव मुष्णन्
महांसि ॥ ७६ ॥

यत्प्राच्यां प्राक्चकास्ति प्रभवति च यतः प्राच्यसावुज्जिहाना
दिङ्गं मध्ये यदह्नो भवति ततरुचा येन चोत्पाद्यतेऽहः ।
यत्पर्य्यायेण लोकानवति च जगतां जीवितं यच्च तद्वो
विश्वानुग्राहि विश्वं सृजदपि च रवेर्मण्डलं मुक्तयेस्तु ॥७७॥

शुष्यन्कूटान्धकारामकरवसतयोमारवीणां स्थलीनां
येनोत्तप्ताःस्फुटन्तस्तडिति तिलतुलां यान्त्यगेन्द्रायुगान्ते ।

तत्त्वण्डांशोरकाण्डत्रिभुवनदहनाशङ्कया धाम कृत्स्नं
संहृत्यालोकमात्रंप्रलघुनिदधतस्ताम्मुदे मण्डलंवः ॥७८॥
उद्यद्द्यूद्यानवाप्यां वहुलततमतःपङ्कपूरं विदार्य
प्रोज्झिन्नं पत्रपार्श्वेष्वविमलमरुणच्छायया विस्फुरन्त्या ।
कल्याणानि क्रियाद्वः कमलमिव महन्मण्डलं चण्डभानोर्
अन्वीतंतृप्तिहेतोरसकृदलिकुलाकारिणा राहुणायत्७९ ॥
चक्षुर्दक्षद्विषो यन्नतु दहति पुरा पूरयत्येव कामं
नास्तं युष्टंमरुद्भिर्यदिह नियमिनां यानपात्रं भवाब्धौ ।
यद्वीतश्रान्तिशश्वद्भ्रमदपि जगतां भ्रान्तिमभ्रान्ति हन्ति
ब्रघ्नस्याव्याद्विरुद्धक्रियमथचहिताधायि तन्मण्डलंवः ॥८०॥
सिद्धैः सिद्धान्तमिश्रं श्रितविधिविवुधैश्चारनैश्चाटुगर्भं
गीत्या गन्धर्वमुख्यैर्मुहुरहिपतिभिर्यातुधानैर्यतात्म ।
साध्यं साध्यैर्मुनीन्द्रैर्मुदिततममनो मोक्षिभिः पक्षपातात्
प्रातः प्रारभ्यमानस्तुतिरवतु रविर्विश्ववंद्योदयोवः ॥८१॥
भासामासन्नभावाभ्भितरतपतुलश्चक्रवालस्य तापात्
छेदादच्छिन्नगच्छत्तुरगखरपुटन्यासनिःशङ्कटङ्कैः ।
निःशङ्कस्यन्दनाङ्गभ्रमणनिकषणात्पातु वस्त्रिप्रकारं
तप्तांशुस्तत्परीक्षापरइव परितः पर्यटन् हाटकाद्रिं ॥८२॥
नोशुष्कं नाकनद्या विकसितकनकाम्भोरुहाभ्राजितन्नु
जुष्टानैवोपभोग्या भवति भृशतरं नन्दनोद्यानलक्ष्मीः ।
नोश्रृङ्गाणि द्रुतानि द्रुतममरगिरेः कामधौतानि धौता
नीत्थं धाम द्युमार्गे मृदयति दयया यःसवोव्यादिनोवः ८३॥

ध्वान्तस्यैवान्त हेतुर्न भवति मलिनैकात्मनःपाप्मनोपि
प्राक्पादोपान्तभाजां जनयति नपरम्पङ्कजानां प्रबोधं।
कर्ता निःश्रेयसानामपि नतु खलु यः केवलंवासराणां
सोव्यादेकोद्यमेच्छाविहितबहुहितद्विस्वकार्य्योर्य्यमावः॥८४॥
लोठल्लोष्टाविचेष्टः स्थिमितनयनतलो निःसहीभूतदेहः
सन्देही प्राणितव्येसपदिदशदिशः प्रेक्षमाणोऽन्धकाराः।
निःश्वासायासनिष्ठःपरमपरवशोजायते जीवलोकः
शोकेनैवान्यलोकोभ्युदयकृतिगतेयत्र सोऽर्कोवतात्वः॥८५॥
क्रामल्लोलोपिलोकांस्तदुपकृतिकृतावास्थितःस्थैर्यकोटीं
नृणां दृष्टिं विजिह्मां विदधदपि करोत्यन्तरत्यन्तभद्रां।
यस्तापस्यापि हेतुर्भवतिनियमिनामेकनिर्वाणदायी
भूयात्सप्रागवस्थाधिकतरपरिणामोदयोऽर्कःश्रियेवः॥८६॥
व्यापन्नर्त्तुन्नकालो व्यभिचरति फलं नौषधीर्वृष्टिरिष्टा
नेष्टैस्तुष्यन्ति देवा नहि वहति मरुन्निर्मलाभानि भानि।
आशाः शान्तानभिन्दन्त्यवधिमुदधयो विभ्रति क्ष्माभृतःक्ष्मां
यस्मिंस्त्रैलोक्यमेवंनचलतितपतिस्तात्ससूर्यःश्रियेवः॥८७॥
कैलासे कृत्तिवासा विहरतिविरहव्यासदेहोढकान्तः
श्रान्तः शेते महाहावधिजलधिविनाछद्मनापद्मनाभः।
योगोद्योगैकतानो गमयति सकलं वासरं स्वं स्वयम्भू
र्भूरित्रैलोक्यचिन्ताभृतिभुवनविधौ यत्र भास्वान्
स वोव्यात्॥८८॥

एतद्यन्मण्डलं खे तपति दिनकृतस्ताऋचोऽर्चींषि यानि

द्योतन्ते तानि सामान्ययमपि पुरुषोमण्डलेणुर्यजूंसि ।
एवं यं वेद वेदत्रितयमयमयं वेद वेदीसमग्रो
वर्गःस्वर्गापवर्गप्रकृतिरविकृतिः सोस्तु सूर्यः श्रियेवः ॥८९॥
नाकौकः प्रत्यनीकक्षतिपटुमहसां वासवाग्रेसराणां
सर्वेषां साधुपातां जगदिदमदितेरात्मजत्वे समेपि ।
येनादित्याभिधानं निरतिशयगुणे नात्मनिन्यस्तमस्तु
स्तुत्यस्त्रैलोक्यवन्द्यै स्त्रिदशमुनिगणैः सोऽंशुमान्
श्रेयसे वः ॥ ९० ॥

भूमिंधाम्नाभिवृष्ट्याजगतिजलमयीं पावनीं संस्मृताव
प्याग्नेयीं दाहशक्तिं मुहुरपि यजमानात्मिकाप्रार्थितानां ।
लीलामाकाश एवामृतकरघटितं ध्वान्तपक्षस्य पर्वण्य्
एवं सूर्योष्टभेदो भवइव भवतः पातु बिभ्रत् स्वमूर्त्तिं ॥९१॥
प्राक्कालोन्निद्रपद्माकरपरिमलनाविर्भवत्पादशोभो
भक्त्यात्यक्तोरुखेदोन्नतिर्दिवि विनतासूनुना नीयमानः ।
सप्ताश्वाप्तापरान्तान्यधिकमधरयन् योजगन्ति स्तुतोऽलं
देवैर्दैवः सपायादपरइव मुरावातिरश्चां पतिर्वः ॥ ९२ ॥
यःस्रष्टापां परस्तादचलवरसमभ्युन्नतेर्हेतुरेको
लोकानां यस्त्रयाणां स्थितउपरिपदे दुर्विलंघ्येन धाम्ना ।
सद्यःसिद्धै प्रसन्नद्युतिशुभचतुराशामुखस्ताद्विभक्तो
द्वेधावेधाइवाविष्कृतकमलरुचिः सोर्चिषामाकरोवः ॥९३॥
साद्रिद्यूर्वीनदीशादिशति दशदिशोदर्शयन् प्राग् दृशो यः
सादृश्यं दृश्यते नो सदशशतदृशि चैदशेयस्य देशे ।

दीप्तांशुर्वः स दिश्याद्युगदशादर्शितद्वादशात्मा
संज्ञास्त्यस्त्वांश्च यस्याशयविदतिशयं दन्दशूकासनाद्यः ॥९४॥
तीर्थानि व्यर्थकानि ह्रदनदसरसीनिर्झराम्भोजिनीनां
नोदन्वन्तो नुदन्ति प्रतिदिनमशुभं शुभ्रपातानुबन्धि ।
आपो नाकापगाया अपि कलुषमुषो मज्जतां नैव यत्र
त्रातुं यातेऽन्यलोकान् स दिशतु दिवसस्यैकहेतुर्हितं
[वः ॥९५॥
एतत्पातालपङ्कप्लुतमिव तमसा साकमुद्गाढमासीद्
अप्रज्ञाताप्रतर्क्यं निरवगति तथालक्षणं सुप्तमन्तः ।
यादृक् सृष्टेः पुरस्तान्निशि निशि निखिलं जायते तादृगेव
त्रैलोक्यं यद्वियोगादवतु रविरसौ सर्गतुल्योदयो वः ॥९६॥
द्वीपे योस्ताचलेस्मिन् भवति खलु सएवापरत्रोदयाद्रिर्
या यामिन्युज्ज्वलेन्दुद्युतिरिहदिवसोन्यत्र दीप्तातपः सः ।
यद्वश्यौ देशकालाविति नियमतोनोभयं देशकाला
वव्यात्स्वप्रभावाहितभुवनहितोहेतुरह्नामिनोवः ॥९७॥
व्यग्रैरुग्रग्रहोडुग्रसनगुरुतरैर्नोसमग्रैरुदग्रैः
प्रत्यग्रैरीषदुग्रैरुदयगिरिगतो गोगणैर्गैरयन् गां ।
उद्गाढार्चिर्विलीनामरनगर नगग्रागभागमिवा..म्
अग्रेऽग्रेयोविधत्ते ग्लपयतु गहनं सग्रहग्रामणीर्वः ॥ ९८ ॥
योनिः साम्नां विधाता मधुरिपुरजितोधुर्जटिः शङ्करो
सौ मृत्युःकालोऽलकायाःपतिरपिधनदः पावकोजातवेदाः।
इत्थं संज्ञा डवित्यादिवदमृतभजां या यहच्छाप्रवृत्तास्ता

सामेकोऽभिधेयस्तल्लुपपपणो यः स सूर्योवताद्वः ॥९९॥
देवःकिं वान्धवः स्यात्प्रियसुहृदथवाचार्य आहोस्विदार्यो
रक्षा चक्षुर्न दीपो गुरुरुत जनको जीवितं वीजमोकः ।
एवं निर्णीयते यःकइव न जगतां सर्वदा सर्वदोसौ
सर्वाका ोपकारी दिशतु दशशताभीषुरभ्यर्थितं वः ॥१००॥
श्लोका लोकस्य भूत्यै शतमिति रचिताः श्रीमयूरेण भक्त्या
युक्त ैतान् पठेद्यः सकृदपि पुरुषः सर्वपापैर्विमुक्तः ।
आरोग्यं सत्कवित्वं मतिमतुलवलं कान्तिमायुः प्रकर्षं
विद्या ैश्वर्यमर्थं सुखमपि लभते सोऽचसूर्य्यप्रसादात् १०१॥
इति महाकविश्रीमयूरभट्टकृतं सूर्यशतकं समाप्तं ॥

## दृष्टान्तशतकं ।

शिवस्मरणमेवैकं संसारान्तकनाशनं ।
घनौघो घोरदावाग्निनिर्वापणपटुर्भवेत् ॥ १ ॥
साधुरेव प्रवीणः स्यात्सद्गुणामृतवर्णने ।
नवचूताङ्कुरास्वादकुशलः कोकिलः किल ॥ २ ॥
दुर्जनो दूषयत्येव सतां गुणगणं क्षणात् ।
मलिनीकुरुते धूमः सर्वथा विमलाम्बरं ॥ ३ ॥
यथा दोषो विभात्यस्य जनस्य न तथा गुणः ।
प्रायः कलङ्कएवेन्दोः प्रस्फुटो न प्रसन्नता ॥ ४ ॥
विवेकएव व्यसनं पुंसां क्षययितुं क्षमः ।
अपहर्त्तुं समर्थोसौ रविरेव निशातमः ॥ ५ ॥
प्रायः सन्त्युपदेशार्हा धीमन्तो न जडाशयाः ।
तिलाः कुसुमसौगन्ध्यवाहिनो न यवाः क्वचित् ॥६॥
चिंत्यते नयएवादावमन्दं समुपेप्सुभिः ।
विनम्य पूर्वं सिंहोपि हन्ति हस्तिनमोजसा ॥ ७ ॥
संस्थितस्य गुणोत्कर्षः प्रायः प्रस्फुरतिस्फुटं ।
दग्धस्यागुरुखण्डस्य स्फारीभवति सौरभं ॥ ८ ॥
मनस्विहृदयं धत्ते रोषेणैव प्रसन्नतां ।
भस्मना ज्वलदङ्गारः प्रसादं लभतेतरां ॥ ९ ॥

उत्तमः क्लेशविक्षोभं क्षमः सोढुं नहीतरः ।
मणिरेव महाशाणघर्षणं नतु मृत्कणः ॥ १० ॥
स्वजातीयं विना वैरी न जय्यः स्यात्कदाचन ।
विना वज्रमणिं मुक्तामणिर्भेद्यः कथं भवेत् ॥ ११ ॥
सज्जना एव साधूनां प्रथयन्ति गुणोत्करं ।
पुष्पाणां सौरभं प्रायस्तनुते दिक्षु मारुतः ॥ १२ ॥
उपकर्त्तुं यथा स्वल्पः समर्थो न तथा महान् ।
प्रायः कूपस्तृषां हन्ति सततं नतु वारिधिः ॥ १३ ॥
सति शीले गुणा भान्ति पुंसां शौर्यादयो यथा ।
यौवने सदलङ्काराः शोभाम्बिभ्रति सुभ्रुवः ॥ १४ ॥
जडः प्रभवति प्रायो दुःखं बिभ्रति साधवः ।
शीतांशावुदिते पद्माः सङ्कोचं यान्ति वारिणि ॥ १५ ॥
गुणेन स्पृहणीयः स्यान्न रूपेण युतो नरः ।
सौगन्ध्यहीनं नादेयं पुष्पं कान्तमपि क्वचित् ॥ १६ ॥
कश्चित्कस्यचिदेव स्यात् सुहृद्विस्रम्भभाजनं ।
पद्मं विकासयत्यर्कः सङ्कोचयति कैरवं ॥ १७ ॥
ईश्वराः पिशुनान् शश्वद्विषन्तीति किमद्भुतं ।
प्रायो निधय एवाहीन्द्विजिह्वान्दधतेतरां ॥ १८ ॥
संपद्यास्ते परैः साकं विपदि स्वजनैर्जनः ।
जृम्भत्यम्भोरुहं भृङ्गैः शुष्यत्युदकशैवलैः ॥ १९ ॥
नीचावमानमलिनां प्रभुंक्ते सम्पदं पुमान् ।
लशुनाक्तां सकर्पूरचर्चां वितनुते तनौ ॥ २० ॥

व्यसनानन्तरं सौख्यं स्वल्पमप्यधिकं भवेत् ।
काषायरसमास्वाद्य स्वाद्वतीवाम्बु विन्दते ॥ २१ ॥
गुणानामन्तरं प्रायस्तज्ज्ञो जानाति नेतरः ।
मालतीमल्लिकामोदं घ्राणं वेत्ति न लोचनं ॥२२॥
प्रभूतवयसः पुंसो धियः पाकः प्रवर्त्तते ।
जीर्णस्य चन्दनतरोरामोद उपजायते ॥ २३ ॥
कामाय स्पृहयत्यात्मा संयतोपि मनीषिणः ।
वीथीनियमितोप्युक्षा शष्यमासाद्य धावति ॥ २४ ॥
धनागमेऽघिकं पुंसां लोभमभ्येति मानसं ।
निदाघकाले प्रालेयः प्रायः शैत्यं वहत्यलं ॥ २५ ॥
सहजोपि गुणः पुंसां साधुवादेन वर्धते ।
कामं सुरसलेपेन कान्तिं वहति काञ्चनं ॥ २६ ॥
निन्दां यः कुरुते साधोस्तथा स्वं दूषयत्यसौ ।
खे भूतिं यस्त्यजेदुच्चैर्मूर्ध्नि तस्यैव सा पतेत् ॥ २७ ॥
स्वभावं नैव मुञ्चन्ति सन्तः संसर्गतोऽसतां ।
न त्यजन्ति रुतं मञ्जु काकसंपर्कतः पिकाः ॥ २८ ॥
संपत्तौ कर्कशं चित्तं खलस्यापदि कोमलं ।
शीतलं कठिनं प्रायस्तप्तं मृदु भवत्यपः ॥ २९ ॥
प्रायः प्रकुप्यतितरां प्रीत्यैव प्रखलो जनः ।
नयनं स्नेहसंपर्कात्कालुष्यं समुपेत्यलं ॥ ३० ॥
शुभं वाप्यशुभं कर्म फलकालमपेक्षते ।
शरद्येव फलत्याशु शालिर्न सुरभौ क्वचित् ॥ ३१ ॥

भोगेच्छा नोपभोगेन भोगिनां जातु शाम्यति ।
लवणेनान्तरालेन तृष्णा प्रत्युत जायते ॥ ३२ ॥
दुर्लभोप्युत्तमः प्रायः स्वजातीयेन लभ्यते ।
कर्णकोटरगं वारि वारिणैवावकृष्यते ॥ ३३ ॥
जन्तोर्निरुपभोगस्य दृश्यते भुवि रूक्षता ।
वाताशिनो द्विजिह्वत्वं विहितं पश्य वेधसा ॥ ३४ ॥
ऊर्जितं सज्जनं दृष्ट्वा द्वेष्टि नीचः पुनः पुनः ।
कवलीकुरुते खस्थं विधुं दिवि विधुन्तुदः ॥ ३५ ॥
न लभन्ते विनोद्योगं जन्तवः सम्पदां पदं ।
सुराः क्षीरोदविक्षोभमनुभूयामृतं पपुः ॥ ३६ ॥
सम्पत्तौ कोमलं चित्तं साधोरापदि कर्कशं ।
सुकुमारं मधौ पत्रं तरोः स्यात्कठिनं शुचौ ॥ ३७ ॥
आकारः कारणं जन्तोर्दौर्जन्यस्य न जायते ।
कालकूटः सुधासिंधोः प्राणिनां प्राणहारकः ॥ ३८ ॥
गुणदोषाववाप्येते पुंसां संशीलनाद्बुधैः ।
लेभे पीयूषगरले मंथनादंवुधेः सुरैः ॥ ३९ ॥
स्वभावं न जहात्येव साधुरापद्गतोपि सन् ।
कर्पूरः पावकस्पृष्टः सौरभं लभतेतरां ॥ ४० ॥
न व्याप्तिरेषा गुणिनो गुणवान् जायते ध्रुवं ।
चन्दनोऽनलसन्दग्धो न भस्म सुरभि क्वचित् ॥ ४१ ॥
अप्यापत्समयः साधोः प्रयाति श्लाघनीयतां ।
विधो र्विधुन्तुदास्कन्दविपत्कालोपि सुन्दरः ॥ ४२ ॥

विना परीक्षां नो तत्त्वं प्रसिद्धं ज्ञायते सतः ।
स्ववर्मबन्धान्नो शुद्धिर्ज्ञायते कर्षणं विना ॥ ४३ ॥
प्राप्य वित्तं जडास्तूर्णं निर्वृत्तिं यान्ति नान्यथा ।
तोयमासाद्य गर्जन्ति न रिक्तास्तनयित्नवः ॥ ४४ ॥
कार्यापेक्षी जनः प्रायः प्रीतिमाविष्करोत्यलं ।
लोमार्थी सौण्डिकः शष्पैर्मेषं पुष्णाति पेशलैः ॥ ४५ ॥
दुर्जनो जीयते युक्त्या निग्रहेण न धीमता ।
निपात्यते महावृक्षस्तत्समीपक्षितिक्षयात् ॥ ४६ ॥
सुखदुःखे समे स्यातां जन्तूनां क्लेशहेतुके ।
मूर्ध्नि स्थितानां केशानां भवेतां स्नेहच्छेदने ॥ ४७ ॥
दुष्टदुर्जनदौरात्म्यैः सज्जने रज्यते जनः ।
आरुह्य पर्वतं पान्थः सानौ निर्वृतिमेत्यलं ॥ ४८ ॥
स्वभावसुन्दरं वस्तु न संस्कारमपेक्षते ।
मुक्तारत्नस्य शाणाश्मघर्षणं नोपयुज्यते ॥ ४९ ॥
शोभते विदुषां मध्ये नैव निर्गुणमानसः ।
अन्तरे तमसान्दीपः शोभते नार्कतेजसां ॥ ५० ॥
युक्त्या परोक्षं बाधेत विपक्षक्षयणक्षमः ।
शोषयत्यचिरेणैव प्रान्तरस्थमलं पयः ॥ ५१ ॥
दुर्गदेशप्रविष्टोपि शूरोभ्येति पराभवं ।
गाढपङ्कनिमग्नाङ्गो मातङ्गोप्यवसीदति ॥ ५२ ॥
नयेनाङ्कुरितं शौर्यं जयाय नतु केवलं ।
अन्ययुक्तं विषं भुक्तं पथ्यं स्यादन्यथा मृतिः ॥ ५३ ॥

मृदुभिर्बहुभिः शूरः पुम्भिरेको न बाध्यते ।
कपोतपोतकैरेकः श्येनो जातु न बाध्यते ॥ ५४ ॥
येनात्मा पण्यतां नीतः सएवान्विष्यते जनैः ।
हस्ती हेमसहस्रेण क्रीयते न मृगाधिपः ॥ ५५ ॥
गुणो गुणान्तरापेक्षी स्वरूपख्यातिहेतवे ।
स्वभाववाल्यं लावण्यं तारुण्ये न मनोहरं ॥ ५६ ॥
सुलभं वस्तु सर्वस्य न यात्यादरणीयतां ।
स्वदारपरिहारेण परदारार्थिनो जनाः ॥ ५७ ॥
विक्रीतं निजमात्मानं वस्त्रैः संस्कुरुते जडः ।
परेभ्यः स्वशरीरस्य के वा भूषां वितन्वते ॥ ५८ ॥
क्षणक्षयिणि सापाये भोगे रज्यंति नोत्तमाः ।
सन्त्यज्यांभोजकिञ्जल्कं न प्रार्थयति शैवलं ॥ ५९ ॥
असम्भवगुणस्तुत्या जायते स्वात्मनस्त्रपा ।
कर्णिकारं सुगन्धीति वदन् केनोपहास्यते ॥ ६० ॥
धनाशया खलीकारः कस्य नाम न जायते ।
दूरादामिषलोभेन बध्यते खे वरः खगः ॥ ६१ ॥
तटस्थैः ख्यापिताश्चेतो विशन्ति गुणिनाङ्गुणाः ।
उत्कोचितानां पद्मानां गन्धोवायुभिराहृतः ॥ ६२ ॥
निजाश्रयवदाभाति पुंसां चित्ते पराश्रयः ।
प्रतिमामुखचन्द्राभे कृपाणे याति दीर्घतां ॥ ६३ ॥
अधमं वाधते भूयो दुःखवेगो न तूत्तमं ।
पादद्वयं व्रजत्याशु शीतस्पर्शो न चक्षुषी ॥ ६४ ॥

गुणवान् सुचिरस्थायी देवोपि नाभिजायते।
तिष्ठत्येकान्निशाश्चन्द्रः श्रीमान् संपूर्णमण्डलः॥ ६५॥
यतएवागतो दोषस्ततएव निवर्त्तते।
अग्निदग्धस्य विस्फोटशान्तिः स्यादग्निना ध्रुवं॥ ६६॥
स्वधियो निश्चयो नास्ति यस्य सँभ्रमते स्वयं।
प्रवातवालपत्रस्थः पटस्तत्र निदर्शनं॥ ६७॥
कथाप्रवन्धे वन्ध्येपि कश्चिदेवानुरज्यते।
प्रायश्चासादपत्यतः सश्चन्निसकेकसं॥ ६८॥
वुद्धिमत्वाभिमानः को भवेत् प्रज्ञोपजीविनां।
अन्यदेयैरलंकारैर्नाहङ्कारो विभूषणे॥ ६९॥
उत्तमोप्यधमस्य स्याद्याञ्चानम्रकरः क्वचित्।
कौस्तुभादीनि रत्नानि ययाचे हरिरंवुधिं॥ ७०॥
प्रयत्ने समके केचिदेव स्युः फलभागिनः।
क्षीरोदमथनाद्देवैरमृतं प्रापि नासुरैः॥ ७०॥
गुणैः पूजा भवेत् पुंसां नैकस्माज्जायते कुलात्।
चूडारत्नं शशी शंभोः यानमुच्चैःश्रवा हरेः॥ ७१॥
भोगः परोपतापेन पुंसां दुःखाय न स्थिरः।
पानमप्यसृजः क्षिप्रं स्वपीडायै जलौकसां॥ ७२॥
नोपभोगपरान् अर्थान् कोपि सञ्चिनुते चिरं।
आखवः किमलङ्कारानात्मन्याहृत्य कुर्वते॥ ७३॥
विवर्णवचनैर्मन्युर्गूढोप्यन्तः प्रकाशते।
इन्धनान्तरसंस्थैश्च ज्वलत्यग्निः पयः कणैः॥ ७४॥

निकटस्थं गरीयांसमपि लोको न मन्यते।
पवित्रामपि यन्मर्त्या न नमस्यन्ति जाह्नवीं ॥ ७५ ॥
स्वजनः स्वात्मवज्जंतुर्न्नायते गुणवान् परैः।
गोपैर्गोपवदाज्ञायि हरिर्देवैर्जगत्पतिः ॥ ७६ ॥
उत्तमस्तोषमायाति तदङ्गो पोष्यते यदि।
वृक्षः प्रसीदति प्रायः पादाभ्यङ्गेन न स्वयं ॥ ७७ ॥
सर्वत्र गुणवानेव चकास्ति प्रथिते नरे।
मणिर्मूर्ध्नि गले बाहौ पादपीठेपि शोभते ॥ ७८ ॥
उत्तमं सुचिरं नैव विपदोभिभवंत्यलं।
राहुग्रसनसंभूतक्षणो विछाययेद्विधुं ॥ ७९ ॥
प्रायः स्वभावं मुञ्चन्ति सन्तः संसर्गतोऽसतां।
चण्डा श्चण्डातपात् पादा हिमांशोरमृतसृजः ॥ ८० ॥
तुल्यं परोपतापित्वं कुड्वयोः साधुनीचयोः।
न दाहे ज्वलतोर्भिन्नश्चन्दनेन्धनयोः क्वचित् ॥ ८१ ॥
न भाति वांछा वैजात्ये न देवा भान्ति वादिनि।
अञ्जनं दूषणं वक्रे भूषणं किल लोचने ॥ ८२ ॥
दुर्भगः स्यात्प्रकृत्या यो विभूत्यापि स ताद्दशः।
गोमयं श्रीनिवासोस्ति न तथापि मनोहरं ॥ ८३ ॥
गुणानर्चन्ति जन्तूनां न जातिं केवलां क्वचित्।
स्फाटिकं भाजनं भग्नं काकिन्यापि न गृह्यते ॥ ८४ ॥
आगच्छदुत्सवो भाति यथैव न तथा गतः।
हिमांशोरुदयः सायं चकास्ति न तथोषसि ॥ ८५ ॥

मनस्विनो न मान्यन्ते परतः प्राप्य जीवनं ।
वलिभुग्भ्यो न काकेभ्यः स्पृहयन्ति हि कोकिलाः ॥८७॥
सन्तोषक्षतये पुंसामाकस्मिकधनागमः ।
सरसां सेतुभेदाय वर्षौघः स च न स्थितः ॥ ८८ ॥
जीर्यते भूगतोप्यात्मा कालेनात्मापि स्वर्गतः ।
भवेत् श्मसानमुद्यानमुद्यानञ्च श्मशानभं ॥ ८९ ॥
उच्चशेखरगं वस्तु शुभं स्यात्सुखकारणं ।
उपशामयते बाधंयथैवा मृतसंस्कृतं ॥ ९० ॥
संतुष्यत्युत्तमः स्तुत्या धनेन महताधमः ।
प्रसीदन्ति जयैर्देवा वलिभिर्भूतविग्रहाः ॥ ९१ ॥
स्वजातीयविघाताय माहात्म्यं दृश्यते नृणां ।
श्येनो विहङ्गमानेव हिनस्ति न भुजङ्गमान् ॥ ९२ ॥
गुरुप्रयोजनोद्देशादर्चयन्ति न भक्तितः ।
दुग्धदात्रीति गौर्गेहे पोष्यते नतु धर्मतः ॥ ९३ ॥
महतां तादृशं तेजो यत्र शाम्यंत्यनोजसः ।
अस्तं यान्ति प्रकाशेन तारका हि विवस्वतः ॥ ९४ ॥
दाता दानस्यान्तरा स्यात् पृथिव्यां
गेहे गेहे याचकानां समूहः ।
चिन्तारन्तस्यास्ति सत्वे विवादो
मार्गे मार्गे रेणवः सन्त्यसंख्याः॥९५॥
चारुता अपवशेन पदार्थे धैर्येण तदनुवादिगुणत्वात् ।
वेणुगो भवति मञ्जुरसो यन्त्रगो हि सुखदः कृतशब्दः ९६॥

नराः संस्काराह्र्हा जगति किल केचित् सुकृतिनः
समानायां जात्यामपि वयसि सत्यां परधियः ।
अयं दृष्टान्तोऽत्र स्फुटकरणतोऽप्यभ्यसनतः
शुकः श्लोकान् वक्तुं प्रभवति न काकः क्वचिदपि ॥९७॥

धनमपि परदत्तं दुःखमौचित्यभाजां
भवति हृदि तदेवानंदकारीतरेषां ।
मलयजरसबिन्दुर्बाधते न प्रसन्नं
नयति च रसवाह्वादेवमत्यन्तमत्र ॥९८॥

कालक्रमेण परिणामवशादनव्या
भावा भवन्ति खलु पूर्वमतीवतुच्छाः ।
मुक्तामणिर्जलदतोयकणोऽप्यणियान्
संपद्यते च चिरकीचकरंध्रमध्ये ॥९९॥

इयं कुसुमदेवेन कविनैकेन निर्मिता ।
दृष्टान्तकलिका नाम जृम्भतां कविमानसे ॥१००॥

इति कुसुमदेवरचितं दृष्टान्तशतकं सम्पूर्णं ॥

## चौरपञ्चाशिका ।

अद्यापि तां कनकचम्पकदामगौरीं
फुल्लारविन्दवदनां तनुलोमराजीं ।
सुप्तोत्थितां मदनविह्वललालसाङ्गीं
विद्यां प्रमादगुणितामिव चिन्तयामि ॥ १ ॥
अद्यापि तां शशिमुखीं नवयौवनाढ्यां
पीनस्तनीं पुनरहं यदि गौरकान्तीं ।
पश्यामि मन्मथशरानलपीडितानि
गात्राणि सम्प्रति करोमि सुशीतलानि ॥ २ ॥
अद्यापि तां यदि पुनः कमलायताक्षीं
पश्यामि पीवरपयोधरभारखिन्नां ।
सम्पीड्य वाहुयुगलेन पिवामि वक्त्रम्
उन्मत्तवन्मधुकरः कमलं यथेष्टं ॥ ३ ॥
अद्यापि तां निधुवनक्लमनिःसहाङ्गीम्
आपाण्डुगण्डपतितालक[illegible]न्तलाक्षीं ।
प्रच्छन्नपापकृतमन्[illegible]हन्तीं
कण्ठावसक्तमृदुवाहुलतां स्मरामि ॥ ४ ॥
अद्यापि तां सुरतजागरघूर्णमानां
तिर्य्यक्स्खलत्तरलतारकमावहन्तीं ।

शृङ्गारसारकमलाकरराजहंसीं
व्रीडावनम्रवदनामुरसि स्मरामि ॥ ५ ॥
अद्यापि तां सुरतताण्डवसूत्रधारीं
पूर्णेन्दुसुन्दरमुखीं मदविह्वलाङ्गीं ।
तन्वीं विशालजघनां स्तनभारखिन्नां
व्यालोलकुन्तलकलापवतीं स्मरामि ॥ ६ ॥
अद्यापि तां मसृणचन्दनचर्चिताङ्गीं
कस्तूरिकापरिमलेन विसर्पिगन्धां ।
अल्पेन्दुरेखपरिशीलितभालरेखां
मुग्धाभिराममनयनां शयने स्मरामि ॥ ७ ॥
अद्यापि तां निधुवने मधुपानपात्रीं
लीढाम्बरां कृशतनुं चपलायताक्षीं ।
काश्मीरपङ्कमृगनाभिकृताङ्गरागां
कर्पूरपूगपरिपूर्णमुखीं स्मरामि ॥ ८ ॥
अद्यापि तां क्लमपतन्मदिरापराग
प्रस्वेदविन्दुविततं वदनं प्रियायाः ।
अन्ते स्मरामि रतिखेदविलोलनेत्रं
राहूपरागपरिमुक्तमिवेन्दुविम्बं ॥ ९ ॥
अद्यापि तन्मुखशशी परिवर्तते मे
रात्रौ मयि क्षुतवति क्षितिपालपुत्र्या ।
जीवेति मङ्गलवचः परिहृत्य कोपात्
कर्णे कृतं कनकपत्रमनालपन्त्या ॥ १० ॥

* * *

अद्यापि तत्प्रणयभङ्गुरदृष्टिपातं
तस्याः स्मरामि रतिविभ्रमगात्रभङ्गं।
वस्त्राञ्चलेन परिधर्षिपयोधरान्तं
दन्तच्छदं दशनखण्डनमण्डलञ्च ॥१२॥
अद्याप्यशोकनवपल्लवरक्तहस्तां
मुक्ताफलप्रचयचुम्बितचूचुकाग्रां।
अन्तःस्मितोच्छसितपाण्डुरगण्डदेशां
तां वल्लभां रहसि सम्वलितां स्मरामि ॥१३॥
अद्यापि तत् कुसुमरेणुसुगन्धिमिश्रं
न्यस्तं स्मरामि नखरक्षतलक्ष्म तस्याः।
आकृष्टहेमरुचिराम्बरमुत्थितायाः
लज्जावशात् करधृतं नकुतोब्रजन्त्याः ॥१४॥
अद्यापि तां विधृतकज्जललोलनेत्रां
पृथ्वीप्रभिन्नकुसुमाकुलकेशपाशां।
सिन्दूरसम्वलितमौक्तिकहारभारां
आवद्धहेमकटिकां रहसि स्मरामि ॥१५॥
अद्यापि तां धवलवेश्मनि रत्नदीप
मालामयूखपटलैर्गलितान्धकारैः।

सुप्ताञ्च मे रहसि हास्यमुखीं प्रसन्नां
लज्जाभरार्द्रनयनां परिचिन्तयामि ॥ १६ ॥
अद्यापि तां गलितबन्धनकेशपाशां
स्रस्तस्रजं स्मितसुधामधुराधरौष्ठीं
पीनोन्नतस्तनयुगोपरिचारुचुम्बन्
मुक्तावलिं रहसि लोलदृशं स्मरामि ॥ १७ ॥
अद्याप्यहं विरहवह्निनिपीडिताङ्गीं
तन्वीं कुरङ्गनयनां सुरतैकपात्रीं ।
नानाविचित्रकृतमण्डनमावहन्तीं
तां राजहंसगमनां सुदतीं स्मरामि ॥ १८ ॥
अद्यापि तां विरहितां कुचभारनम्रां
मुक्ताकलापविमलीकृतकण्ठदेशां ।
तां केलिमन्दिरगतां कुसुमायुधस्य
कान्तां स्मरामि रुचिरोज्ज्वलधूमकेतुं ॥ १९ ॥
अद्यापि चाटुशतप्रोल्लसितस्मितन्तु
तस्याः स्मरामि सुरतक्लमविह्वलायाः ।
अव्याजनिस्तनितकातरकाकुकण्ठ
सङ्कीर्णवर्णरुचिरं वदनं प्रियायाः ॥ २० ॥
अद्यापि तां सुरतघूर्णनिमीलिताक्षीं
स्रस्ताङ्गयष्टिगलितांशुककेशनम्रां ।
शृङ्गारवारिकमलाम्बुजराजहंसीं
जन्मान्तरे निधुवनेप्यनुचिन्तयामि ॥ २१ ॥

अद्यापि तां प्रणयिनीं मृगशावकाक्षीं
पीयूषपूर्णकुचकुम्भयुगं वहन्तीं ।
पश्याम्यहं यदि पुनर्दिवसावसाने
स्वर्गापवर्गनरराज्यसुखं त्यजामि ॥ २२ ॥
अद्यापि तां स्तिमितवस्त्रमिवावलग्नां
प्रौढप्रतापमदनानलतप्तदेहां ।
बालां मदेकशरणामनुकम्पनीयां
प्राणाधिकां क्षणमहं नहि विस्मरामि ॥ २३ ॥
अद्यापि तां क्षितितले वरकामिनीनां
सर्वाङ्गसुन्दरतया प्रथमैकरेखां ।
संसारनाटकरसोत्तमरत्नपात्रीं
कान्तां स्मरामि कुसुमायुधबाणखिन्नां ॥२४॥
अद्यापि तां प्रथमतो वरसुन्दरीं मे
स्नेहैकपात्रघटितावनिनाथपुत्रीं ।
हे हे जना मम वियोगहुताशतापं
सोढुं न शक्यत इति प्रतिचिन्तयामि ॥ २५ ॥
अद्यापि विस्मयकरी त्रिदशान् विहाय
बुद्धिर्बलाच्चलति तत् किमहङ्करोमि ।
जानन्नपि प्रतिमुहूर्तमिवान्तकाले
दृष्टा तु वल्लभतरेति ममातिधीराः ॥ २६ ॥
अद्यापि तां गमनमित्युदितं मदीयं
श्रुत्वैव भीतहरिणीशिशुचञ्चलाक्षीं ।

वाचस्खलद्विगलदश्रुकणाकुलाक्षीं
सञ्चिन्तयामि गुरुशोकविनम्रवक्त्रां ॥ २७ ॥
अद्यापि वासगृहतो मयि नीयमाने
दुर्वारभीषणवरैर्यमदूतकल्पैः ।
किं किं तया वहुविधं न कृतं मदर्थे
कर्तुं न पार्यत इति व्यथते मनो मे ॥ २८ ॥
अद्यापि तां क्षणवियोगवियोगमग्नां
शंके पुनर्वहुतया मृतशोकधारां ।
मज्जीवधारणकरीं मदनालसाङ्गीं
किं ब्रह्मकेशवहरैः सुदतीं स्मरामि ॥ २९ ॥
अद्यापि तां चलचकोरविलोलनेत्रां
शीतांशुमण्डलमुखीं कुटिलाग्रकेशां ।
मत्तेभकुम्भसदृशस्तनभारनम्रां
वन्धूकपुष्पसदृशौष्ठपुटां स्मरामि ॥ ३० ॥
अद्यापि मे निशि दिवा हृदयं दुनोति
पूर्णेन्दुसुन्दरमुखं मम वल्लभायाः ।
लावन्यनिर्जितमनोहरकामदर्पं
भूयःपुनः प्रतिमुहुर्न विलोक्यते यत् ॥ ३१ ॥
अद्यापि तामरहितां मनसापि नित्यं
सञ्चिन्तयामि सततं मम जीवितेशां ।
लावन्यभोगनवयौवनभारसारां
जन्मान्तरेपि मम सैव गतिर्यथा स्यात् ॥ ३२ ॥

अद्यापि तां मलयपङ्कजगन्धलुब्ध
भ्राम्यद्‌द्विरेफचयचुम्बितगण्डदेशां ।
केशावधूतकरपल्लवकङ्कनानां
त्वां नो दुनोति नियतं सुरतं मदीयं ॥३३॥
अद्यापि सा नखपदं स्तनमण्डलेषु
दत्तं मयैव मधुपानविमोहितेन ।
उद्भिन्नरोमपुलकै र्बहुभिः समन्तात्
जागर्ति रक्षति विलोकयति प्रयत्नात् ॥ ३४ ॥
अद्यापि या शशिमुखी न कृतागसं मां
सोच्चै र्वचः प्रति ददाति यदैव नक्तं ।
चुम्बामि रोदिमि भृशं पतितोस्मि पादे
दासस्तव प्रियतमे भज मां स्मरामि ॥ ३५ ॥
अद्यापि धावति मनः किमहङ्करोमि
सार्द्धं सखीभिरभिवासगृहेषु कान्ते ।
कान्तासुगीतपरिहासविचित्रवाद्यैः
क्रीडासुखैरिह तु यातु मदीयकालः ॥ ३६ ॥
अद्यापि तां न खलु वेद्मि किमीशपत्नी
सा वा शची सुरपतेरथ कृष्णलक्ष्मीः ।
धात्रैव किं त्रिजगतां परिमोहनाय
सृष्टा कुले युवतिराजिदिदृक्षयेव ॥ ३७ ॥
अद्यापि तां जगति वर्णयितुं न कोपि
शक्नोत्यदृष्टसदृशप्रतिरूपलक्ष्मीं ।

दृष्टं तया तु सदृशं खलु तेन रूपं
शक्तो भवेदपि सएव परो नचान्यः ॥ ३८ ॥
अद्यापि निर्मलशशाङ्कगौरकान्तिं
चेतो मुनेरपि हरेत् किमुत स्मदीयं ।
वक्त्रं सुधामयमहं यदि तत् प्रपद्ये
चुम्बामि चाप्यविरतं व्यथते न चेतः ॥ ३९ ॥
अद्यापि ते प्रतिमुहुः प्रतिभाव्यमाना
चेतो हरन्ति हरिणीशिशुलोचनायाः ।
अन्तर्निमग्नमधुपाकुलकुन्दवृन्द
सन्दर्भसुन्दररुचो नयनार्द्धपाताः ॥ ४० ॥
अद्यापि तत्कमलरेणुसुगन्धिगन्धं
तत्प्रेमवारिमकरध्वजतापहारि ।
प्राप्नोम्यहं यदि पुनः सुरतैकतीर्थं
प्राणांस्त्यजामि नियतं पुनराप्तिहेतोः ॥ ४१ ॥
अद्यापि सा यदि पुनर्नलिनीवनान्ते
रोमाञ्चवीचिविलसच्चपलाङ्गयष्टिः ।
कादम्बकेशररुचः कणमाचसङ्गात्
किञ्चित्क्रमं [illegible] प्रियराजहंसी ॥ ४२ ॥
अद्यापि तां नृपतिसेखरराजकन्यां
सम्पूर्णयौवनमदालसभङ्गगात्रीं ।
गन्धर्वयक्षसुरकिन्नरराजकन्यां
स्वर्गादिमां निपतितामिव चिन्तयामि ॥ ४३ ॥

अद्यापि तत्सुरतकेलिनिवद्धवुद्धिं
रङ्गोपवन्धपतितोस्मितशून्यहस्तां ।
दन्तौष्ठपीडननखक्षतरक्तसिक्तां
तस्याः स्मरामि रतिवन्धुरगात्रयष्टिं ॥ ४४ ॥
अद्यापि तां निजवपुःकृतवेदिमध्यां
तत्सङ्गसम्बितसुधास्तनभारनम्रां ।
नानाविचित्रकृतमण्डनमण्डिताङ्गीं
सुप्तोत्थितां निशि दिवा नहि विस्मरामि ॥ ४५ ॥
अद्यापि तां नववधूसुरताभियोगे सम्पूर्ण
केलिविधिना रचितां कदाचित् ।
पूर्णेन्दुसुन्दरमुखीं हरिणायताक्षीं
उन्निन्द्रकोकनदपत्रनखीं स्मरामि ॥ ४६ ॥
अद्यापि तद्विकसिताम्बुजगौरमध्यं
गोरोचनातिलकवृन्दकृतैकदेशं ।
ईषन्मदालसविघूर्णितदृष्टिपातं
कान्ता मुखं सखि मया सह गच्छतीव ॥ ४७ ॥
अद्याप्यहं नववधूसुरताभियोगं
शक्नोमि नान्यविधिना रचितुं कदाचित् ।
तज्ज्ञातरोमरणमेव हि दुःखशान्तौ
विज्ञापयामि भवतस्त्वरितं सुनीतं ॥ ४८ ॥
अद्यापि नोज्झति हरः किल कालकूटं
कूर्मो विभर्ति धरणीं खलु पृष्ठकेन ।

अम्भोनिधिर्वहति दुःसहवाडवाग्निम्
अङ्गीकृतं सुकृतिनःपरिपालयन्तिः ॥ ४९ ॥

इति महाकविसुन्दरकृतं विद्याया
रूपगणवर्णनं समाप्तं ।

## पूर्वचातकाष्टकं।

वातैर्विधूनय विभाषय भीमनादैः
सञ्चूर्णय त्वमथवा करकाभिघातैः।
त्वद्वारिबिन्दुपरिपालितजीवितस्य
नान्या गति र्भवति वारिद चातकस्य ॥ १ ॥
चातकस्त्रिचतुरान् पयः कणान्
याचते जलधरं पिपासितः।
सोऽपि पूरयति भूयसाम्भसा
चित्रमत्र महतामुदारता ॥ २ ॥
शक्यते येन केनापि जीवनेनैव जीवितुं।
किन्तु कौलव्रतोद्भङ्गप्रसङ्गः परदुःसहः ॥ ३ ॥
गर्जसि मेघ न यच्छसि तोयं
चातकपक्षी व्याकुलितोऽहं।
दैवाद्यदि यदि दक्षिणवातः
क्व त्वं क्वाहं क्व च जलपातः ॥ ४ ॥
वापी स्वल्पजलाशयो विषमयो नीचापगाहो ह्रदः
क्षुद्रात्क्षुद्रतरो भ[illegible]जलानिधिर्गण्डूषमेकं मुनेः।
गङ्गाद्याः सरितः पयोनिधिगताः सन्त्यज्य तस्मादिमान्

सन्मानी खलु चातको जलमुचामुच्चैः पयो वांछति ॥ ५ ॥
वीजैरङ्कुरितं नदीभिरुदितं वल्मीभिरुज्जृम्भितं
वृक्षैःपल्लवितं जनैश्च मुदितं धाराधरे वर्षति ।
भ्रातश्चातक पातकं किमपि ते सम्य..न जानीमहे
यत्तेस्मिन्न पतन्ति चञ्चुपुटके द्वित्राः पयो विन्दवः ॥ ६ ॥
नदेभ्योपि ह्रदेभ्योपि पिवन्त्यन्येऽवयःपयः ।
चातकस्य तु जीमूत भवानेवावलम्बनं ॥ ७ ॥
नभसि ।न वलम्बे सीदता दीर्घकालं
त्वदभिमुखनिविष्टोत्तानचञ्चूपुटेन ।
जलधर जलधारा दूरतस्त[illegible]
ध्वनिरपि मधुरस्ते न श्रुतश्चातकेन ॥ ८ ॥

इति पूर्वचातकाष्टकं समाप्तं ॥

---

## उत्तरचातकाष्टकं ।

स्वछाः सौम्यजलाशयाः प्रतिदिनं ते सन्तु मा सन्तु वा ।
स्वल्पं वा बहुधा जलं जलधर त्वं देहि मा देहि वा ॥ १ ॥
कासा ेषु सरित्सु सिन्धुषु तथा नीचेषु नीरग्रहं
धिक् तच्चापि [illegible] ।किमप ` ह्येयं भवेन्मानिनां ।
इत्यालोच्य विमुच्य चातकयुवा तेषु स्पृ ामादराद्
उद्ग्रीवस्तव वारिवाह कुरुते धाराधरालोकनं ॥ २ ॥

के वा न सन्ति भुवि तामरसावतंसा
हंसावलीवलयिनो जलसंनिवेशाः ।
किं चातकः फलमवेक्ष्य सवग्रपातां
पौरन्दरीमुपगतो नववारिधारां ॥ ३ ॥
रे धाराधर धीरनीरनिकरैरेषा रसा नीरसा
शेषा पूषकरोत्करैरतिखरैरापूरि भूरि त्वया ।
एकान्तेन भवन्तमन्तरगतं स्वान्तेन सञ्चिन्तयन्
आश्चर्यं परिपीडीतोऽभिरमते यच्चातकस्तृष्णया ॥ ४ ॥
आत्मानमम्भोनिधिरेतु शोषं
ब्रह्माण्डमासिञ्चतु वा तरङ्गैः ।
नास्ति क्षतिर्नोपचितिः कदापि
पयोदवृत्तेः खलु चातकस्य ॥ ५ ॥
पोयोद हे वारि ददासि वा नवा
त्वदेकचित्तः पुनरेष चातकः ।
वरं महत्या म्रियते पिपासया
तथापि नान्यस्य करोत्युपासनां ॥ ६ ॥
यद्यपि चातकपक्षी क्षपयति जलधरमकालवेलायां ।
तदपि न कुप्यति जलदे गतिरिह नान्य यतस्तस्य ॥ ७ ॥
एकएव [illegible]रं जीवतु चातकः ।
पिपासया वा म्रियते याचते वा पुरन्दरान् ॥ ८ ॥

इ[illegible]चातकाष्टकं समाप्तं ।

## भ्रमराष्टकं ।

गन्धाढ्यासौ भुवनविदिता केतकी स्वर्णवर्णा
पद्मभ्रान्त्या क्षुधितमधुपः पुष्पमध्ये पपात ।
अन्धीभूतः कुसुमरजसा कंटकैश्छिन्नपक्षः
स्थातुं गन्तुं द्वयमपि सखे नैव शक्तो द्विरेफः ॥ १ ॥
गन्धाढ्यां नवमल्लिकां मधुकरस्त्यक्त्वा गतो यूथिकां
दैवात्ताञ्च विहाय चम्पकवनं पश्चात् सरोजङ्गतः ।
बद्धस्तत्र निशाकरेण विधिना क्रन्दत्यसौ मूढधीः
सन्तोषेण विना पराभवपदं प्राप्नोति मूढो जनः ॥ २ ॥
येऽमी ते मुकुलोद्गमादनुदिनं त्वामाश्रिताः षट्पदा
स्ते भ्राम्यन्ति फलाद्बहिर्बहिरतो दृष्ट्वा न सम्भाषसे ।
ये कीटास्तवदृक्पथञ्च न गतास्ते त्वत्फलाभ्यन्तरे
धिक् त्वां चूत यतः परापरपरिज्ञानानभिज्ञो भवान् ॥ ३ ॥
नीतं जन्म नवीननीरजवने पीतं मधु स्वेच्छया
मालत्याः कुसुमेषु येन सततं केली कृता हेलया ।
तेनेयं मधुगन्धलुब्धमनसा गुञ्जालतां सेव्यते
हा धिग् दैवकृतं सएव मधुपः काङ्क्षां दशां नागतः ॥ ४ ॥
पलाशकुसुमभ्रान्त्या शुकतुण्डे मधुव्रतः ।
पतत्येप शुकोप्येनं जम्बुभ्रान्त्या जिघांसति ॥ ५ ॥

दृष्ट्वा स्फीतो भ्रमदलिरसौ लेख्यपद्मं विशालं
चित्रं चित्रं किमिति किमिति व्याहरन् निष्पपात ।
नास्मिन् गन्धो नच मधुकणा नास्ति तत्सौ ऽमायँ
घूर्णन्मूर्द्धा वत नतशिरा ब्रीडया निर्जगाम ॥ ६ ॥
अलिरसौ नलिनीवनवल्लभः
कुमुदिनीकुलकेलिकलारसः ।
विधिवशेन विदेशमुपागतः
कुटजपुष्परसं वहु मन्यते ॥ ७ ॥
रात्रिर्गमिष्यति भविष्यति सुप्रभातं
भास्वानुदेष्यति हसिष्यति पद्मजालं ।
इत्थं विचिन्तयाते कोषगते द्विरेफे
हा हन्त हन्त नलिनीं गज उज्जहार ॥ ८ ॥

इति भ्रमराष्टकं समाप्तं ॥

## वानयष्टकं

माधुर्यं शास्त्रमारोग्यं दानं मूर्खो द्विजातिकः ।
वैद्यं सजीर्णं वृक्षञ्च वानर्युक्तमिहाष्टकं ॥

---

माधुर्यं प्रमदाजनेषु ललितं दाक्षिण्यमार्येजने
शौर्यं शत्रुषु नम्रता गुरुजने धर्मिष्ठता साधुष ।
मर्म्मज्ञेष्वनुवर्तनं वहुविधं मानं जने पण्डिते
शाठ्यं पापिजने नरस्य कथिताः पयन्तमष्टौ गुणाः ॥ १ ॥
शास्त्रं सुचिन्तितमपि प्रतिचिन्तनीयं
स्वाराधितोपि नृपतिः परिशङ्कनीयः ।
अङ्के स्थितापि युवतिः परिरक्षणीया
शास्त्रे नृपे च युवतौ च कुतो वशित्वं ॥ २ ॥
आरोग्यमानृण्यमविप्रवासः
सम्प्रत्यया वृत्तिरभीतिवासः ।
सद्‌भिर्मनुष्यैः सह संप्रयोगः
षड् जीवलोकेषु सुखानि राजन् ॥ ३ ॥
दानं दरिद्रे विभवेऽपि शान्तिर्
यूनां तपो ज्ञानवताञ्च मौनं ।
ईहा[illegible] सखोचितानां

दया च भूते त्रिदिवं नयन्ति ॥ ४ ॥
मूर्खो द्विजातिः स्थविरो गृहस्थो
गृही दरिद्रो धनवांस्तपस्वी ।
वेश्या कुरूपा नृपतिः कुधर्मो
लोके षडेतानि विडम्बितानि ॥ ५ ॥
वैद्यं पानरतं नटं कुपठितं स्वाध्यायहीनं द्विजं
युद्धे कापुरुषं हयं गतरयं मूर्खं परिव्राजकं ।
राजानञ्च कुमन्त्रिभिः परिवृतं देशञ्च सोपद्रवं
भार्यां यौवनगर्विंतां पररतां मुञ्चन्ति शीघ्रं वुधाः ॥ ६ ॥
सुजीर्णमन्नं सुविचक्षणः सुतः
सुशासिता स्त्री नृपतिः सुसेवितः ।
सुचिन्त्य चोक्तं सुविचार्य यत् कृतं
सुदीर्घकालेपि न याति विक्रियां ॥ ७ ॥
वृक्षं क्षीणफलं त्यजन्ति विहगाः शुष्कं सरः सारसाः
पुष्पं पर्युषितं त्यजन्ति मधुपा दग्धं वनान्तं मृगाः ।
निर्द्रव्यं पुरुषं त्यजन्ति गणिका भ्रष्टश्रियं मन्त्रिणः
सर्वः कार्यवशाज्जनोभिरमते कस्यास्ति को वल्लभः ॥ ८ ॥

इति वानर्यष्टकं समाप्तं ॥

## वानराष्टकं ।

ईर्षी दक्षः क्रतौ रूपं स्तब्धःशुष्केन्धनं जवः ।
मन्त्रिणमिति श्लोकाः कथिता वानराष्टके ॥

---

ईर्षी घृणी त्वसन्तुष्टः क्रोधनो नित्यशङ्कितः ।
परभाग्योपजीवी च षडेते दुःखभागिनः ॥ १ ॥
दक्षः श्रियमधिगच्छति पथ्याशी कल्यतां सुखमरोगी ।
उद्युक्तो विद्यां तथा धर्मार्थयशांसि विनीतः ॥ २ ॥
क्रतौ विवाहे व्यसने रिपुक्षये
यशस्करे कर्मणि मित्रसंग्रहे ।
प्रियासु नारीषु तथैव वान्धवे
प्यातिव्यये नास्ति नराधिपाष्टसु ॥ ३ ॥
रूपं जरा सर्वसुखानि तृष्णा
खलेषु सेवा पुरुषाभिमानं ।
याञ्चा गुरुत्वं गुणात्मपूजा
चिन्ता वलं हन्त्यदया च लक्ष्मीं ॥ ४ ॥
स्तब्धस्य नश्यति यशो विषमस्य मैत्री
नष्टक्रियस्य कुलमर्थपरस्य धर्मः ।
विद्याफल व्यसनिनः कृपणस्य दृत्तं

राज्यं प्रम[illegible] नराधिपस्य ॥ ५ ॥
शुष्केन्धने वह्निरुपैति वृद्धिं
वालेषु शोक श्चपलेषु कोपः ।
कान्तासु कामो निपुणेषु चित्तं
धर्मो दयावत्सु महत्सु धैर्यं ॥ ६ ॥
जवोहि सप्तेः परमं विभूषणं
त्रपाङ्गनायाः कृशता त[illegible]ः ।
द्विजस्य विद्यैव मुनेरपिक्षमा
पराक्रमः शस्त्रवलोपजीविनां ॥ ७ ॥
दुर्मन्त्रिणं कमुपयाति न नीतिदोषाः
सन्तापयन्ति कमपथ्यभुजं न रोगाः ।
कं स्त्री न मोहयति कं न निहन्ति मृत्युः
कं स्त्रीकृता न विषयाः परितापयन्ति ॥ ८ ॥

इति वानराष्टकं समाप्तं ॥

## आनन्दलहरी ।

शिवः शक्त्या युक्तो यदि भवति शक्तः प्रभवितुं
नचेदेवं देवो न खलु कुशलः स्पन्दितुमपि ।
अतस्त्वामाराध्यां हरिहरविरिञ्च्यादिभिरपि
प्रणन्तुं स्तोतुं वा कथमकृतपुण्यः प्रभवति ॥ १ ॥
तनीयांसं पांशुं तव चरणपङ्केरुहभवं
विरिञ्चिः सञ्चिन्वन् विरचयति लोकानविकलं ।
वहत्येनं शौरिः कथमपि सहस्रेण शिरसा
हरः संक्षुभ्यैनं भजति भसितोद्धूलनविधिं ॥ २ ॥
अविद्यानामन्तस्तिमिरमिहिरोद्दीपनकरी
जडानां चैतन्यं स्तवकमकरन्दश्रुतिशिरा ।
दरिद्राणां चिन्तामणिगुणनिका जन्मजलधौ
निमग्न नां दंष्ट्रा मुररिपुवराहस्य भवति ॥ ३ ॥
त्वदन्यः पाणिभ्यामभयवरदो दैवतगणः
त्वमेकानैवासि प्रकटितवराभित्यभिनया ।
भयात् त्रातुं दातुं फलमपि च वांछासमधिकं
शरण्ये लोकानां तव हि चरणावेवनिपुनौ ॥ ४ ॥
हरिस्त्वामाराध्य प्रणतजनसौभाग्यजननी
परा नारीभूत्वा स्मररिपमपि क्षोभमनयत् ।

स्मरोऽपि त्वां नत्वा रतिनयनलेह्येन वपुषा
मुनीनामप्यन्तः प्रभवति हि मोहाय महतां ॥ ५ ॥
धनुः पौष्पं मौर्वी मधुकरमयी पञ्चविशिखा
वसन्तः सामन्तो मलयमरुदायोधनरथः ।
तथाप्येकः सर्वं हिमगिरिसुते कामपि कृपाम्
अपाङ्गात्ते लब्ध्वा जगदिदमनङ्गो विजयते ॥ ६ ॥
क्वणत्काञ्चीदामा करिकरभकुम्भस्तनभरा
परिक्षीणा मध्ये परिणतशरच्चन्द्रवदना ।
धनुर्बाणान् पाशं सृणिमपि दधाना करतलैः
पुरस्तादास्तां नः पुरमथितुराहोपुरुषिका ॥ ७ ॥
सुधासिन्धोर्मध्ये सुरविटपिवाटीपरिवृते
मणिद्वीपे नीपोपवनवति चिन्तामणिगृहे ।
शिवाकारे मञ्चे परमशिवपर्यङ्कनिलयां
भजन्ति त्वां धन्याः कति च न चिदानन्दलहरीं ॥ ८ ॥
महीं मूलाधारे कमपि मणिपूरे हुतवहं
स्थितं स्वाधिष्टाने हृदि मरुतमाकाशमुपरि ।
मनोपि भ्रूमध्ये सकलमपि भित्वा कुलपथं
सहस्रारे पद्मे सह रहसि पत्या विहरसि ॥ ९ ॥
सधाधारासारैश्चरणयुगलान्तर्विगलितैः
प्रपञ्चं सिञ्चन्ती पुनपरि रसाम्नायमहसा ।
अवाप्य स्वां भूमिं भुजगनिभमध्युष्टवलयं
स्वमात्मानं कृत्वा स्वपिषि कुलकुण्डे कुहरिणि ॥ १० ॥

चतुर्भिः श्रीकण्ठैः शिवयुवतिभिः पञ्चभिरधः
प्रभिन्नाभिः शम्भोर्नवभिरितिमूलप्रकृतिभिः ।
त्रयश्चत्वारिंशद्वसुदलकलाब्जत्रिवलयस्
त्रिरेखाभिः सार्द्धं तव भवनकोणाः परिणताः ॥ ११ ॥

त्वदीयं सौन्दर्यं तुहिनगिरिकन्ये तुलयितुं
कवीन्द्राः कल्पान्ते कथमपि विरिञ्चिप्रभृतयः ।
यदालोकौत्सुक्यादमरललना यान्ति सहसा
तपोभिर्दुष्प्रापामपि गिरिशसायुज्यपदवीं ॥ १२ ॥

नरं वर्षीयांसं नयनविरसं नर्मसु जडं
तवापाङ्गालोके पतितमनुधावन्ति शतशः ।
गलद्वेणीवन्धाः कुचकलसविश्रस्तसिचया
हठात् त्रुट्यत्काञ्चोविगलितदुकूला युवतयः ॥ १३ ॥

क्षितौ षट्पञ्चाशद्द्विसमधिकपञ्चाशदुदके
हुताशे द्वाषष्टिश्चतुरधिकपञ्चाशदनिले ।
दिवि द्विषट् त्रिंशन्मनसि च चतुःषष्टिरिति ये
मयूखास्तेषामप्युपरि तव पादाम्बुजयुगं ॥ १४ ॥

शरज्ज्योत्स्नाशुभ्रां शशियुतजटाजूटमुकुटां
वरत्रासत्राणस्फटिकगटिकापुस्तककरां ।
सकृन्नत्वा न त्वां कथमपि सतां संविदधते
मधुक्षीरद्राक्षामधुरिमधुरीणा भणितयः ॥ १५ ॥

कवीन्द्राणां चेतः कमलवनबालातपरुचिं
भजन्ते ये सन्तः कतिचिदरुणामेव भवतीं ।

विरिञ्चिप्रेयस्यास्तरुणतरशृङ्गारलहरीं
गभीराभिर्वाग्भिर्विदधति सभारञ्जनमयीं ॥ १६ ॥
सविचीभिर्वाचां शशिमणिशिलाभङ्गरुचिभिर्
वशिन्याद्याभिस्त्वां सह जननि सञ्चिन्तयति यः ।
स कर्ता काव्यानां भवति महतां भङ्गिशुभगैर्
वचोभिर्वाग्देवीवदनकमलामोदमधुरैः ॥ १७ ॥
तनुच्छायाभिस्ते तरुणतरणिश्रीसरणिभिर्
दिवं सर्वामुर्वीमरुणिमणिमग्नां स्मरति यः ।
भवन्त्यस्य चस्यद्वनहरिणशालीननयनाः
सहोर्वश्या वश्याः कति कति न गीर्वाणगणिकाः ॥ १८ ॥
मुखं विन्दुं कृत्वा ‥चयुगमधस्तस्य तदधो
हरस्याङ्कं ध्यायेद्धरमहिषि ते मन्मथकलां ।
स सद्यः संक्षोभं नयति वनिता इत्यति लघु
त्रिलोकीमप्याशु भ्र‥‥ति रवीन्दुस्तनयुगां ॥ १९ ॥
‥‥मङ्गेभ्यः किरणनिकुरुम्बामृतरसं
हृदि त्वामाधत्ते हिमगिरिशिलामूर्तिमि‥ यः ।
स सर्पाणां दर्पं शमयति शकुन्ताधिपइव
ज्वरप्लुष्टं दृष्ट्या सुखयति सुधासारसिचया ॥ २० ॥
तडिल्लेखातन्वीं तपनशशिवैश्वानरमयीं
निषन्नां षन्न मप्युपारे कमलानां तव कलां ।
महापद्माटव्यां मुदितमलमायेन मनसा
महान्तः पश्यन्तो दधति परमाह्लादलहरीं ॥ २१ ॥

भवानि त्वं दासे मयि वितर दृष्टिं सकरुणा
मिति स्तोतुं वांछन् कथयति भवानि त्वमिति यः ।
तदैव त्वं तस्मै दिशसि निजसायुज्यपदवीं
मुकुन्दब्रह्मेन्द्रस्फुटमु[illegible]टनीराजितपदां ॥ २२ ॥
त्वया हृत्वा वामं वपुरपरितृप्तेन मनसा
शरीरार्द्धं शम्भोरपरमपि शङ्के हृतमभूत् ।
तथा हि त्वद्रूपं सकलमरुणाभं [illegible]नं
कुचाभ्यामानम्रं कुटिलशशिचूडालमुकुटं ॥ २३ ॥
जगत् सूते धाता हरिरवति रुद्रः क्षययति
ति स्कुर्वन्नेतान् स्वमपि वपुरीशस्तिरयति ।
सदापूर्वः सर्वं तदिदमनुगृह्णाति च शिव
स्तवाज्ञामालम्ब्य क्षणचलितयोर्भ्रूलतिकयोः ॥ २४ ॥
त्रयाणां देवानां त्रिगुणजनितानामपि शिवे
भवेत् पूजा पूजा तव चरणयोर्या वि[illegible] ।
तथाहि त्वत्पादोद्वहनमणिपीठस्य निकटे
स्थिता ह्येते शश्वन्मुकुलितकरोत्तंसमुकुटाः ॥२५॥
विरिञ्चिः पञ्चत्वं ब्रजति हरिराप्नोति विरतिं
विनाशं कीनाशो भजति धनदो याति निधनं ।
वितन्द्रा [illegible] विततिरपि सम्मीलति दृशां
महासंहारेस्मिन् विहरति सति त्वत्पतिरसौ ॥ २६ ॥
जपो जल्पः शिल्पं सकलमपि मुद्राविरचनं
गतिः प्रादक्षिण्यभ्रमणमदनाद्या हुतविधिः ।

प्रणामःसम्वेशः सुखमखिलमात्मार्पणदृशा
सपर्यापर्यायस्तव भवतु यन्मे विलसितं ॥ २७ ॥
ददाने दीनेभ्यः श्रियमनिशमात्मानुसदृशी
ममन्दं सौन्दर्यस्तवकमकरन्दं विकिरति ।
तवास्मिन्मन्दारस्तवकशुभगे यातु चरणे
निमज्जन्मज्जीवः करणचरणैः षट्चरणतां ॥ २८ ॥
सुधामप्यास्वाद्य प्रतिभयजरामृत्युहरिणीं
विपद्यन्ते विश्वे विधिशतमखाद्या दिविषदः ।
करालं यत् क्ष्वेडं कवलितवतः कालकलना
न शम्भोस्तन्मूलं जननि तव ताडङ्कमहिमा ॥२९॥
किरीटं वैरिञ्चं परिहर पुरः कैटभभिदः
कठोरे कोटिरे स्खलसि जहि जम्भारिमुकुटं ।
प्रणम्रेष्वेतेषु प्रसभमुपयातस्य भवनं
भवस्याभ्युत्थाने तव परिजनोक्तिर्विजयते ॥ ३० ॥
चतुःषष्ट्या तन्त्रैः सकलमभिसन्धाय भुवनं
स्थितस्तत्तत्सिद्धिप्रसवपरतन्त्रः पशुपतिः ।
पुनस्त्वन्निर्वन्धादखिलपुरुषार्थैकघटनात्
स्वतन्त्रन्ते तन्त्रं क्षितितलमवतीतरदिदं ॥ ३१ ॥
शिवः शक्तिः कामः क्षितिरथ रविः शीतकिरणः
स्मरो हंसः शक्रुस्तदनु च परामारहरयः ।
अमी हृल्लेखाभिस्तिसृभिरवसानेषु घटिता
भजन्ते ते वर्णास्तव जननि नामावयवतां ॥ ३२ ॥

स्मरं योनिं लक्ष्मीं त्रितयमिदमाद्ये तव मनो
निधायैके नित्ये निरवधिमहाभोगरसिकाः ।
जपन्ति त्वां चिन्तामणिगुणनिबद्धाक्षवलयाः
शिवाग्नौ जुह्वन्तः सुरभिघृतधाराहुतिशतैः ॥ ३३ ॥
शरीरं त्वं शम्भोः शशिमिहिरवक्षोरुहयुगं
तवात्मानं मन्ये भगवति भवात्मानमनघं ।
अतः शेषः शेषीत्ययमुभयसाधारणतया
स्थितःसम्बन्धो वां समरसपरमानन्दपदयोः ॥ ३४ ॥
मनस्त्वं व्योम त्वं मरुदसि मरुत्सारथिरसि
त्वमापस्त्वं भूमिस्त्वयि परिणतायां नहि परं ।
त्वमेव स्वात्मानं परिणमयितुं विश्ववपुषा
चिदानन्दाकारं शिवयुवतिभावेन विभृषे ॥ ३५ ॥
तवाज्ञाचक्रस्थं तपनशशिकोटिद्युतिधरं
परं शम्भुं वन्दे परिमिलितपार्श्वं परचिता ।
यमाराद्धुं भक्त्या रविशशिशुचीनामविषये
निरालोके लोको निवसति निजालोकभवने ॥ ३६ ॥
विशुद्धौ ते शुद्धस्फटिकविशदं व्योमसदृशं
शिवं सेवे देवीमपि शिवसमानव्यसनिनीं ।
ययोःकान्त्या यान्त्या शशिकिरणसारूप्यसरणीं
विधूतान्तर्ध्वान्ता विलसति चकोरीव जगती ॥ ३७ ॥
समुन्मीलत् सम्वित् कमलमकरन्दैकरसिकं
भजे हंसद्वन्द्वं किमपि महतां मानसचरं ।

यदालापादष्टादशगुणितविद्यापरिणतिर्
यदादत्ते दोषाद्गुणमखिलमद्भ्यः पय इव ॥ ३८ ॥
तडित्वन्तं शक्त्या तिमिरपरिपन्थिस्फुरणया
स्फुरन्नानारत्नाभरणपरिणद्धेन्द्रधनुषं ।
तमश्यामं मेघं कमपि मणिपूरैकशरणं
निषेवे वर्षन्तं हरमिहिरतप्तं त्रिभुवनं ॥ ३९ ॥
तव स्वाधिष्ठाने हुतवहमधिष्ठाय नियतं
तमीडे सम्वर्तं जननि जननीं ताञ्च समयां ।
यदालोके लोकान् दहति महति क्रोधकलिने
दयार्द्रा ते दृष्टिः शिशिरमुपचारं रचयति ॥ ४० ॥
तवाधारे मूले सह समयया लास्यपरया
भवात्मानं वन्दे नवरसमहाताण्डवनटं ।
उभाभ्यामेताभ्यामुभयविधिमुद्दिश्य दयया
सनाथाभ्यां जज्ञे जनकजननीमज्जगदिदं ॥ ४१ ॥
गतै र्माणिक्यैक्यं गगणमणिभिः सान्द्रघटितं
किरीटं ते हैमं हिमगिरिसुते कीर्तयति यः ।
समीपे यच्छाया स्फुरणकिरणं चन्द्रशकलं
धनुः सौनासीरं किमिदमिति बध्नाति धिषणां ॥ ४२ ॥
धुनोतु ध्वान्तं नस्तुलितदलितेन्दीवरदलं
घनं स्निग्धं स्निग्धं चिकुरनिकुरुम्बं तव शिवे ।
यदीयं सौरभ्यं सहजमुपलब्धुं सुमनसो
वसन्त्यस्मिन् मन्ये बलमथनवाटीविटपिनां ॥ ४३ ॥

वहन्ती सिन्दूरं प्रबलकबरीभारतिमिर
द्विषां वृन्दै र्बन्दीकृतमिव नवीनार्ककिरणं ।
तनोतु क्षेमं नस्तव वदनसौन्दर्य्यलहरी
परीवाहस्रोतःसरणिरिव सीमन्तसरणिः ॥ ४४ ॥
अरालैः स्वाभाव्यादलिकलभसश्रीभिरलकैः
परीतं ते वक्त्रं परिहसति पङ्केरुहरुचिं ।
दरस्मेरे यस्मिन् दशनरुचिकिञ्जल्करुचिरे
सुगन्धौ माद्यन्ति स्मरमथनचक्षुर्मधुलिहः ॥ ४५ ॥
ललाटं लावण्यद्युतिविमलम भाति तव यत्
द्वितीयं तन्मन्ये मुकुटशशिखण्डस्य शकलं ।
विपर्यासन्यासादभयमभिसन्धाय मिलितः
सुधालेपस्यूतिः परिणमति राकाहिमकरः ॥ ४६ ॥
भ्रुवौ भुग्ने किञ्चिद्भुवनभयभङ्गव्यसनिनि
त्वदीये नेत्राभ्यां मधुकररुचिभ्यां धृतगुणे ।
धनुर्मन्ये सव्येतरकरगृहीतं रतिपतिः
प्रकोष्ठे मुष्टौ च स्थगयति निगूढान्तरमिदं ॥ ४७ ॥
अहः सूते ऽसव्यं तव नयनमर्कात्मकतया
त्रियामां वामं ते सृजति रजनीनायकतय ।
तृतीया ते दृष्टिर्दरदलितहेमाम्बुजरुचिः
समाधत्ते सन्ध्यां द्[illegible]रन्तरचरीं ॥ ४७ ॥
विशाला कल्याणी स्फुटरुचिरयोध्या कुवलयैः
कृपापारावारा किमपि मधुराभोगललतिका ।

अवन्ती ते दृष्टिर्बहुनगरविस्तारविजया
ध्रुवं तत्तन्नामव्यवहरणयोग्या विजयते ॥ ४९ ॥
कवीनां सन्दर्भस्तवकमकरन्दैकरसिकं
कटाक्षव्याक्षेपभ्रमरकलभौ कर्णयुगलं ।
अमुञ्चन्तौ दृष्ट्वा तव नवरसास्वादतरला
वसूयासंसर्गादलिकनयनं किञ्चिदरुणं ॥ ५० ॥
शिवे शृङ्गाराद्रांतदितरमुखे कुत्सनपरा
सरोषा गङ्गायां गिरिशचरिते विस्मयवती ।
हराहिभ्यो भीता सरसिरुहसौभाग्यजननी
सखीषु स्मेरा ते मयि जननि दृष्टिः सकरुणा ॥ ५१ ॥
गते कर्णाभ्यर्णं गरुडइव पक्ष्माणि दधती
पुरांभित्तुश्चित्ते प्रशमरसविद्रावणफले ।
इमे नेत्रे गोत्राधरपतिकुलोत्तंशकलिके
तवाकर्णाकृष्टस्मरशरविलासङ्कलयतः ॥ ५२ ॥
विभक्तं त्रैवर्ण्यं व्यतिकरितलीलाञ्जनतया
विभाति त्वन्नेत्रत्रितयमिदमीशानदयिते ।
पुनःस्रष्टुं देवान् द्रुहिणहरिरुद्रानुपरतान्
रजःसत्वं बिभ्रत्तम इति गुणानां त्रयमिदं ॥ ५३ ॥
पवित्री कर्तुं नः पशुपतिपराधीनहृदये
दयामित्रैर्नेत्रैररुणधवलश्यामरुचिभिः ।
नदः शोनो गङ्गा तपनतनयेति ध्रुवममुं
त्रयाणां तीर्थानामुपनयसि सम्भेदमनघं ॥ ५४ ॥

तवापर्णे कर्णेजपनयनपैशुन्यचकिता
विलीयन्ते तोये नियतमणिमेषाः सफरिकाः ।
इयञ्च श्रीरर्द्धच्छदपुटकवाटं कुवलयं
जहाति प्रत्यूषे निशि च विघटय्य प्रविशति ॥ ५५ ॥
निमेषोन्मेषाभ्यां प्रलयमुदयं याति जगती
तवेत्याहुः सन्तो धरणिधरराजन्य तनये ।
त्वदुन्मेषाज्जातं जगदिदमशेषं प्रलयतः
परित्रातुं शङ्के परिहृतनिमेषास्तव दृशः ॥ ५६ ॥
दृशा द्राघीयस्या दरदलितनीलोत्पलरुचा
दवीयांसन्दीनं स्नपय कृपया मामपि शिवे ।
अनेनायं धन्यो भवति नच ते हानिरियता
वने वा हर्म्ये वा समकरनिपातो हिमकरः ॥ ५७ ॥
अरालं ते पाणीयुगलमगराजन्य तनये
न केषामाधत्ते कुसुमशरकोदण्डकुतुकं ।
तिरश्चीनो यत्र श्रवणपथमुल्लंघ्य विलसन्
अपाङ्गव्यासङ्गो दिशति शरसन्धानधिषणां ॥ ५८ ॥
स्फुरद्गण्डाभोगप्रतिफलितताडङ्कयुगलं
चतुश्चक्रं शङ्के तव मुखमिदं मन्मथरथं ।
यमारुह्य द्रुह्यत्यवनिरथमर्केन्दुचरणं
महावीरो मारः प्रमथपतये स्वं जितवते ॥ ५९ ॥
सरस्वत्याः सूक्तीरमृतलहरीकौशलभिदः
पिबन्त्याः सर्वाणि श्रवणचुलुकाभ्यामविकलं ।

चमत्कारश्लाघाचलितशिरसः कुण्डलगणो
झनत्कारैस्तारैः प्रतिवचनमाचष्टइव ते ॥ ६० ॥
असौ नासावंशस्तुहिनगिरिवंशध्वजपटे
त्वदीयो नेदीयः फलतु फलमस्माकमुचितं ।
वहन्नन्तर्मुक्ताः शिशिरतरनिश्वासघटिताः
समृद्ध्या यस्तासां वहिरपि च मुक्तामणिधरः ॥ ६१ ॥
प्रकृत्यारक्तायास्तव सुदति दन्तच्छदरुचेः
प्रवक्ष्ये सादृश्यं जनयतु कथं विद्रुमलता ।
न विम्बं तद्विम्बप्रतिफलनलाभादरुणितं
तुलामध्यारोढुं कथमपि विलज्जेत कलया ॥ ६२ ॥
स्मितज्योत्स्नाजालं तव वदनचन्द्रस्य पिवतां
चकोराणामासीदतिरसतया चञ्चुजडिमा ।
अतस्ते शीतांशोरमृतलहरीरम्लरुचयः
पिवन्ति स्वच्छन्दं निशि निशि भृशं काञ्जिकधिया ॥ ६३ ॥
अविश्रान्तं पत्युर्गुणगणकथाम्रेडनजडा
जवापुष्पच्छाया जननि तव जिह्वा विजयते ।
यदग्रासीनायाः स्फटिकदृषदच्छच्छविमयी
सरस्वत्या मूर्तिः परिणमति माणिक्यवपुषा ॥ ६४ ॥
रणे जित्वा दैत्यानपहृतशिरस्त्रैः कवचिभिर्
निवृत्तैश्चण्डांशुत्रिपुरहरनिर्माल्यविमुखैः ।
विरिञ्चीन्द्रोपेन्द्रैः [illegible]कर्पूररुचिरा
विलुप्यन्ते मातस्तव वदनताम्बूलकणिकाः ॥ ६५ ॥

ह

विपंच्या गायन्ती विविधमवदानं पशुपतेस्
तयारब्धे वक्तुं चलित[illegible] साधुवदने ।
त्वदीयै र्माधुर्यै [illegible]तन्त्रीकलरवां
निज[illegible]णां वाणी निचुलयति चोलेन निभृतं ॥ ६६
कराग्रेण स्पृष्टं तु[illegible]णा[illegible]त्सलतया
गिरीशेनोदस्तं मुहुरधरपानाकुलतया ।
[illegible] शम्भोर्मुखमुकुरवृन्तं गिरिसुते
कथङ्कारं ब्रूम[illegible]पम्यरहितं ॥ ६७ ॥
भुजाश्लेषान्नित्यं पुरदमयितुः क[illegible]कवती
तव ग्रीवाधत्ते मुखकमलनालश्रियमियं ।
स्वतःश्वेताकालागुरुबहुलजम्बालमलिना
मृ[illegible]लत्यं ब्रजति तदधोहारलतिका ॥ ६८ ॥
गले रेखास्तिस्रो ग[illegible]तिगमकगीतैकनिपुणे
विवादव्यालब्धस्वगुणगणसंख्याप्रतिभुवः ।
[illegible]न्ते न[illegible]विधमधुररागांकुरभुवां
त्रयाणां ग्रामाणां स्थितिनियमसीमानइव ते ॥ ६९ ॥
मृ[illegible]मृद्वीणां तव भुजलतानां चतसनां
चतुर्भिः सौन्दर्यं सरसिजभवस्तौति वदनैः ।
नखेभ्यः सन्त्रस्यन् प्रमथदलनादन्धकरिपोश्
चतुर्नां शीर्षाणां सममभयहस्तार्पणधिया ॥ ७० ॥
नखानामुद्योतैर्नवनलिनरागं विहसतां
कराणान्ते कान्तिं कथय कथयामः कथममी ।

कदाचिद्वा साम्यं भजतु कलया हन्त कमलं
यदि क्रीडल्लक्ष्मीचरणतललाक्षारुणदलं ॥ ७१ ॥
समन्देवि [illegible]पीतं स्तनयुगं
तवेदं नः खेदं हरतु सततं प्रस्तुतमुखं।
यदा लोक्याशङ्का[illegible]लितहृदयो हासजनकः
स्वकुम्भौ हेरम्बः परिमृ[illegible] हस्तेन झटिति ॥ ७२ ॥
अमू ते वक्षोजावमृ[illegible]
न सन्देहस्पन्दो नगपतिपताके मनसि नः।
पिवन्तौ तौ यस्मादविदितवधूसङ्गमरसौ
कुमार[illegible] द्विरदवदनक्रौञ्चदलनौ ॥ ७३ ॥
वहत्यम्बस्तम्बेरमवदनकुम्भप्रसृतिभिः
समावद्धां मुक्तामणिभिरमलां हारलतिकां।
कुचाभोगो विम्बाधररुचिभिरन्तः[illegible]
[illegible]तापव्यामिश्रां पुरविजयिनः कीर्तिमिव ते ॥ ७४ ॥
कुचौ सद्यः स्विद्यत्तटघटितकूर्पासभिदुरौ
कषन्तौ दोर्मूलं कनककलसाभौ कलयतां।
भयात् त्रातुं भङ्गादुदरमविलग्नं तनुभुवा
त्रिधावद्धं देवि त्रि[illegible]लिनवलीवल्लिभिरिव ॥ ७५ ॥
तव स्तन्यं मन्ये धरणिधरकन्ये हृदयतः
पयः पारावारः परिहरति सारस्वत इव।
दयावत्या दत्तं द्रविडशिशु[illegible]स्वाद्य तव यत्
कवीनां प्रौढानामजनि कमनियं कवयिता ॥ ७६ ॥

हरक्रोधज्वालावलिभिरवलीढेन वपुषा
गभीरे ते नाभीसरसि कृतझम्पो मनसिजः।
समुत्तस्थौ तस्मादचलतनये धूमलतिका
जनस्तां जानिते जननि तव रोमावलिरिति ॥ ७७ ॥
यदेतत् कालिन्दीतनुभरतरङ्गाकृति शिवे
कृशे मध्ये किञ्चिज्झटिति तव तद्भाति सुधियां।
विमर्दादन्योन्यं कुचकलसयोरन्तरगतं
तनूभूतं व्योम प्रविशदिव नाभिं कुहरिणीं ॥ ७८ ॥
स्थिरोगङ्गावर्तस्तनमुकुललोमावलिलता
तलारालं कुण्डं कुसुमशरतेजोहुतभुजः।
रते लीलागारं किमपि तव नाभीति गिरिजे
विलद्वारं सिद्धेर्गिरिश नयनानां विजयते ॥ ७९ ॥
निसर्गक्षीणस्य स्तनतटभरेण क्लमजुषो
नमन्मूर्त्तेर्नाभौ वलिषु शनकैस्त्रुट्यतइव।
चिरं ते मध्यस्य त्रुटिततटीनीतीरतरुणा
समावस्था हेम्नो भवतु कुशलं शैलतनये ॥ ८० ॥
गुरुत्वं विस्तारं क्षितिधरपतिः पार्वति निजान्
नितम्बादाकृष्य त्वयि हरणरूपेण विदधे।
अतस्ते विस्तीर्णा गुरुरयमशेषां वसुमतीं
नितम्बप्राग्भावः स्थगयति लघुत्वं नयति च ॥ ८१ ॥
करीन्द्राणां शुण्डाकनककदलीकाण्डपटलीम्
उभाभ्यामूरुभ्यामुभयमपि निर्जित्य भवती।

सुवृत्ताभ्यां पत्यौ प्रणतिकठिनाभ्यां गिरिसुते
विजिग्ये जानुभ्यां विबुधकरिकुम्भद्वयमपि ॥ ८२ ॥
पराजेतुं रुद्रं द्विगुणशरगर्भौ गिरिसुते
निषङ्गौ ते जंघे विषमविशिखो वाढमकृत ।
यदग्रे दृश्यन्ते दशशरफलाः पादयुगली
नखाग्रच्छद्मानः सुरमुकुटशाणैकनिशिताः ॥ ८३ ॥
श्रुतीनां मूर्द्धानो दधति तव यौ शेखरतया
ममाप्येतौ मातः शिरसि दयया धेहि चरणौ ।
ययोः पाद्यं पाथः पशुपतिजटाजूटतटिनी
ययोर्लाक्षालक्ष्मीररुणहरिचूडामणिरुचिः ॥ ८४ ॥
हिमानीहन्तव्यं हिमगिरितटाक्रान्तरुचिरौ
निशायां निद्राणं निशि च परभागेण विशदौ ।
परं लक्ष्मीपात्रं श्रियमभिसृजन्तौ प्रणयिनां
सरोजं त्वत्पादौ जननि जयताश्चित्रमिह किं ॥ ८५ ॥
नमोवाचं ब्रूमोनयनरमणीयाय पदयो
स्तवास्मै द्वन्द्वाय स्फुटरुचिरसालक्तकवते ।
असूयत्यत्यन्तं यदभिहननाय स्पृहयते
पशूनामीशानः प्रमदवनकंकेन्दितरवे ॥ ८६ ॥
मृषा कृत्वा गोत्रस्खलनमथ वैलक्ष्यनमितं
ललाटे भर्तारं चरणयुगलं ताडयति ते ।
चिरादन्तःशल्यं दहनकृतमुन्मीलितवता
तुलाकोटिक्वाणैः किलकिलितमीशानरिपुणा ॥ ८७ ॥

पदन्ते कान्तीनां प्रपदमपदं देवि विपदां
कथं नीतं सद्भिः कठिनकमठीकर्परतुलां ।
कथम्वा वाहुभ्यामुपयमनकाले पुरभिदा
तदादाय न्यस्तं दृशदि दयमानेन मनसा ॥ ८८ ॥

नखैर्नाकस्त्रीणां करकमलसङ्कोचशशिभिस्
तरूणां दिव्यानां हसत इव ते चण्डि चरणौ ।
फलानि स्वःस्थेभ्यः किशलयकराग्रेण ददतां
दरिद्रेभ्यो भद्रां श्रियमनिशमह्नाय ददतौ ॥ ८९ ॥

कदा काले मातः कथय कलितालक्तकरसं
पिवेयं विद्यार्थी तव चरणनिर्णेजनजलं ।
प्रकृत्या मूकानामपि च कविताकारणतया
यदाधत्ते वाणी मुखकमलताम्बूलरसतां ॥ ९० ॥

पदन्यासक्रीडापरिचयमिवालब्धुमनसश्
चरन्तस्ते खेलां भवनकलहंसा न जहति ।
सुविक्षेपे शिक्षां सुभगमणिमञ्जीररणित
च्छलादाचक्षाणं चरणकमलं चारुचरितं ॥ ९१ ॥

अराला केशेषु प्रकृतिसरलानन्दहसिते
शिरीषाभा गात्रे दृशदिव कठोरा कुचतटे ।
भृशं तन्वी मध्ये पृथुरसि वरारोहविषये
जगत्त्रातुं शम्भोर्जयति करुणा काचिदरुणा ॥ ९२ ॥

पुरारातेरन्तःपुरमसि ततस्त्वच्चरणयोः
सपर्या मर्यादातरुणकरुणा नाम सुलभा ।

तथाह्येते नीताः शतमखमुखाः सिद्धिमतुलां
तव द्वारोपान्तस्थितिभिरणिमाद्याभिरमराः ॥ ९३ ॥
गतास्ते पञ्चत्वं द्रुहिणहरिरुद्रेश्वरशिवाः
शिवस्वच्छच्छायाघटितकपटप्रच्छदपटः ।
त्वदीयानां भासां प्रतिफलनलाभारुणतया
शरीरी शृङ्गारो रसइव दृशां दोग्धि कुतुकं ॥ ९४ ॥
कलङ्कः कस्तूरीरजनिकरविम्बं जलमयं
कलाभिः कर्पूरैर्मरकतकरण्डं निविडितं ।
अतस्त्वद्भोगेन प्रतिदिनमिदं रिक्तकुहरं
विधिर्भूयो भूयो निविडयति नूनं तव कृते ॥ ९५ ॥
स्वदेहोद्भूताभि र्घृणिभिरणिमाद्याभिरभितो
निषेव्ये नित्ये त्वामहमिति सदा भावयति यः ।
किमाश्चर्यं तस्य त्रिनयनसमृद्धिं तृणयतो
महासम्वर्ताग्निर्विरचयति नीराजनविधिं ॥ ९६ ॥
समुद्भूतस्थूलस्तनभरमुरश्चारुहसितं
कटाक्षे कन्दर्पाः कतिचनकदम्बद्युतिवपुः ।
रहस्यं त्वद्भ्रान्तिं मनसि जनयन्तः समतुलां
भवत्यां ये भक्ताः परिणतिममीषामियमुमे ॥ ९७ ॥
कलत्रं वधात्रं कति कति भजन्ते न कवयः
श्रियो देव्याः को वा न भवति पतिः कैरपि धनैः ।
महादेवं हित्वा तव सति सतीनामचरमे
कुचाभ्यामासङ्गः कुरवकतरोरप्यसुलभः ॥ ९८ ॥

गिरामाहुर्देवीं द्रुहिणगृहिणीमागमविदो
हरेःपत्नीं पद्मां हरसहचरीमद्रितनयां ।
तुरीया कापि त्वं दुरधिगमनिःसीममहिमा
महामाये विश्वं भ्रमयसि परब्रह्ममहिषि ॥ ९९ ॥
सरस्वत्या लक्ष्म्या विधिहरिसपत्नोर्बिजयते
रतेः पातिव्रात्यं शिथिलयति रम्येण वपुषा ।
चिरञ्जीवन्नेव क्षपितपशुपाशव्यतिकरः
परब्रह्माभिख्यं रसयति रसं त्वद्भजनवान् ॥ १०० ॥
निधे नित्यस्मेरे निरवधिगणे नीतिनिपुने
निरायातज्ञाने नियमपरिचित्त्यैकनिलये ।
नियत्या निर्मुक्ते निखिलनिगमान्तस्तुतपदे
निरातङ्के नित्ये निशमय ममापि स्तुतिमिमां ॥ १०१ ॥
प्रदीपज्वालाभिर्दिवसकरनीराजनविधिः
सुधासूतेश्चन्द्रोपलजललवैरर्घ्यरचना ।
स्वकीयैरम्भोभिः सलिलनिधिसौहित्यकरणं
त्वदीयाभिर्वाग्भिस्तव जननि वाचां स्तुतिरियं ॥ १०२ ॥
मञ्जीरशोभिचरणं वलिशोभिमध्यं
हाराभिरामकुचमम्बुरुहायताक्षं ।
लीलालकं हिममहीधरकन्यकाख्यं
ज्ञानस्वरूपमिदमीश्वरदीपदीप्यं ॥ १०३ ॥

इति शङ्कराचार्यविरचितानन्दलहरी समाप्ता ।

## मोहमुद्गरः ।

मूढ जहीहि धनागमतृष्णां
कुरु तनुबुद्धिमनःसु वितृष्णां ।
यल्लभसे निजकर्मोपात्तं
वित्तं तेन विनोदय चित्तं ॥ १ ॥
अर्थमनर्थं भावय नित्यं
नास्ति ततः सुखलेशः सत्यं ।
पुत्रादपि धनभाजाम्भीतिः
सर्वत्रैषा कथिता नीतिः ॥ २ ॥
का तव कान्ता कस्ते पुत्रः
संसारोऽयमतीव विचित्रः ।
कस्य त्वं वा कुत आयातः
तत्त्वं चिन्तय तदिदं भ्रातः ॥ ३ ॥
मा कुरु धनजनयौवनगर्वं
हरति निमेषात्कालः सर्वं ।
मायामयमिदमखिलं हित्वा
ब्रह्मपदं प्रविशाशु विदित्वा ॥ ४ ॥
नलिनीदलगतजलमतितरलं
तद्वज्जीवनमतिशयचपलं ।

विद्धि व्याधिव्यालग्रस्तं
लोकं शोकहतञ्च समस्तं ॥ ५ ॥
तत्त्वं चिन्तय सततं चित्ते
परिहर चिन्तां नश्वरवित्ते ।
क्षणमिह सज्जनसङ्गतिरेका
भवति भवार्णवतरणे नौका ॥ ६ ॥
अष्टकुलाचलसप्तसमुद्रा
ब्रह्मपुरन्दरदिनकररुद्राः ।
न त्वं नाहं नायं लोकः
तदपि किमर्थं क्रियते शोकः ॥ ७ ॥
यावद्वित्तोपार्जनशक्तः
तावन्निजपरिवारे रक्तः ।
तदनु च जरया जर्जरदेहे
वार्तां कोपि न पृच्छति गेहे ॥ ८ ॥
कामं क्रोधं लोभं मोहं
त्यक्त्वात्मानम्पश्यति कोहं ।
आत्मज्ञानविहीना मूढाः
ते पच्यन्ते नरके निगूढाः ॥ ९ ॥
सुरमन्दिरतरुमूलनिवासः
शय्या भूतलमजिनं वासः ।
सर्वपरिग्रहभोगत्यागः
कस्य सुखं न करोति विरागः ॥ १० ॥

वालस्तावत् क्रीडासक्तः
तरुणस्तावत् तरुणीरक्तः ।
वृद्धस्तावच्चिन्तामग्नः
परमे ब्रह्मणि कोपि न लग्नः ॥ ११ ॥
शत्रौ मित्रे पुत्रे बन्धौ
मा कुरु यत्नं विग्रहसन्धौ ।
भव समचित्तः सर्वत्र त्वं
वांछस्यचिराद् यदि विष्णुत्वं ॥ १२ ॥
यावज्जननं तावन्मरणं
तावज्जननीजठरे शयनं ।
इति संसारे स्फुटतरदोषः
कथमिह मानव तव सन्तोषः ॥ १३ ॥
दिनयामिन्यौ सायं प्रातः
शिशिरवसन्तौ पुनरायातः ।
कालः क्रीडति गच्छत्यायुः
तदपि न मुञ्चत्याशावायुः ॥ १४ ॥
अङ्गं गलितं पलितं मुण्डं
दन्तविहीनं यातं तुण्डं ।
करधृतकम्पितशोभितदण्डं
तदपि न मुञ्चत्याशाभाण्डं ॥ १५ ॥
त्वयि मयि चान्यत्रैको विष्णुः
व्यर्थं कुप्यसि मय्यसहिष्णुः ।

सर्वं पश्यात्मन्यात्मानं
सर्वत्रोत्सृज भेदज्ञानं ॥ १६ ॥
षोडशपज्झटिकाभिरशेषः
शिष्याणां कथितोभ्युपदेशः ।
येषां नैष करोति विवेकं
तेषां कः कुरुतामतिरेकं ॥ १७ ॥

इति श्रीशङ्कराचार्यविरचितो
मोहमुद्गरः समाप्तः ॥

## विदग्धमुखमण्डनं ।

सिद्धौषधानि भवदुःखमहागदानां
पुण्यात्मनां परमकर्णरसायनानि ।
प्रक्षालनैकसलिलानि मनोमलानां
शौद्धोदनेः प्रवचनानि चिरं जयन्ति ॥ १ ॥
जयन्ति सन्तः सुकृतैकभाजनं
परार्थसंपादनसद्व्रतस्थिताः ।
करस्थनीरोपमविश्वदर्शिनो
जयन्ति वैदग्ध्यभुवः कवेर्गिरः ॥ २ ॥
आक्रान्तेव महोपलेन मुनिना शप्तेव दुर्वाससा
सातत्यं बत मुद्रितेव जतुना नीतेव मूर्छां विषैः।
बद्धेवातनुरज्जुभिः परगुणान्वक्तुं न शक्ता सती
जिह्वा लोहशलाकया खलमुखे विद्धेव संलक्ष्यते ॥ ३ ॥
इहानेके सत्यं सततमुपकारिण्युपकृतिं
कृतज्ञाः कुर्वन्तो जगति निवसन्त्येव सुधियः ।
कियन्तस्ते सन्तः सुकृतपरिपाकप्रणयिनो
विना स्वार्थं येषां भवति परकृत्यव्यसनिता ॥ ४ ॥
बध्वांजलिं सममसज्जनसज्जनौ तौ
वन्दे नितान्तकुटिलप्रगणस्वभावौ ।

एकं भिया निरभिसंधितवैरिभूतं
प्रीत्यापरं परमनिर्वृतिपात्रभूतं ॥ ५ ॥
किम्मे ऽथवा हतखलप्रणतावपि स्यात्
स स्वी करोति सुजनो यदि मां गुणज्ञः ।
चन्द्रेण चारुचरितेन विकासितं सत्
संकोचितं भवति किं कुमुदन्तमोभिः ॥ ६ ॥
प्रीत्यै सतान्तदनुभावगतावसादः
संत्यज्य गूढरचनां प्रतिभानुरूपं ।
क्षिप्रावबोधकरणक्षममोक्षितार्थं
वक्ष्ये विदग्धमुखमण्डनमप्रपञ्चम् ॥ ७ ॥
यद्यस्ति सभामध्ये स्थातुं वक्तुं मनस्तदा सुधियः ।
तांवूलमिव गृहीत्वा विदग्धमुखमण्डनं विशत ॥ ८ ॥
प्राहुर्व्यस्तं समस्तं च द्विर्व्यस्तं द्विःसमस्तकं ।
तथा व्यस्तसमस्तं च द्विर्व्यस्तं द्विःसमस्तकं ॥ ९ ॥
सद्विःसमस्तकव्यस्तमेकालापं प्रभिन्नकं ।
भेद्यभेदकमोजस्विसालङ्कारं सकौतुकं ॥ १० ॥
प्रश्नोत्तरसमं पृष्टप्रश्नं भग्नोत्तरं तथा ।
आदिमध्योत्तरे द्वे अन्तोत्तरमतः परं ॥ ११ ॥
कथितापह्नुतिश्चैवविषमं वृत्तनामकं ।
नामाख्यातं च तार्क्ष्यं च सौत्रं शब्दीयशास्त्रजे ॥ १२ ॥
वर्णवाक्योत्तरे तद्वत् श्लोकोत्तरमतः परं ।
खण्डपादोत्तरे चक्रं पद्मं काकपदं तथा ॥ १३ ॥

गोमूत्री सर्वतोभद्रं गतप्रत्यागतं बहु ।
वर्द्धमानाक्षरं तद्वद्धीयमानाक्षरं तथा ॥ १४ ॥
शृंखला नागपाशं च चित्रं संशुद्धमेव च ।
प्रहेलिका तथा हृद्यं कालसारादि वर्णितं ॥ १५ ॥
[illegible]ादेकं गूढं पदपादार्थगूढकं ।
स्तुतिनिन्दा तथा द्व्यर्थसहापह्नुति विन्दुमत् ॥ १६ ॥
क्रियाकारकसंवन्धगुप्तान्यामन्त्रितस्य च ।
गुप्तं तथा समासस्य लिङ्गस्य वचनस्य च ॥ १७ ॥
मात्राविंदुविसर्गाणां च्युतकान्यक्षरस्य च ।
स्थानव्यञ्जनयोश्चापि च्यूतदत्ताक्षरं तथा ॥ १८ ॥

इत्यौद्देशकं ।

पृष्टं पदविभागेन केवलेनैव यद्भवेत् ।
विदुर्व्यस्तं समस्तं यत्समुदायेन पृच्छ्यते ॥ १९ ॥
पूजायां किं पदं प्रोक्तमस्तनं को विभर्त्युरः ।
क आयुधतया ख्यातः प्रलंवासुरविद्विषः ॥२०॥ सुनासीरः ॥
को दुराढ्यस्य मोहाय का प्रिया मुरविद्विषः ।
पदं प्रश्नवितर्के किं को दन्तच्छदभूषणं ॥२१॥
रामानुरागः ॥ इति व्यस्तजातिः ॥
अपि सेविता द्विजिह्वैः कदापि के न यान्ति विकारं ।
वि[illegible]ानतनवः स्वगुणैरधिकं विराजन्ते ॥२२॥
मलयतरवः ॥
अनिभृतकोकिलनिःस्वनमुखरितसहकारकाननः पुंसां ।

को भवति हृदयहारी मधुकरझङ्कारकंकेलिः ॥२३॥
मधुसमयः॥ इति समस्तजातिः ।
व्यस्तं समस्तमथवा समासपदभङ्गतः ।
द्विःपृष्टं यत्तदेव स्याद् द्विर्व्यस्तं द्विःसमस्तकं ॥ २४ ॥
वर्षासु का भवति निर्मधु कीदृगब्जं
शेषं बिभर्ति वसुधासहितं क एकः ।
आमंत्रयस्व धरणीधरनाथपुत्रीं
कोऽत्रास्थि भस्मनि चितांगजनाश्रयः स्यात् ॥ २५ ॥
कालिकापालिकमठः ॥
कीदृशं वद मरुस्थलं मतं
हारि कुच सति भूषणं भवेत् ।
ब्रूहि कान्त सुभटः सकार्मुकः
कीदृशो भवति कुच विद्विषां ॥ २६ ॥
अवारितोरणे ॥ इति द्विर्व्यस्तजातिः ॥
पक्षिश्रेष्ठसखीवभ्रुसुरा वाच्याः कथं वद ।
ज्येष्ठे मासि गताः शोषं कीदृश्योऽल्पजला भुवः ॥२७॥
विवरालीनकुलीराः ॥
विश्वंभराप्रलंबघ्नब्रीहिमानुषसंयतः ।
कथं वाच्याः भवंत्येता दिनादौ विकसन्ति काः ॥२८॥
कुवलयवनराजयः ॥ इतिद्विःसमस्तजातिः ॥
पृष्टं पदविभागेन समुदायेन यद्भवेत् ।
विदुर्व्यस्तसमस्तं तदुभयार्थप्रदर्शनात् ॥ २९ ॥

का प्रियेण रहिता वराङ्गना
धाम्नि केन तनयेन नन्दिता ।
कीदृशेन पुरुषेण पक्षिणां
वन्धनं समभिलष्यते सदा ॥ ३० ॥ शकुन्तलाभरतेन ॥

कीदृशं हृदयहारि कूजितं
कः सखा यशसि भूपतेर्मतः ।
कस्तवास्ति विपिने भयाकुलः
कीदृशश्च न भवेन्निशाकरः ॥ ३१ ॥
कलङ्कविरहितः ॥ इति व्यस्तसमस्तजातिः ॥

द्विर्व्यस्तमेव यत् पृष्टं समुदायेन यद्भवेत् ।
त्रिधाभिन्नं तदेवोक्तं द्विर्व्यस्तकसमस्तकं ॥ ३२ ॥

कौ शङ्करस्य वलयावपयोधरः कः
कीदृक् परस्य नियतं वशमेति भूपः ।
संबोधयोरगपतिं विजयी च कीदृग्
दुर्योधनो नहि भवेद्वद कीदृशश्च ॥३३॥ अहीनाक्षतनयः ॥

को मोहाय दुरीश्वरस्य विहितः संबोधनीयो गुरुः
को धात्र्यां विरलः कलौ नवघनः किंवन्न कीदृग् द्विजः ।
किं लेखावचनं भवेदतिशयन्दुःखाय कीदृक् खलः
को विद्याधिपतिर्मनोभवसमो मूर्त्या भवन् कीदृशः ॥३४॥
राजीवसन्निभवदनः ॥ इति द्विर्व्यस्तसमस्तजातिः ॥

द्विःसमस्तं यदा पृष्टं व्यस्तकेन पुनर्भवेत् ।
तद् द्विःसमस्तकव्यस्तं कथितं प्रश्नपण्डितैः ॥ ३५ ॥

कीदृक्षः सकलजनो भवेत्सुरान्नः
कः कालो विदित इहांधकारहेतुः ।
कः प्रेयान् कुमुदवनस्य को निहन्ति
भ्रातृव्यं वद शिरसा जितस्त्वया कः ॥ ३६ ॥
विधुरविरहितः ॥
संग्रामे स्फुरदसिना हतास्त्वया के
के दुःखं वत निरये नरस्य कुर्युः ।
कस्मिन् उद्भवति कदापि नैव लोम
ख्याताः के जगति महालघुत्वभाजः ॥ ३७ ॥
नरकरेणवः ॥ इति द्विःसमस्तकव्यस्तजातिः ॥
एकश्रुत्या वचो यच भिन्नार्थप्रतिपादकं ।
प्रभेदं द्विःसमस्तस्य तमेकालापकं विदुः ॥ ३८ ॥
कीदृशी निरयभूरनेकधा सेव्यते परमपापकर्मभिः ।
प्रेतराक्षसपिशाचसेविता कीदृशीच पितृकानन
न कपालराचिता ॥ [स्थली ॥ ३९ ॥
केसरद्रुमतलेषु संस्थितः
कीदृशो भवति मत्तकुञ्जरः ।
तत्वतः शिवमपेक्ष्य लक्षणैर्
अर्जुनः समिति कीदृशो भवेत् ॥ ४० ॥
दानवकुलभ्रमरहितः ॥ इत्येकालापकजातिः ॥
शब्दार्थलिङ्गवचनैर्व्यस्तैर्यद्वा समस्तकैः ।
विभक्त्या च प्रभिन्नं यत् तत् प्रभिन्नकमुच्यते ॥ ४१ ॥

निर्जितसकलारातिः पृच्छति
को नैको मृत्योर्भयमृच्छति।
मेघात्ययकृतरुचिराशायाः
किं तिमिरक्षयकारि निशायाः ॥ ४२ ॥ विधुतारातेजः ॥
विहगपतिः कं हतवानहितं
कीदृग् भवति पुरं जनसहितं।
किं कठिनं विदितं वद धीमृद्यादः
पतिरपि कीदृग् भयकृत् ॥ ४३ ॥
अहिमकरमः ॥ इति शब्दार्थलिङ्गप्रभिन्नकं ॥
अनुकूलविधायिदैवतो
विजयी स्यान्न तु कीदृशो नृपः।
विरहिण्यपि जानकी वने
निवसन्ती मुदमादधौ कुतः ॥ ४४ ॥ कुशलवर्द्धितः ॥
कुसुमं पतदेत्य नाकतो वद कस्मै स्पृहयन्ति भोगिनः।
अधिगम्य रतं वराङ्गना क्व नु यत्नं कुरुते सुशिक्षिता ॥४५॥
सुरतरवे ॥ इति शब्दार्थभिन्नं ॥
कामुज्जहार हरिरंवुधिमध्यमग्नां
कीदृक् श्रुतं भवति निर्मलमागमानां।
आमन्त्रयस्व वनमग्निशिखावलीढं
तत्रापि को दहति के मदयन्ति भृङ्गान् ॥ ४६ ॥
कुन्दमकरन्दविन्दवः ॥
वसति कुत्र सरोरुहसन्ततिर्

दिनकृतो ननु के तिमिरच्छिदः ।
पवनभक्षसपत्नरणोत्सुकं
पुरुषमाह्वय को जगति प्रियः ॥ ४७ ॥
केकिरणोत्कराः ॥ इति शब्दार्थवचनभिन्नं ॥

कीदृग् गृहं याम्यगृहङ्गतस्य
कास्त्राणमंभस्तरणे जनानां ।
भूषा कथं कंठ न ते नु पृष्टे
मुक्ताकलापैरिति चोत्तरं किं ॥ ४८ ॥ हाराविनावः ॥

कवयो वद कुच कीदृशाः कठिनं किं विदितं समन्ततः ।
अधुना तव वैरियोषितां हृदि तापः प्रबलो
[विहाय काः ॥ ४९ ॥
गिरिसारमुषाः ॥ इति शब्दार्थलिङ्गवचनविभक्तिभिन्नं ॥

मेघात्यये भवति किं सुभगावगाहं
का वा विडंबयति चारणमल्लवेश्याः ।
दुर्वारवीर्यविभवस्य रणे भवेत् कः
काः स्मेरवक्त्रसुभगास्तरणि प्रभाभिः ॥५०॥ सरोजराजयः ॥

पृच्छति शिरोरुहो मधुमथनं
मधुमथनस्तं शिरोरुहञ्च ।
कः खलु चपलतया भुवि विदितः
का ननु यानतया गवि विदिताः ॥ ५१ ॥
केशवनौकाः ॥ इति शब्दार्थलिङ्गवचनभिन्नं ॥

न भवति मलयस्य कीदृशी भूः

कइह कुचं न विभर्ति कं गता श्रीः ।
भवदरिनिवहेषु कास्ति नित्यं
वलमथनेन विपद् व्यधायि केषां ॥ ५२ ॥ विपन्नगानां ॥
समयमिह वदन्ति कं निशीथं
शमयति कान् वद वारिवाहवृन्दं ।
वितरति जगतां मनःसु कीदृङ्
मुदमतिमाचमयं महातडागः ॥ ५३ ॥ अरविन्दवान् ॥
इति शब्दार्थविभक्तिवचनभिन्नं ॥
कीदृक्षं समिति वलं निहन्ति शत्रुं
विष्णोः का मनसि मुदं सदा तनोति ।
तुच्छं सच्छरधिमुखं निगद्यते किं
पञ्चत्वैःसममपमानएव केषु ॥ ५४ ॥ अभिमानिषु ॥
घनसमये शिखिषु स्यान्नृत्यं
कीदृक्षु किं घनात् पतति ।
प्रावृषि कस्य न गमनं
मानसगमनाय कीदृशा हंसाः ॥ ५५ ॥ समुत्सुकमनसः
इति शब्दार्थलिङ्गवचनभिन्नं ॥ इति प्रभिन्नकजातिः ॥
अर्थमात्रैकभेदेन भिन्नं वध्नंति केचन ।
सुकुमारधियस्तच्च विदग्धै र्नादृतं यथा ॥ ५६ ॥
आनन्दयति कोत्यर्थं सज्जनं नेव भूतले ।
प्रबोधयति पद्मानि तमांसि च निहन्ति कः ॥ ५७ ॥
मित्रोदयः ॥

अटवी कीदृशी प्रायो दुर्गमा भवति प्रिये ।
प्रियस्य कीदृशी कान्ता तनोति सुरतोत्सवं ॥ ५८ ॥
मदनवती ॥
भिन्नाववश्यं कर्तव्यौ शब्दार्थौ ऽनकोविदैः ॥
लिङ्गादिषु यथा शक्ति भेदमाहुर्विपश्चितः ॥ ५९ ॥

इति श्रीधर्मदासविरचिते विदग्धमुखमण्डने
प्रथमः परिच्छेदः ॥

विशेषणं विशेष्यञ्च यत्र प्रश्ने विधीयते ।
भेद्यभेदकमाहुस्तं प्रश्नं प्रश्नविदो यथा ॥ १ ॥
कीदृक् किं स्यान्न मत्स्यानां हितं स्वेच्छाविहारिणां ।
गुणैःपरेषामत्यर्थं मोदते कीदृशः पुमान् ॥२॥ विमत्सरः ॥
अगस्त्येन पयोराशेः कियत् किं पीतमुज्झितं ।
त्वया वैरिकुलं वीर समरे कीदृशं कृतं ॥ ३ ॥
सकलङ्कं ॥ इति भेद्यभेदकजातिः ॥
दीर्घवृत्तेन यत् पृष्टमुत्तरं कियदक्षरं ।
तदोजस्वीति विख्यातमूर्जितं चेति केचन ॥ ४ ॥
कामिन्यास्तनभारमंथरगतेर्लीलाचलच्चक्षुषः
कन्दर्पैकविलासानिवसतेः कीदृक् पुमान्वल्लभः ।
हेलाकृष्टकृपाणपाटितगजानीकात्कुतस्तेऽरयः
श्वासायासविशुष्ककंठकुहरा निर्यान्ति जीवार्थिनः ॥ ५ ॥
समरतः ॥

दैत्यारातिरसौ वराहवपुषा कामुज्जहारांबुधेः
का रूपं विनिहन्ति को मधुवधूवैधव्यदीक्षागुरुः ।
स्वछन्दं नवशल्लकीकवलनैः पंपासरोमज्जनैः
के विंध्याद्रिवने वसन्त्यभिमतक्रीडाभिरामस्थिताः ॥ ६ ॥

कुञ्जराः ॥ इत्योजस्वि[illegible]ः ॥

उपमादिरलङ्कारो वहुधा परिकीर्तितः ।
यत्नेन कथ्यते साङ्गं सालङ्कारं तदुच्यते ॥ ७ ॥

कल्याणवाक् त्वमिव किं पदमच कान्तं
सद्भूपतेस्त्वमिव कः परितोषकारी ।
कः सर्वदा वृषगतिस्त्वमिवातिमाचं
भूत्याश्रितः कथय पालितसर्वभूत : ॥ ८ ॥ शंकरः ॥

सूर्यस्य का तिमिरकुंजरवृन्दसिंही
सत्यस्य का सुकृतवारिधिचन्द्रलेखा ।
पार्थस्य कीदृगरिदावहुताशनोभूत्
का मालतीकुसुमदाम हरस्य मूर्द्ध्नि ॥ ९ ॥

भागीरथी ॥ रूपकं सालङ्क[illegible]ः ॥

लघुवृत्तेन यत् पृष्टं प्रभूताक्षरमुत्तरं ।
सकौतुकमितीच्छन्ति तद्विदस्तदिदं यथा ॥ १० ॥

के स्थिराः के प्रियास्त्रीणां को ऽप्रियो नक्तमाह्वय ।
नृत्यभूः कीदृशी रम्या नदी कीदृग्घनागमे ॥११॥

अगा[illegible] ॥

का कृता विष्णुना कीदृग्योषितां कः प्रशस्यते ।

असेव्यः कीदृशः स्वामी को निहन्ति निशातमः ॥ १२ ॥
कुमुदवनवांधवोदयः ॥ इति सकौतुकजातिः ॥
प्रश्नवर्णश्रुतेस्तुल्यं यत्र स्यादुत्तरं वरं ।
प्रश्नोत्तरसमन्तज्ज्ञास्तदाहुः श्रूयतां यथा ॥ १३ ॥
कन्दर्पं मदजनकं प्राहुः काचघटी गदिताच्छतमेह ।
इत्यादि प्रश्ने युक्तं यद्भूत तदुत्तरमाशु विचिन्त्य ॥ १४ ॥
पथिकस्तिष्ठति कष्टं विरही नाविक आस्ते तत्कृतरक्षः ।
इत्यादि प्रश्ने युक्तं यद्ब्रूहि तदुत्तरमुत्तमपुरुष ॥ १५ ॥
इति प्रश्नोत्तरसमजातिः ॥
यस्मिन्नुत्तरमुच्चार्य प्रश्नस्तस्यैव पृच्छ्यते ।
पृष्टप्रश्नं तदिच्छन्ति प्रश्नोत्तरविदो यथा ॥ १६ ॥
लक्ष्मणेत्युत्तरं यत्र प्रश्नः स्यात्तत्र कीदृशः ।
ग्रीष्मे द्विरदवृंदाय वनाली कीदृशी हिता ॥ १७ ॥
कासारसहिता ॥
चादय इति यत्र स्यादुत्तरमथ तत्र कीदृशः प्रश्नः ।
कथय त्वरितं के स्युर्नौकाया वाहनोपायाः ॥ १८ ॥
केनिपाताः ॥ इति पृष्टप्रश्नजातिः ॥
कथयामुकमित्यादि भंक्त्वा यत्रोत्तरं भवेत् ।
भग्नोत्तरं तदिच्छन्ति काकुमात्रेण गोपितं ॥ १९ ॥
भवत इवाति स्वच्छं कस्याभ्यन्तरमगाधमतिशिशिरं ।
काव्यामृतरसमग्नस्त्वमिव सदा कः कथय सरसः ॥ २० ॥
वीरे सरुषि रिपूणां नियतं का हृदयशालिनी भवति ।

न भसि प्रा[illegible]दे का राजति देव वद तारा ॥ २१ ॥

इति भग्नोत्तरजातिः ॥

यत्पृष्टं प्रश्नवाक्ये स्यादादिमध्यान्तसंस्थितं ।

उत्तरं तत् त्रिधा प्रोक्तमादिमध्यान्तसञ्ज्ञितं ॥ २२ ॥

[illegible]तः कीदृक्षो भवतितरां

विकसितः पद्मः ।

[illegible]तिषि कः कीदृक्षः प्रायो

भुवि पूज्यते लोकैः ॥ २३ ॥

प्रभवः को गङ्गाया नगपतिरतिसुभगशृङ्गधरः ।

के सेव्यन्ते सेवकसार्थैरत्यर्थमर्थरतैः॥२४॥आद्युत्तरजातिः॥

अयमुदितो हि[illegible]नितावदनस्य कीदृशः सदृशः ।

नीलादिकोपलम्भः स्फुरति प्रत्यक्षतः कस्य ॥ २५ ॥

गैरिकमनःशिलादिः

प्रायेणोत्पद्यते कुतो नगतः ।

यः खलु न चलति पुरुषः

स्थानाद्युक्तः स कीदृक्षः ॥ २६ ॥ इति मध्योत्तरजातिः ॥

कस्मिन्वसन्ति वद मीनगणा विकल्पं

किं वा पदं वदति किं कुरुते विवस्वान् ।

विद्युल्लतावलयवान् पथिका[illegible]नानाम्

उद्वेजको भवति कः खलु वारिवाहः ॥ २७ ॥

शब्दः प्रभूगत इति प्रचुराभिधायी

कीदृग् भवेद्वदत शब्दविदो विचिन्त्य ।

कीदृग् बृहस्पतिमते विदिताभियोगः
प्रायः पुमान् भवति नास्तिकवर्गमध्यः ॥ २८ ॥
इत्यन्तोत्तरजातिः ॥

पदान्तरादिसंवन्धात्प्रश्नवाक्येपि संस्थितं ।
कथितापह्नुतिः सा स्याल्लक्ष्यते यत्र नोत्तरं ॥ २९ ॥
पृथ्वीसम्बोधनं कीदृक् कविना परिकीर्तितं ।
केनेदं मोहितं विश्वं प्रायः केनाप्यते यशः ॥ ३० ॥
कस्य मरौ दुरधिगमः
कमले कः कथय विरचितावासः ।
कैस्तुष्यति चामुण्डा
रिपवस्ते कुतो भ्रष्टाः ॥ ३१ ॥ इति कथितापह्नुतिजातिः ॥

यत्र भंगस्य वैषम्यं विषमन्तन्निगद्यते ।
वृत्तं नामोत्तरं यत्र प्रश्नं तद्वृत्तनामकं ॥ ३२ ॥
कीदृग्वनं स्यान्न भयाय पृष्टे
यदुत्तरं तस्य च कीदृशस्य ।
वाच्यं भवेदीक्षणजातमंवु
कं चाधिशेते गवि कोर्चनीयः ॥ ३३ ॥ अहिंस्रमहिमः ॥
प्रायः कार्ये न मुह्यन्ति नराः सर्वत्र कीदृशाः ।
नाधाइति भवेच्छब्दो नौवाची वद कीदृशः ॥ ३४ ॥
सावधानाः ॥ इति विषमजातिः ॥

गतक्लेशायासा विमलमनसः कुत्र मुनयस्
तपस्यन्ति स्वस्थाः सुररिपुरिपोः का च दयिता ।

कविप्रेयः किं स्यान्नवलघुयुतैरष्टगुरुभिर्
वुधावृत्तं वर्णैः स्फुटघटितवन्धं कथयत ॥३५॥ शिखरिणी ॥
उरसि मुरभिदः का गाढमालिङ्गितास्ते
सरसिजमकरंदामोदिता नन्दने का ।
गिरिसमलघुवर्णैरर्णवाख्यातिसंख्यैर्
गुरुभिरपि कृता का छन्दसां वृ[illegible]ा ॥ ३६ ॥
मालिनी ॥ इति वृत्तनामजातिः ॥
एकमेवोत्तरं यत्र सुश्लिष्टत्वाद्द्विधा भवेत् ।
सुप्तिङंतप्रभेदेन नामाख्यातन्तदुच्यते ॥ ३७ ॥
समरशिरसि सैन्यं कीदृशं दुर्निवारं
विगतघननिशीथे कीदृशे व्योम्नि शोभा ।
कमपि विधिवशेन प्राप्य योग्याभिमानं
जगदखिलमनिंद्यन्दुर्जनः किं करोति ॥ ३८ ॥
पदमनन्तरवाचि किमिष्यते [अभिभवति ॥
कपिपतिर्विजयी ननु कीदृशः ।
परगुणं गदितुङ्कृतमत्सराः
कुरुत किं सततं भुवि सज्जनाः ॥३९॥ अनुसरामः ॥लट्॥
वदति राममनुष्य जघन्यजो
वसति कुत्र सदालसमानसः ।
अपि च शक्रसुतेन तिरस्कृतो
रविसुतः किं[illegible]सौ विदधे त्वया ॥ ४० ॥ अनुजगृहे ॥
भिवति गमनयोग्या कीदृशी भूरथानां

कमतिमधुरमम्लम्भोजनान्ते प्रदेयं ।
प्रियतम वद नीचामन्त्रणे किं पदं स्यात्
कुमतिकृतविवादाश्वक्रिरे किं सदर्थैः ॥४१॥ समादधिर ॥
वदतानुत्तमवचनं ध्वनिरुच्चैरुच्यते स कीदृक्षः । [ लिट् ॥
तव सुहृदो गुणनिवहैरिपुनिवहं किं नु कर्तारः ॥ ४२ ॥
अवमन्तारः ॥
कीदृक्तोयं दुस्तरं स्यात्तितीर्षोः
का पूज्यास्मिन् खड्ग मामन्त्रयस्व ।
दृष्ट्वा धूमं दूरतो मानविज्ञाः
किं कर्तास्मि प्रातरेवाश्रयाशं ॥ ४३ ॥
अनुमातासे ॥ लुट्लकारः ॥
कामुकाःस्युः कया नीचाः सर्वः कस्मिन् प्रमोदते ।
अर्थिनः प्राप्य पुण्याहं करिष्यध्वे वसूनि किं ॥ ४४ ॥
दास्यामहे ॥
को दुःखी सर्वकार्येषु किं भृशार्थस्य वाचकं ।
यो यच [illegible] नित्यन्ततः किं स करिष्यति ॥ ४५ ॥
प्रयास्यति ॥ लृट् ॥
विद्यन्त इति समानार्थः शब्दः
को ऽचिरयति मुद्रां किं ।
कथमपि यदि कोपः स्यात्तं सुजनः
किं करोतु वद ॥ ४६ ॥ सन्त्यजतु ॥
मेघात्यये भवति का सभगावगाह्या

वृत्तं वसन्ततिलकं कियदक्षराणां ।
भो भोः कदर्यपुरुषा विषुवद्दिने च
वित्तञ्च नः सुवहु तत् क्रियतां किमेतत् ॥४७॥ नदीयतां
का माद्यति मकरंदैस् [लोट् ॥
तनयं कमसूत जनकराजसुता ।
कथय कृषीवल सस्यं पक्वं
किमचीकरस्त्वमपि ॥ ४८ ॥ अलीलवं ॥
पृच्छति पुरुषः केऽस्यां
समभूवन्वज्रकृत्तपक्षतयः ।
वहुभयदेशं जिगमिषुरे
काकी वार्यते च कथं ॥ ४९ ॥ मानवनगाः ॥ लुङ् ॥
किमकरवमहं हरिर्महीध्रं
स्वभुजवलेन गवां हितं विधित्सुः ।
प्रियतम वदने न पीयते कः
परिणतविम्बफलोपमः प्रियायाः ॥ ५० ॥ अधरः ॥
परिहरति भयात्तवाहितः किं
कमथ कदापि न विन्दतीह भीतः ।
कथय किमकरोरिमां धरित्रीं
नृपति गुणैर्नृपते स्वयं त्वमेकः ॥५१॥ समरंजयं ॥ लङ् ॥
कीदृक् सेना भवति रणे दुर्वारा
वीरः कस्मै स्पृहयति लक्ष्मीमिच्छन् ।
का सम्बुद्धिर्भवति भवः संग्रामे

किं कुर्वीध्वं सुभटजना भ्रातृव्यान् ॥ ५२ ॥ पराजयेमहि ॥
कंसारातेर्वद गमनं केन स्यात्
कस्मिन् हृष्टिं लभते स्वल्पेच्छुः ।
कं सर्वेषां शुभमूचुर्वीराः
किं कुर्यास्त्वं सुजन सशोकल्लोकं ॥ ५३ ॥ विनोदयेयं ॥ लिङ ॥
वारणेन्द्रो भवेत्कीदृक् प्रीतये भृङ्गसंहतेः ।
यद्ययक्ष्यं तदास्मै किमकरिष्यमहं धनं ॥ ५४ ॥ समदास्यः ॥
काले देशे यथा युक्तं नरः कुर्वनुपैति कां ।
भुक्तवन्तावलप्स्येतां किमन्नमकरिष्यतां ॥ ५५ ॥
अहास्यतां ॥ लृङ् ॥ इति नामाख्यातजातिः ॥
ज्ञेयन्तार्क्ष्यदृशा तार्क्ष्यं सौत्रं सूत्रोत्तरैस्तथा ।
शाब्दीयं शब्दसंज्ञाभिः शास्त्रजं शास्त्रभाषया ॥ ५६ ॥
हिमानीस्थगिरौ स्यातां कीदृशौ शशिभास्करौ ।
कः पूज्यः कः प्रमाणेभ्यो न प्रभाकरसंमतः ॥ ५७ ॥
अभावः ॥
के प्रवीणाः कुतो हीनं जीर्णं वासोंशुमांश्च कः ।
निराकरिष्णवो वाह्यं योगाचाराश्च कीदृशाः ॥ ५८ ॥
विज्ञानवादिनः ॥ तार्क्ष्यजातिः ॥
यो नयति जगदशेषं क्षयमथ विभरांवभूव कं विष्णुः ।
नीचः कुचसगर्वःपाणीनिसूचंच कीदृक्षं ॥ ५९ ॥ यमोगंधने ॥
किं स्याद्विशेष्यनिष्ठं का संख्या वदत पूरणी भवति ।
नीचः केन सवर्गः सूचं चन्द्रस्य कीदृक्षं ॥ ६० ॥

विशेषणमेकार्थेन ॥ इति सौत्रजातिः ॥

न श्लाघते खलः कस्मै सुप्तिङन्तं किमुच्यते ।
लादेशानां नवानांच तिङां किं नाम कथ्यतां ॥ ६१ ॥
परस्मैपदं ॥

किमव्ययतया ख्यातं कस्य लोपो विधीयते ।
ब्रूत शब्दविदो ज्ञात्वा समाहारः कथ्यते ॥ ६२ ॥
स्वरितः ॥ शाब्दीयजातिः ॥

जलदात्यये भवति कः
समदः सुभगंच किं कमधरन्मुरभित् ।
कटुतैलमिश्रितो गुडो नियतं
विनिहन्ति कं चिगुणसप्तदिनैः ॥ ६३ ॥ श्वासरोगं ॥

कीदृक् प्रातर्दीपवर्तेः शिखा स्याद्
उष्ट्रः पृच्छत्याभजन्ते मृगाः किं ।
देवामात्ये किं गते प्रायशोसौ
लोकः कुर्यान्नो विवाहं विविक्तः ॥ ६४ ॥ विभाकरभवनं ॥

वर्णएवोत्तरं यच तद्वर्णोत्तरमुच्यते ।
वाक्यं यचोत्तरं तत्तु वाक्योत्तरमिति स्मृतं ॥ ६५ ॥

कौ शचू भुवि विख्यातौ शोकं वदति किं पदं ।
कोभीष्टोच दरिद्रस्य सेव्यन्ते केच भिक्षुभिः ॥ ६६ ॥ वीहासः ॥

किं मुञ्चन्ति पयोवाहाः कीदृशी हरिवल्लभा ।
पूजायां किं पदं कोग्निः कः कृष्णेन हतो रिपुः ॥ ६७ ॥
कंसासरः ॥ वर्णोत्तरजातिः ॥

दधौ हरिः कं शुचि कीदृगब्भ्रं
पृच्छत्यकः किं कुरुते सशोकः ।
श्लोकं विधायापि किमित्युदारः
कविर्न तोषं समुपैति भूयः ॥९८॥ अगमकमकरोदिति ॥
लक्ष्मीधरः पृच्छति कीदृशः स्यात्
नृपः सपत्नैरपि दुर्निवारः ।
अकारि किं ब्रूहि नरेण सम्यक्
पितृत्वमारोपयितुं स्वकीयं ॥ ९९ ॥
समजनितनयः ॥ इति वाक्योत्तरजातिः ॥

इति श्रीधर्मदासविरचिते विदग्धमुखमण्डने
द्वितीयः परिच्छेदः ॥

श्लोक एवोत्तरं यच्च तत् श्लोकोत्तरमुच्यते ।
खण्डोत्तरं भवेदर्धं श्लोकात् पादात्तदुत्तरं ॥ १ ॥
कन्देवञ्चर्चयन्ति स्फुटरुचि निशि किं कीदृशी दुःखिनी स्त्री
कीदृक् चक्रं सदास्ते क्व च तव विजयी प्रावृषं कीदृ[illegible] खं ।
कामाहुः प्रेतयोग्यां कथय स[illegible]ः कीदृशाःस्युः पुमांसः
कं धत्ते कश्च धत्ते गगनतलमलं प्रेक्षणीयं जनानां ॥२॥
ऋक्षः कीदृक् चकास्ति स्फुटनवकुसुमाशोकमासाद्य कालं
किं मुञ्चन्त्यम्बुवाहा भवदरिनिवहे संज्वरः किं भवश्च ।
किं नेत्रप्रावृतिःस्यादतिशयलघवः के च को व्रीहिभेदः

प्रायेण प्राष्टषेण्याः प्रियतमदिवसाः कीदृशाः कीदृशाश्च
अञ्जनाभमहावारिवाहौघनिचितांवराः । [॥ ३ ॥
कदम्वकन्दलीकन्दरजःपक्ष्मलवायवः ॥ ४ ॥
कुर्यादुद्वेगवन्तं कमपि निशि सरः कोदृशं कास्ति वक्रो
वक्ता निंद्यः कया स्यात् परिषदि नियतं मन्दसम्बोधनं किं।
वर्णोपांत्यङ्कमूचुः किमसुररिपुणा नन्दगोपालयेऽस्तं
कः प्रालेयाद्रिपुत्रीकुचकलशलु[illegible]मौलिः ॥ ५ ॥
कीदृक् कस्येह वन्धुः सुकृतमपहरत् प्रेयसी कालयान्ते
कीदृग् भीतिं विधत्ते धनुरवनिरुहां कश्चिदामन्त्रयस्व ।
दैत्यः कंसद्विषा कः कथय विनिहतो गद्गदः कः प्रतीतः
कीदृक्कीदृग्वसन्तः प्रियतम भवतः प्रीतये नित्यमस्तु ॥ ६ ॥
कोकिलालापवाचालसहकारमनोहरः ।
अशोक[illegible]लीनमत्तालिमधुरस्वनः ॥ ७ ॥
इति श्लोकोत्तरजातिः ॥
का चक्रे हरिणा धने कृपणधीः कीदृग् भुजङ्गेऽस्ति किं
कीदृक् कुंभसमुद्भवस्य जठरं कीदृग्प्रियासुर्वधूः ।
श्लोकः कीदृगभीप्सितः सुकृतिनां कीदृङ्नभो [illegible]
क्षौणीमाह्वय सर्वगं किमुदितं रात्रौ सरः कीदृशं ॥ ८ ॥
कुमुदवनपरागरंजितांभो विहितगमागमकोकमुग्धरेखं
वंधः पृच्छति किं मुरारे[illegible] का हन्ति रूपं नृणां ।
कीदृग्वीर[illegible] कोतिगहनः सम्बोधयावश्चितं
का धात्री जगतो बृहस्पतिवधूः कीदृक् कविः कादृतः

कोर्थः किं भवता हृतं रिपुकुलं कीदृक् सरो वासरे ॥९॥
विकचवारिजराजिसमुद्भवोच्चालितभूरिपरागपरिराजितं ॥
इति खण्डान्तरजातिः ॥
विभर्त्ति वदनेन किं कइह सल्लभाक्
कुलं भवति कीदृशं गलितयौवनं योषितां ।
बभार हरिरंबुधेरुपरि कांच केन स्तुतो हतः
कथय कस्त्वया नगपते भयं कीदृशात् ॥१०॥
विषमपादान्तजगताश्रितः ॥
हरिर्वहति कान्तवास्थ्यरिष कागताकञ्च
काकमर्चयति रोगव न् धनवती पुरी कीदृशी ।
हरिः कमधरद्दलिप्रभृतयो धरां किं व्यधुः
कया सदसि कस्त्वया वद जितोम्बुधिः कीदृशः ॥११॥
कुम्भीरमीनमकरागमदुर्गवारिः ॥ इति पादान्त जातिः ॥
चत्वार्यराणि पादाभ्यां नेमिं पादद्वयेन च ।
लिखित्वा दक्षिणावर्तं चक्रं प्रश्नमवेहि मे ॥१२॥
कश्चौरस्य छिनत्ति क्षितिपतिरनघः किं पदं वक्ति कुत्सां
क्षौणीसम्बोधनं किं वदति कमलभूः काच विश्वं विभर्ति ।
चक्रांगामन्त्रणं किं कथमपि सुजनः किं न कुर्यादनार्थं
कीदृग्भोक्तुः पुरं प्रात्पयसिवदकुतोमीनपंक्तिर्विभेति॥१३॥
किं स्वच्छं शारदं स्याद्वदति वृषगतिः कोंशुमाली पवित्रः
कोस्मिन् किं जीवनं कां विरचयति कविर्वद्वि सम्बोधनं किं।
नाकां घ्नन्ति स्त्रियः कं तनरसररिपोः कीदृशी कश्च मकः


सम्यक् प्रीतिन्तडागः प्रियतम तनुते कीदृशः कीदृशस्ते ॥
करंकुकोककुररकलसंसकरांवतः । [१४॥
सरोजकोमलोङ्गारनीरसंसक्तमारुतः ॥ १५ ॥ चक्रजातिः



वर्णद्वयद्वयैकैकदलभूतदलाष्टकं ।
सर्वोत्तराद्यवर्णेन पद्मं स्यात् कृतकर्णिकं ॥ १६ ॥
पुण्यात्मा वद कीदृशः सरसिजैः के मोदिताः कीदृशस्
तद्वैरीगतचक्षुषः कुलमभूत्कीदृक् त्वया के जिताः।
वद्धालिः सलिलाशयः कथय भोः कीदृक् च आक्षेपवाक्
शब्दः कुत्र न तस्करादिकभयं दत्ते भवेत्प्रायशः ॥ १७ ॥
अप्यित्तं गवि कीदृशं निगदितो मुक्तः पुमान् कीदृशः
कस्माद्विभ्यति कौशिका भुवि कृतः कीदृक् त्वया तस्करः ।
हस्ती स्यान्ननु कीदृशो वहुमतः शोच्यो रणः कीदृशः
कीदृक्षः पुरुषः पराप्रतिहतः कीदृग् भवेद्वासुकिः ॥ १८ ॥
अलयः अपश्यत् अवन्धः अहस्तः अगजः अ नः ॥
इति पद्मजातिः ॥




काकस्येव पदं व्यस्तं यत्तत्काकपदं मतं ।
तिर्यग्द्वयोन्यरेखाभिर्गोमूत्री द्विपदीद्वये ॥ १९ ॥
कुतः कः स्यात्कीदृक् कथय विषवैद्य स्फुटमिदं
रिपोः कः कीदृक्षो भवति वशगः कश्च करभः ।
प्रवीणः संवोध्यः सुभग वद कौ रत्नवचनौ
सुरूपे विख्यातिं जगति महती का गतवती ॥ २० ॥
नागदरतः ॥ नागतनयः ॥ नागरमणी ॥ इति काकपद
[जातिः




कामाहुर्युवतीममङ्गलवती कीदृग्ग्रहाणां गतिः
सम्बोध्या वत मत्स्यवेधनधरः कीदृग् भवेत्पामरः ।
कीदृग्वालिम..... कोस्तनमरोधक्ते सरैरुच्यते

गीः कीदृङ्ककदापि कंवुरहितं वांछन्ति कं योषितः ॥ २१ ॥
कीदृक् पान्थ कुलन्तमोहरति का [illegible]धनं
रम्या चम्पकशाखिनां कथय का कस्वाटज[illegible] भवेत् ।
किं क्षिप्तं वलिवैरिणा गु[illegible]णेः कात्वा श्मशानेस्ति का
क्ष्मा कीदृग् भवति स्म पूर्वमधुना कीदृक् पुनर्वर्तते
अजरामशुभाचारवलिशीलविनोदिता । [॥२२॥
भुजङ्गमनिभासारकलिकालजनोचिता ॥ गोमूत्रजातिः
[॥ २३ ॥


अ ज रा म शु भा चा र व लि शी ल वि नो दि ता



भु जं ग म नि भा सा र क लि का ल ज नो चि ता

वर्णैनैकेन वा द्वाभ्यां सर्वैर्वा सर्वदिग्गतैः ।
उत्तरैः सर्वतो भद्रं दुष्करं तदिदं यथा ॥ २४ ॥
कस्त्यागे धातुरुक्तस्तव रिपुहृदि का भूषणं के स्तनानां
को दुःखी कश्च शब्दो वदति वद शुचक्कौ रिपू स्य तवीर्यै ।
शृङ्गारी कीदृशः कां रणशिरसिभयाद्गङ्गमाप्नोति सेना
कोदानार्थाभिधायीशिरसिशिरसिकौयुध्यतःसंप्रहृत्य२५॥
कीदृक्कोयार्थिनी स्त्री भवति मदकरः प्रायशः कोदुराढ्ये
कस्मिन्मन्दायतेऽसौ नियतमुडुपतिः प्रेयसी का मुरारेः ।
विख्यातौ वाहनौ कौ द्रुहिणमुरभिदोः कीदृगाखेटकस्त्री
कीदृङ्केवाचिराभा समिति गतभयाः के गतौ कश्चधातुः२६॥

हारावी ॥ इति सर्वतोभद्रप्रकारः ॥




प्रतिलोमानुलोमाभ्यामुत्तरेण गतागगतं ।
मध्यवर्णविलोपेन तच्चानेकप्रकारकं ॥ २७ ॥
वद वल्लभ सर्वच साधुर्भवति कीदृशः गोविन्दे
नानसिक्षिप्ते नंदवेश्मनि काभवत् ॥ २८ ॥ दीनरक्षी ॥
यत्नादन्विष्य का ग्राह्या लेखकैर्मासमञ्जिका ।
घनान्धका ।नः शंकं मोदतेकेन वन्धकी॥२९॥नारिकेरजा
असुरसुरनरेंद्ररुह्यते का शिरोभिस्
[illegible] शुचिवस्त्रे कीर्तिविस्तारमेति ।
वदति कमलयोनिः सेव्यते केन पुष्पं
मधुरमसृणसद्वी का भवे[illegible]त्पलस्य ॥ ३० ॥

| | | |
|---|---|---|
| | ना | |
| मा | लि | का |
| | का | |

हिमांशुखण्डं व[illegible]टलोज्ज्वलप्रभं
भवेद्वराहप्रवरस्य कीदृशं ।
[illegible] वर्णां पदमध्यसंस्थितं
न किं करोत्येव जिनः करोति किं ॥ ३१ ॥ दंष्ट्राभं ॥

वसन्तमासाद्य वनेषु कीदृशाः
पिकेन राजन्ति रसालभूरुहाः ।
निरस्य वर्णद्वयमच मध्यमं
तव द्विषां कान्त्यतमा तिथिश्च का ॥ ३२ ॥
कान्तगिरा ॥ गतप्रत्यागतजातिः ॥
आदौ मध्ये तथान्ते वा वर्धते वर्णजातयः ।
एकद्विचादयो यच वर्द्धमानाक्षरं हि तत् ॥ ३३ ॥
किमनन्ततय ख्यातं पादेन व्यञ्जमाह्वय ।
जनानां लोचनानन्दङ्के तन्वन्ति घनात्यये ॥ ३४ ॥
डरःस्थलं कोच विना पयोधरं [ खञ्जनाः ॥
विभर्ति सम्बोधय मारुताशनं ।
वदन्ति कं पत्तनसंभवं जनाः
फलञ्च किं गौडवधूकुचोपमं ॥ ३५ ॥ नागरङ्गं ॥
प्रायेण नीचलोकस्य कः करोतीह गर्वतां ।
आदौ वर्णद्वयं दत्वा ब्रूहि के वनवासिनः ॥३६॥ शवराः॥
सानुजः काननङ्गत्वा नैकषेयान् जघान कः ।
मध्ये वर्णचयं दत्वा रावणः कीदृशोवद॥३७॥राक्षसोत्तमः॥
धत्ते वियोगिनी गण्डस्थलपाण्डुफलानि का ।
वद वर्णौ विधायान्ते शीता दृष्टा कयाभवत् ॥ ३८ ॥
विष्णोः का वल्लभा देवी लोकचितयपावनी ।[ लवलीलया॥
वर्णमाद्यंतयोर्दत्वा कः शब्दस्तुल्यवाग्वद ॥३९॥ समानः ॥
इति वर्द्धमानाक्षरजातिः ॥

आदितो मध्यतोन्ताद्वा हीयन्ते वर्णजातयः ।
एकद्विचाद्यो यच हीयमानाक्षरं हि तत् ॥ ४० ॥
वसन्तमासाद्य विकासि राजते
वनेषु किं वल्लभ पुष्पमुच्यतां ।
विहङ्गमं कञ्च [illegible]क्षरं
वदन्ति कम्पकजसंभवं विदुः ॥ ४१ ॥ किं शुकं ॥
समुद्यते कुच नयांति पांशुलाः
समुद्यते कुच भयं भवेज्जलात् ।
समुद्यते कुच तवापयात्यरिः
प्र[illegible]नसम्बोधनवाचि किं पदं ॥ ४२ ॥ हिमकरे ॥
त[illegible]ऽत्यंतमहासुखाशया
वनेषु कस्मै स्पृहयन्ति सत्तम[illegible]ः ।
इहाद्यवर्णौ द्वितयं [illegible]न[illegible]स्थ भोः
सदा स्थितं कुच च सत्त्वमुच्यत[illegible] ॥ ४३ ॥ तपसे ॥
पुरुषः कीदृशो वेत्ति प्रायेण सकल[illegible]ः कलाः ।
मध्यवर्णद्वयं त्यक्त्वा ब्रूहि कः स्यात्सुरालयः ॥ ४४ ॥
यजमानेन कः स्वर्गहेतोः सम्यग्विचार्यते । [ नागरिकः ॥
वि[illegible]याद्यंतयोर्वर्णौ गोत्वं कुच स्थितं वद ॥ ४५ ॥
यागविधिः ॥ [illegible]यमानाक्षरजातिः ॥
अन्योन्या[illegible] चैकान्तारित[illegible] ।
शृङ्खलाबन्ध इत्युक्तो ग्रन्थिमान्नागपाशकः ॥ ४६ ॥
पविचमति[illegible] [illegible]त किमिह किं भटामंचणं

ब्रवीति धरणीधरस्तु किमजीर्णसम्बोधनं ।
हरिर्वदति को जितो मदनवैरिणा संयुगे
तनोति ननु कः [illegible]डम्बरं ॥ ४७ ॥
पयोधरसम[illegible]ः ॥


भवति जयिनी काजौ सेनाह्वयाधरभूषणं
वहति किमहिः पुष्पं कीदृक् कुसुम्भसमुद्भवं।
महति समरे वैरी वीर त्वया वद किं कृतः
कमलमुकुले भृङ्गः कीदृक् पिवन्मधु राजते ॥ ४८ ॥
पर[illegible]गराञ्जतः ॥ शृंखलाजातिः ॥

आह्वानं किं भवति हि तरोः कस्यचित् प्रश्नविज्ञाः
प्रायः कार्यं किमपि न कुलौ कुर्वते के परेषां ।
पूर्णं चन्द्रं वहति ननु का पृच्छति म्लानचक्षुः
केनोदन्या जनितमसमं कष्टमाप्नोति लोकः ॥ ४९ ॥
नीरापकारेण ॥

का संवुद्धिः सुभट भवतो ब्रूहि पृ[illegible]ः सम्यक्
प्रातः कीदृग्भवति विपिनं संप्रहृष्टैर्विहंगैः ।
लोकः [illegible] थयाते मुदं का त्वदीया च जैत्री
प्रायो लोके स्थितमिह सुखं जन्तुना कीदृशेन ॥ ५० ॥
वीहारसेविना ॥ एकान्तरितशृङ्खलाजातिः ॥

गोष्ठी विदग्धजनवत्यपि शोचिनी या
कीदृक् भवेत्तरंणिरश्मिषु का सदास्ति।
दुर्वारदर्पदलितामरनायकापि

कीदृक्प्र्यकारि सुरशत्रुचमूगुहेन ॥ ५१ ॥
तारकविरहिता ॥




कीदृक् परैरुपहतो भवति क्षितीशः
पृच्छत्यनुत्त्वइह किं विदितं पवित्रं ।
विच्छिन्नपाणिचरणो जनको यदीयः
कीदृक् परैरभिहितः स पुमान् पुनः स्यात् ॥ ५२ ॥
व्यङ्गतनयः ॥ नागपाशजातिः ॥
भाषाभिस्त्रिचितं यत् स्यात्संस्कृतप्राकृतादिभिः ।
सन्तश्चित्रन्तदिच्छन्ति संशुद्धं त्वेकभाषया ॥ ५३ ॥
किं न [illegible] महतोपिच तादृशस्य जलराशेः ।
दिनअरकिरणप्पंसण पडिउद्धं होइ किं गोसे ॥ ५४ ॥
कमलवणं ॥
मत्स्यहितमम्बु कीदृक् पृच्छति रोगी निशासु किं भाति।
कोऽनङ्गो वदति मृगः खे गम्मइ केरिसा रइणा ॥ ५५ ॥
अविसामभमिरेण ॥ संस्कृतप्राकृतजातिः ॥
प्रायो विभ्यति कीदृशा [illegible]णा गजाः
पृथ्वी संप्रति कीदृशी नृपतिना राजन्वती राजते ।
प्रायः प्रावृषि कीदृशी गिरितटी धत्ते च कः कज्जले

मज्जणेवलिये घणच्चयदिणे जादं सरो केरिसं ॥ ५६ ॥
सरदादवतावितवाहिरं ॥
क्षत्तं कीदृशमङ्गं दन्तभवं कं वदन्ति विद्वांसः ।
अतिलघुवाचि पदं किं केरिसुः सुअणेसु होइ जणो॥५७॥
विसंतमणु ॥ इति संस्कृतापभ्रंशजातिः ॥
किं सुखमाहुः प्रायः केशविकारश्च का हरेर्दयिता ।
कथमाभा कस्मिन्निशि को लुब्भइ वीरपुलिसाणं ॥ ५८ ॥
शमलकम्मालंभे ॥
कस्तंबेरमसुत इति विख्यातः पृच्छति स्फुटं हरिणः ।
अहिणवण अलीरणो असाहुणो केण उज्जलइ ॥ ५९ ॥
कलभएण ॥ संस्कृतमागधिकं ॥
कोपारुणं किमरुणाग्रसरस्य पूर्वं
काष्ठाअनिष्ठिततनोरुपमानपात्रं ।
पत्तं खणेण मरणं सअरः सरणं
पुत्तेहि किं पविसिउण तुरङ्गमत्थं ॥ ६० ॥ कपिलपणं ॥
कं प्रीणयन्ति जलदाः सैन्यं कीदृक् पलायते समरात् ।
धत्ते शिरोधरा किं रुद्दसिरं केरिसम्भोदि ॥ ६१ ॥
चातकं कातरंकं ॥ संस्कृतपैशाचिकं ॥
को वर्णाद्यः क्व च जलधिसुता कश्च दीर्घादिसंज्ञं
...ज्ञाः कमजयदसौ तार्किकैः के क्रियन्ते ।
आमन्त्र्यो विः कथय विदितं किं पदं हेतुवाचि
जाणश्चेडं मह्हइ महिला साविवोल्लेइ कीसे ॥ ६२ ॥

अरोचम्मारं वादावेहि ॥

शब्दः कः स्यात्प्रवचनं कुण्डलौ कौ स्मरारेः
कामंभोधेर्हरिरुदरद्वीवधः पृच्छतीदं ।
हण्डी कुण्डी अणसिणघरे कीस अम्हारअत्थं
ये पुछिल्ला सउणपरिहारुत्तरं कीसदेइ ॥ ६३ ॥

नाहोकुम्भार ॥ संस्कृतलौकिकं इति चित्रजातिः ॥

को निवसइ सच्छंदं सुन्दरि गिरिगहकुञ्जमज्जम्मि ।
सह अज्जुणेण योद्धुं सिहि ममणो केरिसो होइ ॥ ६४ ॥

सरहससवराहवग्गो ॥

काहरइ मणं पइणो गुणगण जोवण सलाहणिगास्स ।
कअचडचडेति सद्दाहुआ सना केरिसाहोन्ति ॥ ६५ ॥

सरहसवहुआ ॥ इति शुद्धप्राकृतं ॥

पाणिगाहणणि अंसणुसोहइ केहि मण्डिअं ।
साहसु वहुवीर पइणो रिउवलं केहिं खण्डिअं ॥ ६६ ॥

समरङ्गणेहिं ॥

रसिअहु केण उच्चाडणु किज्जइ
जुअइ भाणसु केण उावेज्ज ।
तिसिअलोअ खणु केण सुहिगाइ
एहुपहु मम भुअणे गिग्धइ ॥ ६७ ॥

णीरसराएण ॥ शुद्धापभ्रंशं ॥

सुअलो मेहं पुच्छइ पुच्छइ मेहोवि तन्तहा सुअलं ।
केणह आसअलसआ केण जणो विसइ पाआलं ॥ ६८ ॥

वलाहकविलेन ॥
धवलुज्जलेहिं केहिसौहइ धलणी मसाण देसस्स ।
णिलअ[illegible]र कवनाला केहिं पलिवेटि आहोन्ति ॥६९॥
णलकलकेहिं ॥ शुद्धमागधिकं ॥
वैरी पुच्छइ ककणे रोचइ कसणो घणो केहिं ।
सच्चाइण केहिं समत्थन्ति सच्चंणि हितं कता इम्पि ॥७०॥
अहितपकवेहिं ॥
पत्तूण किं भड अणो णिधणे हताणं
अद्दासणं·फचति चंफणि सूअणस्स भोत्तूण ।
खोरतर तुक्खस आइ [illegible]
धआकरणं लप किं लहन्ति ॥ ७१ ॥
विसमरणं ॥ शुद्धपैशाचिकं ॥
जाणी आणइ णिं भेदे भल्लि
साकिसवुच्चइ वोल्लरे सम्भरि ।
जे तिलसरिस वपीडयि जाणी
कीस भ[illegible] सोविस्साणी ॥ ७२ ॥
सुतेल्लीशुद्धलौकिकं ॥ इति संशुद्धजातिः ॥
एतावतापि ।द[illegible]चं प्रश्नानां दर्शितं मया ।
येन येन हि माद्यन्ति त[illegible] ॥ ७३ ॥

इति श्रीधर्मदासविरचिते विदग्धमुखमण्डने
तृतीयःपरिच्छेदः ॥

व्यक्तीकृत्य कमप्यर्थं स्वरूपार्थस्य गोपनात् ।
यत्र वाह्यांतरावर्थौ कथ्येते सा प्रहेलिका ॥ १ ॥
सा द्विधार्थी च शाब्दी च विख्याता प्रश्नशासने ।
आर्थी स्यादर्थविज्ञान[illegible] शब्दविभागतः ॥ २ ॥
त[illegible]ण्यालिङ्गितः कंठे नितम्बस्थलमाश्रितः ।
गुरूणां संनिधानेपि कः कूजति मुहुर्मुहुः॥ ३ ॥
पानीयकुंभः ॥
आपाण्डु पीनकठिनं वर्तुलं सुमनोहरं ।
करैराकृष्यतेऽत्यर्थं किं वृद्धैरपि सस्पृहं ॥ ४ ॥
पक्वविल्वफलं ॥ इत्यार्थीजातिः ॥
[illegible]वार्वीर्य सरुषि त्वयि का प्रसुप्ता
श्यामा सपत्नहृदये सुपयोधरा च ।
तुष्टे पुनः प्रणतशत्रुसरोजसूर्ये
सैवाद्यवर्णरहिता वद नाम का स्यात् ॥ ५ ॥ शस्त्री ॥
सदारिमध्यापि न वैरियुक्ता
नितान्तरक्तापि सितैवनि[illegible] ।
यथोक्तवादिन्यपि नैव दूतिका
का नाम कान्तेति निवेदयाशु ॥ ६ ॥
सारिका ॥ शाब्दीजातिः ॥
नीरस आउण सो वहुगुणवन्तउ भमइ
निरंतरु णीच्चलहोन्तउ ।
तरुगिज्जइ णउण फलुपत्तु समु

योपरि आणइ पावइ सोविजसु ॥ ७ ॥ गुणरुकेवा ॥
घरघर चल्लइ सअलपि आरी
जीवन्ति होइ वैरिणोः णारी ।
खावन्धइ खण मुञ्चइ खण एकल्ली
तहजाणह जह जाइ णपेल्ली ॥ ८ ॥
पाशासारी ॥ इति प्रहेलिकाजातिः ॥
कालसारादिकं हृद्यमजमरादिगूढकं ।
विदग्धा दुर्विदग्धानां कुर्वते दर्पशान्तये ॥ ९ ॥
अनुनेतुं मानिन्या दायितश्चरणे सरागचरणायाः ।
यावत् पतितः स तया तत्क्षणमवधीरितः कस्मात् ॥१०॥
रजस्वला यतः ॥
अवलोक्य स्तनौ वध्वा गुञ्जाफलविभूषितौ ।
निःश्वस्य रोदितुं लग्ना कुतो व्याधकुटुम्बिनी ॥ ११ ॥
असारस्तनयो यतः ॥ कालसारजातिः ॥
दरादेवुचूअमल्लं पिच्छि असहि
आरा विरहिणीं सहियं ।
णमिओकं केल्लितरु
चूओचलणा ओकतो ॥ १२ ॥
पिच्छंत मणिमिसच्छ पिच्छि
अवहुआए भत्तिभिरुक् वअरं ।
दंसिअकआइ सीसे
कतोदोजाइ कुसमाइ ॥ १३ ॥

इति कालसारादिगूढजातिः ॥

रविसुत[illegible]ोकर्णः श्रुतिविषयगुणांवरो वनात्मधरः ।
[illegible]रो जगदखिलञ्चिरमव्यादसमरुक्पाणिः ॥ १४ ॥

कुम्भेन सुग्रीवनयनाश्रयास
दग्ध[illegible]ादर्दुरहर्षकाले ।
स्वजन्मभ[illegible]भोजनाशा
नृत्यन्ति भीमानुजगोजभाजः ॥ १५ ॥

इत्यजमारादिगूढजातिः ॥

वाताच्छीतिररिभीरं बोहरतान्म[illegible]ासुरीदयितः ।
वीडव्राह्यानौकावार्वाह्वाभोसमस्तानाः ॥ १६ ॥

इति पदगूढजातिः ॥

दयावान् प्रयतः शुद्धः प्रबुद्धकमलेक्षणः ।
पापापहस्त्रिभुवनं बुद्धः पायादप यतः ॥ १७ ॥
न सज्जति क्वचिद्दोषे प्रीणाति जगतां मनः ।
य एकः स परं श्रीमांश्चिरं जयति सज्जनः ॥ १८ ॥

इति पादगूढजातिः ॥

दृष्टो मया सखि ब्रूहि रोदयित्वा गतोद्यमां ।
भद्रे कल्याणिनी भूयाः प्राचीं पश्यातिनिर्मलां ॥ १९ ॥
डाहिणपवणु विग्गासंमीलइ लोअणाइं पहि अवहू ।
णिउण सही उणतं[illegible]विवरे ढक्के इठं ॥ २० ॥

अर्थगूढजातिः ॥

[illegible] तदर्थत्वाद्यर्थमर्थद्वयोदयात् ।

निह्नवात्कथितस्यापि शब्दव्याजादपह्नुतिः ॥ २१ ॥

वहुदोषो गुणध्वंसी गोहन्ता जनपीडकः ।
करोतु विरथो लोकमस्तमात्तम ोदयं ॥ २२ ॥
विष्णोःस्तुतिनिन्दे ॥

सततमहितजनवत्सलवहुभयपापक्रियापरिभ्रष्टः ।
इह कलिकाले कुपतिर्जगतस्त्वं परमदुःखकरः ॥ २३ ॥
राज्ञः स्तुतिनिन्दे ॥ इति स्तुतिनिन्दाजातिः ॥

प्रसन्नवदनः श्रीमानयं लब्धगुणोदयः ।
करप्रचारसुभगो राजा नंदयति प्रजाः ॥ २४ ॥
चन्द्रभूपती ॥

विनायकाहितप्रीतिर्देवो गंगां वभार यः ।
सर्वदो माधवः स त्वामव्यादव्यर्थविक्रमः ॥ २५ ॥
शङ्करवासुदेवौ ॥ द्व्यर्थजातिः ॥

शीत्कारं जनयति व्रणयत्यधरं
तनोति रोमाञ्चं ।
नागरिकः किमु मिलितो नहि नहि
सखि हैमनः पवनः ॥ २६ ॥

रुचिरस्वरवर्णपदा
रसभ ववती जगन्मनो हरति ।
तत्किं तरुणी नहि नहि
वाणी वाणस्य मधुरशीलस्य ॥ २७ ॥
अपह्नतिजातिः ॥

स्वरेषु विंदुयुक्तेषु हलां यदवबोधनं ।
तद्विंदुमतीति प्राहुः केचिद्विंदुमतीमिति ॥ २८ ॥
मानसो नाभसीत्याद्याः बुध्यादौ न्यासतो हि याः ।
बाहुल्येनाप्रयोगात्तु नेह तासां प्रदर्शनं ॥ २९ ॥
त्रिनयनचूडारत्नं मित्रं सिंधोः कुमुद्वतीदयीतः ।
अयमुदयति घुसृणारुणरमणीवदनोपमश्चन्द्रः ॥ ३० ॥
इति विन्दुमज्जातिः ॥
क्रियादिकं पदे यत्र पदसाधनकौशलात् ।
स्फुटं न लक्ष्यते तत्स्यात् क्रियागुप्तादिकं यथा ॥ ३१ ॥
राजन्नव घनश्याम निस्त्रिंशाकर्षदुर्जय ।
आकल्पं वसुधामेतां विद्विषो घ्न रणे बहून् ॥ ३२ ॥
पुंस्कोकिलकुलस्यैते नितांतं मधुरारवैः ।
सहकारद्रुमारम्यां वसन्ते कामपि श्रियं ॥ ३३ ॥
इति क्रियागुप्तजातिः ॥
न करोतु नाम रोषं न वदतु परुषं नहन्तु वाशत्रून् ।
रक्ष्यते महीमाखिलां तथापि धीरस्य वीरस्य ॥ ३४ ॥
शरदिंदुकुंदधवलं नगनिलयरतं मनोहरं देवं ।
यैः सुकृतं नतमनिशं तेषामेव प्रसादः स्यात् ॥ ३५ ॥
कर्तृगुप्तं ॥
शीत्कारकारकः वाही स पवनमारुतः ।
प्रक्षोभयति पांथस्त्री निःश्वासैरिव मांसलः ॥ ३६ ॥
सुभगतवाननपङ्कजदर्शनसंज ततिभरप्रीतेः ।

शमयति कुर्वन् दिवसः पुण्यवतः कस्य सन्तापः ॥ ३७ ॥
कर्मगुप्तं ॥
पूतिपंकमयेऽत्यर्थं कासा दुःखिता अमी ।
दुर्वारा मानसं हंसाः गमिष्यन्ति घनागमे ॥ ३८ ॥
अहं महानसायातः कल्पितो न कस्तव ।
मया मांसादिकं भुक्तं भीमं जानीहि मां वक ॥ ३९ ॥
करणगुप्तं ॥
अम्भोरुहमये स्नात्वा वापीपयसि कामिनी ।
ददाति भक्तिसंपन्ना पुष्पंसौभाग्यकामया ॥ ४० ॥
प्रशस्त्यायुक्तमार्गस्थ तव संमानिताश्रिताः ।
स्पृहयन्ति न के नाम गुणालय प्रभो ॥ ४१ ॥
संप्रदानगुप्तं ॥
शिलीमुखैस्त्वया वीर दुर्वारैर्निर्जितो रिपुः ।
बिभेत्यत्यन्तमलिनोः वनेपि कुसुमाकुले ॥ ४२ ॥
सरसं तोयमुत्सृज्य जनः कर्पंकारकं ।
पिवत्यंभोजसुरभिस्वच्छमेकान्तशीतलं ॥ ४३ ॥
अपादानगुप्तं ॥
या कटाक्षच्छटापातैः पवित्रयति मानवं ।
एकान्तरोपितप्रीतिरस्ति सा कमलालया ॥ ४४ ॥
विपद्यमनता सिद्धा सर्वस्यैवनिरूपणः ।
तथाहि भस्मपादाभ्यां निर्वाणं यंत्ययं जनः ॥ ४५ ॥
अधिकरणगुप्तं ॥ कारकगुप्तजातिः ॥

तृणीव मधुमासेस्मिन् रसालद्रुममंजरी ।
इयमुद्भिन्नमुकुलैः भाति न्यस्तशिलीमुखा ॥ ४६ ॥
प्राप्तमदो मधुमासः प्रवलारुक् प्रियतमो विदूरस्थः ।
असतीयं संनिहिता हा हतशीला सखी नियतं ॥ ४७ ॥
संबन्धगुप्तजातिः ॥
सर्वज्ञेन त्वया किंचिन्नास्त्यविज्ञातमीक्ष्यं ।
मिथ्या वचस्तथा हि त्वमसत्यं वेत्सि न क्वचित् ॥ ४८ ॥
कमले कमले नित्यं मधूनि पिवतस्तव ।
भविष्यति न सन्देहः कष्टं दोषाकरोदये ॥ ४९ ॥
आमन्त्रितगुप्तजातिः ॥
विषादी भैक्ष्यमश्नाति सदारोगं न मुञ्चति ।
रुष्टेनापि त्वया वीर शम्भुनारिः समः कृतः ॥ ५० ॥
नित्यमाराधिता देवैः कंसस्य द्विषतंस्तनुः ।
मण्डलाग्रं गदां शंखं चक्रं जयति विभ्रती ॥ ५१ ॥
समासगुप्तजातिः ॥
नितान्तस्वच्छहृदयं सखि प्रेयान् समागतः ।
त्वां चिरादर्शनप्रीत्या यः समालिंग्य रंस्यते ॥ ५२ ॥
कलिकालमियन्तावदगस्त्यस्य मुनेरपि ।
मानसं खण्डयत्यच शशिखण्डानुकारिणी ॥ ५३ ॥
लिङ्गगुप्तजातिः ॥
प्रमोदं जनयन्त्येव सदाराः गृहमेधिनः ।
यदि धर्मश्च कामश्च भवेतां सङ्गतावुभौ ॥ ५४ ॥

सुव्वचनगुप्तं॥
कस्मात्त्वं दुर्बलासीति स यस्तां परिपृच्छति ।
त्वयि सन्निहिते तासु दद्यात् किं कथयोत्तरं ॥ ५५ ॥
लिङ्गवचनगुप्तं ॥ वचनगुप्तजातिः ॥
अन्योप्यर्थः स्फुटो यत्र मात्रादिच्युतकेष्वपि ।
प्रतीयते विदुस्तज्ज्ञास्तन्मात्र च्युतकादिकं ॥ ६६ ॥
महाशयमतिस्वच्छं नीरं सन्तापशांतये ।
खलावासादतिश्रान्ताः समाश्रयत हे जनाः ॥ ५७ ॥
तुषारधवलः स्फुर्जन्महामणिधरोऽनघः ।
नागराजो जयत्येकः पृथिवीधरणक्षमः ॥ ५८ ॥
मात्राच्युतकजातिः ॥
सुश्यामा चन्दनवती कान्ता तिलकभूषिता ।
कस्यैषा नगभूः प्रीतिं भुजंगस्य करोति न ॥ ५९ ॥
यथा सत्प्रसवः स्निग्धः सन्मार्गविनिस्थितः ।
तथा सर्वाश्रयः सत्यमयमेव कुलद्रुमः ॥ ६० ॥
विंदुच्युतकजातिः ॥
महीरुहो विहङ्गानामेते हृद्यैः कलापिनां ।
विरुतैः स्वागतानीव नीरवाहाय कुर्वते ॥ ६१ ॥
अगस्त्यस्य मुनेः शापाद्ब्रह्मस्पन्दनमाश्रितः ।
महासुखात् परिभ्रष्टो नहुषः सर्पतां गतः ॥ ६२ ॥
विसर्गच्युतकजातिः ॥
महानपि सुधीरोपि वहुरत्नयुतोपि सन् ।

विरसः कुपरीवारः नदीनः केन सेव्यते ॥ ६३ ॥
सुशीलः स्वर्णगौराभः पूर्णचन्द्रनिभाननः ।
सुगतः कस्य न प्रीतिं तनोति हृदि संस्थितः ॥ ६४
अक्षरच्युतकजातिः ॥
तनोतु ते यस्य फणी गरुत्मान्
पाणौ मुरारिर्-एन च शय्या ।
नाभ्यां स्फुरन् भद्र दमशुभ्रदेहः
पद्मा गातक्रमसौ विरिंचिः ॥ ६५ ॥
हरः क्षयी तापकरः सुरेशः
शान्तो हरिर्गोचरिपुर्विवस्वान् ।
चन्द्रो [illegible]श्रित इत्युपेक्ष्य
लक्ष्या वृतः पातु विधिर्जगन्ति ॥ ६६ ॥
[illegible]नच्युतकजातिः ॥
भिक्षवो रुचिराः सर्वे सुरसाश्च जनप्रियाः ।
[illegible]मायामातसम्पन्ना ह[illegible]यन्ते मगधे परं ॥ ६७ ॥
सत्यशीलो दयोपेतो दाता शुचिरमत्सरः ।
जिनः सर्वात्मना सेव्यः पदमुच्चैरभीप्सिता ॥ ६८ ॥
[illegible]जनच्युतजातिः ॥
स्फोटायेत्वा[illegible]रं किंचित् पुनरन्यस्य दानतः ।
यचापरो भवेदर्थश्च्युत[illegible]ताक्षरं हि तत् ॥ ६९ ॥
सदागतिहतोच्छ्रायस्तमसो वशतां गतः ।
अस्तमे[illegible]ति दीनोयं विधुरेकः शिवंस्थितः ॥ ७० ॥

पूर्णचन्द्रमुखी रम्या कामिनी निर्मलाम्बरा ।
करोति कस्य न स्वान्तमेकान्तमदनोत्तरं ॥ ७१ ॥

इति च्युतदत्ताक्षरजातिः ॥

इति श्रीधर्मदासविरचिते विदग्धमुखमण्डने
चतुर्थः परिच्छेदः ॥

समाप्तः ॥

## चाणक्य शतकं ।

नानाशास्त्रोद्धृतं वक्ष्ये राजनीतिसमुच्चयं ।
सर्वबीजमिदं शास्त्रं चाणक्यं सारसंग्रहं ॥ १ ॥
मूलसूत्रं प्रवक्ष्यामि चाणक्येन यथोदितं ।
यस्य विज्ञानमात्रेण मूर्खो भवति पण्डितः ॥ २ ॥
विद्वत्त्वञ्च नृपत्वञ्च नैव तुल्यं कदाचन ।
स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते ॥ ३ ॥
पण्डिते च गुणाः सर्वे मूर्खे दोषा हि केवलं ।
तस्मान्मूर्खसहस्रेषु प्राज्ञ एको विशिष्यते ॥ ४ ॥
मातृवत् परदारेषु परद्रव्येषु लोष्ट्रवत् ।
आत्मवत् सर्वभूतेषु यः पश्यति स पण्डितः ॥ ५ ॥
किं कुलेन विशालेन गुणहीनस्तु यो नरः ।
अकुलीनोऽपि शास्त्रज्ञो दैवतैरपि पूज्यते ॥ ६ ॥
रूपयौवनसम्पन्ना विशालकुलसम्भवाः ।
विद्याहीना न शोभन्ते निर्गन्धा इव किंशुकाः ॥ ७ ॥
नक्षत्रभूषणं चन्द्रो नारीणां भूषणं पतिः ।
पृथिवीभूषणं राजा विद्या सर्वस्य भूषणं ॥ ८ ॥
माता शत्रुः पिता वैरी येन बालो न पाठितः ।
सभामध्ये न शोभन्ते हंसमध्ये बका यथा ॥ ९ ॥

वरमेको गुणी पुत्रो नच मूर्खशतैरपि ।
एकश्चन्द्रस्तमो हन्ति नच ताराशतैरपि ॥ १० ॥
लालयेत् पञ्च वर्षाणि दश वर्षाणि ताडयेत् ।
प्राप्ते तु षोडशे वर्षे पुत्रं मित्रवदाचरेत् ॥ ११ ॥
लालने बहवो दोषास्ताडने बहवो गुणाः ।
तस्मात् पुत्रञ्च शिष्यञ्च ताडयेन्नतु लालयेत् ॥ १२ ॥
एकेनापि सुवृक्षेण पुष्पितेन सुगन्धिना ।
वासितं तद्वनं सर्वं सुपुत्रेण कुलं यथा ॥ १३ ॥
एकेनापि कुवृक्षेण कोटरस्थेन वह्निना ।
दह्यते तद्वनं सर्वं कुपुत्रेण कुलं यथा ॥ १४ ॥
दूरतः शोभते मूर्खो लम्बशाटपटावृतः ।
तावच्च शोभते मूर्खो यावत् किञ्चिन्न भाषते ॥ १५ ॥
विषादप्यमृतं ग्राह्यममेध्यादपि काञ्चनं ।
नीचादप्युत्तमां विद्यां स्त्रीरत्नं दुष्कुलादपि ॥ १६ ॥
उत्सवे व्यसने चैव दुर्भिक्षे शत्रुविग्रहे ।
राजद्वारे श्मशाने च यस्तिष्ठति स बान्धवः ॥ १७ ॥
परोक्षे कार्यहन्तारं प्रत्यक्षे प्रियवादिनं ।
वर्जयेत्तादृशं मित्रं विषकुम्भं पयोमुखं ॥ १८ ॥
सकृद् दुष्टञ्च मित्रं यः पुनः सन्धातुमिच्छति ।
स मृत्युमुपगृह्णाति गर्भमश्वतरी यथा ॥ १९ ॥
न विश्वसेदविश्वस्तं मित्रञ्चापि न विश्वसेत् ।
कदाचित् कुपितं मित्रं सर्वदोषं प्रकाशयेत् ॥ २० ॥

जानीयात् प्रेषणे भृत्यान् बान्धवान् व्यसनागमे।
मित्रञ्चापदि काले च भार्याञ्च विभवक्षये॥ २१॥
उपकारगृहीतेन शत्रुणा शत्रुमुद्धरेत्।
पादलग्नं करस्थेन कंटकेनेव कंटकं॥ २२॥
न कश्चित् कस्यचिन्मित्रं न कश्चित् कस्यचिद्रिपुः।
कारणेन हि जानाति मित्राणि च रिपूंस्तथा॥ २३॥
दुर्जनः प्रियवादी च नैतद्विश्वासकारणं।
मधु तिष्ठति जिह्वाग्रे हृदये तु हलाहलं॥ २४॥
दुर्जनः परिहर्तव्यो विद्ययालङ्कृतोऽपि सः।
मणिना भूषितः सर्पः किमसौ न भयङ्करः॥ २५॥
सर्पः क्रूरः खलः क्रूरः सर्पात् क्रूरतरः खलः।
मन्त्रौषधिवशः सर्पः खलः केन निवार्यते॥ २६॥
नखिनाञ्च नदीनाञ्च शृङ्गिणां शस्त्रपाणिनां।
विश्वासो नैव कर्तव्यः स्त्रीषु राजकुलेषु च॥ २७॥
हस्ती हस्तसहस्रेण शतहस्तेन वाजिनः।
शृङ्गिणो दशहस्तेन स्थानत्यागेन दुर्जनः॥ २८॥
आपदर्थं धनं रक्षेत् दारान् रक्षेद्धनैरपि।
आत्मानं सततं रक्षेद्दारैरपि धनैरपि॥ २९॥
परदारं परद्रव्यं परीवादं परस्य च।
परीहासं गुरोः स्थाने चापल्यञ्च विवर्जयेत्॥ ३०॥
त्यजेदेकङ्कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत्।
ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत्॥ ३१॥

चलत्येकेन पादेन तिष्ठत्येकेन बुद्धिमान् ।
नासमीक्ष्य परं स्थानं पूर्वमायतनं त्यजेत् ॥ ३२ ॥
लुब्धमर्थेन गृह्णीयात् क्रुद्धमञ्जलिकर्मणा ।
मूर्खं छन्दोनुवृत्तेन तथा तथ्येन पण्डितं ॥ ३३ ॥
अर्थनाशं मनस्तापं गृहे दुश्चरितानि च ।
वञ्चनञ्चापमानञ्च मतिमान् न प्रकाशयेत् ॥ ३४ ॥
धनधान्यप्रयोगेषु तथा विद्यागमेषु च ।
आहारे व्यवहारे च त्यक्तलज्जः सदा भवेत् ॥ ३५ ॥
धनिनः श्रोत्रियो राजा नदी वैद्यस्तु पञ्चमः ।
पञ्च यत्र न विद्यन्ते तत्र वासं न कारयेत् ॥ ३६ ॥
यस्मिन् देशे न सम्मानं न प्रीतिर्न च बान्धवाः ।
नच विद्यागमः कश्चित् तंदेशं परिवर्जयेत् ॥ ३७ ॥
मनसा चिन्तितं कर्म वचसा न प्रकाशयेत् ।
अन्यलक्षितकार्यस्य यतः सिद्धिर्न जायते ॥ ३८ ॥
कुदेशञ्च कुवृत्तिञ्च कुभार्यां कुनदीं तथा ।
कुद्रव्यञ्च कुभोज्यञ्च वर्जयेच्च विचक्षणः ॥ ३९ ॥
ऋणशेषो ऽग्निशेषश्च व्याधिशेषस्तथैव च ।
पुनश्च वर्द्धते यस्मात्तस्मात् शेषं न कारयेत् ॥ ४० ॥
चिन्ता ज्वरो मनुष्याणां वस्त्राणामातपो ज्वरः ।
असौभाग्यं ज्वरः स्त्रीणामश्वानां मैथुनं ज्वरः ॥ ४१ ॥
अस्ति पुत्रो वशे यस्य भृत्यो भार्या तथैव च ।
अभावे सति सन्तोषः स्वर्गस्थो ऽसौ महीतले ॥ ४२ ॥

दुष्टा भार्या शठं मित्रं भृत्यश्चोत्तरदायकः ।
ससर्पे च गृहे वासो मृत्युरेव न संशयः ॥ ४३ ॥
माता यस्य गृहे नास्ति भार्या चाप्रियवादिनी ।
अरण्यं तेन गन्तव्यं यथारण्यं तथा गृहं ॥ ४४ ॥
ऋणकर्त्ता पिता शत्रुर्माता च व्यभिचारिणी ।
भार्या रूपवती शत्रुः पुत्रः शत्रुरपण्डितः ॥ ४५ ॥
कोकिलानां स्वरो रूपं नारीरूपं पतिव्रता ।
विद्या रूपं कुरूपाणां क्षमा रूपं तपस्विनां ॥ ४६ ॥
अविद्याजीवनं शून्यं दिक् शून्या चेदबान्धवा ।
पुत्रहीनं गृहं शून्यं सर्वशून्या दरिद्रता ॥ ४७ ॥
अदाता वंशदोषेण कर्मदोषाद्दरिद्रता ।
उन्मादो मातृदोषेण पितृदोषेण मूर्खता ॥ ४८ ॥
गुरुरग्निर्द्विजातीनां वर्णानां ब्राह्मणो गुरुः ।
पतिरेको गुरुः स्त्रीणां सर्वस्याभ्यागतो गुरुः ॥ ४९ ॥
अतिदर्पे हता लङ्का अतिमाने च कौरवाः ।
अतिदाने बलिर्बद्धः सर्वमत्यन्तगर्हितं ॥ ५० ॥
वस्त्रहीनस्त्वलङ्कारो घृतहीनञ्च भोजनं ।
स्तनहीना च या नारी विद्याहीनञ्च जीवनं ॥ ५१ ॥
भोज्यं भोजनशक्तिश्च रतिशक्तिर्वराः स्त्रियः ।
विभवो दानशक्तिश्च नाल्पस्य तपसः फलं ॥ ५२ ॥
पुत्रप्रयोजना दाराः पुत्रः पिण्डप्रयोजनः ।
हितप्रयोजनं मित्रं धनं सर्वप्रयोजनं ॥ ५३ ॥

दुर्लभं प्राकृतं वाक्यं दुर्लभः क्षेमकृत् सुतः।
दुर्लभा सदृशी भार्या दुर्लभः स्वजनः प्रियः ॥ ५४ ॥
शैले शैले न माणिक्यं मौतिकं न गजे गजे।
साधवो नहि सर्वत्र चन्दनन्न वने वने ॥ ५५ ॥
अशोच्यो निर्धनः प्राज्ञोऽशोच्यः पण्डितवान्धवः।
अशोच्या विधवा नारी पुत्रपौत्रप्रतिष्ठिता ॥ ५६ ॥
अविद्यः पुरुषः शोच्यः शोच्यं मैथुनमप्रजं।
निराहाराः प्रजाः शोच्याः शोच्यं राज्यमराजकं ॥ ५७ ॥
कुलीनैः सह सम्पर्कं पण्डितैः सह मित्रतां।
ज्ञातिभिश्च समं मेलं कुर्वाणो न विनश्यति ॥ ५८ ॥
कष्टा वृत्तिः पराधिना कष्टो वासो निराश्रयः।
निर्धनो व्यवसायश्च सर्वकष्टा दारिद्रता ॥ ५९ ॥
तस्करस्य कुतो धर्मो दुर्जनस्य कुतः क्षमा।
वेश्यानाञ्च कुतः स्नेहः कुतः सत्यञ्च कामिनां ॥ ६० ॥
प्रेषितस्य कुतो मानं कोपनस्य कुतः सुखं।
स्त्रीणां कुतः सतीत्वञ्च कुतो मैत्री खलस्य च ॥ ६१ ॥
दुर्बलस्य बलं राजा बालानां रोदनं बलं।
बलं मूर्खस्य मौनित्वं चौराणामनृतं बलं ॥ ६२ ॥
यो ध्रुवाणि परित्यज्य अध्रुवं परिषेवते।
ध्रुवाणि तस्य नश्यन्ति अध्रुवं नष्टमेव च ॥ ६३ ॥
शुष्कं मांसं स्त्रियो वृद्धा बालार्कस्तरुणं दधि।
प्रभाते मैथुनं निद्रा सद्यः प्राणहराणि षट् ॥ ६४ ॥

सद्यो मांसं नवान्नञ्च वाला स्त्री क्षीरभोजनं ।
घृतमुष्णोदकञ्चैव सद्यः प्राणकराणि षट् ॥ ६५ ॥
सिंहादेकं वकादेकं षट् शुनस्त्रीणि गर्दभात् ।
वायसात् पञ्च शिक्षेच्च चत्वारि कुक्कुटादपि ॥ ६६ ॥
प्रभूतमल्पकार्यं वा यो नरः कर्तुमिच्छति ।
सर्वारम्भेन तत् कुर्यात् सिंहादेकं प्रकीर्तितं ॥ ६७ ॥
सर्वेन्द्रियाणि संयम्य वकवत् पतितो जनः ।
कालदेशोपपन्नानि सर्वकार्याणि साधयेत् ॥ ६८ ॥
बह्वाशी स्वल्पसन्तुष्टः सुनिद्रः शीघ्रचेतनः ।
प्रभुभक्तश्च शूरश्च ज्ञातव्याः षट् शुनो गुणाः ॥ ६९ ॥
अविश्रामं वहेद्भारं शीतोष्णञ्च न विन्दति ।
ससन्तोषस्तथा नित्यं त्रीणि शिक्षेत गर्दभात् ॥ ७० ॥
गूढमैथुनधर्मञ्च काले काले च संग्रहं ।
अप्रमादमनालस्यं चतुः शिक्षेत वायसात् ॥ ७१ ॥
युद्धञ्च प्रातरुत्थानं भोजनं सह वन्धुभिः ।
स्त्रियम पन्नतां रक्षेच्चतुः शिक्षेत कुक्कुटात् ॥ ७२ ॥
कोऽतिभारः समर्थानां किं दूरं व्यवसायिनां ।
को विदेशः सविद्यानां कः परः प्रियवादिनां ॥ ७३ ॥
आपदां कथितः पन्था इन्द्रियाणामसंयमः ।
तज्जयः सम्पदां मार्गो येनेष्टं तेन गम्यतां ॥ ७४ ॥
नच विद्यासमो बन्धुर्न च व्याधिसमो रिपुः ।
न चापत्यसमः स्नेहो नच दैवात् परं बलं ॥ ७५ ॥

समुद्रावरणा भूमिः प्राकारावरणं गृहं।
नरेन्द्रावरणा देशाश्चरित्रावरणाः स्त्रियः॥ ७६॥
घृतकुम्भसमा नारी तप्ताङ्गारसमः पुमान्।
तस्माद् घृतञ्च वह्निञ्च नैकत्र स्थापयेद्बुधः॥ ७७॥
आहारो द्विगुणः स्त्रीणां बुद्धिस्तासां चतुर्गुणा।
षड्गुणो व्यवसायश्च कामश्चाष्टगुणः स्मृतः॥ ७८॥
जीर्णमन्नं प्रशंसीयात् भार्याञ्च गतयौवनां।
रणात् प्रत्यागतं शूरं शस्यञ्च गृहमागतं॥ ७९॥
असन्तुष्टा द्विजा नष्टाः सन्तुष्टा इव पार्थिवाः।
सलज्जा गणिका नष्टा निर्लज्जाश्च कुलस्त्रियः॥ ८०॥
अवंशपतितो राजा मूर्खपुत्रश्च पण्डितः।
अधनेन धनं प्राप्य तृणवन्मन्यते जगत्॥ ८१॥
ब्रह्महापि नरः पूज्यो यस्यास्ति विपुलं धनं।
शशिनस्तुल्यवंशोऽपि निर्धनः परिभूयते॥ ८२॥
पुस्तकस्था तु या विद्या परहस्तगतं धनं।
कार्यकाले समुत्पन्ने न सा विद्या न तद्धनं॥ ८३॥
पादपानां भयं वातात् पद्मानां शिशिराद् भयं।
पर्वतानां भयं वज्रात् साधूनां दुर्जनाद् भयं॥ ८४॥
प्राज्ञे नियोज्यमाने तु सन्ति राज्ञस्त्रयो गुणाः।
यशः स्वर्गनिवासश्च विपुलश्च धनागमः॥ ८५॥
मूर्खे नियोज्यमाने तु त्रयो दोषा महीपतेः।
अयशश्चार्थनाशश्च नरके गमनं तथा॥ ८६॥

बहुभिर्मूर्खसंघातै न्योन्यपशुद्दत्तिभिः ।
प्रच्छाद्यन्ते गुणाः सर्वे मेघैरिव दिवाकरः ॥ ८७ ॥
यस्य क्षेत्रं नदीतीरे भार्या वापि परप्रिया ।
पुत्रस्य विनये नास्ति मृत्युरेव न संशयः ॥ ८८ ॥
असंभाव्यं न वक्तव्यं प्रत्यक्षमपि दृश्यते ।
शिला तरति पानीयं गीतं गायति वानरः ॥ ८९ ॥
सुभिक्षं कृषके नित्यं नित्यं सुखमरोगिणि ।
भार्या भर्तुः प्रिया यस्य तस्य नित्योत्सवं गृहं ॥ ९० ॥
हेला स्यात् कार्यनाशाय बुद्धिनाशाय निर्धनं ।
याचना माननाशाय कुलनाशाय भोजनं ॥ ९१ ॥
सेवितव्यो महावृक्षः फलच्छायासमन्वितः ।
यदि दैवात् फलं नास्ति छाया केन निवार्यते ॥ ९२ ॥
प्रथमे नार्जिता विद्या द्वितीये नार्जितं धनं ।
तृतीये नार्जितं पुण्यं चतुर्थे किं करिष्यति ॥ ९३ ॥
नदीकुले च ये वृक्षाः परहस्तगतं धनं ।
कार्यं स्त्रीगोचरो यत् स्यात् सर्वं तद्विफलम्भवेत् ॥ ९४ ॥
कुदेशमासाद्य कुतोऽर्थसञ्चयः
कुपुत्रमासाद्य कुतो जलाञ्जलिः ।
कुगेहिनीं प्राप्य गृहे कुतः सुखं
कुशिष्यमध्यापयतः कुतो यशः ॥ ९५ ॥
कूपोदकं वटच्छाया श्यामा स्त्री चेष्टक लयं ।
शीतकाले भवेदुष्णं ग्रीष्मकाले च शीतलं ॥ ९६ ॥

विषं चंक्रमणं रात्रौ विषं राज्ञोऽनुकूलता ।
विषं स्त्रियोऽप्यन्यहृदो विषं व्याधिरवीक्षितः ॥ ९७ ॥
दुरधीता विषं विद्या अजीर्णे भोजनं विषं ।
विषं गोष्ठी दरिद्रस्य वृद्धस्य तरुणी विषं ॥ ९८ ॥
प्रदोषे निहतः पन्थाः पतिता निहताः स्त्रियः ।
अल्पवीजं हतं क्षेत्रं भृत्यदोषाद् हतः प्रभुः ॥ ९९ ॥
हतमश्रोत्रियं श्राद्धं हतो यज्ञस्त्वदक्षिणः ।
हता रूपवती वंध्या हतं सैन्यमनायकं ॥ १०० ॥
वेदवेदाङ्गतत्त्वज्ञो जपहोमपरायणः ।
आशीर्वादवचोयुक्त एष राजपुरोहितः ॥ १०१ ॥
कुलशीलगुणोपेतः सर्वधर्मपरायणः ।
प्रवीणः प्रेषणाध्यक्षो धर्माध्यक्षो विधीयते ॥ १०२ ॥
आयुर्वेदकृताभ्यासः सर्वेषां प्रियदर्शनः ।
आर्यशीलगुणोपेत एष वैद्यो विधीयते ॥ १०३ ॥
सकृदुक्तगृहीतार्थो लघुहस्तो जिताक्षरः ।
सर्वशास्त्रसमालोकी प्रकृष्टो नाम लेखकः ॥ १०४ ॥
समस्तनीतिशास्त्रज्ञो वाहने पूजितश्रमः ।
शौर्यवीर्यगुणोपेतः सेनाध्यक्षो विधीयते ॥ १०५ ॥
मेधावी वाक्पटुः प्राज्ञः परचित्तोपलक्षकः ।
धीरो यथोक्तवादी च एष दूतो विधीयते ॥ १४६ ॥
पुत्रपौत्रगुणोपेतः शास्त्रज्ञो मिष्टपाचकः ।
शूरश्च कठिनश्चैव सूपकारः स उच्यते ॥ १०७ ॥

इङ्गिताकारतत्त्वज्ञो बलवान् प्रियदर्शनः ।
अप्रमादी सदा दक्षः प्रतीहारः स उच्यते ॥ १०८ ॥
यस्य नास्ति स्वयं प्रज्ञा शास्त्रं तस्य करोति किं ।
लोचनाभ्यां विहीनस्य दर्पणः किं करिष्यति ॥ १०९ ॥
किं करिष्यन्ति वक्तारः श्रोता यत्र न विद्यते ।
नग्नक्षपणके देशे रजकः किं करिष्यति ॥ ११० ॥

इति श्रीचाणक्यशतकं समाप्तं ॥

## उद्धवसन्देशः ।

सान्द्रीभूतैर्नवविटपिनां पुष्पितानां वितानैर्
लक्ष्मीवन्तं दधति मथुरापत्तने दत्तनेत्रः ।
कृष्णः क्रीडाभवनवडभीमूर्द्धि विद्योतमानो
दध्यौ सद्यस्तरलहृदयो गोकुलारण्यमैत्रीं ॥ १ ॥

श्वासोल्लासैरथ तरलितस्थूलनालीकमालः
कुर्वन् पूर्णा नयनपयसां चक्रवालैः प्रमालीः ।
स्मारं स्मारं प्रणयानिविडां वल्लवीकेलिलक्ष्मीं
दीर्घोत्कण्ठाजटिलहृदयस्तत्र चिन्तायितोभूत् ॥ २ ॥

अन्तःस्वान्ते क्षणमथ परामृष्य पाराभिलासी
कष्टाम्भोधेः [illegible]वरे कुट्टिमान्तर्निविष्टः ।
सोत्कण्ठोभूदभिमतकथां संशितुं कंसभेदी
नेदिष्ठाय प्रणयलहरीवक्र वाग् उद्धवाय ॥ ३ ॥

त्वं सर्वेषां मम गुणनिधे वान्धवानां प्रधानं
त्वत्तो मन्त्रैः शिवमविकलं यादवाः साधयन्ति ।
इत्याश्वासादभिमतविधौ कामये त्वां नियोक्तुं
न्यस्तः साधीयसि सफलतामर्थभारो हि धत्ते ॥ ४ ॥

संरम्भेण क्षितिपतिगिरां लम्भिते गर्वितानां
वृन्दारण्यान्मयि मधुपुरीं गान्धिनीनन्दनेन ।

वल्लव्यस्ता विरहदहनज्वालिकामण्डलीनाम्
अन्तर्लीनाः कथमपि सखे जीवितं धारयन्ति ॥ ५ ॥
प्राणेभ्यो मे प्रणयवसतिर् मित्र तत्रापि राधा
धातुः सृष्टौ मधुरिमधुराधारणाद्द्वितीया ।
वाचोयुक्तिस्तवविनयिभिरद्य सेयं सखीनां
गाढाश्वासैर्विधुरविधुरं प्राणभारं बिभर्ति ॥ ६ ॥
गत्वा नन्दीश्वरशिखरिणो मेखलां रत्नभूतां
त्वं वल्लीभिर्वलयितनगां वल्लवाधीशपल्लीं ।
तां दृष्टाङ्गीं विरहफणिना प्राणयन् प्रीणयार्तां
मन्त्रप्रायैर्ध्वनिभिरथ मे मन्त्रिचूडामणीन्द्र ॥ ७ ॥
तिष्ठन्त्येते जगति बहवस्त्वद्विधानां विधातुं
चेतः पूर्तिं ननु जनपद मूर्तिभिर्मे सनाथ : ।
भूयोभूयः प्रियसख शपे तुभ्यमव्याजतोऽहं
भूरन्या मे हृदि सुखकरी गोष्ठतः कापि नास्ति ॥ ८ ॥
मद्विश्लेषज्वलनपटलीज्वालया जर्जराङ्गीः
सर्वे तस्मिन्पवनपदवीं शाखिनोऽप्याश्रयिष्यन् ।
गोपीनेत्रावलिविगलितैर् भूरिभिर्वाष्पवारां
पूरैस्तेषां यदि निरवधिर्नाभिषेको ऽभविष्यत् ॥ ९ ॥
आत्मक्लेशैरपि नहि तथा मेरुतुङ्गैर् व्यथन्ते
वल्लव्यस्ताः प्रियसख यथा मद्व्यथालेशतोऽपि ।
दुर्वारां मे विरहविहितां निह्नुवानस्तदार्तिं
प्रेमग्रन्थिं त्वमतिपृथुलं तासु विख्यापयेथाः ॥ १० ॥

भ्रातर्नन्दीश्वरगिरिमितो यास्यतस्ते विदूरं
पन्थाः श्रीमानयमकुटिलः कथ्यते पथ्यरूपी ।
प्रीये सद्यस्त्वयि निपतिते गो[illegible]लानन्दसिन्धौ
सन्तस्तुष्टे सुहृदि हि निजां तुष्टिमेवामनन्ति ॥ ११ ॥
अग्रे गौरीपतिमनुसरेः पत्तनान्तर्वसन्तं
गोकर्णा [illegible] व्यसनजलधौ कर्णधारं नराणां ।
यस्याभ्यर्णे सह रविजया सङ्गमो जङ्गमानाम्
आविष्कुर्वन्नभिमतधुरां धीर सारस्वतोस्ति ॥ १२ ॥
आरूढस्ते नयनपदवीं तन्निधन्यासिसोयं
गोपीनम्रं करणमुरलीकाकलीकः कलावान् ।
इत्यालापस्फुरितवदनैर्यच नारीकदम्बैर्
दृग्भङ्गीभिः प्रथममथुरासङ्गमे चुम्बितोस्मि ॥ १३ ॥
तस्मादन्तर्विरचितपरानन्दपूराददूरां
याहि प्रीत्या सपदि पदवीमम्बिकाकाननस्य ।
यच्चानन्दोत्सवमकरवं सर्पतः सर्पताया
नन्दं विद्याधरमपि पुरामोचयन् वल्लवीनां ॥ १४ ॥
भूयोभिस्त्वं किल [illegible]वलथ[illegible]तैर्
एतां निम्नोन्नतप[illegible]सरां स्यन्दने वर्तमानः ।
मुञ्चोत्तुङ्गां भिदि[illegible]हतुर् धीरतीरान्तभूमिं
मन्दाक्रान्तां न खलु पदवीं साधवः शीलयन्ति ॥ १५ ॥
मुञ्चासव्ये विहगरुचिरं किञ्चिदस्मा[illegible]दञ्चं
राजतीरं नवसमनसां राजिभिस्तीर्थराजं ।

यत्रापूर्वं किमपि कलयाञ्चक्रतुर्मत्प्रभावाद्
आभीराणां कुलमपि तथा गान्धिनीनन्दनोपि ॥ १६ ॥
यज्वानस्ते यदपि भवतो विप्रिया हेलनान्मे
नम्रस्तेषां तदपि भवनद्वाररथ्यां जि गाथाः ।
गायन्तीनां मदनुचरितं तत्र विप्राङ्गनानाम्
आलोकाय स्पृहयसि न चेदध्वभावैर्जितोसि ॥ १७ ॥
तामेत्यात्तं स्फुटविष्टपिनां मण्डलेनाभिपूर्णं
तूर्णं गच्छेरुपपुरिपुरः कोटिकाख्यं प्रदेशं ।
यत्र प्राप्ते मयि विकिरती नेत्रमु ानपालां
शालीनापि कटितभुजा मूलमल्पं जहास ॥ १८ ॥
इत्थं क्रान्त्वा पुरपरिसरान् याहि सट्टीकरा थं
पट्टीभूतं भ्रमरनृपतेः पु ष्पतार यमारात् ।
यत्र स्मान्नं सुभग गरुडीकृत्य यत्राधिरूढः
क्रीडाकारी दधदुरुभुजां द्वादशाहं वसामि ॥ १९ ॥
मुग्धे श्यामः कलयति युवा पश्य मामेव नत्वाम्
इत्युल्लासैरहमहमिकां सर्वतः ुर्वताभिः ।
यानालम्बी सरलनयनालोकमैत्रीभराणां
ग्रामीणाभिर् युवतिभिरहं यत्र पात्रीकृतोस्मि ॥ २० ॥
मुञ्चन् सव्ये वहलवहुलां काननस्योपशल्यं
तञ्चतु ं ह्रदपरिसरं दक्षिणे कालियस्य ।
फुल्लाभिस्त्वं पिहितमि रद्योतमन्तर्लताभिर्
धीराध्वानं विमलसरसीराजिभाजं भजेथाः ॥ २१ ॥

वल्लीचित्रं ब्रजमृगदरं तं ब्रजस्योपशल्ये
कल्ये क्रीडा वनविहरणोत्कण्ठया गच्छतो मे ।
यत्रोदञ्चत् कलवलयितैर्वेणुगीतैर्मृगाणां
तूर्णं राजीरजनिविरहव्या .।..नामहारि ॥ २२ ॥
आनम्राणां हासितमु .लैः फुल्लगण्डस्थलानां
दू .... स्फु . सुमनसां स्यन्दने मुञ्चतीनां ।
ते वैदग्धीपरिमलकिरो यत्र सीमन्तिनीनां
सस्रुर्वाणावलिविलसिता रुद्धलक्षाः कटाक्षाः ॥ २३ ॥
एष श्रीमान् प्रसवति रथी माधवो राधिकायाः
प्रेम स्थूलंकरणकुटिलालोकभङ्गीविलासः ।
इत्यौत्सुक्याद्वरयुवतिभिः स्मारितो .।.मनर्मा
घर्माम्भोभिर्ह्ततनुरहं यत्र चित्रायितोस्मि ॥ २४ ॥
लीलास्वप्नो मम विजयते यत्र नागेन्द्रभोगे
श्रीराधाङ्गीकृतपदयुगाम्भोजसंवाहनस्य ।
तत्र क्षीराम्बुधिपरिमलस्पर्द्धने वर्द्धहस्ते
ग्रामे कामं ध्वजवति भजे वङ्का।वश्राम सौ । थं ॥ २५ ॥
सोयं दध्नां मथननिनदाक्रान्तदिक्चक्रवालो
घोषस्तोषं तव जनयिता योजन .. चुम्बी ।
दिव्येनालं निखिलजगतीं सर्पिषा तर्पयन्ती
भ्रातर्भूम्ना विलसति विधेर् गोमयी यत्र सृष्टिः ॥ २६ ॥
कक्षां लक्षावधिभिरभितः ......ः परीतां
तां सम्मद्धब्रजविजयिनीं शाल्मल।..चां भजेथाः ।

वीथ्यां वीथ्यां पृथुकनिकरा यत्र मित्रानुवेलं
खेलन्तस्ताननुविदधते विक्रमान्मे क्रमेण ॥ २७ ॥
दूरादेष प्रणयति पुरा लब्धसाहारनामा
प्रेमानन्दं तव नयनयोरौपन[illegible]ो निवासः ।
जंघालेन क्षितिपतिपुरीं स्यन्दनेनानुविन्दन्
यत्राहारं प्रियमकरवं हारि हैयङ्गवीनं ॥ २८ ॥
गोपेन्द्रस्य व्रजपरिसरे लब्धतुष्टिर्लभेथास्
तां विख्यातां कालतमा[illegible]लाचार[illegible]लां रहेलां ।
यामासाद्य प्रहितमुरलीकाकलीदूतिकोऽहं
सायं गोपीकुलमकरवं सामि नेपथ्यनद्धं ॥ २९ ॥
यत्र प्रीतानहमकरवं मित्रभावेन शावान्
हारं हारं विदितसमयो वल्लवीनां दधीनि ।
शा[illegible]: स खलु वलितः गी[illegible]राभिधस्ते
देशः क्लेशं पथिषु रथिनो दारयेध्य[illegible]दारं ॥ ३० ॥
सोयं रम्भान[illegible]नचटुलैः सेव्यमानो मरुद्भिः
कम्राशोकोत्तमसुमनसां निर्भरामोदधारी ।
पीयूषेण स्फुरितवसतिस्त्व मुदञ्चत्कुरुश्रीर्
लोकातीतः किल म[illegible] वल्लवेन्द्रस्य लोकः ॥ ३१ ॥
पश्यन्तीनां चकितचकितं लब्धसङ्गं शताङ्गे
मामुत्तुङ्गव्यसनविसरैः काममुन्मा[illegible]तानां ।
तासां नि[illegible] व[illegible]नां प्रपाताद्
विद्युत्कारीं कथयति जनो दक्षिणां यस्य कक्षां ॥ ३२ ॥

यत्राक्रूरः प्रणयनिविडोत्कण्ठया गूढतात्मा
रङ्गन्नोष्ठाङ्कनमनुसरन् मामलं किष्ट वन्धुं ।
तद्वास्याम्भः ्लपरिचयारब्धजृम्भैः कदम्बैः
सा सम्बात विलसति तटी यत्र सौयाचिकाख्या ॥ ३३ ॥
धावद्वालावलि[illegible]लीनां
यत्रोत्तुङ्गस्फाटिकपटलस्पर्द्धिद्युतीनां ।
घ्रायं घ्रायं नवतृणशिखां मुञ्चतीनां वलन्ति
वत्सालीनां चटुलपटुलं शश्वदाटीकनानि ॥ ३४ ॥
आभीरीणां नयनसर[illegible] तासां
सद्यो मोक्षयितमधुरिमोल्लासभ[illegible]विधाता ।
पीठीभूतो मम प[illegible]यान्
[illegible]नीमनुविजयते पाण्डरो गण्डशैलः ॥ ३५ ॥
रेणुर्नायं प्रसरति गवां धूमधारा कृशानोर्
वे[illegible]र्नासौ गहनकुहरे कीचको [illegible]रवीति ।
पश्योन्मत्ते रविरभिययौ नाधुनापि प्रतीचीम्
मा चाञ्चल्यं कलय कुचयोः पत्रव[illegible] तन[illegible]मि ॥ ३६ ॥
दूरे वंशीध्वनिरुदयते हन्त मा धाव तावद्
धूम्रे[illegible]नामपि नहि गवां लक्ष्यते धूलिलेखा ।
अस्ति द्वारे गुरुरपि ततो [illegible] स्तम्भयन्ती
क्षीरे नीवीं त्वमि[illegible] तरसा याहि गेहान्त[illegible]लं ॥ ३७ ॥
आप्रत्यूषादपि सुमनसं वीथिभिर्ग्रथ्यमान
धत्ते नासौ सखि कचभ[illegible] । वैजयन्ती समाप्तिं ।

धिन्वन् गोपीनयनशिविनो व्योमकक्षां जगाहे
सोयं मुग्धे निविडधवलधूलिचक्रम्बुवाहः ॥ ३८ ॥
अस्मिन् भूयो विसृमरवपुः सौरभे सौरभेयी
धूलिज लैः सवलितशिरो मालतीचक्रव ले ।
अन्तर्गोष्ठं प्रविशति हरौ हन्त कस्या न चेतस्
तृष्णां धत्ते जरति मुखरे किं वृथा रारटीषि ॥ ३९ ॥
मा मन्दाक्षं कुरु गुरुजनाद्देहलीं गेहमध्याद्
एहि क्रान्ता दिवसमखिलं हन्त विश्लेषतोसि ।
एष स्मेरो मिलति मृदुले वल्लवीचित्तहारी
हारी गुञ्जावलिभिरलिभिर्लीढगन्धो मुकुन्दः ॥ ४० ॥
सौरिर्गोष्ठाङ्गनमनुसरन् शिञ्जितै विमुग्धः
किङ्कि या स्ते पारे हसितारुणं मण्डिताङ्कि ।
आराद्गीतैः कलपरिमिलन्माधुरीकैः कुरङ्गे
लब्धे सद्यः सखि विवशतां वागुरां कस्तनोति ॥ ४१ ॥
यान्त्या लीलो ढकलतुलाकोटि सद्यस्त्वयासौ
लब्धा च ावाल सखि कुतः शब्दभेदाख्यविद्या ।
पश्योपेन्द्रः सदनपदवीं वल्लवेन्द्रस्य मुंचन्
अन्तर्भिन्नो मुहुरिह यया संभ्रमाद्भ्रमीति ॥ ४२ ॥
सा सा्क ठं वसति वसतेर्व ला द्वारि देवी
वल्लीस्तोमैः क्षणम मुखाम्भोजलक्ष्मीं पिधेहि ।
दूराच्चेतोमणिमपहरन्नेष ... दिव्यो
विव्वोकस्ते मुरविजयिनो वर्त्मपाती बभूव ॥ ४३ ॥

यष्टिर्भूमौ लुठति तरसा भ्रंसते पश्य वंशी
कंसारातेः स्खलनममलं स्र...करोति ।
दूरान्नन्दः ... पुरो ज्ञेपयामु न राधे
वन्धे देवि स्थगय चपलापाङ्गभङ्गीवितानं ॥ ४४ ॥
तिष्ठन् गोष्ठाङ्गनभुवि मु...लोचनान्तं विधत्ते
जातोत्कण्ठस्तव सखि हरिर्देहलीवेदिकायां ।
मिथ्यामाने ऽन्तिकवलिते किं गवाक्षार्पिताक्षी
स्वान्तं हन्त ...से वह्निः प्रीणय प्रा...नाथं ॥ ४५ ॥
पश्य व्रीडां सकप...मसौ तन्वती नः पुरस्ता...
द्वारे गौरी न सरति मुहुः श्रौ...रणा...तापि ।
आकृष्टाया गहनकुहरे वेणुविद्या विनो...र्
जानात्यस्याः पुनरनुपमं विक्रमं ...ञ्जवीथी ॥ ४६ ॥
इत्थं स...तां यत्र सन्ध्य...
मामु...श्य स्म पारमलं विभ्रताना...म...भ्रं ।
पौनःपुन्याद्विविधहृदयोत्तुङ्गभावानुसङ्गी
लील...जल्पः ...वलयदृशां प्रेमपूर्णः पुर... ॥ ४७ ॥
दा...भिः कुलकं ॥

दामाकृष्टिद्विगुणितकरारण्यविद्योतितानां
घर्माम्भोभि...रवलायितस्मेरग...ण्डस्थलानां ।
भाले पान्तप्रचल...लकश्रे...भाजां मदीयैः
का...र्ति...तोमैर् मुखरितमु...भाजल...भराणां ॥ ४८ ॥
हेलाचंचद्वलयरणितभ्राम्यतैर्मन्थनीनां

ध्वानोन्मिश्रैर्मसृणमसृणं मन्थलीनां दधीनि ।
गीतैस्तासां [illegible]वलयहृशां यत्र रात्रेर्विरामे
प्रेमोत्तानैर्मम समजनि [illegible]लालासमाप्तिः ॥ ४९ ॥
युग्मकं ॥
निर्माय त्वं [illegible]त फलकं हारि कंसारिमू[illegible]
वारं वारं [illegible] यदि मां माननिव[illegible]नाय ।
यत् पश्यन्ती भवनकुहरे [illegible]ाहं
साहङ्कारा प्रियसखि सुखं यापयिष्यामि यामं ॥ ५० ॥
सन्ति [illegible]ता व्रजयुवतयस्त्वा[illegible] नोद[illegible]नुकूला
रागिण्यग्रे मम सहचरी न त्वया घट्टनीया ।
दृष्ट्वाभ्यर्णे शठकुलगुरुं त्वां कटाक्षार्द्धच[illegible]न्
भ्रूकोदण्डे घटयति जवात् पश्य संरम्भिणीयं ॥ ५१ ॥
मा भूयस्त्वं वद रविसुतातीरधूर्तस्य वार्त्तां
गन्तव्या मे न खलु तरले दूति सीमापि तस्य ।
विख्याताहं जगति कठिना यत् पिधत्ते मदङ्गं
रोमाञ्चोयं सपदि पवन[illegible]मनस्तत्र हेतुः ॥ ५२ ॥
कामं दूरे वसतु [illegible] चाटुहन्दे तवायं
राज्यं स्वामिन् विरचय मम प्राङ्गणं मा प्रयासीः ।
हन्त क्कान्ता मम सहचरी रात्रिमेकाकिनीयं
नीता कुञ्जे निखिलप[illegible]पोनागराज्जागरेण ॥ ५३ ॥
मेदिन्यां ते लुठति दयिता म[illegible]लतं। म्लानपुष्पा
तिष्ठन् द्वारे रमणिविमनाः खिद्यते पद्मलाभः ।

त्वं चोन्निद्रा ... निशा ... वयस्या
माने कस्ते नवमधुरिमातन्तुनालोकयामि ॥ ५४ ॥
मद्वक्त्राम्भोरुहप। मत्तोन्मत्तसेवानुबन्धे
पत्युः कृष्णभ्रमर कुरुषे किन्तरामन्तरायं ।
...ष्णाभिस्त्वं यदि कलरुतव्यग्रचित्तस्त...ग्रे
पुष्पैः पाण्डुच्छविभिरविरलैर् याहि पुन्नागकुञ्जं ॥ ५५ ॥
आयान्तं ... हरिं लोकयन्ती वलिष्ठां
त्वामालम्ब्य प्रियसखि घने नास्मि कुञ्जे निलीना ।
अस्मान्मुग्धे हृदयनिहितादद्य पीताम्बर...
शङ्को नान्यः ...परिचये मत्पुरो मा व्यथिष्ठाः ॥५६॥
मां पुष्पावचयमिषाद्दूरमानीय कुञ्जं
स्मित्वा धूर्ते किमिति रभसा...वकैर् गा...से त्वं ।
सङ्क्रामन्तर्नरचय मुधा तन्वि गीतं तनोमि
स्फीतं वृन्दावनभुवि मुहुः कृष्णसारोत्सवाय ॥ ५७ ॥
वारं वारं व्रजसि सलिलच्छ...ना पद्मबन्धोः
पुच्चीं ज्ञातस्तव सखि रसः पु...डरीकेक्षणोसौ ।
चेतः काम्या भवति विशदासारसाली न वामे
तेन स्मेरं मुहुरभिलष स्यच्युतं रक्तप...ं ॥ ५८ ॥
पश्याम्यन्तर्वि...तवसातं त्वामरालाङ्गनानाम्
अब क्षीरे स्पृ...यासे कथं कृष्णकण्ठप्र...य ।
साधु ब्रूषे सखि म...कला मां शिख...ण्डोज्वलोयं
कुञ्जे दृष्ट्वा भजगदमनोद्दामदर्पोभ्युपैति ॥ ५९ ॥

वाले चन्द्रावलि नहि वहिर्भूय भूयः प्रदोषे
गेहात् तृष्णावति कुरु पुरः कृष्णवर्त्मावलोकं ।
सर्वस्यान्तर्जडिम- मने पावके नाद्य लब्धे
मुग्धे सि मम रसवती प्रक्रिया न प्रयाति ॥ ६० ॥
हस्तेना प्रियसखि लसत्पुष्कराभेन दूरात्
कृष्णेनाहं मदकलदृशा कम्पिताङ्गी विकृष्टा ।
नीचैर्जल्प भ्रमति पुरतो भ्रान्तचित्ते गुरुस्ते
हूंकालिन्दीपुलिनविपिने दीप्रदन्तीश्वरेण ॥ ६१ ॥
वृन्दारण्ये मम विदधिरे निर्भरोत्कण्ठितानि
क्रीडोल्लासैः सपदि हरिणा हा मया किं विधेयं ।
ज्ञातं धूर्ते स्पृहयसि मुर्नन्दपुत्राय तस्मै
मा शङ्किष्ठाः सखि मम रसो दिव्यसारङ्गतोभूत् ॥ ६२ ॥
इत्थं भूता वहुविधपदारम्भगम्भीरगर्भा
कर्णानां मे स्फुटतरतया कोटिभिः पातुमिष्टा ।
आसीत्तासां प्रियसख पुरा यत्र कल्याणवाचां
प्रेमोल्लासप्रकटनकला कर्मठा नर्मगोष्ठी ॥ ६३ ॥
चतुर्भिः ालकं ॥
केयं श्यामा स्फुरति सरले ग पकन्या किम
प्राप्ता सख्यं तव मृगयते निर्मितासौ वयस्या ।
आलिङ्गामु ुरितं ्वतां मां विा त्वा
नारीवेषं ह्रियमुपययौ मानिनी यत्र राधा ॥ ६४ ॥
यत्रोत्तुङ्गाः करपरिचयं शश्वदासेदिवांसो

भूयांसो मे विमलहशां [illegible] मण्डलीभिः ।
वन्धायोद्यत्तरल[illegible] सां त[illegible]कानां निखाताः
कीलाः कूलस्थलवलयिनो भान्ति पद्माकराणां ॥ ६५ ॥
नो जानीमः कठिनविधिना मद्विधानां कपाले
गोप[illegible] किल विलिखिता कीदृशी वर्णलेखा ।
यः सन्ध्यायां सुमुखि [illegible] गोकुले राजदूतः
सोयं कर्णे नि[illegible]तं माधवं वावदीति ॥ ६६ ॥
एष क्षत्ता व्रजनरपतेराज्ञया गोकुलेस्मिन्
वाले प्रातर्नगरगतये घोषणामातनोति ।
दृष्टं भूयः [illegible] च वलादीक्षणं दक्षिणं मे
तेन स्वान्तं स्फुटति चटुलं हन्त भाव्यं न जाने ॥ ६७ ॥
प्रातर्यात्रां न [illegible]पुरे तथ्यमाकर्ण्य शौरेर्
आयामाय प्रियसखि मया यामिनी प्र[illegible]भूत् ।
पश्य क्षिप्रं प्रथितलघिमा पापिनीयं प्रभाता
जायन्ते हि प्रचु[illegible]तमसो नानुकूलाः परेषु ॥ ६८ ॥
यावद्यक्तिं न किल भजते गान्धिनेयानुवन्धस्
तावन्नत्वा सुमुखि भवतीं किञ्चिदभ्यर्थयिष्ये ।
पुष्पैर्यस्या मु[illegible]रकवरं कर्णपूरान्मुरारेः
सेयं फुल्ला गृहपरिसरे मालती पाल[illegible]या ॥ ६९ ॥
नावैषि त्वं [illegible]तिलमश्नानं मूर्ध्नि निर्मीयमाना
मेनांकस्ते सखि शिखरिणीं हन्त पाता हतासि ।
तूर्णं मुग्धे वहिरनूसर प्रा[illegible]णं गेहमध्याद्

अध्यारूढो जिगमिषुरसौ स्यन्दनं नन्दसूनुः ॥ ७० ॥

आसीदार्ये [illegible] नान्तरायः
प्रापुः पापा नच विकलतां पादभङ्गैस्तुरङ्गाः ।
ध्वस्तो नाभूदयमपि मनाक् स्यन्दने चक्रबन्धः
सत्यं गन्ता मधुपु[illegible]मसौ हन्त किं केशिहन्ता ॥ ७१ ॥

आराद्ग्रे कलय नृपतेर् दूत निर्धूतलज्जा
सज्जा तन्वी किमपि विषमं साहसं कर्तुमिच्छुः ।
य[illegible] सृजसि पुरश्चन्द्रहासं न कृष्णां
हस्तात्तावद्विसृजति सखी चन्द्रहासं न कृष्णां ॥ ७२ ॥

मुग्धे पश्य [illegible]मापि हरिं नेत्रमुन्मी[illegible]
मोहेन त्वं विरचय मु[illegible]नात्मनो व[illegible]न ।
शृन्वन् काकूत्करमपि पुरो हन्त सीमन्तिनीनां
क्रूरस्तूर्णं विनु[illegible]ति रथं दूरम[illegible] ॥ ७३ ॥

पश्य क्षामोदरि तव मुखालोकजन्मा हि शोको
वारं वारं हरिनयनयोर्वाष्पमन्तस्तनोति ।
धाव[illegible]ज स्फुरदुरु[illegible]नितानां [illegible]ताने
भू[illegible]दु श्रयति विसरन्नेष [illegible]मिथ्याकल[illegible]ः ॥ ७४ ॥

कृष्णां मुष्णन्नकरुणवलाक्रू[illegible]र्थी
मा मर्यादां य[illegible] कुलभुवां भिन्धि रे गान्धिनेयः ।
इत्युक्त्वा मम मधुपुरे याचय[illegible] तत्र तासां
विचित्तानां परिववलि[illegible] व[illegible]वानां विलापाः ॥ ७५ ॥

दशभिः कुलकं ॥

शश्वन्नीराहरणकपटप्राप्तगोपालनारी
गूढक्रीडावसतिनिविडच्छायकुञ्जोपगूढः ।
यच्चादूरे विलसति महान् वह्नरोलम्बसङ्घा
पद्मा मोदस्नपितपवनः पावनाख्यस्तडागः ॥ ७६ ॥
लीलाक्रान्तैर्मुरविजयिनः सर्वतः पादपातैर्
वैलक्षण्यं किमपि जगतामन्तराकर्षि नीताः ।
एते नन्दीश्वरपरिसर नैचवीथीं भजन्तस्
तीव्रं मातः किमपि दहनं चेतसि ज्वालयन्ती ॥ ७७ ॥
अस्ति प्रेम्णां त्वयि परिमलो मांसलः कंसशत्रोर्
अद्य श्वो वा स तव भविता हारिहारानुकारी ।
दम्भोलीनामपि सुवदने गर्भनिर्भेददक्षैर्
एभिः कामं किमु विलपितैर्बान्धवान् दन्दहीषि ॥ ७८ ॥
मा कार्पण्याद्विरचय वृथा वास्पमोक्षं हताशे
कृष्णाश्लिष्टां तनुमनुपमां स्वेच्छया न त्यजामि ।
ज्वालस्तीव्रो विरहदहनादाप्तजन्मा वलान्मे
मर्मोन्माथी लघुतरमिमं पातयन्दन्दहीति ॥ ७९ ॥
कारुण्याब्धौ क्षिपसि जगतीं हा किमेभिर्विलापैर्
धेहि स्थैर्यं मनसि यदभूरध्वगे वह्नरागा ।
स्मृत्वा वाणीमपि यदि निजां सव्रजं नाजिहीते
धूर्तोऽस्माकं त्रिजगति ततस्तम्वि निर्दोषभूत् ॥ ८० ॥
क्वायं गन्ता मधुरिपुरितो गोकुलादस्मदीयः
काले वंश्ये सुखमिति मया हन्त मानो व्यधायि ।

का जानीते यदिह खलता चातुरी दीक्षितेन
प्रक्षेप्तव्यं शिरसि कुलिशं गान्धिनीनन्दनेन ॥ ८१ ॥
न क्षोदीयानपि सखि मम प्रेमगन्धो मुकुन्दे
क्रन्दन्तीं मां निजशुभगताख्यापनाय प्रतीहि ।
खेलद्वंशीवलयिनमनालोक्य तं [illegible]म्बं
ध्वस्तालम्बा यदहमहह प्राणकीटं बिभर्मि ॥ ८२ ॥
आशापाशैः सखि नवनवैः कुर्वती प्राणबन्धं
जात्या भीरुः कति पुनरहं वासराणि क्षयिष्ये ।
एते वृन्दावनविटपिनः स्मारयन्तो विलासान्
उत्फुल्लास्तान्मम किल बलान्मर्म निर्मूलयन्ति ॥ ८३ ॥
सा वि[illegible]नुर्विभ्रमोद्बोधविद्या
चिल्लीवल्लिभ्रमिमधुरिमोद्दामसम्पद्भिरिष्टा ।
एतामार्तिं मम शमयिता स्मेरत[illegible] सङ्कराङ्गी
प्रेमोत्तुङ्गा:किमु मुरभिदो भङ्गुरापाङ्गभङ्गी ॥ ८४ ॥
कामं दूरे सहचरि वरीवर्ति यत् कंसवैरी
नेदं लोकोत्तरमपि विपद्दुर्दिनं मे दु[illegible]ति ।
आशाकीलो हृदि किल धृतः प्राणरोधी तु यो मे
सोयं पीडां निवि[illegible]वावह्निती‍व्रस्तनोति ॥ ८५ ॥
तव स्फीताधरमधुभरे शीतलो[illegible]
सौन्दर्येणोल्लसितवपुषि स्फ[illegible]पूरे ।
नर्मारम्भस्थ[illegible]कान्दले नन्दसूनो
मोदिष्यन्ते मम सखि कदा हन्त पञ्चेन्द्रियाणि ॥ ८६ ॥

भिन्दन्नक्ष्णोः किल कलुषतां श्यामलः श्यामलाभिर्
लिम्पन्तीभिर्गिरिपरिसरं माधुरीणां छटाभिः ।
आविर्भावी गुरुतरचमत्कारभाजः कदा मे
खेलन्नग्रे निखिलजगदानन्दनो नन्दसूनुः ॥ ८७ ॥
अ नम्रायां मयि निजमुखालोकलक्ष्मीप्रसादं
खेदश्रेणीविरचितमनोलाघवायां विधेहि ।
सेवाभाग्ये यदपि न विभो योग्यता मे तथापि
स्मारं स्मारं तव करुणतापूरमेवं ब्रवीमि ॥ ८८ ॥
क्रीडातल्पे निहितवपुषः कल्पिते पुष्पजालैः
स्मित्वा स्मित्वा प्रणयरभसात् कुर्वतो नर्मभङ्गीं ।
विन्यस्यन्ती तव किल मुखे पूगफालीं विधास्ये
कुञ्जद्रोण्यामहमिह कदा देव सेवाविनोदं ॥ ८९ ॥
इत्युन्नद्धैः पशुपरमणीमण्डलीनां विलापैर्
भूयोभूयः करुणकरुणैरद्य कीर्णान्तरस्य ।
उद्यद्वास्पा त्यजति परितो रुद्धकर्णा कराभ्यां
दूरात् पान्थावलिरपि सखे यस्य सीमोपकण्ठं ॥ ९० ॥
चतुर्दशभिः कुलकं ॥
युक्तं [illegible]लाञ्छिताङ्कैस्तुरङ्गैर्
दृष्ट्वा नन्दीश्वरतटभुवि स्यन्दनं ते मिलन्तं ।
मामाशङ्क्य स्फुटमुपगतं सन्निधातव्यमाराद्
धावन्तीभिस्तरलतरलं राधिकायाः सखीभिः ॥ ९१ ॥
गोपालीनामपि वपुरलङ्क[illegible] दधानो

येषां नव्यः किशलयगणो रागिणं माम्बकार ।
भ्राम्यद्भृङ्गावलिषु भवता तेषु शस्ताशिषां मे
वृन्दं वृन्दावनविटपिषु प्राज्ञ विज्ञापनीयं ॥ ९२ ॥
मत्ता वंशीनिनदमधुभिस्तूर्णगा स्त[illegible]
या मुञ्चन्त्यः प्रणयमभितः सखुर[illegible]ताक्ष्यः ।
तासामुच्चैर्मम परिपठन् कामतो नामधेयं
क्षेमं पृच्छेस्त्वमथ निचये नीचकैर्नैचकीनां ॥ ९३ ॥
डिम्भव्यूहं हृतवति विधौ तत्तदाभस्तदाहं
स्तन्यं यासां मधुरमधयं वत्सरं वत्सलानां ।
वारं वारं मम नतिगणान् विज्ञ विज्ञापयेथा
नम्रस्तासां जठरपशुपीमण्डलीनां पदेषु ॥ ९४ ॥
आमोदं मे मधुर दधिरे मामहंपूर्विकाभिर्
दूरे यान्तं कुसुमितवनालोकनाय स्पृशन्तः ।
श्रीदामाद्याः प्रियसहचरा हन्त मन्नामतस्ते
पौनःपुण्यान्निपुन भवता तुङ्गमालिङ्गनीयाः ॥ ९५ ॥
हत्वा रङ्गस्थलभुवि मया धीर कंसं नृशंसं
काकून्मिश्रैः शपथशतकैर् गोकुलं प्रेषितस्य ।
आनम्रस्त्वं चरणयुगलं वल्लवेन्द्रस्य कामं
नामग्राहं मम गुणनिधे वन्दमानो दधीथाः ॥ ९६ ॥
तां वन्देथा मम सविनयं नामतः क्षामगात्रीम्
आक्रोशन्तीं खलनरपतिं साङ्गुलीभङ्गमुच्चैः ।
अन्तश्चिन्ताविलुलितमुखीं हा मदेकप्रसूतिं

सर्वाङ्गैस्त्वं कलितवसुधालम्बमम्बां यशोदां ॥ ९७ ॥
या निश्वासोद्गमवलयिनं हारवं मुञ्चमाना
खेदोदग्रं मम गुणकथामन्तरेणान्तरेण ।
क्षामीभूता क्षितिपतिपुरीवर्त्मविन्यस्तनेत्रा
वास्पोद्गारस्नपितवसना वासराणि क्षिपन्ती ॥ ९८ ॥
अक्रूराख्ये [illegible] हठाज्जीवनं मां निदाघे
विन्दन्तीनां मुहुरविरलाकारमन्तर्विदारं ।
सद्यः शुष्यन्मुखवनरुहां वल्लवीदीर्घिकानां
यासामासान्मदमनुसृताः प्राणकुर्मा वसन्ति ॥ ९९ ॥
तासां वद्धाञ्जलिरनुसरैरन्तिकं यन्त्रितात्मा
शङ्काभिस्त्वं क्रमपरिणमद्विक्रियाणां प्रियाणां ।
दूत्यं कुर्वन्नसि गुणनिधे सापराधस्य यन्मे
भर्तुर्दोषादपि हि कुशला हन्त दुष्यन्ति भृत्याः ॥ १०० ॥
मन्नेपथ्यस्तवकितभवद्वीक्षणेनाकुलानां
तुङ्गातङ्कोत्तरलितमनःकल्पनाजल्पभाजां ।
ति[illegible]नासां पथि नयनयोर्निःसलाकं गतानां
सन्देशं मे लघु लघु सखे हारिणं व्याहरेथाः ॥ १०१ ॥
त्रिभिः कुलकं ॥
यः कालिन्दीवनविहरणोद्दामकामः कलावान्
वृन्दारण्यान्नर[illegible]पुरं गान्धिनीयेन नीतः ।
कुर्वन् दूत्यं प्रणयसचिवस्तस्य गोपेन्द्रसूनोर्
देवीनां वः सपदि सविधं लब्धवानुद्धवोऽस्मि ॥ १०२ ॥

तापोन्नद्धश्वसितपटलीदूयमानाधरश्रीर्
मुक्तक्रीडो धवलिम[illegible]ण्डरक्षामगण्डः ।
स्मारं स्मारं गुण[illegible]जं हन्त वः कान्तचेताः
सोयं कान्तः किमपि सरलाः सुंदरं संदिदेश ॥ १०३ ॥
कच्चिद्गीतं न भजत मुहुर्[illegible]ः पुरावत्
कल्याणं वः सरलहृदयाः कच्चिद[illegible]ति ।
कच्चिद्यूयं स्मरथ सरसं तच्च चित्तानुकूलं
कुञ्जे कुञ्जे कृतमथ मया तच्च सेवाप्रपञ्चं ॥ १०४ ॥
नीतो यत्नाद्विविधविनयैर्वन्धनं वन्धुताभिः
कर्तुं भूयः किमपि कुशलं पत्तने वर्तमानः ।
ध्यायं ध्यायं [illegible]महं सौहृदं वः सुकण्ठ्यो
गाढोत्कण्ठाक्रमपरवशं वासराणि क्षिपामि ॥ १०५ ॥
ज्ञातं ज्ञातं विरमत चिरं त्वादृशीनां चरित्रं
याभ्यस्तीव्रा समजनि मनो भेदिनी वेदनेयं ।
[illegible] मयि किल तथा प्रेमपूरं भवत्यो
येनोद्भ्रान्तस्त्रुटिमपि वलादुत्सहे नाद्य नेतुं ॥ १०६ ॥
रासोल्लासान्निशि निशि चिरं स्वप्नवृंदापदेशाद्
वृन्दारण्ये सुरभिनि मया सार्द्धमास्वादयन्ते ।
भूयोभूयस्तदपि च [illegible]गिता दूषणं मे
शंसन्त्यः किं कुटिलहृदया न त्रपन्ते भवत्यः ॥ १०७ ॥
ते ते चन्द्रावलि रसभरभ्रान्तनेत्रान्तभेदैर्
वैचित्रीभिस्त्रिभुवनजये दत्तहस्तावलम्बाः ।

उत्सर्पन्तः स्मरणशरणीं हन्त ते भ्रूविलासा
निःशङ्कं मे हृदयमधुना प्रांशवः श्रंसयन्ति ॥ १०८ ॥
तत्तत्तन्वि स्मरसि विपिने फुल्लशाखे विशाखे
कर्षन्नीविं तव मुहुरहं वीक्ष्य हृष्टां भ्रमन्तीं ।
कल्याणीं मे वितर कितवे हन्त चेलान्तरस्थे
गुप्तां गुञ्जावलिमिति वदन् यद्विलक्षस्तदासं ॥ १०९ ॥
तां वैदग्धीपरिमलकथामुज्झिरन्ती सखीषु
क्षान्तीं दूरे क्षपयसि निजां हन्त धन्यासि धन्ये ।
ध्यायन्नाहं तमिह नगरे देवि लोकं विलोके
प्रीत्या यत्र व्यसनविधुरं वक्त्रमुन्मुद्रयामि ॥ ११० ॥
गम्भीराणि प्रमदगुरुभिर्गूढनर्मप्रवन्धैर्
माध्वीकानां मधुरिममहाकीर्तिविध्वंसनानि ।
सोत्कण्ठं मे स्मरति हृदयं श्यामले कोमलानि
प्रेमोद्बुद्धस्मितपरिचितान्यत्र ते जल्पितानि ॥ १११ ॥
पद्मे पद्मस्तृतमुखिलतास[illegible]ने छद्मनिद्रां
लब्धे लुब्धा मयि मुरलिकां हर्तुकामा त्वमासीः ।
धृत्वा पाणौ मुहुरथ मया कञ्चुकं लुञ्चता ते
यत्प्रारब्धं किमपि तदिदं स्वान्तमन्तः पिनष्टि ॥ ११२ ॥
न्यस्ताङ्गी मे सुरभिनि भुजस्तम्भयोरन्तराले
भूयोभिस्त्वं रहसि ललिते केलिभिर्लालितासि ।
अन्तश्चिन्ताविधुरमधुना पांशुपुञ्जे लुठन्ती
हन्त म्लाना रचयसि कथं प्राणसन्धारणानि ॥ ११३ ॥

यः सेवाभिर्मुदमुदयिनीं तत्र भद्राङ्गि भद्रे
नीत स्ताभिर्निशि निशि मनःकर्षिणीभिस्त्वयासीत् ।
स प्रेष्ठस्ते नवपरिचयादिङ्गितस्यानभिज्ञैः
कृष्णस्तुष्णीं पुरपरिजनैः सेव्यमानो दुनोति ॥ ११४ ॥
सोढव्यं ते कथमपि बलाच्चक्षुषी मुद्रयित्वा
तीव्रोत्तापं हत मनसिजोद्दामवि[illegible]न्तचक्रं ।
द्वित्रैरेव प्रियसखि दिनैः सेव्यतां देवि शैव्ये
यास्यामि त्वत्प्रणयचटुलभ्रूयुगा[illegible]म्बराणां ॥ ११५ ॥
इत्थं तासामनुनयकलापेशलः क्लेशहारी
सन्देशं मे कुवलयदृशां कर्णपूरं विधाय ।
त्वं मच्चेतोभवनवडभीप्रौढपारावतीं तां
राधामन्तःक्लमकवलितां संभ्रमेणाजिहीथाः ॥ ११६ ॥
सापल्यङ्के किशलयदलैः कल्पिते तत्र सुप्ता
गुप्तानीरस्तवकितदृशां चक्रवालैः सखीनां ।
द्रष्टव्या ते कृशिमकलिताकण्ठनालोपकण्ठ
स्पन्देनान्तर्वपुरनुमितप्राणसङ्गावराङ्गी ॥ ११७ ॥
मालां मैत्रीविदुरमदुरःसङ्गसौरभ्यसभ्यां
वासन्तीभिर्विरचितमुखीं पञ्चवर्णां गृहाण ।
आरूढायाः परि[illegible]तां तादृशीं सारसाक्ष्याः
सा[illegible]ते कः प्रबोधे समर्थः ॥ ११८ ॥
माल्यामोदव्यतिकरव[illegible]वोधितायाः सवास्यं
नेत्र[illegible]न्द्वं दिशि दिशि मुहुर्विक्षिपन्त्या विलक्षं ।

तस्याः प्रोद्यत्पुलककलिकादन्तुरायाः पुरस्तान्
मन्दं मन्दं विनयमसृणस्त्वं विनम्रो जिहीथाः ॥ ११९ ॥
धृत्वा मालां किशलयततेरञ्चले न्यञ्चदङ्गो
भ्रूसंज्ञाभिः सपदि सचिवीकृत्य तस्या वयस्याः ।
दूत्यं स्वस्य प्रणयहृदयस्त्वं निवेद्यानवद्यं
धीमन् सद्यो मम कथयितुं वाचिकं प्रक्रमेथाः ॥ १२० ॥
यः सर्वस्मात्तव किल गुरुस्त्वञ्च यस्यासि धीरे
प्राणेभ्यस्त्वं प्रणयवसतिर्यस्य यः स्यात्तवापि ।
स त्वां धृत्वा मनसि विधुरे हन्त सन्धुक्षमाणः
कृष्णस्तृष्णाचटलचटुलं देवि सन्देदिशीति ॥ १२१ ॥
सख्युर्लक्ष्मीमुखि मतमुरीकृत्य दूरीभविष्णोर्
धत्ते प्राणाननुपदविपद्धि चित्तापि साध्वी ।
मुक्तच्छाया मुहुरसुमनाः क्षौणिपृष्ठे लुठन्ती
वह्नापेक्षं विलसति गते माधवे माधवीयं ॥ १२२ ॥
नीते शोषं विरहरविणा सर्वतो [illegible]तडागे
जाने कण्ठस्थलविलुठितप्राणमीनासि तन्वि ।
दूरे संप्रत्यविरलसुहृन्मारुतैर्वारितोहं
कृष्णाम्भोदो विलसदमृतालङ्कृतः किं करिष्ये ॥ १२३ ॥
नायं स्वप्नो निशि निशि भवेद्यत्तया सङ्गतिर्मे
पश्यामोदं विधुमुखि [illegible]न [illegible]वाधमास्वा[illegible]यामे ।
किन्तु ज्ञातं त्वयि विजयते काचिदाकृष्टिविद्या
यां शंसन्ती हरसि तरसा मामदूराद्यदूनां ॥ १२४ ॥

लब्धान्दोलः प्रणयरभसादेष ताम्रोष्ठि नम्रः
[illegible] किमपि भवतीं याचते नंदसूनुः ।
प्रेमोद्दामप्रमदपदवी साक्षिणी शैलकक्षे
द्रष्टव्या ते कथमपि न सा माधवी कुञ्जवीथी ॥ १२५ ॥
विंदन् वंशीस्फुरितवदनो नेचवी[illegible]मकस्मात्
अन्तर्बाध कवलिताधियो धातुभिर्धूमलोहं ।
क्रीडाकुञ्जेलु[illegible]तवपुषः स्वान्तमानंदधारा
कल्लोलैस्ते रहसि सहसोत्फुल्लमुल्लासयिष्ये ॥ १२६ ॥
प्रेमोन्माहादहमधिवहन् वास्पधारामकाण्डे
गण्डोत्सङ्गे स्मरपरिभवैः पाण्डुरे दत्तचुम्बः ।
कुर्वन् कण्ठग्र[illegible]विलासितं नंदयिष्यामि सत्यं
सान्द्रेण त्वां सहचरि परिष्व[illegible]वेन ॥ १२७ ॥
इत्थं तीव्रव्यसनजलधेः पारसीमामिवासां
संदेशैर्मे धृतगरिमभिर्दर्शयन् दूरदर्शी ।
भूयः कुर्वन् कुवलयदृशां तच चित्त[illegible]नुकूलं
कालं कञ्चित् त्वमतुलमते गोकुलान्तर्नयेथाः ॥ १२८ ॥
गोपेन्द्रस्य व्रजभुवि सखे केवलं य[illegible]चया ते
नार्थः सिद्धेन्मम वहुमतः किन्तु वाढं तवैव ।
प्रेमोल्लासं परिकलयतां गोपस[illegible]मन्त्रिनां[illegible]नां
स्मर्तव्या मे सपदि भवता भारतीसारतेयं ॥ १२९ ॥
गोष्ठक्री[illegible]डो[illegible]नसो निर्व्यलीकानुरागात्
कुर्वाणस्य प्रथितमथुराम[illegible]ण्डले ताण्डवानि ।

भूयोरूपाश्रयपदसरोजन्मनः स्वामिनोयं
तस्योद्दामं वहतु हृदयानंदपूरं प्रवन्धः ॥ १३० ॥
श्रीदामाद्यैः शिशुसहचरैर् वाल्यखेलामकार्षीत्
गोपालीभिः सह युवति भीर[illegible] चकार ।
दुष्टान् दैत्यानपि वहुतरान् [illegible]लया यो [illegible]घान
स श्रीकृष्णस्तरुणकरुणस्तारयेद्वो भवाब्धिं ॥ १३१ ॥

इत्युद्धवसन्देशाख्यप्रवन्धः समाप्तः ॥

## उद्धवदूतः ।

गोपीवन्धोरनवधिकृपादाक्ष्यदाक्षिण्यसिन्धोर्
आदेशेन प्रणयपटुना प्रापितं गोकुलाय ।
गोधुग्वृन्दव्यसनविसरालोकदुःस्थं रहस्थं
मध्येकृत्य प्रियसहचरीमुद्धवं काचिदूचे ॥ १ ॥
कस्त्वं साधो कुवलयदलश्याम विस्तीर्णदृष्टे
दृष्टे सद्यो भवति भवति स्निग्धमत्यन्तमन्तः ।
किम्वा प्रश्नैरहह मथुरानाथभुक्तं तदेतत्
यत्ते मौलौ कनककपिशं सौरभोद्गारि वासः ॥ २ ॥
तत् त्वं तत्त्वं मधुपुरपतेर् लब्धलोभ्यप्रसादस्
तद्विश्रम्भस्थलमतिमहन्नेह सन्देहलेशः ।
वक्ष्यस्येतन्मम च किमिदं कथ्यते दृश्यते वा
जातं यस्मादखिलमधुना हन्त हास्यास्पदं नः ॥ ३ ॥
प्रस्थानं ते भवतु भगवन्नच वाप्यन्यतो वा
गम्भीरत्वं भजतु स भव ।नित्यमुत्तानतां वा ।
यद्वा तद्वा भवतु विधिना वञ्चितेयं वराकी
यत्ते विज्ञापयति निमिषं पातनीयोच कर्णः ॥ ४ ॥
कैषा योषित् प्रकृतिचपला पामरी कातरा च
ज्यायान् यातो यदुकुलपतेर्वल्लभत्वं क च त्वं ।

विज्ञप्तौ मे तदपि भवता भव्य नोदासितव्यं
सानुक्रोशं वहति हि मनो दुर्गते दुर्जनोऽपि ॥ ५ ॥
त्वं कल्याणी नन कुलवधूः सार्द्धमन्येन पुंसा
संलापस्ते सपदि समुदाचारसेतुं भिनत्ति ।
जल्पन्नेवं नहि जहि घनश्यामदास्योन्मदानां
लोकातीतं किमपि चरितं केन नालोकितं नः ॥ ६ ॥
अब्रश्यामं स्मरसि न मनागित्यमुद्भाषिणीनां
प्राणत्राणप्रवणमनसो गोदुहो गेहिनीनां ।
एताः शश्वत्कुसुमशयने शाययित्वा सखीव
मन्दं मन्दं सरसविसिनीपल्लवैर् वीजयन्ति ॥ ७ ॥
[illegible]घ्रप्रभृतिभिरपि प्रेक्ष्यमाणाः प्रवासैर्
आक्रन्देषु प्रखरकुररीसंसदं शिक्षयन्त्यः ।
एकाकिन्यस्तरुणतिमिरास्तत्पदस्पर्शपुण्ये
वृन्दारण्ये कति युवतयो यामिनीर्यापयन्ति ॥ ८ ॥
पश्यन्नक्षिद्वयमविरलस्यन्दमानास्रुधारा
क्लिन्नाभोगं मम च किमभूर्लङ्घितो विस्मयेन ।
गोगोपानां विरमतु कथा नेह भीरस्ति गत्वा
शारङ्गाणामपि वनजुषां पश्य कीदृक्षमक्षि ॥ ९ ॥
राधे मन्युं परिहर हरिः पादमूले तवायं
जातं दैवादसदृशमिदं वारमेकं क्षमस्व ।
एतानाकर्णयसि नयवन् कुञ्जकीरानुवादान्
एभिः क्रूरैर्वयमविरतं वञ्चिता वञ्चिताः स्म ॥ १० ॥

त्वञ्चेदञ्चैरिह विमुखतामत्र वाले तमाले
प्राणान्मोक्ष्ये वनलतिकया कण्ठमुद्बध्य सद्यः ।
आतङ्को वा कइह भवतां सेवकास्तस्य यूयं
यस्योद्देश्यं न खलु किमपि स्त्रीवधादन्यदस्ति ॥ ११ ॥

पीतप्राणा ऽयममुना पूतना स्तन्यदात्री
देहस्यान्तं कति न गमिता वेणु गीतेन गोप्यः ।
तस्य प्रीत्या जगति विदितं यत् कृतं यज्ञपत्ना
स्वातन्त्र्येण प्रविशति मनस्तत्र तत् किं करोमि ॥ १२ ॥

अश्रुस्निग्धं नयनयुगलं रूढरोमाञ्चराजि
प्रत्यङ्गं ते तदलमनया देव दुःशङ्कया नः ।
एतद्दीनोद्धरणपटवे तुभ्यमभ्यर्थनीयं
मत्सन्दिष्टं मुदिर महसि प्रेयसि प्रापयेति ॥ १३ ॥

नन्दो न त्वां त्यजति निमिषं नापि देवी यशोदा
श्रीदामाद्या अपि न शिशवो नापि पौराःसदाराः ।
स त्वं लब्धो रहसि च मया केनचिन्नापि दृष्टस्
तत्कीर्तिं किमपि सुकृतं शिष्टमस्माकमास्ते ॥ १४ ॥

द्विचानचावससि दिवसानि चदं घोषभर्त्तुस्
तेनाशङ्के पुरमिदमात्ते प्रेषितो माधवेन ।
एतद्वीजं किमपि बहुधा मद्विधा भावयन्त्यस्
तस्यानत्यं किमपि न पुनः कृत्यमालोकयन्ति ॥ १५ ॥

तेन प्राप्तौ सपदि जनकौ पोषकाभ्यां किमाभ्यां
किं गोरक्षैः सखिभिरधुना राजपुत्राः सखायः ।

तस्य द्वारे कति करटिनस्तर्णकादेःक्व चिन्ता
हन्ताभीरी स्मरतु स कथं संवृतो नागरीभिः ॥ १६ ॥
आस्तामेतन्मम किमनया कूटकृत्यानुवृत्त्या
सारं फल्गु प्रियमथ परं पथ्यमन्यादृशं वा ।
धर्माधीनैरिति मम वचः पुण्डरीकाक्षसाक्षाद्
आख्यातव्यं यदनुकरणे कुचचिन्नैव दोषः ॥ १७ ॥
।व ख्यातोऽभूद्दिनकतिपयं नन्दसूनुर् यसोदा
नेत्रानन्दी व्रजजनपतिर् वल्लभो वल्लवीनां ।
अद्य ख्यातो मधुपुरपतिर् माधवीप्राणनाथः
सूनुः सौरेरगणितगुणो [illegible]न्दनोसि ॥ १८ ॥
गो[illegible]पूड्वाप्विव तव समो भोगकालः कलानां
भर्तुः [illegible]रिवासीत् ।
तासां मध्ये तदपि रमणी रोहिणीव प्रसिद्धा
सा त्वां नत्वा रहसि परमाकिञ्चना किञ्चिदाह ॥ १९ ॥
इत्यचत्यैरुपधिभिरपि स्निग्धसम्बोधनं ते
जायेतारुन्तुदमुदयिनी रीतिरन्या[illegible] यद्वः ।
प्राक्संस्कारास्तदपि यदि मां तेनूवधन्ति दोषः
[illegible]ऽयं भवतु भवता वाचिकप्रक्रियासु ॥ २० ॥
वाक्चातुर्यं त्वयि वत वृथा सन्ततान्त[illegible]रेण
ज्ञातं चेतश्चरितमखिलं मन्मथेन त्वया च ।
विज्ञप्तिर्मे तदपि मथुरानाथ नेयं विरुद्धा
संतप्तादेर्वचसि विदितं पौनरुक्तं न दोषः ॥ २१ ॥

गोरक्षत्वं समजनि यदा तावकीनं तदैव
स्वच्छन्दत्वं तव निरधितं नाथ माभूम शङ्काः ।
वश्यः कस्य त्वमथ जगतानीशिता किन्तु वाचा
माविस्कारैरदयहृदयग्रन्थिमुद्घाटयामि ॥ २२ ॥
किन्ते जन्मान्तरमुपगतं पारसञ्चारकाले
धौतं नद्याः किमिदमथवा कार्मणीमाथुरीणां ।
विस्मर्तव्यं यदिह न तनौ यच्च वन्धः पशोर
प्यच प्रेम्णि क्षणकतिपयैर्नाथ निर्लेपकोऽसि ॥ २३ ॥
कर्ता कृष्णो नियतमधुना गोकुलं राजधानी
बन्धुभ्योपि प्रगुणममुना गाढ़ं हो गदर्णियाः ।
काचिद्गोपी भवति महिषीत्युक्तमग्रे नवा कैः
तद्दैदग्धेन तु पितवनप्रेतवत् कारिताः स्मः ॥ २४ ॥
नीतेनामन्यपि च भवतः प्रस्नुवाना स्तनाभ्यां
विभ्रत्यङ्के पुलकिनि भवद्देणुवेत्रप्रतोदान् ।
सोरस्ताडं न वहतु तवाक्रन्दमम्बा कथं वा
यस्मादद्य प्रशमितपरो राजराजेश्वरोसि ॥ २५ ॥
तैस्तैः हैः क्व खलु चलितं कुत्र ते नर्मवादाः
कण्ठो भग्नः करुणकथैस्तात तातेति शब्दैः ।
पर्वन्नन्तः किमपि विरजन्नाममात्रानुकारी
पितुस्ते तमपि हतवान् नन्दमस्पन्दमेव ॥ २६ ॥
दोहः प्रायो न भवति गवां दामनं भिन्नपाकः
क्षीराणां स्यात् स भवति यदा दुर्लभं तद्दधित्वं ।

दध्नः सिद्धौ क्व खलु मथनं मन्थने क्वोपयोगस्
तक्रादीनामिति गतिरभूदद्य गोधुग्गृहेषु ॥ २७ ॥
तन्न क्षौणीखुरविलिखनं वप्रभङ्गो न शृङ्गैर्
नैवास्पर्द्धो नवजलमुचां घोरहम्बानिनादः।
कामोन्मादैरुदयति न वा सोपसर्या सपर्या
नामावाहा मधुपुरपथादन्यदालोकयन्ति ॥ २८ ॥
वत्सालोकस्मरणसुलभप्रस्रवस्रावनीयं
धूलीजालं नयनसलिलैरध्वसु स्नावयन्त्यः।
त्वामन्विष्य व्रजपुरसरित्तीरभूषु भ्रमन्त्यः
सद्योजातानपि सुरभयो नार्भकान् पाययन्ति ॥ २९ ॥
निष्प्रेमाणो ललितयवसश्यामसीमन्यरण्ये
न्यस्य न्यस्य त्वदनुसृतये चक्षुषी दिक्षु दिक्षु।
आजिघ्रन्ति व्यथितमनसः किञ्च सिञ्चन्ति वास्रैः
क्रीडानीपं तव यदुपते वत्सला वत्सतर्यः ॥ ३० ॥
भास्वत्कन्याकमलविपिनं कर्णिकाशेषमेतद्
वृन्दारण्यद्रुमकिशलयः पाण्डुपत्री भवन्ति।
शस्यैः पङ्कैः पिहितमभित [illegible]सानुकूलं
मूलं धत्ते स तव कमलाकान्तकेलीकदम्बः ॥ ३१ ॥
ये वै गोवर्द्धनधर तव स्निग्धगम्भीरघोषैः
केकावाचस्तिमितनयनास्तेनिरे ताण्डवानि।
अद्य प्रावृड् [illegible]नघटागर्जितेऽपि प्रवृत्ते
भुग्नग्रीवाः किमपि नहि ते पुच्छमुल्लासयन्ति ॥ ३२ ॥

यस्य स्कन्धोमसृणसुरभिस्तारकैरङ्गसङ्गैर्
यत्रास्माकं सिचयनिचयं चोरयन्नुद्गतोसि ।
यस्याधस्तात्तव चरणयोश्चक्रचिह्ना धरित्री
धन्यो नीपः समभवदसौ देव दुग्धं दृशौ नः ॥ ३३ ॥
पाण्डुच्छायाः कुसुमरजसा भृङ्गमाला जटालाः
संवीताङ्गाः किशलयरुचा पाटलेनाम्बरेण ।
भोगाभावादपगतरुजः पावनाभ्यासभाजः
सर्वे वृन्दावनविटपिनो योगिचर्यां चरन्ति ॥ ३४ ॥
शृङ्गस्वानप्रियसखसमभूतिपीरक्षहिक्काः
प्रत्याख्याय व्रजपुरपथस्योपकण्ठे विशिष्य ।
श्रोतद्वास्याः सहसुरभयस्तोककण्ठादयस्ते
सायंः प्रातर् नगरसरणौ चौरवत् सञ्चरन्ति ॥ ३५ ॥
विस्मृत्य त्वन्मधुपुरगतिं वासरान्ते पुरान्तः
श्रीदाम दौ विशति विशती हस्तहैयङ्गवीना ।
वत्स क्वासि क्व च मम सुतेत्युन्मदेव भ्रमन्ती
त्वामप्राप्य व्रजपतिवधूः क्रन्दयत्यश्मनोपि ॥ ३६ ॥
वीतासङ्गाः शयनवसनस्नानपानाशनादौ
गायन्त्यस्त्वच्चरितगुणिताः सन्ततं गीतगाथाः ।
औदासीन्यं किमपि सकला वन्धुवृन्दे वहन्त्यो
गोप्यो लीलाक्षितिषु भवतो योगिनीवत् भ्रमन्ति ॥ ३७ ॥
स्वार्थं नैतत् समुचिततया वच्मि कम[illegible]
सत्त्वं यस्मिन्नजनि समये नाथ यातः सकालः ।

अद्य त्र्यस्यन्त्रिभुवनवशीकारमाधुर्यधूर्यैं
त्वच्चातुर्यैं न भवति यथा लाञ्छनं तद्विदध्याः ॥ ३८ ॥

एकैकाभिर्विहितमसकृत् तत्तवेह्यानुगत्यं
यस्मै कस्मिन्नपि गणयति क्रीतमात्मानमन्यः ।
धिग्वैदग्ध्यं तव तदिह ताः सिन्धुपारे विहाय
स्मैरी वैरी परमइव यन्निर्भरं निर्वृतोसि ॥ ३९ ॥

कूलक्रोडे तपनदुहितुश्चालपङ्के निमग्नं
यत्नादुत्थापितमथ कृतोपस्क्रियं कौशलेन ।
न्यस्तं पीठे तव चरणयोश्चक्रचिह्नं पदं तत्
शालग्रामोपलमिव सदा मद्विधाः पूजयन्ति ॥ ४० ॥

युक्ता सर्वात्मनि मयि मनः सच्चिदानन्दरूपे
चेतस्तापं जहित न हितः कश्चिदेवाङ्गसङ्गः ।
इत्युद्देशान् कथयसि वृथा मादृशां वालिशानाम्
एते हि त्वद्विरहशिखिनः सामीधेनीं भजन्ति ॥ ४१ ॥

वेशे वाम्यं तदपि मुदिरश्याम सावर्ण्यतस्ते
मुग्धा हस्ते मरकतमयी कङ्कणश्रेणिरीदृक् ।
अङ्गालेपो मृगमदरसैः स्निग्धनीलं दुकूलं
सर्वाङ्गीनं व्रजपुरजुषामङ्गनानामिदानीं ॥ ४२ ॥

साक्षादीक्षां घटयति घनश्याम यत्ते कुतस्तत्
तल्लावण्यं कथय कृतिना केन चित्रेण लेख्यं ।
अक्रूरस्यागमनदिवसान्निद्रया नाथ नष्टं
क्व स्वप्नः शिव शिव दृशौ वास्पदृष्ट्यै परं नः ॥ ४३ ॥

दत्तस्वप्नो भवसि यदि मे दर्शनीयः कदाचिद्
वर्हापीडं मधुरमुरलीधाम तद्धाम दध्याः ।
अस्मादन्यद् यदि वितनुषे दीयते दिव्यमुग्रं
पादस्पर्शः पुरम्रुगदृशां दुर्लभस्तत्तव स्यात् ॥ ४४ ॥
मद्भावेन स्थिरमथ चरं भावयन्त्यो भवत्यः
सन्तुस्यन्तु त्वमिति वहुधा सत्वमस्मानवादीः ।
आख्यातव्यं किमिह भवतः किञ्चिदूनो नवासौ
नैवास्माकं मदयति मनो नामनीलाम्बरोपि ॥ ४५ ॥
व्यक्तीभूतः स्वयमयमसि श्लाघनीयः समृद्ध्या
ऋज्वीषु त्वं कथमिह परीतोषमस्मासु यायाः ।
तत्तद्वन्धुप्रकरपुरतस्तत्र कापि चिवक्रा
धृत्वा यत्त्वामधिनिवसनं नाथ निघ्नी चकार ॥ ४६ ॥
गव्यस्तेन प्रथममुदभूर्वत्सपालस्य पश्चात्
तक्रेदानीं तदनु तदनु छिद्रनौकर्णधारः ।
लुण्ठाको भूदथ कुलवधूजातिजीवार्थसार्थ
धिग्धातारं भवति निहितो येन भूचक्रभारः ॥ ४७ ॥
भक्तिप्रीतिप्रणयसहितं मानदम्भाद्यपेतं
चेतोस्माकं गुणवदगुणं गोदुहां देहमेतत् ।
विक्रीतं ते युगपदुभयं स्वीकृतञ्च त्वयाथो
हृन्नृह्णासि त्यजसिच वपुर्नाथ कोयं विचारः ॥ ४८ ॥
यत्राधर्मः प्रसवतितरां यत्र भूयाननर्थो
यत्राकामः सपरमदयी यत्र ते नास्ति मोक्षः ।

त्यागे तस्मिन्नपि परिजने गोचरे यत् त्वनर्थी
तस्मादर्थी भवति विदूषां पौरुषव्यत्ययोपि ॥ ४९ ॥
शैलोद्धर्ता दमितभुजगः पीतदामाभिच[illegible]ो
माद्यन्नागायुतवलगजाधीशभोजेन्द्रहन्ता ।
स त्वं दोषेष्यसति कुरुषे किङ्करीणामभद्रं
वक्तुं नास्ते जनइति न भोः कर्तुमेवं युनक्ति ॥ ५० ॥
लोकातीतं यदिह कुरुते कर्म किं धर्मधारा
तेन त्याज्या किमि[illegible] विहितं श्रीमता राघवेन ।
त्यक्ता सीता तदपि सुचिरं सैव हैमी प्रियाभूत्
त्यक्ता यस्मिन्नहनि तु वयं तत्र कुब्जारतोसि ॥ ५१ ॥
व्यावर्तध्वं स्वभवनमितः कुत्र रे यात मुग्धा
त्वञ्चीरद्य स्पृशतु सकथं वल्लभः कुब्जिकायाः ।
संभूय त्वच्चरणकमलस्पर्शलोभेन यान्तीर्
इत्थं गोपीः पथि पथि वलादध्वगा अप्यरुन्धन् ॥ ५२ ॥
पीयूषात्मा तव कुलगुरुर्जन्मदातावदातो
माता याभूदियमपि जगत्पावनीति प्रसिद्धं ।
एकैकान्ते जयति जगदानन्दि चित्रं चरित्रं
कस्मादेवं विरहदहने देव दासीर्जुहोषी ॥ ५३ ॥
स्वामी वामी भवति यदि तत्सन्निधौ सञ्चरिष्णुः
पथ्यं प्रत्यापयति समयः सोयमीशानयानां ।
लोकद्विष्टं किमपि भवते कुर्वते युक्तवादी
साधुस्तस्मिन् किमु मथुरामण्डले कश्चिदस्ति ॥ ५४ ॥

येनागत्य त्वमपि मथुरां यानमारोप्य नीतो
यश्चाविष्टस्तव चरणयोश्चक्रचिह्ने लुलोठ ।
अस्माकं त्वद्गमनसमये सा दशा येन दृष्टा
सोऽपि स्वामिन् किमपि करुणाकातरो न ब्रवीति ॥ ५५ ॥
अस्मन्मर्मच्छिदुरमकरोत् कृत्यमत्युत्कटं यत्
कंसस्तेन त्रिभिरपि दिनैस्तत्फलं साधु लेभे ।
त्वामुत्थाप्य त्वरिततुरगं येन यानं वितेने
किञ्चित्तस्य प्रभुवर कुतः श्रूयते नाधुनापि ॥ ५६ ॥
श्यामं तेजः प्रतिफलितमलत्वेन संक्रान्तसर्वं
प्रत्यक्षञ्च व्यवधिवहुलं विश्वरूपप्रकाशि ।
आन्ध्यं जन्मावधि जनयताशेषलोकैकरत्नं
हाहा तेन त्वमपि मुषितं तारकं चक्षुषो नः ॥ ५७ ॥
सूक्ष्मं सूक्ष्मादपि च कलयन्नन्धवच्चेष्टते यो
नान्ध्यं तस्मात्तिरयति रसैरश्विनीनन्दनोऽपि ।
विज्ञोत्तुं सत्त्वमपि रचयन्नेवमङ्गव्यवस्थां
वक्रीकार्यः कथमिव वृथा किं परं दूषयामि ॥ ५८ ॥
तत्ते चित्तं शरणमपि नः सर्वतो भद्ररूपं
व्यावृत्तास्मान् वसति वलवन्नागरीवृन्दमत्र ।
वैदग्ध्यं ते किमिदमधुना तद्वहिर्वीथिकान्ते
वासोरासोत्सवनट विभो दुर्लभो यन्ममापि ॥ ५९ ॥
किं नो वृष्ट्या न किमशनिभिर्भूभृता वाहताः स्म
किं न प्रष्टादवहुतवहैर्दंशिताः किं न सर्पैः ।

प्रेम प्रौढं किमपि जनयन्नव्यलीकाश्च मुञ्चन्
अञ्चन्नेवं कथमपयशो घोरमङ्गी करोति ॥ ६० ॥
अस्मत्प्राणास्तव पदनखच्छायनार[illegible]य
तं यातोभूः सपदि यदि ते यान्ति को वा विषादः ।
एकं किन्तु व्यथयति मनश्छद्मना किङ्करीणां
प्रा[illegible]शे यदुपतिरितित्वन्नता किं वदन्ती ॥ ६१ ॥
सङ्कोचो य स्तव गुरुजने यश्च पौराङ्गनासु
व्यक्तीभूतं तदुभयमभूत् कुब्जिकोपग्रहेण ।
अस्मानेव क्षिपसि सहसा देव दूराद्दवीयः
कर्तुं यः पारयति स कृती किं करोत्येवमेव ॥ ६२ ॥
एतस्मादप्यधिकमधिकं यत्तदस्मासु कुर्या
न स्वप्नेपि त्वयि विसदृशं चिन्तयत्येतदन्तः ।
दन्ते कृत्वा तृणमिति महासभ्यमभ्यर्थयामि
स्वामिन्नेवं नहि मधुपुरीं क्षीणमध्यां विदध्याः ॥ ६३ ॥
द्रोणीरादौ मलयजयुता शोचिताः सञ्चिनुध्वं
वापीर्निघ्नी कुरुत शतशो लालशैवालपूर्णा ।
सख्यं सख्यो यदि यदुपतौ पातनीयं तदेति
प्रेष्यो वश्यो मिलति यदि तन्माथुरीर्वेदयिष्ये ॥ ६४ ॥
सौभाग्येन ब्रजकुलवधूसार्थसीमन्तरत्नं
या कंसारेरतिगुणवती स्कन्धमप्यारुरोह ।
सेयं राधा किमिदमिति मामुद्दिशन्त्यङ्गुलीभिः
लोकानोच स्वलितनयनाः शाखिनो रोदयन्ति ॥ ६५ ॥

यो विद्यायां तपसि भवतो ज्येष्ठएवादेदेवे
माद्यन्मायाविभव भवता वञ्चितः सोपि दृष्टः ।
या त्वामम्बा शरणमविश ञ्चकश्चापि तस्यास्
त्वामुद्दामा कथय न कथं लोकलज्जा रुणद्धि ॥ ६६ ॥
आदावेव क्षणसुखकरं कृष्ण कल्पान्तभोग्य
क्लेशारम्भि त्वयि मम महत् पातकं प्रेम मन्ये ।
प्रायश्चित्तं भवति नच मे दुर्गताया विधेयं
तेनैव त्वामहमविरतं सानुतापा स्मरामि ॥ ६७ ॥
मातुर्नापि स्मरणम ता लक्षितं लौकिकं ते
धर्माधीनो यदसि तदपि व्यक्तमेतावतैव ।
किञ्च ब्रूते तव रसिकतां निग्रहः कामिनीनां
को जानीते कितव भवतः कुत्र तात्पर्यमस्ति ॥ ६८ ॥
तत्त्वज्ञानं कथय शतधा प्रेषय प्रेषलक्षं
चिन्तारत्नं वितर कुरु वा सानुतापप्रसङ्गान् ।
यावद्दोर्भ्यां तव नवघनश्यामलं धाम गाढं
नाश्लिष्यामि त्रुटति नहि मे तावदेवैष तापः ॥ ६९ ॥
लक्ष्मीकान्तं कतिचन चिदानन्दमन्ये विदुस्त्वां
मायाकारं कतिचि प साधकाः सिद्धिमाहुः ।
योवाण्योवा भव नवघनश्याम तस्यैव धाम्नो
दासीभूता वयमिति परे वन्ध्यकल्पा विकल्पाः ॥ ७० ॥
नायासि त्वं नच नयसिमामात्मनः पादमूलं
नोवा दूतं विसृजसि नवा लेखलेशं ददासि ।

निश्वासाग्निर्निपतति न ते काचिदाश्वासवार्ता
कस्मिन्नास्थामुपहितवती जीवितं धारयामि ॥ ७१ ॥
यत् पूर्वेद्युर्गमनदिवसान्मानभङ्गाभिलासी
लक्ष्मीकान्त त्वमपि पतितः पादमूले ममासीः ।
स्पृष्टोऽङ्गुल्या तदपि न मया नापि नेत्रान्तपीतं
चित्ते शैल्यं सविषमिव तन्मामके मग्नमस्ति ॥ ७२ ॥
को जानाति त्वदपहरणक्रूरमक्रूरमाप्तं
कः प्रत्येति त्वमपि सहसा गोकुलं त्यक्ष्यसीति ।
त्यक्त्वा नायास्यसि पुनरिदं नाथ केनाशुमेयं
मद्दुर्दैर्वान्यहह सुमहादुर्घटं साधयन्ति ॥ ७३ ॥
भूयस्त्वञ्चेन्मिलसि महिलासंप्रदायं विहाय
द्वाभ्यां दृग्भ्यां युगपदपि तद्रूपमादौ ग्रहीष्ये ।
आश्लिष्य त्वामहह तदनु स्पन्दसंबन्धहीना
कल्पक्रूरामपि निमिषतां यामीनीं यापयिष्ये ॥ ७४ ॥
यच्चाकाले कथमपि चलन्न् पताकाराज
व्यस्तन्यस्ते न च सुरुचिरं रोचनाचित्रकेन ।
आशीर्दुर्वाक्षतचितमनुस्मर्यमाणं सुखं ते
सर्वक्लेशापहमपि जगन्नाथ मर्म छिनत्ति ॥ ७५ ॥
न स्मर्तव्यस्तदयमदयः कर्हिचिद्बर्हचूडो
निश्चित्येति स्पृहयति मनो यावदर्थान्तराय ।
किं ते वैरं विहितमवरे कृष्ण कृष्यान्नवान्त
धारावाहिस्मरणपदवीं गाहसे तावदेव ॥ ७६ ॥

गुञ्जाहारं कतिचन तदापच शृङ्गाणि केचित्
केचिद्वर्हन्तवकमपरे वेचमन्ये प्रतोदं ।
वंशीं काचित् त्वदधरसुधासारसौरभ्यलभ्यां
निन्युर्धन्या निजमविदुषी दीर्घमायुर्मृतास्मि ॥ ७७ ॥
आयास्यामि स्वयमिति पुरः प्रस्थितौ यत् त्वयोक्तं
मय्येवाश्रुप्लुतमिव तदा नाथ निःक्षिप्तमस्मि ।
आस्थामच प्रणिहितवती प्राणिनीप्राणवन्धो
चिन्तावन्धोभवदथ भवेः सत्यसन्धो न वेति ॥ ७८ ॥
सेयं सिन्धुर्विकचकमलाकाननं फुल्लमेतन्
नीपश्चायं कुसुमनमितः श्रूयते भृङ्गगीतं ।
स त्वं साहं स च रतिपतिः किं वदामः परन्ते
भावाभिन्नः सपदि विदधे सर्वमन्याहगेव ॥ ७९ ॥
योषिल्लक्षं रमय दमय द्वेषिणो दुर्विनीतान्
सम्राडेधि प्रणयसुमुखो वन्धुवृन्दं पुराणं ।
क्लेशानेषा वहतु वहुशः कान्त किं तेन वार्तां
कल्यानींते भवतु मम तु श्रोतुमेवेदमायुः ॥ ८० ॥
यत्तन्मेस्तु त्वयितु चरितं युक्तिवर्त्मव्यतीतं
संपश्यन्ती किमपि किमपि प्राणवन्धो विभेमि ।
दीना याचे विधिमहमतस्त्वत्कृते मन्त्रयन्ते
यद्गर्गाद्याः किमपि निपुणं तद्वचः सत्यमस्तु ॥ ८१ ॥
आगः कस्मिन्नहनि न कृतं तिष्ठतापि त्वयेह
प्रस्थानेन प्रकटितमथ वीर वैरं वरीयः ।

रूक्षत्वं नो न जयितुमियानेव यत्नस्तवाभूद्
एतच्चेतस्त्वयितु न गुणादन्यदङ्गी करोति ॥ ८२ ॥
तुभ्यं दातुं विषमुपनता पूतनाघानि युक्तं
वि[illegible]पि समुचितो [illegible] पूरुषेषु ।
अन्नायोषित् प्रकृतिकृपणानन्यवृत्तिश्च याते
तच्चोन्माथे किमपयशसः पातकाद्वान्यदस्ति ॥ ८३ ॥
संभोग्योभूद्दिनकतिपयं मादृशीनामथ त्वं
माथुर्यश्चेद्दिनकतिपयं भुञ्जते सह्यमेतत् ।
अस्माभिर्यो भवदनुभवः सोपि सर्वात्मना यन्
निःसंस्कारः समजनि मनो दग्धमेतावतैव ॥ ८४ ॥
तुल्याकारं समनु भवतोरत्र दुःखं सुखञ्च
क्रीडाकारी त्वमहमिति नो शब्दभेदोपि जातः ।
स त्वं योषित्कुलरतिगुरुः साहमेवं वराकी
सा किं नाहं त्वमसि न स किं नाथ किं जातमेतत् ॥ ८५ ॥
धैर्या काचित् कतिचन सखी शिक्षया लज्ज[illegible]न्ये
भीत्या काचित् कतिचन रुषा का[illegible]तोपि ।
स्वाधीनेपि त्वयि रतिगुरौ केलिकुञ्जावलम्बिन्य्
अस्वाध्यायाः कति कति निशामादृशामत्र नासन् ॥ ८६ ॥
दूरं दू[illegible] च विषमं कश्चिदेत्य प्रहारं
कुर्वन्नेकं पशुमिव जगन्नाथ किं नावधीर्मां ।
वाटीसीमप्रसरणपटुः श्रूयमाणैरजस्रं
किं दुःशीलप्रहरणशतैरङ्गमङ्गं लुनासि ॥ ८७ ॥

सोढव्यस्ते सकलमधुना संभृतब्रह्मचर्या
राजर्षित्वं कलयसि यदि स्वीयवंशानुरूपं ।
लक्ष्मः श्रोणिः पुरयुवतिषु श्रूयमाणा नवीना
किं कुर्यामः स्पृशति हृदयं शाशिता सर्वलेव ॥ ८८ ॥
यान्ति प्राणा नहि वहिरमी नुद्यमानाश्च गाढं
सत्यं गत्यन्तरमपि न मे किञ्चिदस्ति श्वसत्याः ।
मग्नं चेतः कुलिशकठिने त्वय्यनुद्धार्यमेतत्
तेनैवाहं भवदनुगतिं सुस्थिता किं करोमि ॥ ८९ ॥
किं नो दण्डप्रहररजनीपक्षिणी पक्षरीत्या
स्फीतस्फीतां विरहविपदं साहयन्मामहासीः ।
दत्तो यस्यै न खलु निमिषो दृष्टिविघ्नोपि तस्यै
दूरस्थित्यै वितरसि विभो यौगपद्याद् युगानि ॥ ९० ॥
स्वामिन्नेकं वचसि भवतः स्वान्तविश्रान्तमन्यत्
कर्मण्यन्यन्मुहुरिदमभिव्यक्तमन्धोपि वेद ।
भूयो भूयस्तदति मुषिता नाम गृह्णामि किं ते
तिष्ठत्यस्मिन् जगति यदि नो जीवनस्थानमन्यत् ॥ ९१ ॥
त्वत्सेवासु स्खलनमभवन्मादृशः कस्य किम्वा
सेवाधर्मो गहन इति यन्नीतिनिष्ठाः पठन्ति ।
तेन त्यागः किमघमुचितो वच्मि सङ्कोचहीना
पान्थो यत्र त्वमसि रसिकैरीक्षितो नैष पन्थाः ॥ ९२ ॥
पाण्डुक्षामं वपुरिदममी कुन्तलाः क्लान्तभासो
वासोप्येवंविधमिति भिदा भिक्षुकीभिः कुतो नः ।

एषा क्रोशाः कतिच मथुरा यामि चेदद्य किं तन्
नेत्रोद्वन्धं न भवति क्षतिः श्रीमुखालोकनाय ॥ ६३ ॥
कुब्जद्वाराद्बहिरपि यदि प्राणनाथ प्रयासि
प्राणैः स्थेयं क्षणमपि तदा नैव मे सत्यमेतत् ।
भूयोभूयो विलुभितवती त्वामिति ध्वस्तलज्जा
दूराद्दूरं कथमतिचिरादाननं दर्शयिष्ये ॥ ६४ ॥
त्वञ्चेदानीं नगरतरुणीसार्थसर्वस्वभूतस्
ता अप्येवं तव किमितरास्तुभ्यमद्य स्वदन्ते ।
अत्यौत्सुक्यात्तदपि भवतः संमुखी वा यदि स्यां
किं स्यादेतन्न खलु निपुणं भावयन्त्यप्यवैमि ॥ ६५ ॥
न स्यादस्या यदि मम तनोः प्रत्यभिज्ञेयता वा
स्यादेवाथ स्फुटमुभयथा मामकीनो विडम्बः ।
आद्ये मासि स्पृशति भवतो [illegible]दास्यमुद्राम्
अन्यत्रापि प्रणयलघुता तादवस्थ्यं व्यनक्ति ॥ ६६ ॥
सांमुख्यं ते भवति यदि मे तद्गृहे वा वहिर्वा
सौजन्येन स्मरसि यदि तत् सा कथा दुर्लभैव ।
पूर्वावस्थास्मरणलघिमा दुर्वारः सभायां ।
शुद्धान्ते चेच्चतुरतरुणीसार्थसौहार्दभङ्गः ॥ ६७ ॥
दूरादेव स्मिततरसुधासिच्यमानाधरौष्ठं
गण्डोदञ्चत्पुलककमलाकारविस्फारदृष्टि ।
एह्येहीति स्वयमशवतः प्रेयसः प्रार्थनं या
लेभे तस्यामनतिशयनी माननैवापमृत्युः ॥ ६८ ॥

रूक्षालोकाः कटुकुवचसः स्वालये सर्वएव
क्षीणासि त्वं कथमिति व ि ग्राम्यवाचो दहन्ति ।
ग्रामस्यान्ते तपनतनयाकूलमुद्यानमूलं
शून्यं लीलाशरणमपि ते कुत्र तन्निर्दृणोमि ॥ ९९ ॥
वैमुख्यन्ते किमपि मदनो माद्यति क्रूरकर्म
नर्मालापेष्वपि कुवचनैर्बाधते वन्धुवर्गः ।
चेतो नाथ त्वयि विनिहितं वाचमुल्लङ्घ्य यासा
मासामुक्तिः स्मितकलुषिता कल्पते किं करोमि ॥ १०० ॥
कुञ्जे कुञ्जे रतिरुपहिता धिक्कृतं धाम धौतं
मग्नं वेणोर्वचसि विहितो वन्धुवाचां विसर्गः ।
दृष्टः स्वामी कपिरिव कृतः प्राणसारोऽसि जारो
हीनोपाया कथमहममूनद्य भूयो नियोक्ष्ये ॥ १०१ ॥
एते नित्यं नवपरिमलोद्गारिणः सन्तु कुञ्जाः
सन्तु क्लेशा नच मम तनोरच वीभत्सभावः ।
एतद्दृष्ट्वा रमयति हरिर्गूढमागत्य राधाम्
इत्यद्यापि ब्रजयुवतयोमह्यमीर्षां वहन्ति ॥ १०२ ॥
राधे राधे कथय कथय त्वय्यसौ नन्दनो मे
वाल्यादेव प्रभृति कुरुते वत्सलो ् त्प्रकाशं ।
द्रष्टव्योऽसौ पुनरपि मया मन्यते कीदृशं वा
मानिन्यम्बा तव च रुदती पृच्छती दंदहीति ॥ १०३ ॥
अत्रागच्छ त्वरितमथवा तिष्ठ तात्राब्दलक्षं
शृण्वन्त्वेते जनपदजना मुक्तकण्ठा ब्रवीमि ।

यामि स्वर्गं निरयमथवा प्राणिमीह म्रियेवा
श्यामादन्यो नहि नहि नहि प्राणनाथो ममास्ते ॥ १०४ ॥
राधावन्धुर्लिखितपठितो विश्रुतो यत्त्वमासीः
साहं साहंकृतिरुदभवं य[illegible]प्रयेति ।
लक्ष्मीकान्त प्रणयसुधया सिञ्च वा मां नवा त्वम्
एतज्ज्ञातं ननु मम जनुर्धन्यमेतावतैव ॥ १०५ ॥
यान्ति प्राणा मम यदि न ते पृच्छनीयः पुरोधा
देया मह्यं किशलयरुचा पानिनैव त्वयापः ।
याचे तच्च व्यवधि[illegible]: क्षालनं क्षारनीरैः
कर्तव्यं ते मधुपुरवभूपादलाक्षारसस्य ॥ १०६ ॥
सीदत्यङ्गं दलति हृदयं किं नु कुर्वन्ति हन्त
प्राणाश्श्यामाश[illegible] मम वधाभद्रभागी त्वमेव ।
हाधिक् कीदृग् वदसि रसने तत्वतो यत्तदास्तां
वन्दीभूय स्वयमिह मया मोचितः प्राणनाथः ॥ १०७ ॥
श्याम श्यामस्मर सहचरी मन्दकारीकृतं मे
केनाकस्माद्भ्रमति भुवनं मज्जति द्यौरवन्यां ।
काहं काहं क्व मम दयितः कुत्र तस्यैष दासो
हा हा हा हा हरि हरि हरि क्षीणमध्य प्रसीद ॥ १०८ ॥
इत्युद्गाहुर् विमलपुलकाकम्पनासन्नकण्ठी
छिन्ना मूले पतति भुवि सा हेमवल्लीव यावत् ।
भृङ्गारैस्तैः शिशिरसलिलैस्तावदेवोद्धवोऽस्याः
सिञ्चन्नास्यं तदुपरि विभोस्तत्सखं दुधाव ॥ १०९ ॥

चक्रे चैतन्मनसि चतुराश्वेटकाश्चक्रपाणेर्
लक्ष्यं यत् स्यात्तदपि यदसौ मामिहैकं न्ययुङ्क्त ।
एतत् सम्भावनसमुचितं साध्वभून्नैपुणं मे
यद्रक्षायामहमधिकृतो नाश्रितेयं मयैव ॥ ११० ॥
सम्यग्जातं सुचिरविरहज्वालया दूयमाना
सेयं साध्वी विशति परमानन्दधामन्यनन्ते ।
मन्त्री वैज्ञानिक इति वृथा मानमासाद्यमाद्यन्
अद्य स्वीयां मतिपरिणतिं बुद्धवानुद्धवोपि ॥ १११ ॥
शृन्वन्नेतन्मधुपुरपतिर्मंस्यते कीदृशं मां
किं वा भावी कथमिव मया द[illegible]र्थतामास्यमस्मै ।
ध्यायन्नेतत् पुलकमुकुलारम्भिसस्पन्दतारं
प[illegible]थन्नस्या मुखमकथयत् प्राणिति प्राणितीति ॥ ११२ ॥
नष्टं प्राप्तं निधिमिव मुखं वीक्ष्यमाणोऽयमस्या
भूयः सिञ्चन्मधुपुरपतेरुत्तरीयानिलेन ।
उच्चैराह श्रुतिपरिसरे किंकरं [illegible]
दूतं राधे त्वयि विनिहितं विद्धिमामु[illegible]वोस्मि ॥ ११३ ॥
सातिस्वादुर्दवथुदमनी तुल्यपीयूषवाणी
वर्णश्रेणिः श्रवणपुटके नान्तरस्या विशन्ती ।
को जानीते किमकृत परं सत्वरं सापि तन्वी
किञ्चिं किञ्चिं कथय कथयेत्युत्थिता कौतुकेन ॥ ११४ ॥
आदावस्यै मलयजजलैर्मर्मरीभूतमन्तर्
म्लानाभोगं नयनपयसः प्रोञ्छनात् साञ्जनस्य ।

किञ्च प्रोतं वहुभिरभितः शुष्कशैवालखण्डैः
सारं शौरेरखिलमपि तद्दर्शयामास भूयः ॥ ११५ ॥
पश्चादूचे पुनरयमिदं चेलवल्लीं धुनानस्
तस्मादस्याः शपथशतकैः सन्निवृत्तः कथंचित् ।
लक्ष्मीर्यस्मान्निवसति वहिस्त्वं तदन्तर्निमग्ना
मन्योरन्यो भवतु विषयः सा किमेवं विधासि ॥ ११६ ॥
धाराबाहि व्यसनकथनाद्भूतवत्याः प्रियायाः
सूक्ता सक्तिव्यवधिभयतो यन्न मध्ये मयोक्तं ।
मौढ्यादेवं मम किमु महानेव न स्यादनर्थस्
तस्यायं चेद्वसनपवनः पावनो नाभविष्यत् ॥ ११७ ॥
यस्ते मग्नो मनसि हृदये यस्य च त्वं विलीना
मन्यन्ते यच्चरणशरणा भूतिमैन्द्रीं तृणाय ।
यस्यालाभात् पुरयुवतयो नालशैवालशय्याः
सूर्या गर्यज्वलितवपुषो यामिनीर्यापयन्ति ॥ ११८ ॥
यस्याद्य त्वद्विरहदहनज्वालया पाण्डुभासो
वासो नीलं गमयति भिदामम्ब नीलाम्बरेण ।
दासो रासोत्सवनटगुरोरस्य सोहं समोहं
स त्वामावेदयति यदिदं मन्मुखेन प्रतीहि ॥ ११९ ॥
दैवादद्य प्रतिपदमितो विश्वतो वन्धुपाशैर्
देहेनैव द्विजपदमनुप्रापितः संयतोस्मि ।
यस्मिन् वाले तपनतनयाकूलकुञ्जान्तराले
चित्तेन त्वं विरमति न मे किन्तु केलीविनोदः ॥ १२० ॥

साक्षादीक्षा न भवतु चिरं चिन्तिता तेन माभूर्
दैवाधीनो गमयति जनः कोपि कुत्रापि कालं ।
बन्धीभूतं मयि तव मनस्त्वय्यपीदं ममेति
द्वाभ्यामाभ्यां मिलनमचिरादावयोः साधनीयं ॥ १२१ ॥
राधे राधे क्व चलसि मनाक् तिष्ठ कल्याणि कुञ्जे
प्रातर्जातं नहि नहि निशा सावशेषाधुनापि ।
इत्यावेशप्रलपितशतंमन्नतं देवि दिग्भ्यः
संप्राप्तास्ते क[illegible]तुममी साक्षिणः सन्ति सभ्याः ॥ १२२ ॥
रुद्धा बन्धुप्रणयपदवी लंघिता लोकलज्जा
मूर्द्ध्नि न्यस्तं पदमयशसः शङ्कितो नापमृत्युः ।
मामाराद्धुं किमिव न कृतं दुष्करं त्वादृशीभिस्
त्यक्त्वा युष्मान् मम यदुपतेरद्य राज्यं धिगस्तु ॥ १२३ ॥
रम्या हर्म्यावलिरियममी बन्धवः सानुबन्धाः
निर्वैरेयं जयति नगरी गुंफिता नागरीभिः ।
एषा सम्पत् किमिह न सुखं किन्तु कान्तारकुक्षौ
युष्माभिर्यः समजनि स मे दुर्लभो हृद्विनोदः ॥ १२४ ॥
नोपष्टम्भो गुणवति तव स्यादयं [illegible]नीं
नाहं नासावतिनवघनश्यामलो देहबन्धः ।
दुःखं क्वापि क्वचिदपि सुखं यच्छसि क्वापि मोहं
सर्वत्रैवं स्फुरति मम तु त्वन्मयी सृष्टिरेव ॥ १२५ ॥
कुब्जामृज्वीमकरवनु[illegible] यन्निर्घृणत्वं
तत्तात्पर्यं विपलमतयो नापयन्ति क्षतिः का ।

हित्वा वेशं कुवलयदृशां केशमक्षिभ्रुवं वा
क्षन्तव्या मे नहि कुटिलतेत्येतदुन्नायकं तत् ॥ १२६ ॥
विद्युल्लोलं वपुरिदमितो यौवनादेः कथा का
दृश्यं मिथ्या सकलमिति मद्दासदासोपि वेद ।
किंते वक्ष्ये स्वयममुमहं नैव वक्तुं समर्थो
यज्ञोपीतत् प्रणयमदिरामत्तमात्मानमेव ॥ १२७ ॥
उद्यन्नोचस्खलनमनिशं गोपिते गोपयिष्यन्
राधानाम्नीमकरवमहं सारिकामन्तिकस्थां ।
नीता राधे मम मुरलिकेत्येवमादीन्यकाण्डे
वक्तुं सभ्यस्मितजनयितुस्तन्मयासीद्दृथैव ॥ १२८ ॥
अस्त्रं प्रस्वापनमपि मया लब्धमुन्निद्रकेण
यस्मिन्नेतन्निहितमथ ते स्वप्नसन्दर्शनाय ।
जाग्रद्भावे भवति भवती भावनीयैव धिङ्मे
तेनाशेषस्फुरणः ामनो हन्त जाता सुषुप्तिः ॥ १२९ ॥
याने [illegible]रे मम यथा निर्विवादं तथा ते
सन्तप्ताया युगपदभियन्त्यद्य तन्वोरजन्यः ।
यास्यन्त्येता दिनकतिपयैरङ्गपल्यङ्कभाजोः
सत्यं सत्यं निमिषनिभतामावयोः सुस्थितास्था ॥ १३० ॥
ज्ञातिग्रामो हसति निभृतं वन्धुवर्गो रुणद्धि
क्रीडामन्तर्दधति गुरवो नीरवो भृत्यलोकः ।
चिचीयन्ते किमपि सुजना दुर्जनाः कुत्सयन्ते
श्लाघन्ते मां सदसि रसिकाः सादरं त्वत्कथासु ॥ १३१ ॥

इत्यादिष्टं भुवनगुरुणा गौरवेण क्रियाणाम्
अत्रागन्तुं किमिव शयि ना भोक्तु मप्यक्षमेण ।
तामौत्सुक्यादिति स कथयन्नात्मनः पादमूले
निम्नासीनः सुरभिशिशिरं निर्झरं किञ्चिदाप ॥ १३२ ॥
पश्यन्नेतत् किमिति कथयन्नश्रुधारामुदारां
मन्दाकिन्याइव तनुभृतः सुभ्रुवः सुस्थितायाः ।
हा हा जातं किमिति चकितः सत्वरं प्रोंच्यपादौ
भक्तिश्रद्धासपुलकमुपादाय मूर्द्ध्ना ववन्दे ॥ १३३ ॥
वुद्धा वद्धाञ्जलिपु[redacted] किंछिदाख्यातुकामाम्
इत्याचख्यौ विरमतु परं निष्फलो देवि खेदः ।
एतद्दासो नयवति हरेः श्रीमदङ्गाधिरूढं
चेतोमूढं न कुरु करुणासागरे सङ्गतासि ॥ १३४ ॥
भास्वानश्वानयमति क्षती खेलयन्नम्बरान्तर्
धर्मस्थित्यै भ्रमति भुवने तामसे[redacted]य ।
प्रादक्षिण्या ज्झटिति विनतानन्दनाधीनयानो
रागी चिन्तां न कुरु कुरुते पद्मिनीनां प्रवोधं ॥ १३५ ॥
गोपीमात्रं घुणलिपिनयान्माधवप्रेमपात्रं
मत्वा यत्त्वामनतिशयिनी दृष्टिरग्रे ममासीत् ।
क्षन्तव्यं तद्विधिविधिसुतव्योमकेशाब्धिपुत्री
मृग्यः पाशे पशुरिव तव प्रेम्नि वद्धो यदस्ति ॥ १३६ ॥
मातर्मातर्जय जय जगन्मोहनं मोहयन्त्याः
कस्ते तत्त्वं कलयतु न यद्वेदगर्भोऽपि वेद ।

मन्तव्योसौ परिजनतया वल्लभस्येति तस्यै
वारं वारं तदनु दधिरे तेन दण्डप्रणामाः ॥ १३७ ॥
सर्वाङ्गीनं पुलकमुदभूदश्रुमग्रे च दृष्टी
कण्ठोभग्नस्वर इववचः पर्यवस्थानशून्यं ।
तस्यास्तस्याप्यजनि युगपद्यानकाले तदानीं
मुग्धा मूर्द्धन्यभवदुभयोरद्भुता पुष्पवृष्टिः ॥ १३८ ॥
आमन्त्र्यैकस्तदनु सकलं घोषमुत्कण्ठमानः
सद्यो राधारमणचरणप्रेक्षणाय प्रतस्थे ।
मन्त्रं चिन्तामणिमिव पराचिन्तयन्ती चिराय
प्रेयः सूक्तं वनभुवि घनानन्दमग्नावतस्थे ॥ १३९ ॥
नानारामप्रणयिषु मनः सङ्गसौभाग्यभाजा
जाड्यापाये सुरभिसमयस्थायिना माधवेन ।
राधावन्धोरुपहृतमिति प्रेममाध्वीकमेतन्
निर्विघ्नेन श्रवणपुटकैः पुन्यवन्तः पिवन्तु ॥ १४० ॥
विचारपारदृश्वानः कृतं कृशधिया मया ।
करुणार्द्राः करिष्यन्ति शुद्धमुद्धवदूतकं ॥ १४१ ॥
इति तालितनगरनिवासि श्रीमाधवकवीन्द्र भट्टाचार्य
विरचितं उद्धवदूतं खण्डकाव्यं
सम्पूर्णमिति ॥ ० ॥

## हंसदूतः ।

दुकूलं विभ्राणो दलितहरितालद्युतिहरं
जवापुष्पश्रेणीरुचिरुचिरपादाम्बुजतलः ।
तमालश्यामाङ्गो दरहसितलीलाञ्चितमुखः
परानन्दाभोगः स्फुरतु हृदि मे कोपि पुरुषः ॥ १ ॥
यदा यातो गोपीहृदयमदनो नन्दसदनान्
मुकुन्दो गान्धिन्यास्तनयमनुविन्दन् मधुपुरीं ।
तदामाङ्क्षीच्चिन्तासरिति घनघूर्णापरिचयैर्
अगाधायां वाधामयपयसि राधा विरहिणी ॥ २ ॥
कदाचित् खेदाग्निं विघटयितुमन्तर्गतमसौ
सहालीभिर्लेभे तरलितमना यामुनतटीं ।
चिरादस्याश्चित्तं [illegible]टीरावकलनाद्
अवस्थां तस्तार स्फूटमथ सुषुप्तेः प्रियसखीं ॥ ३ ॥
तदा नि[illegible]ी कलितनलिनीपल्लवकुलैः
परीणाहात् प्रेम्नामकुशलशताशङ्किहृदयैः ।
हगम्भोगम्भीरीकृतमिहिरपुत्रीलहरिभिर्
विलीना धूलिनामुपरि परिवव्रे परिजनैः ॥ ४ ॥
ततस्तां न्यस्ताङ्गीमुरसि ललितायाः कमलिनी
पलाशैः कालिन्दीसलिलशिशिरैर्वीजिततनं ।

परावृत्तश्वासाङ्कुरचलितकण्ठीं कलयतां
सखीसन्दोहानां प्रमदभरशाली ध्वनिरभूत् ॥ ५ ॥
निधायाङ्के पङ्केरुहदलाविट[illegible]स्य ललिता
ततो राधां नीराहरणसरणीन्य[illegible]णा ।
मिलन्तं कालिन्दीपुलिनभुवि खेलांछितगतिं
ददर्शाग्रे कंञ्चिन्मधुरविरुतं श्वेतगरुतं ॥ ६ ॥
तदालोकस्तोकोच्छ्वसितहृदया सादरमसौ
प्रणामं संशन्ती लघु लघु समासाद्य सविधं ।
धृतोत्कण्ठा सद्यो [illegible] सन्देशहरणे
वरं दूतं मेने तमतिललितं हन्त ललिता ॥ ७ ॥
अमर्षात् प्रेमेर्ष्यां सपदि दधती कंसमथने
प्रवृत्ता हंसाय स्वमभिलषितं शंसितुमसौ ।
न तस्या दोषोऽयं यदिह विहगं प्रार्थितवती
न कस्मिन् विस्रम्भं दिशति हरिभक्तिप्रणयिता ॥ ८ ॥
पवित्रेषु प्रायो विरचयसि तोयेषु वसतिं
प्रमोदं नालीके वहसि विषदात्मा स्वयमसि ।
अतोहं दुःखार्ता शरणमवला त्वां गतवती
न भिक्षा सत्पक्षे ब्रजति हि कदाचिद्विफलतां ॥ ९ ॥
चिरं विस्मृत्यास्मान् विरहद[illegible]नज्वालविकलाः
कलावान् सानन्दं वसति मथुरायां मधुरिपुः ।
तदेतं सन्देशं स्वमनसि समाधाय निखिलं
भवान् क्षिप्रं तस्य श्रवनपदवीं संगमयतु ॥ १० ॥

निरस्तप्रत्यूहं भवतु भवतो वर्त्मनि शिवं
समुत्तिष्ठ क्षिप्रं मनसि मुदमाधाय सदयं ।
अधस्ताद्धावन्तो लघु लघु समुत्तानननयनैर्
भवन्तं वीक्षन्तां कुतुकतरला गोपशिशवः ॥ ११ ॥
किशोरोत्तंशोसौ कठिनमतिना दानपतिना
यया निन्ये तूर्णं पशुपयुवतीजीवितपतिः ।
तया गन्तव्या ते निखिलजगदेकप्रथितया
पदव्या भव्यानां तिलक किल दाशार्हनगरी ॥ १२ ॥
गलद्दास्यासारप्लुतधवलगण्डा मृगदृशो
विदूयन्ते यत्र प्रवलमदना वेशविवशाः ।
त्वया विज्ञातव्या हरिचरणसङ्गप्रणयिनो
ध्रुवं सा चक्राङ्की रतिसखशताङ्कस्य पदवी ॥ १३ ॥
पिवन् जम्बुश्यामं मिहिरदुहितुर् वारि मधुरं
मृणालीर् भुञ्जानो हिमकरकलाकोमलरुचः ।
क्षणं हृष्टस्तिष्टन् निविडविटपे शाखिनि सखे
सुखेन प्रस्थानं रचयतु भवान् वृष्णिनगरे ॥ १४ ॥
वलादाक्रन्दन्तीरथपथिकमक्रूरमिलितं
विदूरादाभीरीततारनुययौ येन रमणं ।
तमादौ पन्थानं रचय चरितार्था भवतु ते
विराजन्ती सर्वोपरि परमहंसस्थितिरियं ॥ १५ ॥
अकस्मादस्माकं हरिरपहरन्नंशुकचयं
यमारूढो गूढप्रणयलहरीं कन्दलयितं ।

तव श्रान्तस्यान्तःस्थगितरविबिम्बः किसलयैः
कदम्बः कादम्ब त्वरितमवलम्बः स भविता ॥ १६ ॥
किरन्ती लावन्यं दिशि दिशि शिखण्डस्तवकिनी
दधाना साधीयः कनकविमलद्योतिवसनं ।
तमालश्यामाङ्गी सरलमुरलीचुम्बितमुखी
जगौ चित्रं यत्र प्रकटपरमानन्दलहरी ॥ १७ ॥
तया भूयः क्रीडारभसविकसद्वल्लववधू
वपुर्वल्लीभ्रश्यन्मृगमदकणश्यामलिकया ।
विधातव्यो हल्लीसकदलितमल्लीलतिकया
समन्तादुल्लासस्तव मनसि रासस्थलिकया ॥ १८ ॥
तदन्ते वासन्तीविरचितमनङ्गोत्सवकला
चतुःशालं शौरेः स्फुरति न हशौ तत्र विकिरेः ।
तदालोकोद्भेदप्रमदभरविस्मारितगति
क्रिये जाने तावत्त्वयि वत हता गोपवनिता ॥ १९ ॥
मम स्यादर्थानां क्षतिरिह विलम्बाद्यदपि ते
विलोकेथाः सर्वं तदपि हरिकेलिस्थलमिदं ।
तवेयं न व्यर्था भवतु शुचिता कः स हि सखे
गुणो यस्त्राणूरद्विषि मतिनिवेशाय न भवेत् ॥ २० ॥
सकृद्वंशीनादश्रवणमिलिताभीरवनिता
रहःक्रिडासाक्षी [illegible]तासङ्गसुभगः ।
स धेनूनां वन्धुर्मधुमथनखट्टायितशिलः
करिष्यत्यानन्दं सपदि तव गोव[illegible]नगिरिः ॥ २१ ॥

तमेवाद्रिं चक्राङ्कितकरपरिष्वङ्गरसिकं
महीचक्रे शङ्केमहि शिखरिणां शेखरतया ।
अरातिं ज्ञातीनां ननु हरिहयं यः परिभवन्
यथार्थं स्वं नाम व्यधित भुवि गोवर्द्धन इति ॥ २२ ॥
तमालस्यालोकाद्गिरिपरिसरे सन्ति चपलाः
पुलिन्दो गोविन्दस्मरणरभसोत्तप्तवपुषः ।
शनैस्तापं तासां क्षणमपनयन् यास्यति भवान्
अवश्यं कालिन्दीसलिलशिशिरैः पक्षपवनैः ॥ २३ ॥
तदन्ते श्रीकान्तस्मरसमरधाटीपुटकिता
कदम्बानां वाटी रसिकपरिपाटीं स्फुटयति ।
त्वमासीनस्तस्यां न यदि परितो नन्दसि ततो
वभूव व्यर्था ते घणरसनिवेशव्यसनिता ॥ २४ ॥
शरन्मेघश्रेणीप्रतिभटमरिष्टासुरशिरस्
चिरं शुष्कं वृन्दावनपरिसरे द्रक्ष्यति भवान् ।
यदारोढुं दूरान्मिलति किल कैलासशिखरि
भ्रमाक्रान्तस्वान्तो गिरिशसुहृदः किङ्करगणः ॥ २५ ॥
रुवन् याहि स्वैरं चरमदशया चुम्बितरुचो
नितम्बिन्यो वृन्दावनभुवि सखे सन्ति वहवः ।
परावर्तिष्यन्ते तुलितमुरजिन्नूपुररवात्
तव ध्वानात्तासं वहिरपि गताः क्षिप्रमसवः ॥ २६ ॥
त्वमासीनः शाखान्तरमिलितचण्डत्विषि सुखं
दधीथा भाण्डीरे क्षणमपि घनश्यामलरुचौ ।

ततो हंसा विभ्रन्निखिलनभसश्चिक्रमिषया
स वर्द्धिष्णुं विष्णुं कलितदरचक्रं तुलयिता ॥ २७ ॥
त्वमष्टाभिर्नेत्रैर्वि॰ लदमलप्रेमसलिलैर्
मुहुः सिक्तस्तम्भां चतुर चतुरास्यस्तुतिभुवं ।
जिहीथा विख्यातां स्फुटमिह भवद्वान्धवरथं
प्रविष्टं मंस्यन्ते विधिमटविदेव्यस्त्वयि गते ॥ २८ ॥
उदंछन्नेचाम्भः प्रसरलहरीपिच्छिलपथ
स्खलत्पादन्यासप्रनिहितविलम्बा॰ ॰ला॰धयः ।
हरौ यस्मिन्मग्ने त्वरितयमुनाकूलगमन
स्पृहाक्षिप्ता गोप्यो ययुरनुपदं कामपि दशां ॥ २९ ॥
मुहुर्लास्यक्रीडाप्रमदमिलदाहोपुरुषिका
विकाशेन भ्रष्टैः फणिमणिकुलैर् धूमलरुचौ ।
पुरस्तस्मिन्नीपद्रुमकुसमकिञ्जल्कसुरभौ
त्वया पुन्ये पेयं मधुरमुदकं कालियह्रदे ॥ ३० ॥
तृणावर्तारातेर्विरहदवसन्तापिततनोः
सदाभीरीवृन्दप्रणयवहुमानोन्नतिविदः ।
प्रणेतव्यो नव्यस्तवकभरसम्बर्द्धितशुचस्
त्वया वृन्दादेव्याः परमविनयाद्वन्दनविधिः ॥ ३१ ॥
इति क्रान्त्वा केकाकृतविरुतिमेकादशवनीं
घनीभूतं चूतैर्व्रजमनुवनं द्वादशमिदं ।
पुरी यस्मिन्नास्ते यदुकुलभुवां निर्मलयशो
भराणां धाराभिर् धवलितधर॰ चीपरिसरा ॥ ३२ ॥

निकेतैराकीर्णा गिरिशगिरिदम्भप्रतिभटैर्
अवष्टम्भस्तम्भावलिविलसितैः पुष्पितवना ।
निविष्टा कालिन्दीतटभुवि तवाधास्यति सखे
समन्तादानन्दंमधुरजनवृन्दा मधुपुरी ॥ ३३ ॥
वृषः शम्भोर्यस्यां दशति नवमेकत्र यवसं
विरिञ्चेरन्यस्मिन् गिलति कलहंसो विसलतां ।
क्वचित् क्रौञ्चारातेः कवलयति केकी विषधरं
विलीढे शल्लक्या वलरिपुकरी पल्ल[illegible]तः ॥ ३४ ॥
अवोधिष्ठाः काषान्नहि विघटितां प्रच्छदपटीं
विमुक्तामज्ञासीः पथि पथि न मुक्तावलिमपि ।
अयि श्रीगोविन्दस्मरणमदिरामत्तहृदये
सतीति ख्यातिं ते हसति कुलटानां कुलमिदं ॥ ३५ ॥
असव्यं बिभ्राणा पदमधृत लाक्षारसमसौ
प्रयाताहं मुग्धे विरम मम वेशैः किमधुना ।
अमन्दादाशङ्के सखि पुरपुरन्ध्रीकलकलाद्
अलिन्दाग्रे वृन्दावनकुसुमधन्वा विजयते ॥ ३६ ॥
अयं लीलापाङ्गस्नपितपुरवीथीपरिसरो
नवाशोकोत्तंसस्खलति पुरतः कंसविजयी ।
किमस्मानेतस्मान्मनिभवनपृष्ठाद्विनुदती
त्वमेका स्तब्धाक्षि स्थगयसि गवाक्षावलिमपि ॥ ३७ ॥
मुहुः शून्यां दृष्टिं वहसि रहसि ध्यायसि सदा
शृणोषि प्रत्यक्षं न परिजनविज्ञापनशतं ।

अतः शङ्के पङ्केरुहमुखि ययौ श्यामलरुचिः
स यूनामुत्तंसस्तव नयनवीथीपथिकतां ॥ ३८ ॥
विलज्जं मा रोदीरिह सखि पुनर्यास्यति हरिस्
तवापाङ्गक्रीडानिविडपरिचर्याग्रहिलतां ।
इति स्वैरं यस्यां पथि पथि मुरारेरभिनव
प्रवेशे नारीणां रतिरभसजल्पा ववनिरे ॥ ३९ ॥
पंञ्चभिः कुलकं ॥

सखे साक्षाद्दामोदरवदनचन्द्रा वकलन
स्फुरत्प्रेमानन्दप्रकरलहरीचुम्बितधियः ।
मुहुस्तत्राभीरीसमुदयशिरोन्यस्तविपदस्
तवाश्लो रानन्दं विदधति पुरा पौरवनिताः ॥ ४० ॥
अथ क्षामं क्षामं क्रमघटनया सङ्कटतरान्
निवासान् वृष्णीनामणुसर पुरीमध्यविशिखान् ।
मुरारातेर्यच्च स्थगितगगनाभिर् विजयते
पताकाभिः सन्तर्पितभुवनमन्तःपुरवरं ॥ ४१ ॥
यदुत्सङ्गे तुङ्गस्फटिकरचिताः सन्ति परितो
मराला मानिक्यप्रकरखचितचोटिचरणाः ।
सुहृद्बुद्ध्या हंसाः कलितमधुरस्याम्बुजभुवः
समर्यादा येषां सपदि परिचर्यां विदधति ॥ ४२ ॥
चिरान्मृगयन्तीनां पशुपरमणीनामपि कुलैर्
अलब्धं कालिन्दीपुलिनविपिने लीनमभितः ।
मदालोकोल्लासिस्मितपरिचितास्यं प्रियसखि

स्फुरन्तं वीक्षिष्ये पुनरपि किमग्रे मुरभिदं ॥ ४३ ॥
विषादं माकार्षीर्द्रुतमवितथव्याहृतिरसौ
समागन्ता राधे धृतनवशिखण्डस्तव सखा ।
इति ब्रूते यस्यां शुकमिथुनमिन्द्रानुज कृते
यदाभीरीवृन्दैरुपहृतमभूदुद्भवकरे ॥ ४४ ॥
युग्मकं ॥
घनश्यामा भ्राम्यत्युपरि हरिहर्म्मस्य शिखिभिः
कृतस्तोचा मुग्धैरगुरुजनिता धूमलतिका ।
तदालोकाभीर स्फुरति तव चेन्मानसरुचिर्
जितं तर्हि स्वैरं जनसहनिवासप्रियतया ॥ ४५ ॥
ततोमध्येकक्षं प्रतिनवगवाक्षस्तवकितं
चलन्मुक्तालम्बस्फुरितममलस्तम्भनिवहं ।
भवान् द्रष्टा हेमोल्लिखितदशमस्कन्धचरितैर्
लसद्भित्तिप्रान्तं मुरविजयिनः केलिनिलयं ॥ ४६ ॥
अलिन्दे यस्यास्ते मरकतमयी यष्टिरमला
शयालुर्यां रात्रौ मदकलकलापी कलयति ।
निरातङ्कन्तस्याः शिखरमधिरुह्य श्रमनुदं
प्रतीक्षेथा भ्रातर्वरमवसरं यादवपतेः ॥ ४७ ॥
निविष्टः पल्यङ्के मृदुलतरतूलीधवलिते
त्रिलोकीलक्ष्मीणां ककुदि दरसाचीकृततनुः ।
अमन्दं पूर्णेन्दुप्रतिममुपधानं प्रफुल्लो
निधायाग्रे तस्मिन्नपह्नितकपोलिद्वयभरः ॥ ४८ ॥

उदंञ्चत्कालिन्दीसलिलसुभगम्भावुकरुचिः
कपोलान्ते प्रेंखन्मणिमकरमुद्रामधुरिमा ।
वसानः कौषेयं जितकनकलक्ष्मीपरिमलं
मुकुन्दस्ते साक्षात् प्रमदसुधया सेक्ष्यति दृशौ ॥ ४९ ॥
विकद्रुः पौराणीरखिलकुलवृद्धो यदुपतेर्
अदूरादसीनो मधुरभणितिर्गास्यति तदा ।
पुरस्तादाभीरीगणभयदनामा सकठिनो
मणिस्तम्भालम्बी कुरुकुलकथां सङ्कलयिता ॥ ५० ॥
शिलीनामुत्तुंसः स किल[illegible]भयतः
प्रणेष्येते वालव्यजनयुगलान्दोलनविधिं ।
स जानुभ्यामष्टापदभुवमवष्टभ्य भविता
गुरोः शिष्यो नूनं पदकमलसम्बाहनरतः ॥ ५१ ॥
विहङ्गेन्द्रो युग्मीकृतकरसरोजो भुवि पुरः
कृताशङ्को भावी प्रजविनि निदेशेऽर्पितमनाः ।
छदद्वंद्वे यस्य ध्वनति मथुरावासिवटवो
व्युदस्यन्ते सामस्वरकलितमन्योन्यकलहं ॥ ५२ ॥
न निर्वक्तुं दामोदरपदकनिष्ठाङ्गुलिनख
द्युतीनां लावण्यं भवति चतुरास्योपि चतुरः ।
तथापि स्त्रीप्रज्ञासुलभतरलत्वादहमसौ
प्रवृत्ता तन्मूर्तिस्तवरतिमहासाहसरसे ॥ ५३ ॥
विराजन्ते यस्य व्रजशिशुकुलस्तेयविकल
स्वयम्भूचूडाग्रैर्लुलितशिखराः पादनखराः ।

क्षणं यानालोक्य प्रकटपरमानन्दविरसः
स देवर्षिर् मुक्तानपि तनुभृतः शोचति भृशं ॥ ५४ ॥
सरोजानां व्यूहः श्रियमभिलसन् यस्य पदयोर्
ययौ रागाढ्यानां विधुरमुदवासव्रतविधिं ।
हिमं वन्दे नीचैरनुचितविधानव्यसनिनां
यदेषां प्राणान्तं दमनमनुवर्षं प्रणयति ॥ ५५ ॥
रुचीनामुल्लासैर् मरकतमयस्थूलकदली
कदम्बाहङ्कारं कवलयति यस्योरुयुगलं ।
यदालानस्तम्भद्युतिमवललम्बे वलमृतां
मदादुद्दामानां पशुपरमणीचित्तकरिणां ॥ ५६ ॥
सखे यस्याभीरीनयनसफरीजीवनविधौ
निदानं गाम्भीर्यप्रसरकलिता नाभिसरसी ।
यतः कल्पस्यादौ सनकजनकोत्पत्तिवडभी
गभीरान्तःकक्षाधृतभुवनमम्भोरुहमभूत् ॥ ५७ ॥
द्युतिंधत्ते यस्य त्रिवलिलतिका सङ्कटतरं
सखे दामश्रेणीक्षणपरिचयाभिज्ञमुदरं ।
यशोदा यस्यान्तः सुरनरभुजङ्गैः परिवृतं
मुखद्वारावारद्वयमवलुलोके त्रिभुवनं ॥ ५८ ॥
उरो यस्य स्फारं स्फुरति वनमालावलयितं
वितन्वानं तन्वीजनमनसि सद्यो मनसिजं ।
मरीचीभिर्यस्मिन् रविनिवहतुल्योपि वहते
सदा खद्योताभां भुवनमधुरः कौस्तुभमणिः ॥ ५९ ॥

समन्तादुन्मीलद्दलभिदुपलस्तम्भयुगल
प्रभाजैत्रं केश्चिद्विजलुलितकेयूरललितं ।
स्मरक्रीडाभ्यङ्गोपीपटलहठकण्ठग्रहपरं
भुजद्वन्द्वं यस्य स्फुटसुरभिगन्धं विजयते ॥ ६० ॥
जिहीते साम्राज्यं जगति नवलावण्यलहरी
परीपाकस्यान्तर्मुदितमदनावेशमधुरं ।
नटद्भ्रूवल्लीकं स्मितनवसुधाकेलिसदनं
स्फुरन्मुक्तापङ्क्तिप्रतिमरदनं यस्य वदनं ॥ ६१ ॥
किमेभिर्व्याहारैः कलय कथयामि स्फुटमहं
सखे निःसन्देहं परिचयपदं केवलमिदं ।
परानन्दो यस्मिन्नयनपदवीभाजि भविता
त्वया विज्ञातव्यो मधुररव सोऽयं मधुरिपुः ॥ ६२ ॥
विलोकेथाः कृष्णं मदकलमरालीरतिकला
विदग्धव्यामुग्धं यदि पुरवधूविभ्रमभरैः ।
तदा नास्मान् ग्राम्याः श्रवणपदवीं तस्य गमयेः
सुधापूर्णं चेतः कथमपि न तक्रं मृगयते ॥ ६३ ॥
यदा वृन्दारण्यस्मरणलहरीहेतुरमलं
पिकानां वेवेष्टि प्रतिहरितमुच्चैः कुहुरुतं ।
वहन्ते वा वाताः स्फुरितगिरिमल्लीपरिमलास्
तदैवास्माकीनां गिरमुपहरेथा मुरभिदि ॥ ६४ ॥
पुरा तिष्ठन् गोष्ठे निखिलरमणीभ्यः प्रियतया
भवान् यस्यां गोपीरमण विदधे गौरवभरं ।

सखी तस्या विज्ञापयति ललिता धीरललित
प्रणम्य श्रीपादाम्बुजकनकपीठीपरिसरे ॥ ६५ ॥
प्रयत्नादावाल्यं नवकमलिनीपल्लव[illegible]लैस्
त्वया भूयोयस्याः कृतम[illegible]ह सम्बर्द्धनमभूत् ।
[illegible]चिरा[illegible]धोभारस्फुरणगरिमाक्रान्तजघना
वभूव प्रष्ठौही मु[illegible] मथन सेयं कपिलिका ॥ ६६ ॥
समीपे न[illegible]दां चिचतुरदला हन्त गमिता
त्वया माकन्दस्य [illegible]प्रथस[illegible]चरी भावनियतिं ।
इयं सा वासन्ती गलदमलमाध्वीकपटली
मिषादग्रे गोपीरमण रुदती रोदयति नः ॥ ६७ ॥
प्रसूतो देवक्या मुरमथन यः कोपि पुरुषः
स जातो गो[illegible]पालाभ्यदयपरमानन्दवसतिः ।
धृतो यो गान्धिन्या कठिनजठरे संप्रति ततः
समन्तादेवास्तं शिव शिव गता गोकुलकथा ॥ ६८ ॥
अरिष्टेनाहूताः पशुपसुदृशो यान्ति विपदं
[illegible]नावर्ताक्रान्त्या रचयति भयं चत्वरचयः ।
अमी व्योमीभूता ब्रजवसतिभूमीपरिसरा
वहन्ते नस्तापं मुरहर विदूरं त्वयि गते ॥ ६९ ॥
त्वया ना[illegible]न्तव्यं कथमिह हरे गोष्ठमधुना
लताश्रेणी वृन्दावनभुवि यतोऽभूद्विषमयी ।
प्रसूनानां गन्धं कथमितरथा वातनिहितं
भजन स[illegible]ं वहति निव[illegible]ो गोपसुदृशां ॥ ७० ॥

कथं सङ्गोऽस्माभिः सह समुचितः संप्रति हरे
वयं ग्राम्या नार्यस्त्वमसि नृपकन्यार्चितपदः ।
गतः कालो यस्मिन् पशुपरमणीसङ्गमकृते
भवान् व्यग्रस्तस्थौ तमसि गृहवाटीविटपिनिः ॥ ७१ ॥
वयं त्यक्ताः स्वामिन् यदि ह तव किं दूषणमिदं
निसर्गः :थामानामयमतितरां दुष्परिहरः ।
कुहूकण्ठैरण्डावधिसहनिवासात् परिचिता
विसृज्यन्ते सद्यः कलितनवपक्षैर्वलिभुजः ॥ ७२ ॥
अयं पूर्वोरङ्गः किल विरचितो यस्य तरसा
रसादाख्यातव्यं परिकलय तन्न  कामिदं ।
मया प्रष्टव्योऽसि प्रथममिति वृन्दावनपते
किमाहो राधेति स्मरसि कृपणं वर्णयुगलं ॥ ७३ ॥
अये कुञ्जद्रोनीकुहरगृहमेधिन् किमधुना
परोक्षं वक्ष्यन्ते पशुपरमणीदुर्नियतयः ।
प्रवीणा गोपीनां तव चरणपद्मेऽर्पितमन
ययौ राधा साधारणसमुचितप्रश्नपदवीं ॥ ७४ ॥
त्वया गोष्ठं गोष्ठीतिलक किल चेद्विस्मृतमिदं
न तूर्णं धूमोर्णापतिरपि विधत्ते यदि कृपां ।
अहर्वृन्दं वृन्दावनकुसुमपालीपरिमलैर्
दुरालोकं शोकास्पदमथ कथं नेष्यति सखी ॥ ७५ ॥
तरङ्गैः कुर्वाणा शमनभगिनीलाघवमसौ
नदीं कांछिन्नोष्ठे नयनजलपूरैरजन त् ।

इती वास्याद्वेषादभिमतदशाप्रार्थनमयीं
मुरारे विज्ञप्तिं निशमयति मानी न शमनः ॥ ७६ ॥
कृताकृष्टिक्रीडं किमपि तव रूपं मम सखी
सकृद्दृष्टादू[illegible]हितबोधोज्झितमतिः ।
हता शेयं प्रेमानलमनुविशन्ती सरभसं
पतङ्गीवात्मानं मुरहर मुहुर्दाहितवती ॥ ७७ ॥
मया वाच्यः किं वा त्वमिह निजदोषात् परमसौ
ययौ मन्दा वृन्दावनकुमुदबन्धो विधुरतां ।
यदर्थं दुःखाग्निर्दहति न तमद्यापि हृदयान्
नयस्माद्दुर्मेधा लवमपि भवन्तं दवयति ॥ ७८ ॥
चिवक्राह्वो धन्या हृदयमिव ते स्वं वपुरियं
समासाद्य स्वैरं यदिह विलसन्ती निवसति ।
ध्रुवं पुण्यभ्रंशादजनि सरलेयं मम सखी
[illegible]वेशस्तत्रासीत् क्षणमपि यदस्या न सुलभः ॥ ७९ ॥
किमाविष्टा भूतैः सपदि यदि वाक्रूरफणिना
क्षतापस्मारेण च्युतमतिरकस्मात् किमपतत् ।
इति व्यग्रैरस्यां गुरुभिरभितो वेणुनिनद
श्रवाद्विभ्रष्टायां गु[illegible]र विकल्पा विदधिरे ॥ ८० ॥
नवीनेयं संप्रत्यकुशलपरीपाकलहरी
नरीनर्ति स्वैरं मम सहचरीचित्तकुहरे ।
जगन्नेत्रश्रेणी मधुरमथुरायां निवसतश्
चिरादार्ता वार्तामपि तव यदेषा न लभते ॥ ८१ ॥

जनान् सिद्धादेशान्नमति भजते मान्त्रिकगणान्
विधत्ते शुश्रुषामधिकविनये नौषधिविदां ।
त्वदीक्षादीक्षायै परिचरति भक्त्या गिरिसुतां
मनीषा हि व्यग्रा किमपि शुखहेतुं न मनुते ॥ ८२ ॥
पशूनां पातारं भुजगरिपुपचप्रणयिनं
स्मरोद्दद्दिक्रीडं निविडघनसारद्युतिहरं ।
सदाभ्यर्णे नन्दीश्वरगिरिभुवो रङ्गरसिकं
भवन्तं कंसारे भजति भवदास्यै मम सखी ॥ ८३ ॥
भवन्तं सन्तप्ता विदलिततमालाङ्कुररसैर्
विलिख्य भ्रूभङ्गीकृतमदनकोदण्डकदनं ।
निधास्यन्ती कण्ठे तव निजभुजावल्लरिमसौ
धरण्यामुन्मीलज्जडिमनिविडाङ्गी विलुठति ॥ ८४ ॥
कदाचिन्मूढेयं निविडभवदीयस्मृतिमदाद्
अमन्दादात्मानं कलयति भवन्तं मम सखी ।
तथास्या राधाया विरहदहनाकल्पितधियो
मुरारे दुःसाधा क्षणमपि न राधा विरमति ॥ ८५ ॥
त्वया सन्तापानामुपरि परिमुक्तापि रभसाद्
इदानीमापेदे तदपि तव चेष्टां प्रियसखी ।
यदेषा कंसारे भिदुरहृदयं त्वामवयती
सतीनां मूर्द्धन्या भिदुरहृदयाऽभूदनुदिनं ॥ ८६ ॥
समक्षं सर्वेषां निवससि समाधिप्रणयिनाम्
इति श्रुत्वा ननं गरुतरसमाधिं कलयति ।

सदा कंसाराते भजसि यमिनां नेचपदवीम्
इति व्यक्तं सञ्ज्ञी भवति [illegible]लम्बितुमपि ॥ ८७ ॥
मुरारे कालिन्दीसलिलचल दिन्दीवररुचे
मुकुन्द श्रीवृन्दावनम[illegible]नवृन्दारकमणे ।
व्रजा[illegible]न्द त्मजहरे
सदेति क्रन्दन्ती परिजनशुचं कन्दलयति ॥ ८८ ॥
समन्तादुत्तप्तस्तव विरहद[illegible]वया
कृतोद्वेगः पंञ्चाशुगमृगयुवेधव्यतिकरैः ।
तनू भूतं सद्यस्तनुवनमिदं हास्यति हरे
हठादद्यः श्वो वा मम सहचरी प्राणहरिणः ॥ ८९ ॥
पयो[illegible] हिमकरोत्तंसमधुरे
दधाने दृग्भङ्ग्या स्मरविजयिरूपं मम सखी ।
हरे दत्तस्वान्ता भवति तदिमां किं प्रभवति
स्मरो हन्तुं किन्तु व्यधयति भवानेव कुतुकी ॥ ९० ॥
विज[illegible]षे भावं पशुपरमणीनां यदुपते
न जानीमः कस्मात्तदपि वत मायां रचयसि ।
समन्तादध्यात्मं यदिह पवनव्याधिरलपट्
वलाद[illegible]न व्यसनकुलमेव द्विगुणितं ॥ ९१ ॥
गुरोरन्तेवासी स भजति यदूनां सचिवतां
सखी कालिन्दीयं किल भवति कालस्य भगिनी ।
भवेद[illegible]ः को वा [illegible]पुरे मत्परिचितो
दशामस्याः शंसन् यदुतिलक यस्त्वामनुनयेत् ॥ ९२ ॥

विशीर्णाङ्गीमन्तर्व्रणविलुठनादुत्कलिकया
परीतां भूयस्या सततमपरागव्यतिकरां ।
परिध्वस्तामोदां विरमितसमस्तालिकुतुकां
विधो पादस्पर्शाद्दपि सुखय राधाकुमुदिनीं ॥ ९३ ॥
विपत्तिभ्यः प्राणान् कथमपि भवत्सङ्गमसुख
स्पृहाधीना शौरे मम सहचरी रक्षितवती ।
अतिक्रान्ते संप्रत्यवधिदिवसे जीवनविधौ
हताशा निःशङ्कं वितरति हशौ चूतमुकुले ॥ ९४ ॥
प्रतीकारारम्भश्लथमतिभिरुद्यत्परिणतेर्
विमुक्तायाया व्यक्तस्मरकदनभाजः परिजनैः ।
अमुंचन्ती सङ्गं कुवलयहशः केवलमसौ
वलादद्य प्राणानवाते भवदाशा सहचरी ॥ ९५ ॥
अये रासक्रीडारसिक मम सख्यां नवनव
पुरा वद्धा येन प्रणयलहरी हन्त गहना ।
स चेन्मुक्तापेक्षस्त्वमसि धिगिमां तूलशकलं
यदेतस्या नासानिहितमिदमद्यापि चलति ॥ ९६ ॥
मुकुन्द भ्रान्ताक्षी किमपि यदसङ्कल्पितशतं
विधत्ते तद्वक्तुं जगति मनुजः कः प्रभवति ।
कदाचित्कल्याणी विलपति यदुत्कण्ठितमतिस्
तदाख्यामि स्वामिन् गमय मकरोत्तंशसविधं ॥ ९७ ॥
अभूत् कोपि प्रेमा मयि मुररिपोर्यः सखि पुरा
पराङ्गमपिक्षामपि तदवलम्बादलघयं ।

तथेदानीं हा धिक् समजनि तटस्थः स्फुटमहं
भजे लज्जां येन क्षणमिह पुनर्जीवितुमपि ॥ ९८ ॥
अमी कुञ्जाः पूर्वं मम न दधिरे कामपि मुदं
द्रुमालीयं चेतः सखि न कतिशो नन्दितवती ।
इदानीं पश्यैते युगपदुपतापं विदधते
प्रभौ मुक्तापेक्षे भजति न हि को वा विमुखतां ॥ ९९ ॥
गरीयान्मे प्रेमा त्वयि परमिति स्नेहलघुता
न जीविष्यामीति प्रणयगरिमाख्यापनविधिः ।
कथं नायासीति स्मरणपरिपाटीप्रकटनं
हरौ सन्देशाय प्रियसखि न मे वागवसरः ॥ १०० ॥
ययौ कालः कल्यान्यवकलितकेलीपरिमलां
विलासार्थी [illegible] चलकुहरे लीनवपुषीं ।
स मां धृत्वा धूर्तः कृतकपटरोषां सखि हठाद्
अकार्षीदाकर्षन्नुरसि शशिलेखाशतवृतां ॥ १०१ ॥
कदा प्रेमोन्मीलन्मदनमदिराक्षी समुदयं
बलादाकर्षन्तं मधुरमुरलीकाकलिकया ।
मुहुर्भ्राम्यच्चिल्ली चुलुकितकुलस्त्रीव्रतमहं
विलोकिष्ये लीलामदामन्दभाङ्गी मुरभिदं ॥ १०२ ॥
रणद्भृङ्गश्रेणीसुहृदि सरदारम्भमधुरे
वनान्ते चान्द्रीभिः किरणलहरीभिर्धवलिते ।
कदा प्रेमोद्दण्डस्मरकलहवैतण्डिकमहं
करिष्ये गोविन्दं निविड भुजबन्धप्रणयिनं ॥ १०३ ॥

मनो मे हा कष्टं ज्वलति किमहं हन्त करवै
न पारं नावारं किमुखि कलयाम्यस्य जलधेः ।
इयं वन्दे मूर्द्ध्ना सपदि तमुपायं कथय मे
परामृष्ये यस्माद्धृतिकलिकयापि क्षणिकया ॥ १०४ ॥
प्रयातो मां हित्वा यदि विबुधचूडामणिरसौ
प्रयातु स्वच्छन्दं मम समयधर्मः किल गतिः ।
इदं सोढुं का वा प्रभवति यतः स्वप्नकपटाद्
इहायातो वृन्दावनभुवि बलान्मां रमयति ॥ १०५ ॥
अनौचित्यं तस्य व्यथयति मनो हन्त मथुरां
त्वमासाद्य स्वैरं चपलहृदयं धावय हरिं ।
सखि स्वप्नारम्भे पुनरपि यथा विभ्रममदाद्
इहायातो धूर्तः [illegible] न मे किञ्चिनिगुणं ॥ १०६ ॥
अयि स्वप्नो दूरे निवसतु समक्षं शृणु हठाद्
अविश्वस्ता मा भूरिह सखि मनो विभ्रमधिया ।
वयस्यस्ते गोवर्द्धनविपिनमासाद्य कुतुकाद्
अकाण्डे यद्भूयः स्मरकलहपाण्डित्यमकरोत् ॥ १०७ ॥
अमर्षाद्धावन्तीं गहनकुहरे सूचितपथां
तुलाकोटिक्वाणैश्चकितपदपातद्विगुणितैः ।
दिधीर्षन्मां हर्षोत्तरलनयनान्तः स कुतुकी
न वंशीमज्ञासीद्भुवि करसरोजाद्विगलितां ॥ १०८ ॥
अशक्तां गन्तव्ये कलितनवचेलाञ्चलतया
लतालीभिः पुष्पस्मितशबलिताभिर्विरुधतीं ।

परीहासारम्भी प्रियसखि समालम्बितमुखीं
प्रपेदे चुम्बाय स्फुरदधरविम्बस्तव सखा ॥ १०९ ॥
ततोहं धम्मिल्ले स्थगितमुरलीका सखि शनैर्
अलीकामर्षेण भ्रमदविरलभ्रूरुदचलं ।
कचाकृष्टिक्रीडाक्रमपरिचिते चौर्यचरिते
हरिर्लब्धोपाधिः प्रसभमनयन्मां गिरिदरीं ॥ ११० ॥
कदाचिद्वासन्तीकुहरभुवि धृष्टः सरभसं
हसन् गु[illegible]म्बी स्थगयति कराभ्यां मम दृशौ ।
दिधीर्षौ जातेर्ष्यं मयि सखि तदीयाङ्गुलिशिखां
न जाने कुत्रायं व्रजति कितवानां कुलगुरुः ॥ १११ ॥
अतीतेयं वार्ता [illegible]तु पुरः पश्य सरले
वयस्यस्ते सोऽयं स्मितमधुरिमोन्मृष्टवदनः ।
भुजस्तम्भोल्लासादभिमतपरीरम्भरभसः
स्मर क्रीडासिन्धुः क्षिपति मयि वन्धूककुसुमं ॥ ११२ ॥
तदुत्तिष्ठ व्रीडावति निविडमुक्तालतिकया
वधानैनं धूर्तं सखि मधुपुरीं याति न यथा ।
इति [illegible]लज्जवदनुभवारूढजडिमा
सखीनामाक्रन्दं न किल कतिशः कन्दलयति ॥ ११३ ॥
अहो कष्टं वाल्यादहमिह सखीं दुष्टहृदया
मुहुर् मानग्रन्थिं सहजसरलां ग्राहितवती ।
तदारम्भाद् गोपीगणरतिगुरो निर्भरमसौ
न लेभे लुब्धापि त्वदमलभुजस्तम्भरभसं ॥ ११४ ॥

अलिन्दे कालिन्दीकमलसुरभौ कुञ्जवसतेर्
वसन्तीं वासन्तीनवपरिमलोद्गारचिकुरां ।
त्वदुत्सङ्गे लीनां मदमुकुलिताक्षीं पुनरिमां
कदाहं सेविष्ये किसलयकलापव्यजनिनी ॥११५॥
धृतानन्दां वृन्दावनपरिसरे शारदनिशा
विलासोल्लासेन श्लथितकवरीस्फुल्लकुसुमां ।
तव स्कन्धोपान्ते विनिहितभुजावल्लरिमहं
कदा कुञ्जे लीना रहसि विहसिष्यामि सुमुखीं ॥ ११६ ॥
विदूरादाहर्तुं कुसुममुपयामि त्वमधुना
पुरस्तीरे तीरे कलय तुलसीपल्लवमिदं ।
इति व्याजादेनां विदितभवदीयस्थितिरहं
कदा कुञ्जे गोपीरमण गमयिष्यायि समये॥११७॥
इति श्रीकंसारेः पदकमलयोर् गोकुलकथां
निवेद्य प्रत्येकं भज परिजनेषु प्रणयितां ।
निजाङ्गे कादम्बीसहचर वहन्मण्डनतया
स यात्युच्चैः प्रेमप्रवणमनुजग्राह भगवान् ॥ ११८ ॥
मिलद्भृङ्गीं हंसीरमण वनमालां प्रथमतो
मुदा क्षेमं पृच्छन्निदमुपहरेथा मम वचः ।
चिरं कंसारातेरुरसि सहवासप्रणयिनीं
किमेनामेणाक्षीं गुणवति विसस्मार भवति ॥११९॥
इदं किं वा हन्त स्मरसि रसिके खण्डनरुषा
परीताङ्गी गोवर्द्धनगिरिनितम्बे मम सखी ।

भिया संभ्रान्ताक्षं यदिह विचकर्ष त्वयि वलाद्
गृहीत्वा विभ्रश्यन्नवशिखिशिखं गोकुलपतिं ॥ १२० ॥
ततः सम्भाषेथाः श्रुतिमकरमुद्रामिति मुदा
भवत्यां कर्तव्यः किमिति कुशलप्रश्नजडिमा ।
रुचिस्मेरा या त्वं रचयसि वलाच्चुम्बनकलाम्
अपाङ्गेन स्पृष्टा सखि मुररिपोर् गण्डकुहरे ॥ १२१ ॥
निवासस्ते देवि श्रवनलतिकायामिति धिया
प्रयत्नात्त्वामेव प्रणयहृदया यामि शरणं ।
परोक्षं वृष्णीनां निभृतनिभृतं कर्णकुहरे
हरेः काकून्मिश्रां कथय सखि राधाविधुरतां ॥ १२२ ॥
परीरम्भं प्रेम्ना मम सविनयं कौस्तुभमणौ
ब्रुवाणः कुर्वीथाः पतगवर विज्ञापनमिदं ।
अगाधा राधायामपि तव सखे विस्मृतिरभूत्
कथं वा कल्याणं वहति तरलेहि प्रणयिता ॥ १२३ ॥
मुहुः कूजत्काञ्चीमणिवलयमञ्जीरमुरली
वरालम्बी भ्राम्यद्युवतिकलगीतैः सुरमणे ।
स किं साक्षाद्भावी पुनरपि हरेस्ताण्डरसैर्
अमन्दः कालिन्दीपुलिनभुवि तौर्यत्रिकभरः ॥ १२४ ॥
नवीनस्त्वं कम्बो पशु[illegible]भिः परिचयं
न धत्से राधाया गुणगरिमगन्धेपि न क्षती ।
तथापि त्वां याचे हृदयनिहितं दोहदमहं
वहन्ते हि क्लान्ते प्रणयमवदातप्रकृतयः ॥ १२५ ॥

गृहीत्वा गोविन्दं जलधिहृदयानन्दन सखे
सुखेन श्रीवृन्दावनपरिसरे नन्दतु भवान् ।
कथं वा ते गोष्ठं भवतु दयितं हन्त बलवान्
यदेतस्मिन् वेणोर्जयति चिरसौभाग्यमहिमा ॥ १२६ ॥
इति प्रेमोद्गारप्रवणमनुनीय क्रमवशात्
परीवारान् भ्रातर्निशमयति चानूरमथने ।
पुनः कोपोद्भिन्नप्रणयचटुलं तस्य निकटे
कथामाचक्षीथा दशभिरवतारैर् विलसितां ॥ १२७ ॥
ग्रहीतुं त्वां प्रेमामिषपरिवृतं चित्तवडिशं
महामीन क्षिप्रं न्यधित रसपूरे मम सखी ।
विवेकाख्यं छित्वा गुणमथ तदग्रासि भवता
हताशेयं किंवा शिव शिव विधातुं प्रभवति ॥ १२८ ॥
वराकीयं दृष्ट्वा सुभग वपुषो विभ्रमभरं
तवाभ्यर्णं भेजे परमकुतुकोल्लासितमतिः ।
तिरोधाय स्वाङ्गं प्रकटयसि यत्त्वं कठिनतां
तदेतत् किं न स्यात्तव कमठमूर्तेः समुचितं ॥ १२९ ॥
सदा कंसाराते स्फुरति चिरमद्यापि भवतः
स्फुटं क्रोडाकारे वपुषि निविडप्रेमलहरी ।
यतः सा सैरिन्ध्री मलयरुहपङ्कप्रणयिणी
त्वया क्रोडी चक्रे परमरभसादात्मदयिता ॥ १३० ॥
चिरादन्तर्भूता नरहरिमयी मूर्तिरभितस्
तदीयो व्यापारस्तव हि न ययौ विस्मृतिपथं ।

विनीतप्रह्लादस्त्वमिह परमक्रूरचरित
प्रयुक्तो यद्भूयः परहृदयभेदं जनयसि ॥ १३१ ॥
यदात्मानं दर्पादगणितगुरुर्वामन मुदा
मनोवाद्ये नाट्यं त्वयि वलितया कल्पितवती ।
प्रपेदे तस्येदं फलमुचितमेव प्रियसखी
विदूरे यत् क्षिप्ता व्यसनकुलपाशैर्निगडिता ॥ १३२ ॥
इयं नाथ क्रूरा भृगुपतनमाकांक्षति ततो
यदस्यां काठिन्यं तव समुचितं तद्भृगुपतेः ।
इयन्ते दुर्वोधाकृतिरथ भवद्विस्मृतिपथं
यतो यातः साक्षाद्गुरुरपि स नन्दीश्वरपतिः ॥ १३३ ॥
निरानन्दा गावश्चिरमुपहता दूषणकुलैः
खरायन्ते सद्यो रघुतिलक गोवर्द्धनतटाः ।
विराधत्वं घोषो ब्रजति भवदीयप्रवसनाद्
इदानीं मारीचः स्फुटमिह नरीनर्ति परितः ॥ १३४ ॥
प्रपन्नः कालोऽयं पुनरुदयितुं रासभजनैर्
विलासिन्नद्यापि स्फुटमनपराधा वयमपि ।
वितन्वानः कांतिं वपुषि शरदाकाशवनितां
कथं न त्वं सीरध्वज भजसि वृन्दावनामिदं ॥ १३५ ॥
न रागं सर्वज्ञ क्वचिदपि विधत्ते नरपतिं
मुहुर्द्वेष्टि द्रोहं कलयति वलादिष्टविधये ।
चिरं ध्यानासक्ता निवसति सदासौ गतरतिस्
तथाप्यस्यां हंहो सदयहृदयस्त्वं न दयसे ॥ १३६ ॥

परिक्लेशम्लेच्छान् समदमधुपाली मधुरया
निकृन्तन् नैचान्तप्रणयरचनाखड्गलतया ।
त्वमासन्नः कल्किन्निह च तुरगोपाहितरुचिः
स्वदेशं कुर्वीथाः प्रतिमुदितधीराधिकमिदं ॥ १३७ ॥
इति प्रेमोद्गाटस्थपुटितवचो भङ्गिरखिलं
त्वमावेद्य क्लिद्यन्मुखपरिसरो लोचनजलैः ।
ततो गोविन्दस्य प्रतिचरणमाध्वीकपदवीम्
उपासीनो दृग्भ्यां क्षणमवदधीथाः खगपते ॥ १३८ ॥
प्रणेतव्यो दृष्टेरनुभवपथं नन्दतनयो
विधेया गोपीनां स्मरपतिहृतानामुपकृतिः ।
इयं यामैर्गम्या चतुर मथुरापि चिचतुरैर्
इतिद्वैधं नान्तः कलय कलहंसीकुलपते ॥ १३९ ॥
अपूर्वा यस्यान्तर्विलसति मुदा सारसरुचिर्
विवेक्तुं शक्येते सपदि मिलिते येन पयसी ।
कथङ्कारं युक्तो भवतु भवतस्तस्य कृतिनो
विलम्बः कादम्बीरमण मथुरासङ्गमविधौ ॥ १४० ॥
प्रपन्नः प्रेमाणं भगवति सदा भागवतभाक्
पराचीनो जन्मावधिभवरसाद्भक्तिमधुरः ।
चिरं कोपि श्रीमान् जयति विदितः साकरतया
धुरीणो धीराणामधिधरणि वैयासकिरिव ॥ १४१ ॥
रसानामाधारैरपरिचितदोषः सहृदयैर्
मुरारातिक्रीडानिविडघटनारूपसहितः ।

प्रबन्धोऽयं बन्धोरखिलजगतां तस्य सरसां
प्रभोरन्तः सान्द्रां प्रमदलहरीं पल्लवयतु ॥ १४२ ।

इति श्रीरूपगोस्वामिविरचितं हंसदूताख्यं
काव्यं समाप्तं ॥ ० ॥

## पद्माङ्कदूतः ।

गोपी भर्तुर्विरहविधुरा काचिदिन्दीवराक्षी
उन्मत्तेव स्खलितकवरी निःश्वसन्ती विशाल ।
अत्रैवास्ते मुररिपुरितिभ्रान्तिदूतीसहाया
त्यक्त्वा गेहं झटिति यमुनामंजुकुञ्जं जगाम ॥ १ ॥
अप्राप्यैव व्रजपतिसुतं तत्र कालं कियन्तं
मूर्च्छाप्राणप्रियतमसखीसंगता संगमय्य ।
तस्योपान्ते कुलिशकमलस्यन्दनाङ्कादियुक्तं
पद्माकारं मुरहरपदस्याारु चिह्नं ददर्श ॥ २ ॥
तस्मिन्नुद्यन्नवजलधरध्वानमाकर्ण्य भूयः
कन्दर्पेण व्यथितहृदयोन्मत्ततुल्या ययाचे ।
प्रज्ञाहीनं वचनरहितं निश्चलं श्रोत्रहीनं
दौत्यं कर्तुं मुरहरपदो लक्ष्मणं पक्ष्मलाक्षी ॥ ३ ॥
रम्यं यावन्मुरहरपदे शोभते तावदेव
तय्यप्यास्ते कुलिशकमलस्यन्दनाङ्काङ्कशादि ।
गोपीदौत्यप्रकटनभिया सन्निधौ चक्रपाणेर्
याने धीर प्रमुखमुखरो नूपुरो न प्रहीतः ॥ ४ ॥
युक्तं चैतत् त्वयि मधुपुरीं प्रस्थिते पुण्यशीलाः
कीलालोत्थैः सुरभिकुसमैरर्च्चयन्तोपि भक्त्या ।

पश्यन्तस्त्वां नयनसुभगं साश्रुधाराक्षियुग्मं
यास्यन्त्युच्चैः पुलकिततनु प्रेमधारामुदारां ॥ ५ ॥
चेतः प्रस्थापितमणुतया दौत्यकर्मोपयुक्तं
तत्रैवास्ते मुरहरपदस्पर्शमासाद्य मुग्धं ।
आकांक्षेयं तनुगुरुतया नैव गन्तुं मसमर्था
कोऽन्यो गच्छेद्वद मधुपुरीं गोपिकानां हिताय ॥ ६ ॥
आगन्तव्यं झटिति मथुरामण्डलाद्गोपकान्ते
श्रान्तेति त्वं भव मधुरिपुः प्रस्थितः प्रोच्य चेदं ।
वाक्यं तच्च श्रवणमभवत्तेन मेने क्रमाङ्क
प्रायः सत्यं मतमिदमहो कारणं कार्यमेव ॥ ७ ॥
तूर्णं तस्यां गमनमुचितं तेन मे तद्वियोग
व्याधेः शान्तिस्तव च भविता तत्पुरीस्पर्शपुण्यं ।
वृन्दारण्याद्भवतु सुकृतं भूरि तेनैव किंस्यान्
नाकांक्षा किं भवति विपुलश्रीमतोऽर्थान्तरेषु ॥ ८ ॥
अक्रूरस्य व्रजकुलवधूप्राणपानोद्यतस्य
प्रीतिर्भूयो भवतु भवतो दर्शनात्तेन किंवा ।
कार्यासिद्धिर् भवति यदहो मादृशां दुःखहेतुर्
नैवौन्नत्यं सकलभुवनप्रार्थनीयं रिपूणां ॥ ९ ॥
सन्त्येवास्मत्कलुषकरिणः कोटिशो वारणीयास्
ते ष्यस्माभिः स्मृतिकरवरेणाङ्कुशं ते गृहीत्वा ।
स्वच्छन्देन व्रज मधुपुरीं कोभवेद्वा विरोधी
गोपीभर्तुर्विरहजलधिं गोपकन्यास्तरन्तु ॥ १० ॥

आस्ते नूनं यदुषु मथुरामण्डले चक्रपाणिः
कूजद्भृङ्गैरमलकमलैराकुले गोकुले वा ।
तस्माद् गच्छेरतिलघुपुरीं तांच जन्मावनीवद्
वालक्रीडां रचयति मुहुर्यच तचानुरागः ॥ ११ ॥
आस्तां मध्ये तरणितनया भीषणा भूरिनक्रैर्
आवर्ताद्यैरपि नयनभयदैस्तां तरिष्यस्यवश्यं ।
संसाराब्धिं तरति सहसा यत् क्षणं चिन्तयित्वा
तस्यासाध्यं भवति किमहो पारयानं तटिन्याः ॥ १२ ॥
दृष्ट्वैव त्वां विदितमधुना पूर्ववत् पद्मनाभं
प्राप्यावश्यं विरहजलधेः पारमासादयिष्ये ।
मोदिष्ये च क्षणमपि रहेरास्यचन्द्रामृतेन
प्राप्तप्राणा सुरभिकुसुमामोदिते मंजुकुञ्जे ॥ १३ ॥
सम्पर्कात्ते तरणितनयाती[illegible]नन्दं
राज्ञः पन्थास्तलमपि तरोराचितं पद्मरागैः ।
शोभां यास्यत्यचिरमतुलां स्वीयकार्यानुरोधाद्
उक्तैरेतैर्मुहुरपि सखे तच न स्थेयमेव ॥ १४ ॥
ये वीक्षन्ते सततमधुना श्रीपतेरंघ्रिपद्मं
मञ्जीराद्यैः कनककलितैर्भूषणैर्भूषितंच ।
तेषां च त्वं किमु न भविता लोचनप्रीतिहेतुर्
व्यक्तैरेतैः कुलिशकमलस्यन्दनाङ्कादिचिह्नैः ॥ १५ ॥
यस्यासङ्गादलभत तनुं मानुषीं गौतमस्त्री
ध्यानेनैव प्रथितमहिमश्रीपतिं नारदादिः ।

तस्माज्जाते त्वयि मधुरिपोरंघ्रिपद्माद्विचिह्नः
किं दीनानामुपरि करुणालिङ्गितो दृष्टिपातः ॥ १६ ॥
एकं चिह्नं हरिपदभवं पन्नगस्योत्तमाङ्गे
तादृक् शोभामपि खगपतेर् निर्भयत्वं चकार ।
पिण्डेनान्यत्तरणिरभवद् घोरसंसारसिन्धौ
ध्यातं तादृक् त्वमपि महतां जन्मविश्वोपकृत्यै ॥ १७ ॥
उत्फुल्लानामतिसुरभयः सौरभैरम्बुजानाम्
अम्भोलेशैस्तरणिदुहितुः शीतलैः शीतलाश्च ।
अद्यावश्यं सततगतयः स्वैरमाधूतवर्हा
वर्तिष्यन्ते भवदभिमतप्रीतये लोचनाग्र ॥ १८ ॥
त्यक्तव्येयं चिरपरिचिता जन्मभूमीति बुद्ध्या
मा खिद्यस्व त्रिभुवनजनत्राणहेतोः क्रमाङ्क ।
किं न त्याज्यं भवति महतां चेत् परस्योपकारो
वाराणस्या मुनिरपि गतो दक्षिणाशामगस्त्यः ॥ १९ ॥
कर्पूरादेः सलिलमभवत् वैतरण्यम्बुतुल्यं
वाक्यागम्यं नदति कठिनं कोकिलः षट्पदोपि ।
वृन्दारण्ये किरति गरलं दुःसहं शीतरश्मिर्
नैतद्वाच्यं सकृदपि सखे सन्निधौ केशवस्य ॥ २० ॥
प्रस्थानन्ते कुलिशकलनान्निश्चितं पण्डिताग्र्यैश्
चित्तेऽस्माकं तदपि रमते याहि याहीति वाणी ।
अप्रामाण्यं जनयति सदा नन्दसूनोर्वियोगो
व्याप्यज्ञानाद् व्रजकुलभुवां व्यापकस्यापि सिद्धौ ॥ २१ ॥

उक्तप्रायं तरणितनयानागयोस्तत्कथाथाम्
आस्ते को वा जगति भवतां भीतिहेतुः क्रमाङ्क ।
किंच स्वान्ते क्षणमपि भवत्सङ्गमे याति दूरं
भीतिर्मृत्योरपि किमशनिं लोकरीत्या दधासि ॥ २२ ॥
येनारूढं विषधरशिरो भूरि वक्तव्यमन्यत्
किंवाकारि स्तनगिरिवरारोहणंच श्रुतञ्च ।
उत्पन्नस्य प्रियतमपदा तेन भीतिस्तवास्ते
को वा ब्रूयादिति हि सदृशं कारणेनैव कार्यं ॥ २३ ॥
ज्ञातं ज्ञातं कुलिशसदृशं चिह्नमेतन्न वज्रं
नोचेदेवं जनयति कथं लोचनप्रीतिधारां ।
दूरस्थंच ग्लपयति मनो निस्वनो यस्य तत्स्यान्
नेचप्रीतिप्रदमिति वचो न श्रुतं क्वापि केन ॥ २४ ॥
आस्ते चैवं नवजलधरो यं विलोक्य प्रमोदान्
नृत्यन्त्युच्चैर् विषधरभुजो [illegible] भीमः ।
मिथ्यैवायं यदवधि मया वीक्षितस्तादृशोयं
कन्दर्पो मां तदवधि दहत्येव वाणैरसह्यैः ॥ २५ ॥
क्रोशस्यान्ते चरणयुगलं क्षालयन् सूरजायां
यायाः किंच क्षणमपि तरोर्मूलमासाद्य तिष्ठेः ।
उत्कृष्टं [illegible]जनयाते पदं सेवकानां जनानां
पद्भ्यां हीनं तदिति जगतां प्रत्ययः कूर्मलोम ॥ २६ ॥
आरुह्यास्मत्हृदयमथवा गच्छ तुङ्गं तुरङ्गं
सौरं तेजः सजलजलदच्छायया वारणीयं ।

वृष्टिं नैव त्वदुपरि करिष्यत्ययं चण्डरश्मिः
खेदाशङ्की सरसिजसखस्त्वङ्कृताम्भोरुहस्य ॥ २७ ॥
एतेन स्यान्मधुपुरगतिः केन मे पङ्किलोऽभूत्
पन्था नन्दव्रजकुलभुवां लोचनाम्भोभिरुच्चैः ।
नो वा शुष्को हरिविहरजोत्तापितोपीन्दुवक्त्रे
नित्योत्पत्तेर्नयनपयसां वाक्यमेतन्निरस्तं ॥ २८ ॥
अद्भिस्ताभिस्तरणितनया पीनतां नैव लब्धा
गोपीभर्तुर् विरहदहनैः प्रत्युत क्षीणतांच ।
नोचेदेवं सलिलतरसा गोकुले मास्तु किन्तु
प्रस्थानन्ते किल मधुपुरे निर्विरोधं क्रमाङ्क ॥ २९ ॥
क्षीणैवास्ते तरणितनया वस्तुतस्त्वद्वियोगे
का वा पीना भवति वचनं कस्यचिन्नेति युक्तं ।
गोपस्त्रीणां नयनसलिलैर् वर्द्धते सा विशीर्णा
अन्ये नन्दव्रजपुरजना नूनमत्यर्थकं यत् ॥ ३० ॥
सामग्री चेन्न फलविरहो व्याप्तिरेवेति तत्वं
तत्वं गोपीनयनसलिले केवलेप्यस्ति मैवं ।
उत्कण्ठायां हृदि न कुरुते कारणानां सहस्रं
लक्षं वापि क्षणमपि यतः पीवरत्वं जनानां ॥ ३१ ॥
तस्मात्तस्या विरतिरथवा हेतुरन्यादृशोऽस्या
न स्यादेव क्वचिदपि फलं कारणासन्निधाने ।
नष्टे हेतौ प्रभवति कुतः कार्यमित्यप्ययुक्तं
यागेऽपूर्वादिव जनकताद्वारतस्तस्य सिद्धा ॥ ३२ ॥

क्लेशोस्माकं मलयपवनैर् मूर्च्छया चोपकार
स्तस्मात् सर्वं किल विधिकृतं कारणं कारणं न ।
अम्भोजानाममृतकिरणज्योतिषा म्लानिरुच्चैर्
उग्रज्योतिः किरणमिलनाज्जायते च प्रकाशः ॥ ३३ ॥
स्त्रीभिः प्रेम प्रियतमकृतं नैव शक्यं विहातुं
यातेऽतस्त्वां किल मधुपुरीं चंक्रमाय क्रमाङ्क ।
दग्धेनापि व्यथितहृदया पंचबाणेन बाणैः
क्रूरैरुच्चैर् मदनरमणी तत्कृते रोदितिस्म ॥ ३४ ॥
आस्ते चित्ते किल कलयितुं वासना सम्बरारेर्
एकैकेन व्रजकुलवधूप्राणमेकैकमङ्क ।
बाणेनातः सततमतनुर्जातकोपाहितुल्यैः
क्रूरैरस्मान्दहति कुसुमैः शायकैः पंचसंख्यैः ॥ ३५ ॥
यल्लोकानामपकृतिभयात् कालकूटोपि पीतस्
तानेवायं दहति गरलैस्तादृशैराचितेन ।
बाणेनेति त्रिपुररिपुणा जातकोपेन दग्धो
नेत्रोत्थेन प्रबलशिखिना निर्दयं सम्बरारिः ॥ ३६ ॥
नैवं न्यूनः स गरजगरः शम्बरारेः शरस्य
ब्रह्मादीनामयमपि यतो धैर्यविध्वंसहेतुः ।
एतद्वाक्यं गिरिशचरणैः खण्डितं मण्डिताक्षैर्
अन्यासङ्गाद्व्यथितहृदयैर्निर्दयं दग्धुकामैः ॥ ३७ ॥
उत्तापोयं मदनजनितो वर्द्धते नित्यमुच्चैर्
वृन्दारण्ये वसतिरधुना केवलं दुःखहेतुः ।

किञ्चास्माकं नयनसलिलैर्वर्द्धते चेन्नदीयं
केन स्थेयं द्रुतगतिजलैराचिते कुञ्जमध्ये ॥ ३८ ॥
यस्य ध्यानं जनयति सुखं यादृशं तादृशं न
स्वर्लोकादावपि किमपरं ब्रह्मसाक्षात्कृतौ च ।
ज्ञेयञ्चैतन्मुनिवरमुखाम्भोजतः कीदृशी ते
बुद्धिस्तादृग् जनकविधये दर्शने नास्तियत्नः ॥ ३९ ॥
वक्तव्यं यन्मदनजनितं दुःखमस्माकमेतद्
भूयो भूयः प्रियतमपदे गोपयित्वा स्वदेहं ।
दृष्टे तेन त्वयि नयनयोर्निस्तुलप्रीतिहेतौ
यास्यत्येव क्षणमपि मनस्तत्कथायां न तस्य ॥ ४० ॥
वक्तव्यंच स्फुटमिति यदा निर्जनस्थो मुकुन्दः
पद्माद्यङ्कैरतिसुललितैरङ्कितं तत्पदाब्जैः ।
वृन्दारण्यं स्मरसि न कथं श्रीपते मञ्जुकुञ्जं
ज्ञातं ज्ञातं यदिह न परीरम्भणं कुब्जिकायाः ॥ ४१ ॥
आकांक्षाया ग्लपयति मनो मादृशां वासना सा
शाब्दे धर्मे सति न भविता हानिरेव क्रमाङ्क ।
साकांक्षोक्त्या मुरहरपदे सर्वमेतन्निवेद्यं
नोचेत्तस्य प्रमितिजनने केन हेतुस्तवोक्तिः ॥ ४२ ॥
आगन्तव्यं सरसिजदृशा बोधितेन त्वदुक्त्या
नाप्रत्यक्षं प्रमितिकरणं वाक्यमेतन्न युक्तं ।
स्वीकर्तव्यं नयनविरहापत्तिभीत्येति सर्वैर्
मानाभावात् दृशि नहि भवेन्मानमन्यद्द्वितीयात् ॥ ४३ ॥

वौद्धस्यैतन्मतविटपिनो मूलमाच्छादितं स्यात्
मृद्भिस्तस्यान्ततवचनतो यन्मया पूर्वमुक्तं ।
यद्यस्माकं सततमतनोः शायकक्षुन्नदेहः
प्रामाण्ये स्यात् कुसुमविशिखोऽस्तीति वाक्ये न साक्षी ॥४४॥
मूर्खा एव क्षणिकमनिशं विश्वमाहुर्न धीराः
खेदोऽस्माकं हरिविरहजः सर्वदैवास्ति चित्ते ।
नान्त्यः शब्दो वचनमपि यत्तादृशं तस्य किन्तु
प्रेमैवास्मत्प्रियतमकृतं तच्च गोपाङ्गनासु ॥ ४५ ॥
शाके शायकवेदषोडशमिते श्रीकृष्णशर्मार्पयन्
आनन्दप्रदनन्दनन्दनपदद्वन्द्वारविन्दं हृदि ।
चक्रे कृष्णपदाङ्कदूतरचनं विद्वन्मनोरञ्जनं
श्रीलश्रीयुतरामजीवनमहाराजाधिराजादृतः ॥ ४६ ॥

इति महामहोपाध्यायश्रीकृष्णसार्वभौमविरचितं
पदाङ्कदूतकाव्यं समाप्तं ॥ ० ॥

# शान्तिशतकं ।

नमस्यामो देवान् ननु हतविधेस्तेपि वशगा
विधिर्वंद्यः सोपि प्रतिनियतकर्मैकफलदः ।
फलं कर्मायत्तं किममरगणैः किंच विधिना
नमस्तत् कर्मभ्यो विधिरपि न येभ्यः प्रभवति ॥ १ ॥
यदि शान्तौ मनो देयं
यदा मुक्तिपदे रतिः ।
तदा शिह्लनमिश्रस्य
पदमारभ्यतां धिया ॥ २ ॥
सन्तोषसन्ततिकरं विदुषां कवीनां
सांसारिकाप्रतिमदुःखविनाशवीजं ।
यत्नेन शान्तिशतकं विदधे विवेकी
श्रीशिह्लनः प्रकृतिसुन्दरशुद्धबुद्धिः ॥ ३ ॥
आत्मज्ञानविवेकनिर्मलधियः कुर्वन्त्यहो दुष्करं
यन्मुञ्चन्त्युपभोगभांज्यपि धनान्येकान्ततो निस्पृहाः ।
न प्राप्तानि पुरा न संप्रति न च प्राप्तौ दृढप्रत्यया
वांछामात्रपरिग्रहाण्यपि वयं त्यक्तुं न तानि क्षमाः ॥ ४ ॥

धन्यानां गिरिकन्दरोदरभुवि ज्योतिः परं ध्यायताम्
आनन्दाश्रुजलं पिबन्ति शकुना निःशङ्कमङ्के स्थिताः ।
अस्माकन्तु मनोरथोपरचितप्रासादवापीतट
क्रीडाकाननकेलिमण्डपयुषामायुः परं क्षीयते ॥ ५ ॥
विशीर्णः प्रारम्भो वपुरपि जराव्याधिविधुरं
गतं दूरे विप्रस्वजनभरणं वांछितमपि ।
इदानीं व्यामोहादहह विपरीते हतविधौ
विधेयं यत्तत्त्वं स्फुरति मम नाद्यापि हृदये ॥ ६ ॥
वीभत्साः प्रतिभान्ति किन्न विषयाः किन्तु स्पृहा युष्मती
देहस्यापचयो मतौ निविशते गाढो गृहेषु ग्रहः ।
ब्रह्मोपास्यमिति स्फुरत्यपि हृदि व्यावर्तिका वासना
का नामेयमतर्क्यहेतुगहना दैवी सतां यातना ॥ ७ ॥
अजानन्दाहार्तिं विशति शलभो दीपदहनं
न मीनोपि ज्ञात्वा हृतवडिशमश्नाति पिशितं ।
विजानन्तोप्येतान् वयमिह विपज्जालजटिलान्
न मुञ्चामः कामानहह गहनो मोहमहिमा ॥ ८ ॥
क्षान्तं न क्षमया गृहोचितसुखं त्यक्तं न सन्तोषतः
सोढा दुःसहशीतवाततपनक्लेशा न तप्तन्तपः ।
ध्यातं वित्तमहर्निशं नच पुनर्विष्णोः पदं शाश्वतं
तत् तत् कर्म कृतं यदेव मुनिभिस्तैस्तैः फलैर्वंचितं ॥ ९ ॥
कृत्वा शस्त्रविभीषिकां कतिपयग्रामेषु दीनाः प्रजा
मथ्नन्तोविटजल्पितैरुपहता क्षौणीभुजस्ते किल ।

विद्वांसोपि वयं किल चिजगतीसर्गस्थितिव्यापदाम्
ईशस्तत्परिचर्थ्यया न गणितो यैरेष नारायणः ॥ १० ॥

नाथे श्रीपुरुषोत्तमे चिजगतामेकाधिपे चेतसा
सेव्ये स्वस्य पदस्य दातरि सुरे नारायणे तिष्ठति ।
यं कंचित् पुरुषाधमं कतिपयग्रामेशमल्पार्थदं
सेवायै मृगयामहे नरमहो मूढा वराका वयं ॥ ११ ॥

जन्मेदं वन्ध्यतां नीतं
भवभोगोपलिप्सया ।
काचमूल्येन विक्रीतो
हन्त चिन्तामणिर्मया ॥ १२ ॥

याञ्चाशून्यमयत्नलभ्यमशनं वायुः कृतो वेधसा
व्यालानां पृ[illegible]तृणाङ्कुरभुजः स्वस्थाः स्थलीशायिनः ।
संसारार्णवलंघनक्षमधियां वृत्तिः कृता सा नृणां
यामन्वेषयतां प्रयान्ति सततं सर्वे समाप्तिं गुणाः ॥ १३ ॥

यद्वक्त्रं मुहुरीक्षसे न धनिनां ब्रूषे न चाटुं मृषा
नैषां गर्वगिरः शृणोषि न पुनः प्रत्याशया धावसि ।
काले बालतृणानि खादसि सुखं निद्रासि निद्रागमे
तन्मे ब्रूहि कुरङ्ग कुच भवता किं नाम तप्तन्तपः ॥ १४ ॥

कामं वनेषु हरिणास्तृणेन
जीवन्त्ययत्नसुलभेन ।
विदधति धनिषु न दैन्यं
ते खलु पशवो वयं सुधियः ॥ १५ ॥

आस्वाद्य स्वयमेव वच्मि महतीर् मर्मच्छिदो वेदना
मा भूत् कस्यचिदप्ययं परिभवो याञ्चेति संसारिणः ।
पश्य भ्रातरियं हि यौवनजराधिकारकेलिस्थली
मानम्लानमसी गुणव्यतिकरप्रागल्भ्यगर्वच्युतिः ॥ १६ ॥
क गन्तासि भ्रातः कृतवसतयो यत्र धनिनः
किमर्थं प्राणानां स्थितिमनुविधातुं कथमपि ।
धनैर्याञ्चालब्धैर्न न परिभवोऽभ्यर्थनफलं
निकारोऽग्रे पश्चाद्धनमहह भोस्तद्धि निधनं ॥ १७ ॥
प्राणानां वत किं ब्रुवे कठिनतां तैरेव सा विष्कृता
निष्क्रामन्ति कथंचिदेव हि न ये याञ्चावचोभिः समं ।
आत्मानं पुनराक्षिपामि विदितस्थैर्योऽपि येषामहो
मिथ्याशङ्कितताद्वियोगविधुरोयत् प्रार्थये सर्वशः ॥ १८ ॥
अमीषां प्राणानां तुलितविसिनीपत्रपयसां
कृते किं नास्माभिर् विगलितविवेकैर् व्यवसितं ।
यदीशानामग्रे द्रविणकणमोहान्धमनसां
कृतं वीतव्रीडैर् निजगुणकथापातकमपि ॥ १९ ॥
वीभत्सा विषया जुगुप्सितनमः कायो वयो गत्वरं
सर्वैर्बन्धुभिरध्वनीव पथिकैर् योगे वियोगावहः ।
ह्यातव्योयमसार एष विवसः संसार इत्यादिकं सर्वस्य्
एव हि वाचि तेतसि पुनः कस्यापि पुण्यात्मनः ॥ २० ॥
तडिन्मालालोलं प्रतिविरतिदत्तान्धतमसं
भवे सौख्यं हित्वा शमसखमपादेयमनघं ।

इतिव्यक्तोद्गारं चटुलवचसः शून्यमनसो
वयं वीतव्रीडाः शुकइव पठामः परममी ॥ २१ ॥
यदासौ दुर्वारः प्रसरति मदश्चित्तकरिणस्
तदा तस्योद्दामप्रसररसरूढैर् व्यवसितैः ।
क्व तत् धैर्यालानं क्व च निजकुलाचारनिगडः
क्व सा लज्जारज्जुः क्व विनयकठोराङ्कुशमपि ॥ २२ ॥
भिक्षाशनं भवनमायतनैकदेशः
शय्या भुवः परिजनो निजदेहभावः ।
वासश्च जीर्णपटखण्डनिवद्धकन्था
हाहा तथापि विषयान् न जहाति चेतः ॥ २३ ॥
त्वामुदर साधु मन्ये शाकैरपि
यदसि लब्धपरितोषं ।
हतहृदयं ह्यधिकाधिकवांछा
शतदुर्भरं न पुनः ॥ २४ ॥
शुचां पात्रं धात्री परिणतिरमेध्यप्रचयभू
रयं भूतावासो विमृश कियतीं याति न दशां ।
तदस्मिन् धीराणां क्षणमपि किमास्थातुमुचितं
खलीकारः कोयं यदहमहमेवेति रभसः ॥ २५ ॥
रेतः शोनितयोरियं परिणतिर्यद्वस्म तच्चाभवन्
मृत्योरास्पदमाश्रयो गुरुशुचां रोगस्य विश्रामभूः ।
जानन्नप्यवशी विवेकविरहान्मज्जन् न विद्याम्बुधौ
शृङ्गारीयति पुत्रक म्यति वत क्लेचीयति स्त्रीयति ॥ २६ ॥

क्वैतद्वक्त्रारविन्दं क्व तदधरमधु क्वायतास्ते कटाक्षाः
कालापाः कोमलास्ते क्व च मदनधनुर्भङ्गुरो भ्रूविलासः ।
इत्थं खट्वाङ्गकोटौ प्रकटितदशनं मञ्जुगुञ्जत्समीरं
रागान्धानामिवोच्चैरुपहसति महामोहजालं कपालं २७॥

शृणु हृदय रहस्यं यत् प्रशस्तं मुनीनां
न खलु न खलु योषित्सन्निधिः सन्निधेयः ।
हरति हि हरिणाक्षी क्षिप्रमक्षिक्षुरप्र
प्रहतशमतनुत्वं चित्तमप्युत्तमानां ॥ २८ ॥

समाश्लिष्यत्युच्चैर् घनपिशितपिण्डं स्तनधिया
मुखं लालाक्लिन्नं पिवति चषकं सासवमिव ।
अमेध्यक्लेदार्द्रे पथि च रमतेस्पर्शरसिको
महामोहान्धानां किमपि रमणीयं न भवति ॥ २९ ॥

इति शान्तिशतके परीतापोपशमे नाम
प्रथमः परिच्छेदः ॥ १ ॥

---

अयमविचारितचारुतया
संसारोभाति रमणीयः ।
अत्र पुनः परमार्थदृशा
न किमपि सारमणीयः ॥ १ ॥

केनाप्यनर्थरुचिना कपटं प्रयुक्तम्
एतत् सुहृत्तनयवन्धुमयं विचित्रं ।
कस्यात्र कः परिजनः स्वजनो जनोवा

स्वप्नेन्द्रजालसदृशः खलु जीवलोकः ॥ २ ॥

आरम्भः संशयानामविनयभवनं पत्तनं साहसानां
दोषाणां सन्निधानं कपटशतमयं क्षेत्रमप्रत्ययानां ।
दुस्त्याज्यं यन्महद्भिः सुरनरवृषभैः सर्वमायाकरण्डं
स्त्रीरूपं केन लोके विषममृतमयं धर्मनाशाय सृष्टं ॥ ३ ॥

यदा प्रकृत्यैव जनस्य रागिणो
भृशं प्रदीप्तो हृदि मन्मथानलः ।
तदात्र भूयः किमनर्थपण्डितैः
कुकाव्यहव्याहुतयो निवेशिताः ॥ ४ ॥

दधति तावदमी विषयाः सुखं
स्फुरति यावदियं हृदिमूढता ।
मनसि तत्वविदान्तु विवेचके
क्व विषयाः क्व सुखं क्व परिग्रहः ॥ ५ ॥

यदा पूर्वं नासीदुपरि च तथा नैव भविता
तदा मध्यावस्था क्षणपरिचयो भूतनिचयः ।
अतः संयोगेऽस्मिन् परिणतिवियोगे च सहजे
किमाधारप्रेमाः किमधिकरणाः सन्तु च शुचः ॥ ६ ॥

इन्द्रस्याशुचिशूकरस्य च सुखे दुःखे च नास्त्यन्तरं
स्वेच्छाकल्पनया तयोः खलु सुधा विष्ठा च काम्याशनं ।
रम्भा चाशुचिशूकरी च परमप्रेमास्पदं मृत्युतः
संत्रासोपि समः स्वकर्मगतिभिश्चान्योन्यभावः समः ॥७॥

कृमिकुलचितं लालाक्लिन्नं विगन्धि जुगुप्सितं

निरुपमरसप्रीत्या खादन्नरास्थि निरामिषं ।
सुरपतिमिव पार्श्वस्थं श्वा सशङ्कितमीक्षते
गणयति नहि क्षुद्रो लोकः परिग्रहफल्गुतां ॥ ८ ॥
अमीषां जन्तूनां कतिपयनिमेषस्थितिजुषां
वियोगे धीराणां कइह [illegible]स्य विषयः ।
क्षणादुत्पद्यन्ते विलयमपि यान्ति क्षणममी
न केपि स्थातारः सुरगिरिपयोधिप्रभृतयः ॥ ९ ॥
पुत्रः स्यादिति दुःखितः सति सुते तस्यामये दुःखितस्
तद्दुः[illegible]र्जने तदनये तन्मूर्खतादुःखितः ।
जातश्चेत् सगुणोऽथ तन्मृतिभयं तस्मिन्मृते दुःखितः
पुत्रव्याजमुपागतो रिपुरयं मा कस्यचिज्जायतां ॥ १० ॥
स्थिरापायः कायः प्रणयिषु सुखं स्थैर्यविमुखं
महाभोगा रोगाः कुवलयदृशः सर्पसदृशः ।
महावेशः क्लेशः प्र[illegible]ला श्रीरपि तथा
यमः स्मैरी वैरी तदपि न हितं कर्म विहितं ॥ ११ ॥
अर्थं प्राणविनाशसंशयकरीं प्राप्यापदं दुस्तरां
प्रत्यासन्नभयं न वेत्ति विभवं स्वजीवितं कांक्षति ।
उत्तीर्णस्तु ततो धनार्थमपरां भूयो विशत्यापदं
[illegible]णानांच धनस्य चाधमधियामन्योन्यभावः पणः ॥ १२ ॥
विमलमतिभिः कैरप्येतज्जग[illegible]
पुराविधृतमपरैर् दत्तं चान्यैर् [illegible] तृणं यथा ।
इह हि भवनान्यन्ये वीराश्चतर्दश भञ्जते

कतिपयपुरस्वाम्ये पुंसां कएष मदज्वरः ॥ १३ ॥
रम्यं हर्म्यतलं न किं वसतये श्राव्यं न गीतादिकं
किं वा प्राणसमासमागमसुखं नैवाधिकप्रीतये ।
किन्तु प्रान्तपतत्पतङ्गपवनव्यालोलदीपाङ्कुर
छायाचंचलमाकलय्य सकलं सन्तो वनान्तं गताः ॥ १४ ॥
आस्तामकंटकमिदं वसुधाधिपत्यं
त्रैलोक्यराज्यमपि तच्च तृणाय मन्ये ।
निःशङ्कसुप्तहरिणीकुलसङ्कुलासु
चेतः परं वलितशैलवनस्थलीषु ॥ १५ ॥
हरिणचरणक्षुण्णोपान्ताः सशाद्वलनिर्झराः
कुसुमशवलैर् विश्वग्वातैस्तरङ्गितपादपाः ।
विविधविहगश्रेणीचित्रध्वनिप्रतिनादिता
मनसि न मुदं केषां दध्युः शिवा वनभूमयः ॥ १६ ॥
ते तीक्ष्णदुर्जन[illegible]रैरभिन्ना
धीरास्तएव शमसौख्यभुज स्तएव ।
सीमन्तिनीभुजलतागहनं व्युदस्य
येऽवस्थिताः शमफलेषु तपोवनेषु ॥ १७ ॥
कुरङ्गाः कल्याणं प्रतिविटपमारोग्यमटविं
श्रयन्ति क्षेमं ते पुलिनकुशलं भद्रमुपलाः ।
निशान्तादस्वन्तात् कथमपि विनिष्क्रान्तमधुना
मनोऽस्माकं दीर्घामभिलषति युष्मत्परिचितिं ॥ १८ ॥
वासो वल्कलमास्तरः किशलयान्योकस्तरूणां तलं

मूलानि क्षतये क्षुधां गिरिणदीतोयं तृषाशान्तये ।
क्रीडामुग्धमृगैर्वयांसि सहृदो नक्तं प्रदीपः शशी
स्वाधीने विभवे तथापि कृपणा याचन्त इत्यद्भुतं ॥ १९ ॥

शय्या शाद्वलमासनं शुचिशिला सद्म द्रुमाणामधः
शीतं निर्झरवारि [illegible]शनं कन्दः सहाया मृगाः ।
इत्यप्रार्थितसर्वलभ्यविभवे दोषोऽयमेको वने
दुष्प्रापार्थिनि यत् परार्थघटनायत्नैर्विना स्थीयते ॥२०॥

पूरयित्वार्थिनामाशां प्रियं कृत्वा द्विषामपि ।
पारं गत्वा श्रुतौघस्य धन्या वनमुपासते ॥ २१ ॥

आहारः फलमूलमात्मरचितं शय्या मही वल्कलं
संवीताय परिच्छदः कुशसमित् पुष्पानि पुत्रा मृगाः ।
वस्त्रान्नाश्रयदानभोगविभवा निर्यन्त्रणाः शाखिनो
मित्राणीत्यधिकं गृहेषु गृहिणां किं नाम दुःखाहते ॥ २२ ॥

विवेकः किं सोपि स्वरसजनिता यत्र न कृपा
स किं योगो यस्मिन् न भवति परानुग्रहरसः ।
स किं धर्मो यत्र स्फुरति न परद्रोहविरतिः
श्रुतं किं तद्वास्यादुपशमफलं यन् न भवति ॥ २३ ॥

अग्रे कस्यचिदस्ति कश्चिदभितः केनापि पृष्ठे कृतः
संसारः शिशुभावयौवनजराभारावतारादयं ।
वालस्तं वहुमन्यतामसुलभं प्राप्तं युवा सेवतां
वृद्धस्तं विषयाद्वहिष्कृत इव व्याहृत्य किं पश्यति ॥ २४ ॥

पुत्रदारादिसंसारः पुंसां सम्मूढचेतसां ।

विदुषां शास्त्रसंसारः सद्योगाभ्यासविघ्नकृत् ॥ २५ ॥
सार्वभौमभवनं वनवासो
निःस्वभावभवभावनया ते ।
बालिशोहि विषयेन्द्रियचौरैर्
मुच्यते स्वभवने च वने च ॥ २६ ॥
स्थूलप्रावरणोतिपूर्वकथकः काशाश्रुलालाविलो
भग्नोरःकटिपृष्ठजानुदशनो मुग्धोऽतिथीन् वारयन् ।
शृन्वन् धृष्टवधूवचांसि धनुषा संचासयन् वायसान्
आशापाशनिबद्धजीवविभवो वृद्धो गृहे ग्लायति ॥ २७ ॥
वनेषु दोषाः प्रभवन्ति रागिणां
गृहेषु पंचेन्द्रियनिग्रहस्तपः ।
अकुत्सिते कर्मणि यः प्रवर्तते
निवृत्तरागस्य गृहं तपोवनं ॥ २८ ॥

इति शान्तिशतके विवेकोदयोनाम
द्वितीयः परिच्छेदः ॥ ० २ ० ॥

महता पुण्यपण्येनक्रीतेयं कायनौस्त्वया ।
पारं दुःखोदधेर्गन्तुं त्वरया यन्न भिद्यते ॥ १ ॥
दिवसरजनीकूलच्छेदैः पतद्भिरनारतं
वहति निकटे कालः स्रोतः समस्तभयावहं ।
इह हि पततां नास्त्यालम्बो न चापि निवर्तनं

तदिह महतां कोयं मोहो यदेष मदाविलः ॥ २ ॥
अवश्यं यातारश्चिरतरमुषित्वापि विषया
वियोगे को भेदस्त्यजति न जनो यत् स्वयमिमान् ।
व्रजन्तः स्वातन्त्र्यात् परमपरितापाय मनसः
स्वयं मुक्ता ह्येते शमसुखमनन्तं विदधति ॥ ३ ॥
भवारण्यं भीमं तनुगृहमिदं छिद्रवहुलं
वली कालश्चौरो नियतमसिता मोहरजनी ।
गृहीत्वा ज्ञानासिं विरति[illegible] शीलकवचं
समाधानं कृत्वा स्थिरतरदृशो जागृत जनाः ॥ ४ ॥
गृहे पर्यन्तस्थे द्रविणकणमोषं श्रुतवता
स्ववेश्मान्यारक्षा क्रियत इति मार्गोऽयमुचितः ।
नरान् गेहात् गेहात् प्रतिदिवसमाकृष्य नयतः
कृतान्तात् किं शङ्का नहि भवति रे जागृत जनाः ॥ ५ ॥
के यूयं नो वयमिति च वः के भवामो भवाब्धौ
कर्मोर्मीणां विषमवलनैः फेणवत् पुञ्जिताः स्मः ।
तत्क्षेपीयः क्वचि[illegible] विषये चित्तमाधाय पुत्राः
सर्वारम्भैर् लगत जगतामन्तरात्मन्यनन्ते ॥ ६ ॥
सूक्तिं कर्णसुधां व्यनक्तु सुजनस्तस्मिन्न मोदामहे
ब्रूतां वाचमसूयको वि[illegible] तस्मिन्न खिद्यामहे ।
या यस्य प्रकृतिः सतां [illegible] तनुतां किं नस्तया जायते
कुर्मस्तत् खलु कर्मजन्म[illegible]नेग[illegible]च्छेदाय यज्जायते ॥ ७ ॥
मन्निन्दया यदि जनः परितोषमेति

नन्वप्रयत्नसुलभोऽयमनुग्रहो मे ।
श्रेयोर्थिनोहि पुरुषाःपरतुष्टिहेतोर्
दुःखार्जितान्यपि धनानि परित्यजन्ति ॥ ८ ॥
स्वधर्मपीडामपहाय योऽयं
मत्पापशुद्ध्यर्थमिह प्रवृत्तः ।
न चेत् क्षमामप्यहमस्य कुर्यां
मत्तः कृतघ्नो वद कीदृशोऽन्यः ॥ ९ ॥
कश्चित् पुमान् क्षिपति मां प्रतिरूक्षवाक्यैः
सोऽहं क्षमाभवनमेत्य मुदं प्रयामि ।
शोकं ब्रजामि पुनरेवमयं तपस्वी
चारित्रतः स्खलितवानिति मन्निमित्तं ॥ १० ॥
आत्मात्मन्यवधीयतां गृहवसाद्वैराग्यमाधीयतां
बन्धुभ्यो व्यवधीयतां सुरसरित्तीरे सदा स्थीयतां ।
भिक्षार्थं व्यवसीयतां प्रतिदिनं सत्कर्म संचीयतां
कोपश्चेतसि हीयतां परतरं ब्रह्मानुसन्धीयतां ॥ ११ ॥
यत् क्षान्तिः समये स्मृतिः शिव शिवेत्युक्तौ मनोनिर्वृतिर्
भैक्षे चाभिरुचिर् धनेषु विरतिः शश्वत्समाधौ रतिः ।
एकान्ते वसतिर् गुरौ प्रतिनतिः सद्भिः समं सङ्गतिः
सत्वे प्रीतिरनङ्गनिर्जितिरसौ सन्मुक्तिमार्गे स्थितिः ॥१२॥
सम्भोगाद्विषयामिषस्य परितस्तैमित्यमस्ताखिल
ज्ञानोन्मेषतया कथं तव भवेदात्मास्पदं देहिनः ।
साध्यं तद्धि तदेव साधनमितो व्यावृत्तिरेवामिपात्

तस्यां ज्योतिरुपैत्यनिन्धनमिदं दोषचयं धक्ष्यति ॥ १३ ॥

वुद्धेरगोचरतया न गिरां प्रचारो
दूरे गुरुप्रथितवस्तुकथावतारः ।
तत्त्वं क्रमेण विदुषां क[illegible]णावदाते
श्रद्धावतां हृदि पदं स्वयमादधाति ॥ १४ ॥

दुःखाङ्गारकतीव्रः
संसारोऽयं महानसो गहनः ।
इह विषयामिषलालस
मानस मार्जार मा निपत ॥ १५ ॥

अरे चेतोमीन भ्रमणमधुना यौवनजले
त्यज त्वं स्वच्छन्दं यु[illegible]लौ पश्यसि न किं ।
तनूजालीजालं स्तनयुगलतुम्बीफलयुतं
मनोभूः कैवर्तः क्षिपति परितस्त्वां प्रति मुहुः ॥ १६ ॥

विषय विषधराणां दोषदंष्ट्रोत्कराणां
विषयविषविमर्दव्यक्तदुश्चे[illegible]तानां ।
विरम विरम चेतः सन्निधानादमीषां
सुखकणमपि नाहो साहसं मास्म कार्षीः ॥ १७ ॥

एकीभूय स्फुटमिव किमप्याचरद्भिः प्रलीनैर्
एभिर्भूतैः स्मर कति कृताः स्वान्त ते विप्रलम्भाः ।
तस्मादेषां त्यज परिचयं चिन्तयस्व व्यवस्थाम्
आभाषस्ते किमु न विदितः खण्डितः पण्डितःस्यात् ॥१८॥

धूर्तैरिन्द्रियनामभिः प्रणयितामापादयद्भिः स्वयं

सम्भोक्तुं विषयानयं किल पुमान् सौख्याशया वंचितः ।
तैः शेषे कृतकृत्यतामुपगतैरौदास्यमालम्बितं
संप्रत्येष विधेर्नियोगवशगः कर्मान्तरैर्वध्यते ॥ १९ ॥
दैवे समर्प्य चिरसंचितमोहजालं
सुस्थाः सुखं वसत किं परयाचनाभिः ।
मेरुं प्रदक्षिणयतोऽपि दिवाकरस्य
ते तस्य सप्त तुरगा न कदाचिदष्टौ ॥ २० ॥
आकाशमुत्पततु गच्छतु वा दिगन्तम्
अम्भोनिधिं विशतु तिष्ठत वा यथेष्टं ।
जन्मान्तरार्जितशुभाशुभकृन्नराणां
छायेव न त्यजति कर्मफलानुबन्धः ॥ २१ ॥
उपशमफलाद्विद्यावीजात् फलान्तरमिच्छतां
भवति विफलो यत् प्रारम्भस्तदत्र किमद्भुतं ।
नियतविषया ह्येते भावा न यान्ति विपर्ययं
जनयति यतः शालेर्वीजं नजातुयवाङ्कुरं ॥ २२ ॥
यदेते साधूनामुपरि विमुखाः सन्ति धनिनो
नचैषावज्ञैषामपितु निजावित्तक्षयभयं ।
अतः खेदो नास्मिन् परममनुकम्पैव भवति
स्वमांसत्रस्तेभ्यः कइह हरिणेभ्यः परिभवः ॥ २३ ॥
तस्मादनन्तमजरं परमं विकाशि
तद्ब्रह्मवांछत वुधा यदि चेतनास्ति ।
यस्यानुषङ्गतइमे भुवनाधि पत्यभोगदयः

क्षयिण एव सतां विभान्ति ॥ २४ ॥

इति शान्तिशतके कर्तव्यतोपदेशो नाम
तृतीयः परिच्छेदः ॥ ० ३ ० ॥

लक्ष्मीर्निर्वृतिमेति हीनचरितैर्यैरेव तच्छिक्षया
किं नाद्यैव करोमि तामनुचरीं रामां सकामामिव ।
ब्रह्माण्डे निपतत्यपि स्खलति न प्रायेण येषां मनस्
तेषामार्यमनस्विनामनुपदं गन्तास्मि नाहं यदि ॥ १ ॥

लब्धाः श्रियः सकलकामदुघास्ततः किं
सन्तर्पिताः प्रणयिनो विभवैस्ततः किं ।
न्यस्तं पदं शिरसि विद्विषतां ततः किं
कल्पं स्थितं तनुभृतां तनुभिस्ततः किं ॥ २ ॥

निष्कन्दाः किमु कन्दरोदरभुवः क्षीणास्तरूणां त्वचः
किं शुष्काः सरितः स्फुरन्निरिगुहागावस्खलद्वीचयः ।
प्रत्युत्थानमितस्ततः प्रतिदिनं कुर्वद्भिरुद्ग्रीविभिर्
यद्द्वारं प्रतिहारिभिः क्षितिभुजां विद्वद्भिरप्यास्यते ॥ ३ ॥

कामं जीर्णपलाशसंहतिकृतां कन्थां वसानो वने
कुर्यामम्बुभिरप्ययाचितसुखैः प्राणानुबन्धस्थितिं ।
साङ्गग्लानि सवेपितं सचकितं स्वान्तर्निदाघज्वरं
वक्तुं नत्वहमुत्सहे सकृपणं देहीति दीनं वचः ॥ ४ ॥

सत्यं वक्तुमशेषमस्ति सुलभा वाणी मनोहारिणी

दातुं दानवरं शरण्यमभयं स्वच्छं पितृभ्यो जलं ।
पूजार्थं परमेश्वरस्य विमलः स्वाध्याययज्ञः परं
क्षुद्व्याधेः फलमूलमस्ति शमणं क्लेशात्मकैः किं धनैः ॥५॥
सन्ति स्वादुफला वनेषु तरवः स्वच्छं पयो निर्झरं
वासोवल्कलमाश्रयो गिरिगुहा शय्यालतावल्लरी ।
आलोकाय निशासु चन्द्रकिरणाः सख्यं कुरङ्गैः सह
स्वाधीने विभवेप्यहो नरपतिं सेवन्त इत्यद्भुतं ॥ ६ ॥
पाणिः पात्रं पवित्रं भ्रमणपरिगतं भैक्षमक्षय्यमन्नं
वस्त्रं विस्तीर्णमाशादशकममलिनं तल्पमस्वपल्पमुर्वी ।
येषां निःषङ्गताङ्गीकरणपरिचितिः स्वान्त संतोषणास्ते
धन्याः संन्यस्तदैन्यव्यतिकरनिकराः कर्मनिर्मूलयन्ति ॥७॥
महाशय्या भूमिर्मसृणमुपधानं भुजलता
वितानं चाकाशं व्यजनमनुकूलोऽयमनिलः ।
स्फुरच्चन्द्रो दीपः स्वधृतिवनितासङ्गमुदितः
सुखं शान्तः शेते विगतभवभीतिर् नृपइव ॥ ८ ॥
धैर्यं यस्य पीता क्षमा च जननी शान्तिश्चिरं गेहीनी
सत्यं सूनुरयं दया च भगिनी भ्राता मनःसंयमः ।
शय्या भूमितलं दिशोऽपि वसनं ज्ञानामृतं भोजनं
यस्यैते हि कुटुम्बिनो वद सखे कस्मात् भयं योगिनः ॥९॥
धिक् धिक् तान् कृमिनिविशेषवपुषः स्फुर्जन्महासिद्धयो
निष्पन्दीकृतशान्तयोपि च तमःकारागृहेष्वासते ।
तं विद्वांसमिह स्तुमः करपुटीभिक्षान्नशाकेपि वा

वाला वक्त्रसरोजिनीमधुनि वा यस्याविशेषो वशः ॥ १० ॥
मातर्लक्ष्मि भजस्व किंचिदपरं मत्कांक्षिणी मास्मभूर्
भोगेभ्यः स्पृहया लवस्तव वशाः का निस्पृहानामसि ।
सद्यः स्यूतपलाशपत्रपुटिकापात्रे पवित्रीकृते
भिक्षा शक्तुभिरेव संप्रति वयं वृत्तिं समीहामहे ॥ ११ ॥
जिह्वे लोचननासिके श्रवण हे त्वक्वापि न वार्यसे
सर्वेभ्यस्तु नमस्कृताञ्जलिरहं सप्रश्रयं प्रार्थये ।
युष्माकं यदि सम्मतं तदधुना नात्मानमिच्छाम्यहं
होतुं भूमिभुजां निकारदहनज्वालाकराले गृहे ॥ १२ ॥
गतः कालो यत्र प्रणयिणि मयि प्रेमकुटिलः
कटाक्षः कालिन्दीलघुलहरिवृत्तिः प्रभवति ।
इदानीमस्माकं जठरकमठीपृष्ठकठिना
मनोवृत्तिस्तत् किं व्यसनिविमुखैव क्षपयसि ॥ १३ ॥
यदासीदज्ञानं स्मरतिमिरसंस्कारजनितं
तदा ज्ञातं तारामयमिदमशेषं जगदपि ।
इदानीमस्माकं पटुतरविवेकाञ्जनजुषां
समीभूता दृष्टिस्त्रिभुवनमपि ब्रह्म मनुते ॥ १४ ॥
गतः कालो यत्र द्विचरणपशूनां क्षितिभुजां
पुरः स्वस्तीत्युक्ता विषयसुखमास्वादितमभूत् ।
इदानीमस्माकं तृणमिव समस्तं कलयताम्
अपेक्षा भिक्षायामपि किमपि चेतस्त्रपयति ॥ १५ ॥
पूर्वं तावत् कुवलयदृशां लोललोलैरपाङ्गैर्

आकर्षद्भिः किमपि हृदयं पूजिता यौवनश्रीः।
संप्रत्यन्तर्निहितसदसद्भावलब्धप्रबोध
प्रत्याहारैर्विषद हृदये वर्तते कोपि भावः॥ १६॥
गङ्गातीरे हिमगिरिशिलाबद्धपद्मासनस्य
ब्रह्मज्ञानाभ्यसनविधिना योगनिद्रां गतस्य।
किं तैर्भाव्यं मम सुदिवसैर्यच ते निर्विशङ्काः
संप्राप्स्यन्ते जठरहरिणा गाचकण्डूविनोदं॥१७॥
कदा भिक्षाभक्तैः करकलितगङ्गाम्बुत लैः
शरीरं मेस्थास्यत्युपरतसमस्तेन्द्रियसुखं।
कदा ब्रह्माभ्यासस्थिरतनुतयारण्यविहगाः
पतिष्यन्ति स्थाणुभ्रमहृतधियः स्कन्धशिरसि॥१८॥
रथ्यान्तश्च त तथा धृतजरत्कन्थांचलस्याध्वगैः
सत्रासंच सकौतुकंच सकृपं दृष्टस्य तैर्नागरैः।
निर्व्याजीकृतचित्सुधारसमुदा निद्रायमाणस्यमे
निःशङ्कः करटः कदा करपुटीभिक्षां विलु[illegible]॥१९॥
एणाक्षीस्पृ था लुतान कथमप्यास्ते विवेकोदयान्
नित्यं प्रच्युतिशङ्कया क्षणमपि स्वर्गे न मोदामहे।
अप्यन्येषु विना शिवस्तु विषयाभोगेषु तृष्णा न मे
स्वर्णद्याः पुलिने परं हरिपदध्यानं मनो वांछति॥२०॥
अयि बोधाम्बुधौ भावः स्वच्छोयं विश्वबुद्बुदः।
विनीत उदितो वेति विकल्पपटलं मनः॥ २१॥
अहङ्कारः क्वापि व्रजदृजिनहेमात्वमिह भूर्

अभूमिर्दर्पाणामहमपसरत्वं पिशुन हे ।
अरे क्रोध स्थानान्तरमनुसरानन्यमनसां
त्रिलोकीनाथो नो हृदि वसतु देवो हरिरसौ ॥ २२ ॥
मातर्माये भगिनि कुमते हे पितर्मोहजाल
व्यावर्तध्वं भवतु भवतामेष दीर्घो वियोगः ।
सद्यो लक्ष्मीरमणचरणभ्रष्टगङ्गाप्रवाह
व्यामिश्रायां हशदि परमब्रह्मदृष्टिर्भवामि ॥ २३ ॥
आदित्यस्य गतागतैरहरहः संक्षीयते जीवितं
व्यापारैर् वहुकार्यकारणशतैः कालोपि न ज्ञायते ।
दृष्ट्वा जन्मजरावियोगमरणं त्रासश्च नोत्पद्यते
पीत्वा मोहमयीं प्रमोदमदिरामुन्मत्तभूतं जगत् ॥ २४ ॥
मातर्मेदिनि तातमारुत सखे ज्योतिः सुवन्धो जल
भ्रातर्व्योम निवद्ध एष भवतामस्तु प्रणामाञ्जलिः ।
युष्मत्सङ्गवशोपजातसुकृतोद्रेकस्फुरन्निर्मल
ज्ञानापास्तसमस्तमोहमहिमा लीये परे ब्रह्मणि ॥ २५ ॥
आशा नाम नदी मनोरथजला तृष्णातरङ्गाकुला
रागग्राहवती वितर्कविहगा धैर्यद्रुमध्वंसिनी ।
मोहावर्तसुदुस्तरा प्रकटितप्रोत्तुङ्गचिन्तातटी
तस्याः पारगता विशुद्धमनसो नन्दन्ति योगीश्वराः ॥२६॥

इति शान्तिशतके ब्रह्मप्राप्तिर् नाम
चतुर्थः परिच्छेदः संपूर्णः ॥ ० ४ ० ॥

## वृन्दावनशतकं ।

नमस्तस्मै कस्मैचिदपि पुरुषायाद्भुत महा
महिम्ने विभ्राजत्कनकरुचिधाम्ने स्वरूपया ।
असङ्कोचेनैव श्वपचमखिलेभ्यः स्वयमहो
ददौ यत्तद्भक्तिं विमलतरनानारसमयीं ॥ १ ॥
यस्मिन्न प्रविशेन्मनोपि महतां का तत्त्ववार्ता पुनः
शास्त्राणां ज्ञपितंच यद्भगवता भंगैव भक्तोद्भवे ।
तद्वृन्दावनमुन्मदेन रसिकद्वंद्वेन केनाप्यहो
नित्यक्रीडतया गृहीतमिह के विद्युर्न गौरप्रियाः ॥ २ ॥
गुणैः सर्वैर्हीनोप्यह[illegible]जीवाधमतमो
प्यशेषैर् दोषाग्र्यैरपिच वलितो दुर्मतिरपि ।
प्रसादात्तस्यैव[illegible]वेदमह[illegible] राधां व्रजपतेः
कुमारं श्रीवृन्दावनमपि स गौरो मम गतिः ॥ ३ ॥
श्रीवृन्दावनकेलिरङ्गसहजं सौन्दर्यशोभावयो
वैदग्ध्यादिचमत्कृतेः परतरं विश्रान्तिधामा[illegible]तं ।
तन्मेमोहनदिव्यनागरवरद्वंद्वं मिथो जीवनं
गौरश्यामलमुज्वलोन्मदरसाविष्टं हृदि स्फुर्जतु ॥ ४ ॥
इह भ्रामं भ्रामं जगति नहि गन्धोपि कलितो
यदीयस्तच्चैवाखिलनिगमदुर्लक्ष्यशरणी ।

अपारे श्रीवृन्दावनमहिमपीयूषजलधौ
महाश्चर्योन्मीने मधुरिमनि चित्तं लगतु मे ॥ ५ ॥
जयति जयते वृन्दारण्यान्यूनसिन्धोर्
अनुपममिव सारं शारदाकोट्यकथ्यं ।
खगमृगतरुवल्लीकुञ्जवापीतडाग-
स्थलगिरिह्रदिनीनामद्भुतैः सौभगाद्यैः ॥ ६ ॥
वृन्दारण्ये चर चरण दृक् पश्य वृन्दावनश्रीर्
जिह्वे वृन्दावनगुणगणान् कीर्तय श्रोत्र दृष्टान् ।
वृन्दाटव्या भज परिमलं घ्राण गात्र त्वमस्मिन्
वृन्दारण्ये लुठ पुलकितं कृष्णकेलिस्थलीषु ॥ ७ ॥
महोज्ज्वलवसोन्मदप्रणयसिन्धुनिःस्यन्दिनी
महामधुरराधिकारमणखेलनानन्दिनी ।
रसेन समधिष्ठिता भुवनवंद्यया वृन्दया
चकास्तु हृदि मे हरेः परमधाम वृन्दाटवी ॥ ८ ॥
जन्मनि जन्मनि वृन्दावनभुवि वृन्दारकेन्द्रवंद्यायां ।
अपि तृणगुल्मकभावे भवतु ममाशासमुल्लासः ॥ ९ ॥
हरिपदपङ्कजसस्वाद्दनर समनुभूय पूर्णोपि ।
यत्रोद्धव आशास्ते तृणतां तन्नौमि राधिकाविपिनं ॥१०॥
राधावल्लभपादपल्लवजुषां स॰ भन।तायुषां
नित्यं सेवितवैष्णवांघ्रिरजसां वैराग्यजीवस्पृशां ।
हन्तैकान्तर सप्रविष्टमनसामप्यस्ति यद्दूरतस्
तद्राधाकरुणावलोकमचिराद्विदन्तु वृन्दावने ॥ ११ ॥

राधानन्दकिशोरौ निरवधिरससागरे मग्नौ ।
निजकेलिधाम वृन्दाविपिनमुदीक्ष्यैव सौख्यमाप्नुवतः॥१२॥
उद्दामप्रमदोज्ज्वलैकरसया भक्त्या विधूतारु क्वते
व्यक्तं कस्यचिदेव चित्तमुद्भवे तत्तद्दिगाभोगवत् ।
यस्मिन् दिव्यविचित्रकेलिमिथुनं तच्छ्यामगौरं विधु
ज्योत्स्नावत् परिचाययेत तदिह किं विन्देय वृन्दावनं ॥१३॥
विशुद्धाद्वैतैकप्रणयरसपीयूषजलधेर्
घनीभूतद्वीपे समुदयति वृन्दावनमहो ।
मिथः प्रेमोद्घूर्णद्रसिकमिथुनक्रीडमनिशं
तदेवाध्यासीनं प्रविशति पदे क्वापि मधुरे॥ १४ ॥
नाहं वेद्मि कथं नु माधवपदाम्भोजद्वयी ध्यायते
का वा श्रीशुकनारदाद्यकलिते मार्गेस्तु मे योग्यता ।
तस्माद्भद्रमभद्रमेव यदि नामास्तां ममैकं परं
राध केलिनिकुञ्जमञ्जुलतरं वृन्दावनं जीवनं ॥ १५ ॥
यत्सीमानमपि स्पृशन्न निगमो दूरात् परं लक्षते
किंचिद्गूढतया यदेव परमानन्दोत्सवैकावधिः ।
यन्माधुर्यकलोप्यवेदि न शिवब्रह्मायम्भुवाद्यैरहं
तद्वृन्दावननामधाम वसदं विन्दामि राधापतेः ॥ १६ ॥
कदा नु वृन्दावनकुञ्जमण्डले भ्रमं भ्रमं हेमहरिन्मणिप्रभं
संस्मृत्य संस्मृत्य तदङ्घ्रिप्रियं द्वयं तद्वयं विस्मृतिमेतु मेखिलं
छिद्येत खण्डशइदं यदि मे शरीरं [॥१७॥]
घोरा विपत्तिचयो यदि वा पतन्ति ।

हा हन्त हन्त न तथापि ममेह भूयाद्
वृन्दावनादितरतीर्थपदे यियासा ॥ १८ ॥

स्वयं पतितपत्रकणामृतवत् क्षुधाभक्षयन्
सदा मिहिरनन्दिनीशुचिपयोञ्जलीभिः पिवन् ।
कदा मधुरराधिकारमणरासकेलिस्थलिं
विलोक्य रसशेवधिमधिवसामि वृन्दावनं ॥ १९ ॥

भूमिर्यत्र सुकोमला वहुविधप्रद्योतिरत्नच्छटा
नानाचित्रमनोहरं खगमृगाद्याश्चर्यरागान्वितं ।
वल्लीभूरुहजातयोद्भुततमा यत्र प्रधानादिभिस्
तन्मे नन्दकिशोरकेलिभवनं वृन्दावनं जीवनं ॥ २० ॥

साक्षादिवास्ते पुरुषोत्तमांघ्रि
सेवारसादप्यधिको रसौघः ।
स्यन्देत वृन्दाविपिनेप्यदृष्टो
राधाप्रियो यो भुवनस्य साक्षी ॥ २१ ॥

जागर्ति दुन्दुभिरवः परमोच्च राधा
वृन्दावनं वनमतिप्रकटं पुराणे ।
तस्याविधेयमसमोद्भमहानुराग
मूर्तैस्तदङ्गनमत्यहो प्रेत्य हरिं क्व पश्ये ॥ २२ ॥

मिलन्तु चिन्तामणिकोटिकोटयः
स्वयं वहिर्दृष्टिमुपैतु वा हरिः ।
तथापि वृन्दावनधूलिधूसरं
न देहमन्यत्र कदापि यातु मे ॥ २३ ॥

कृपयतु मयि वृन्दारण्यराजीमनाग
प्यतिवहनकृपोरुस्नेहभावादुदिष्णुः ।
फलतु तदनुकम्पाकल्पवल्लीफलं त्वद्
प्रभवतु वसतिर्मे तत्प्रियारामसीम्नि ॥ २४ ॥
तेनाकारि समस्तएव भगवद्धर्मोपि तेनाहृतः
सर्वस्मात् पुरुषार्थतोपि परमः कश्चित् करस्थीकृतः ।
तेनाधायि समस्तमूर्द्धनि पदं ब्रह्मादयस्तं नमन्त्
आदेहान्तमधारि येन वसतौ वृन्दावने निश्चयः ॥ २५ ॥
पुलिने पुलिने कलिन्दजाया
विचरन्नापि तले तले तरूणां ।
घणीभूतसौख्यकन्दवृन्दाविपिने
हन्त कदा दिनानि नेष्ये ॥ २६ ॥
गौरश्यामलमिथुनं
खेलति कन्दर्पलीलया यत्र ।
राधामाधवनाम्ना प्रथितं
तन्नौमि काननं किमपि ॥ २७ ॥
खगवृन्दं पशुवृन्दं
द्रुमवल्लीवृन्दमुन्मदप्रेम्णा ।
प्रीणयदमृतरसेन
ख्यातं वृन्दावनं नमत ॥ २८ ॥
उपरमपि हरिभक्तेर्
नानादुर्भक्तिकमप्यधमं ।

वृन्दाविपिनमचिन्त्य
प्रभावमुन्मादये प्रेम्णा ॥ २९ ॥
भक्त्यैकयान्यच कृतार्थमानिनो
धीरास्तदेतन्न वयं विदामः ।
श्रीराधिकामाधववल्लभं नः
परन्तु वृन्द[illegible]मेव संश्रयः ॥ ३० ॥
दोषाकरोहं गुणलेशहीनः
सर्वाधमो दुर्लभवस्तुकांक्षी ।
वृन्दाटवीमुज्वलभक्तिसार
वीजं कदा प्राप्य भवामि पूर्णः ॥ ३१ ॥
शुद्धोज्वलप्रेमरसामृताब्धेर्
अनन्तपारस्य किमप्युदारं ।
राधाभिधाय प्रचकास्ति सारं
तदेव वृन्दाविपिनं गतिर्मे ॥ ३२ ॥
सर्वसाधनहीनोपि
वृन्दारण्यैकसंश्रयः ।
यः कोपि प्राप्नुयादेव
राधाप्रियरसोत्सवं ॥ ३३ ॥
त्यजन्तु स्वजनाः कामं
देहवृत्तीश्च माप्नुवन् ।
न वृन्दावनसीमातः
पदं मे चलतु क्वचित् ॥ ३४ ॥

सा मे न माता स च मे पिता न
स मे न वन्धुः स च मे सखा न ।
स मे न मित्त्रं स च मे गुरुर् न
यो मे न वृन्दावनवासमादिशेत् ॥ ३५ ॥
तच्छास्त्रं मम कर्णमूलमपि न स्वप्नेपि यायादहो
श्रीवृन्दाविपिनस्य यत्र महिमा नात्यद्भुतः श्रूयते ।
ते मे दृष्टिपथं न यान्तु नितरां सम्भाष्यतामाप्नुयुर्
ये वृन्दावनवैभवे श्रुतिगते नोल्लासिनो नोखिलाः ॥३६॥
अलमलमिह योषिन्नर्दभीसङ्गरङ्गैर्
अलमलमिह वित्तापत्यविद्यायशोभिः ।
अलमलमिह नानासाधनायासदुःखैः
भवत भवत वृन्दारण्यमाश्रित्य धन्याः ॥ ३७ ॥
वैकुण्ठं कोटिकोटिप्रगुणितमपिनो यत्र जालेशमात्रां
प्रोन्मीलत्सौभगाब्धेर्लवमपि लभते शुद्धभावोज्वलायाः ।
कुर्वीरन् भक्तिकोटीर्भगवति न तथाप्यद्भुतप्रेममूर्तेः
श्रीराधाया अभक्तैः किमपिनकलितां नौमिवृन्दाटवींतां
इदमपि भविता किं यत्र कुत्रापि वृन्दा [॥१८॥]
पदमपि मम जातं श्रीचवीथीमकस्मात् ।
मधुरमधुरराधामाधवानङ्गखेला
वनमुपनयदन्तर्दास्यति प्रेममूर्छां ॥ ३९ ॥
कदा नु वृन्दावनवीथिकास्वहं
परिभ्रमन् श्यामलगौरमद्भुतं ।

किशोरमूर्त्तिद्वयमेकजीवनं
पुर स्फुरद्वीक्ष्य पतामि मूर्च्छितः ॥ ४० ॥
किमेतादृग्भाग्यं मम कलुषमूर्तेरपिभवेन्
निवासो देहान्तावधि यदिह वृन्दावनभुवि ।
तयोः श्रीदम्पत्योर् नवनवविलासैर्विहरतोः
पदज्योतिःपूरैरपितु मम सङ्गोपि भविता ॥ ४१ ॥
भूतं स्थावरजङ्गमात्मकमहो यत्र प्रविष्टं किमप्य्
आनन्दैकघनाकृतिस्वमहसा नित्योत्सवं भासते ।
मायान्धीकृतदृष्टिभिस्तु कलितं नानाविरूपात्मना
तद्वृन्दाविपिनं कदाधिवसतः स्यान्मे तनुश्चिन्मयी ॥ ४२ ॥
यत्र प्रविष्टः सकलोपि जन्तुः
सर्वः पदार्थोप्यवुधैरदृश्यः ।
स्व नन्दसम्बीतघन[illegible]मेति
तदेव वृन्दावनमाश्रयन्तु ॥ ४३ ॥
वृन्दावनस्थेष्वपि येच दोषान्
आरोपयन्ति [illegible]मेषु ।
आनन्दमूर्तिष्वपराधिनस्ते
श्रीराधिकामाधवयोः कथं स्युः ॥ ४४ ॥
ये वृन्दावनवासिनिन्दनरता ये वा न वृन्दावनं
श्लाघन्ते तुलयन्ति ये च कुधियः केनापि वृन्दावनं ।
ये वृन्दावनमत्र नित्यसुखचिद्रूपं सहन्ते नवा
तैः पापिष्ठनराधमैर् न भवतु स्वप्नेपि मे सङ्गतिः ॥ ४५ ॥

असह्य वहुदुर्वचो यदिह वदन्ति साक्षान्मम
स्त्रियं वलादपहरन्ति चेत् प्रियसुतादिकं घ्नन्ति वा ।
धनाद्यपि च जीवनं यदि हरन्ति वृन्दावनस्थितास्
तदपि ते प्रिया मम भवन्ति वंद्याः परं ॥ ४६ ॥
परस्वस्तेयैकव्यसनमपि नित्यं परवधू
प्रसक्तं विश्वेषामहह वहुधा हिंसकमपि ।
दुराचारं लोभादपहृतमपि भ्रातरहण
दिवान्धस्त्वं वृन्दावनगतजनं नावगणयेः ॥ ४७ ॥
परधनप दारद्वेषमात्सर्यलोभा
न्टतप ·षपराभिद्रोहमिथ्याभिलापान् ।
त्यजति य इह भक्तो राधिकाप्राणनाथे
न खलु भवति वन्ध्या तस्य वृन्दावनाशा ॥ ४८ ॥
कुरु सकलमधर्मं मुंच सर्वं स्वधर्मं
त्यज गुरुमपि वृन्दारण्यवासानुरोधात् ।
स तव परमधर्मः सा च भक्तिर्गुरूणां
स किल कलुषराशिर्यद्धि वासान्तरायः ॥ ४९ ॥
निर्मर्यादाश्चर्यकारुण्यपूर्णौ
राधाकृष्णौ पश्यतश्चेत् कदाचित् ।
यः कोप्यस्मिन् यादृशस्तादृशो वा
देहस्यान्ते प्राप्नुयादेव सिद्धिं ॥ ५० ॥
राधामधुपतिपादाम्बुज-
भक्तादूरमुक्तस्य ।

अजितेन्द्रियस्य कृपया
मम वृन्दारण्यमाश्रयो भवतु ॥ ५१ ॥
राधामाधवपादपङ्कजरजःप्रेमोन्मदैतत्प्रिय
क्रीडाकाननवासिषु स्थिरचरप्राणिष्वपि द्रोहिषु ।
प्रद्वेषं परमापराधमहह त्यक्तैतरैरप्यघैर्
युक्तोप्यामरणान्तलब्धवसतिर् वृन्दावने स्यात् कृती ॥५२॥
न लोकवेदोद्धतमार्गभेदैर्
आविश्य संक्लिश्यत रे विमूढाः ।
हठेन सर्वं परिहृत्य वृन्दा
वनान्तरे पर्णकुटीं कुरुध्वं ॥ ५३ ॥
यत्तद्वल्कन्तु शास्त्राण्यहह जनतया गृह्यतां यत्तदेव
स्वं स्वं यत्तन्मतं स्थापयतु लघुमतिस्तर्कमात्रे प्रवीणः ।
अस्माकं तूज्ज्वलैकोन्मदविमलरसप्रेमपीयूषमूर्तेः
श्रीराधायाविहाराटविमिहनविनान्यच निर्यातिचेतः ५४॥
स्निग्धश्यामाभिरामच्छविमृदुमसृनोत्तप्तहेमावदातं
ज्योतिरद्वन्द्वंकिशोराकृतिमधुरमहो घूर्णमानं रसेन ।
नित्यं यत्रैव खेलायति मदनकलाकौतुकेनात्युदारं
सारं सारादशेषादवतु दशदिशः श्रीलवृन्दावनं नः ॥५५॥
अपारकरुणाकरं व्रजविलासिनीनागरं
मुहुः सुवहुकाकुभिर्नतिभिरेतदभ्यर्थये ।
अनर्गलवहन्महाप्रणयसीधुसिन्धौ मम
क्वचिज्जनुषि जायतां रतिरिहैव वृन्दावने ॥ ५६ ॥

नानामार्गरतोपि दुर्मतिरपि त्यक्तस्वधर्मोपि हि
स्वच्छन्दाचरितोपि दूरभगवत्सम्बन्धगन्धोपि च ।
कुर्वन् यत्र च कामलोभवशतो वासं समस्तोत्तमं
यायादेव रसात्मकं परमहं तन्नौमि वृन्दावनं ॥ ५७ ॥

इह सकलसुखेभ्यः सूत्तमं भक्तिसौख्यं
तदपि चरमकाष्ठां सम्यगाप्नोति यत्र ।
तदिह परमपुंसा धाम वृन्दावनाख्यं
निखिलनिगमगूढं मूढबुद्धिर्न वेद ॥ ५८ ॥

भजन्तमपि देवतान्तरमथाक्षरब्रह्मणि स्थितं
पशुवदेव वा विषयभोगमात्रे रतं ।
अचिन्त्यनिजशक्तितः स्वगतराधिकामाधव
प्रगाढरसदुर्मदं कुरुत एव वृन्दावनं ॥ ५९ ॥

यत्कोट्यंशमपि स्पृशेन्न निगमो यन्नो विदुर्योगिनः
श्रीशब्रह्मशुकार्जुनोद्धवमुखाः पश्यन्ति यन्न क्वचित् ।
अन्यत् किं व्रजवासिनामपि न यत् दृश्यं कदालोकये
तद् वृन्दावनरूपमद्भुतमहं राधापदैकाश्रयः ॥ ६० ॥

विसृज्य द्वैतमात्रं प्रणयमयमहो ज्योतिरेकार्णवान्तः
श्रीवृन्दारण्यमत्युच्चलदतुलरसाम्भोधितस्मिन् सखे त्वं ।
वेषं किंचिन्गृहीत्वोज्ज्वलमखिलकलाकोमलाभीरबाला
प्राणाः श्रीराधिकायाः किमपि रसनिधेश्चाटुकारं भजेथाः
दुर्वासनासुदृढरज्जुशतैर्निबद्धम्　　　[॥ ६१ ॥]
आकृष्य सर्वत इदं स्वबलेन कृष्ण ।

वृन्दावने विहरतः सह राधया ते
पादारविन्दसविधं नय मानसं मे ॥ ६२ ॥
वशीकर्त्तुं शक्यो नहि नहि मनागिन्द्रियगणो
गुणोभून्नैकोपि प्रविशति सदा दोषनिचयः।
क्व यामः किं कुर्मो हरि हरि मयीशोप्यकरुणः
स्ववासं श्रीवृन्दावन वितर मानन्यगतिकं ॥ ६३ ॥
जातिप्राणधनानि यान्तु सुयशोराशिः परिक्षीयतां
सद्धर्मा विलयं प्रयान्तु सततं सर्वैश्च निर्भर्त्स्यतां।
आधिव्याधिशतेन जीर्यतु वपुर्लुप्तप्रतीकारतः
श्रीवृन्दाविपिनं तथापि न मनाक् त्यक्तुं ममास्तां मतिः
रक्षति संसारभयाद्दोपाकरम् [॥ ६४ ॥]
अप्यशेषदेहभृद्वृन्दं।
वृन्दावनमिति तेन प्रथितं
तन्नौमि काननं किमपि ॥ ६५ ॥
वृन्दारण्यादन्यत् प्रकृतेरन्तर्बहिर्वापि।
नैवास्ति मधुरवस्त्वित्यवकलितं यैर् नमस्तेभ्यः ॥ ६६ ॥
विभ्राजत्तिलका कलिन्दतनयानीरौघनीलाम्बरा
उद्दंचत्कांचनचम्पकच्छविरहो नानारसोल्लासिनी।
कृष्णप्रेमपयोधरेण रसदेनात्यन्तसम्मोहिनी
गोपस्वात्मजवल्लभा विजयते राधेव वृन्दाटवी ॥ ६७ ॥
यस्मिन् कोटिसुरद्रुमैर धुरयुता भूमीरुहः पोषका
भक्तिः सद्वनिता महारसमयी यत्र स्वयं श्लिष्यति।

यत्र श्रीहरिदासवर्यवदिताः खट्वायमानाः शिलास्
तद् वृन्दावनमद्भुतं सुखमयं को नाम नालम्बते ॥६८॥
विन्दन्ति यावत् प्रणयं न मन्दा
वृन्दावने प्रेमविलासकन्दे ।
तावन्न गोविन्दपदारविन्द
स्वच्छ-- सद्भक्तिरहस्यलाभः ॥ ६९ ॥
स्मारं स्मारं नवजलधरश्यामलं धाम विद्युत्
कोटिज्योतिस्तनुलतिकया राधयाश्लिष्यमाणं ।
उच्चैरुच्चैः सरससरसी प्राञ्जवी जृम्भमाण
प्रेमाविष्टो भ्रमति सुकृती कोपि वृन्दावनान्तः ॥ ७० ॥
राधापदाङ्कभूषितवृन्दारण्य
स्थलीषु निर्भरप्रेम्णा हरि हरि ।
कदा लुठामि प्रतिपद
गलदस्रुरुल्लसत्पुलकः ॥ ७१ ॥
पूर्णोज्वलत्प्रेमरसैकमूर्तिर्
यत्रैव राधाव्रजवि हरीति ।
तदेव वृन्दावनमाश्रितानां
भवेत् परं भक्तिरहस्यलाभः ॥ ७२ ॥
सर्वं त्यक्त्वा सरसविशदप्रेमपीयूषसान्द्रे
वृन्दारण्ये द्रुततरलत गुल्मकाद्यैर् मनोज्ञे ।
राधाकृष्णोज्ज्वलगुणगणोद्दानमत्तालिकारैर्
नीरेणापि स्थितिमिह तनोरध्यवस्या वसन्तु ॥ ७३ ॥

श्रीराधायाः कनकरुचिरज्योतिरङ्गच्छटौघैः
शुद्धप्रेमोज्ज्वलरसमयैः सेव्यमानं समन्तात् ।
गोविन्दस्याम्बुदरुचितनोर्ज्योतिरम्भोधिपूरैः
सान्द्रानन्दात्मभिरपि चितं नौमि वृन्दावनं तत् ॥ ७४ ॥
निन्दा वा स्तुतिरेव वा वहुविपत् सम्पत्तिरेवास्तु वा
पाण्डित्यं वत मूर्खतापि यदि वा रागोविरागोथवा ।
यत् किंचिद्भवतु श्रुतेरपि मनाग्लक्ष्यं न यद्वैभवं
तद्वृन्दाविपिनं न जीवनमहं स्वप्नेपि हातुंक्षमः ॥ ७५ ॥
[illegible] वा यदि जनाः कुर्वन्ति सर्वे [illegible] स्कारं
दुर्विषहंच तेन नहि मे खेदोस्त्यनीयानपि ।
देवा देव्य इमे च भूतनिवहाः [illegible] दद्युर्महा
स्नेहात्तुष्टिमतो न मे गुरुतृषा वृन्दावनीये वसे ॥ ७६ ॥
भ्रातः सम [illegible]पि साधनानि
विहाय वृ[illegible]वनमाश्रयस्व ।
यथा तथा प्राक्तनवासनावसात्
शरीरवानी हृदयं विचेष्टतां ॥ ७७ ॥
तादृक् कालो भवतु भगवान् येन कस्यांचि देनी
दृश्या शक्तोप्यहह न वहिर्यामि वृ[illegible]टवीतः ।
तादृक् दम्भोप्युदयतु तथाहंकृतिश्चापि मे स्याद्
ये न प्यस्मिन्वसमयवने र[illegible]चयेनित्यवासं ॥ ७८ ॥
वरं वृन्दारण्ये हरि हरि करेखर्परभृतो
भ्रमामो भैक्षार्थं स्वपचगृहवीथीषु दिनशः ।

तथापि प्राचीनैः परमसुकृतैरच मिलितं
न नेष्यामोन्यच क्वचिदपि कथंचिद्वपुरिदं ॥ ७९ ॥
जरत्कन्थामेकां दधदपि च कौपीनमनिशं
प्रगायन् श्रीराधामधुपतिरहःकेलिलहरीं ।
फलं वा मूलं वा किमपि दिवसान्ते कवलयन्
कदा नेष्ये वृन्दावनभुवि दशां जीवनमयीं ॥ ८० ॥
प्रकृत्युपरि केवले सुखनिधौ परब्रह्मणि
श्रुतिप्रथितवैभवं परपदं विकुण्ठाभिधं ।
तदन्तरखिलोज्वलं जयति माथुरं मण्डलं
महारसमयं सखे कलय तच वृन्दावनं ॥ ८१ ॥
कदा वृन्दारण्यं श्रवणवसनस्पर्शननिरीक्षण
घ्राणाद्यैर् मे स्फुरति वसमिच्छन् श्रवदिव ।
कदा वा तल्लोकोत्तरवसमदान्धो मधुपते
गुणानुच्चैरुच्चैः सरसमुपगास्यामि परितः ॥ ८२ ॥
स्वानन्दसच्चिद्घनरूपतामतिर्
यावन् न वृन्दावनवासिजन्तुषु ।
तावत् प्रविष्टोपि न तच विन्दते
ततोपराधात् पदवीं परात्परां ॥ ८३ ॥
यदैव सच्चिद्रसरूपबुद्धिर्
वृन्दावनस्तस्थिरजङ्गमेषु ।
स्यान्निर्व्यलीकं पुरुषस्तदैव
चकास्ति राधाप्रियसेविरूपः ॥ ८४ ॥

सकलविभवसारं सर्वधर्मैकसारं
सकलभजनसारं सर्वसिद्धैकसारं ।
सकलमहिमसारं वस्तु वृन्दावनान्तः
सकलमधुरिमाम्भोरासिसारं विहारं ॥ ८५ ॥
दैवी वाक् प्रतिषेधिनी भवतु मे स्याद्वा गुरूणां गिरां
श्रेणी शास्त्रविदामिहास्तु वहुधा यः कोपि कोलाहलः ।
त्यक्ता साधनसाध्यजातमखिलं लगेन्नु मे राधिका
क्रीडाकाननवाससम्पदि मनाक् व्यावर्त्तते नो मनः॥८६॥
प्रगायन्नटन्नुद्धसन्नालुठन्
वप्रे धावन् रुदन् सम्पत् मूर्छितो वा ।
कदा वा महाप्रेममाध्वीमदान्धस्
यिरष्यामि वृन्दावने लोकवाह्यः ॥ ८७ ॥
न लोकं न धर्मं न गेहं न देहं
न निन्दा स्तुतिर् वापि सौख्यं न दुःखं ।
विजानन् किमप्युन्मदप्रेममाध्व्या
ग्रहग्रस्तवत् कर्हि वृन्दावने स्यां ॥ ८८ ॥
हरे कृष्ण कृष्णेति कृष्णेति मुख्यान्
महाश्चर्यनामावलीसिद्धमन्त्रान् ।
कृपामूर्तिचैतन्यदेवेन गीतान्
कदाभ्यस्य वृन्दावने स्यां कृतार्थः ॥ ८९ ॥
हैमस्फाटिकपद्मरागरचितैर् माहेन्द्रनीलैर्द्रुमैर्
नानारत्नमयस्थलीभिरलिभिर्झङ्काररितोद्वल्लिभिः ।

चित्रैः कीरमयूरकोकिलमुखैर्नानाविहङ्गैर्लसत्
पद्माद्यैश्च सरोभिरद्भुतमहं ध्यायामि वृन्दावनं ॥ ९० ॥
ताम्बूलपानकमनोहरमोदकादि
रम्ये लसन्मृ - लपल्लवचारुतल्पे ।
दूरेस्थितालिभिरहोसुहृदावपेक्ष्य
वृन्दावनं स्मर निकुञ्जगृहैर् मनोज्ञं ॥ ९१ ॥
क्वचिद्रतिविम [illegible] तल्पकैः कुत्रचिद्
रतो पकरणान्वितप्रियमृदु प्रसूनास्तरैः ।
क्वचित् प्रमदराधिकामधुपतिप्रवृत्तोत्सवैः
सदानवनिकुञ्जकैः स्मर सुमंजुवृन्दावनं ॥ ९२ ॥
राधाकृष्णरहःसुहृत्क्षितिधरस्योपत्यकासुस्फुरन्
नानाकेलिनिकुञ्जवीथिषु न [illegible] ादिषु ।
भ्रामं भ्राममहर्निशं ननु परं श्रीवासकेलिस्थली
रम्यास्वेव कदाप्रकाशितर ःप्रेमा भवेयं कृती ॥ ९३ ॥
अलं क्षयिसुदुःखदैर् युवति पुत्रवित्तादिकैर्
विमुक्तिकथयाप्यलं मम नमो वि [illegible] ण्ठप्रीये ।
परत्विह भवे भवे भवतु वाघभानव्यथो
भजेन्नतनयो वने लसति यत्र तस्मिन् रतिः ॥ ९४ ॥
नमामि वृन् ावनमेव मूर्ध्ना
वदामि वृन् ावनमेव वाचा ।
स्मरामि वृन्दावनमेव बुद्ध्या
वृन्दावनादन्यदहं न जाने ॥ ९५ ॥

राधाकेलिरसैकानन्दं वृन्दावनमेव जीवनं येषां ।
तच्चरणाम्बुजरेणो राशामेवाहमाशासे ॥ ९६ ॥
शृण्वन्ति शुकसारिकाः सु[illegible]नि राधापतेस्
[illegible]ष्टये तरुलतासदोत्फुल्लिताः ।
सरांसि कमलोत्पलादिभिरधुश्च यत्र श्रियं
तदुत्सवस्रुते मनः स्मरतदेववृन्दावनं ॥ ९७ ॥
नानाकेलिनिकुञ्जमण्डपयुते न[illegible]वा[illegible]पिका
रम्ये गुल्मलताद्रुमैश्च परितो न[illegible]ः शोभिते ।
नानाजातिसमुल्लसत्खगमृगैर् नानाविलासस्थली
प्रद्योतद्युति रोचिषि प्रिय कदा ध्येयोसि वृन्दावने
यत्रैवातिरसन्मदं विहरते मत्प्रेष्ठवस्तुद्वयं [॥९८॥]
भक्तिः कापि महा[illegible]वमयी यत्रैव निस्यन्दते ।
तत्रैव प्रविशन्ति नैव निगमश्रेणीगिरां भङ्गयस्
तस्मिन्नेव ममास्तुधीः प्रणयिणी वृ[illegible]वने पावने ॥९९॥
वान्या गद्गदया कदा मधुपतेर् नामानि संकीर्तये
धाराभिर्नयनाम्भसां तरुतलक्षौणीं कदा पङ्कये ।
दृष्ट्वा भावनया पुरोमिलदिव स्वान्तस्वभोग्यंमहो
द्वंद्वं हेमहरिन्मणिच्छवि कदा नंस्ये मुहुर्विह्वलः ॥ १०० ॥
वृन्दारण्यनि[illegible]ञ्जसीमनि वसन् प्रेमान्तरश्चिन्तयन्
स्वप्राणैकघनं किशोर[illegible] द्रक्ष्याम्यकस्मात् कदा ।
[illegible]माका[illegible]का रसमयी गौरीश्च काश्चित् छटाः
पश्यामिशृणुयांच शीतमधुरा काश्चिन्मिथोवाक्सुधा॥१०१॥

वृन्दारण्ये किमपि जनतादुःप्रवेशं प्रदेशं
गत्वा प्रोच्चैर्निजदयितयोर्नामजल्पन्नुदस्रुः ।
अत्यन्तार्त्या विकलविकलो दिव्यमूर्त्तैकयापि
श्रीश्वर्याज्ञाकरमृगदृशावाक्सुधास्वासितः स्यां ॥ १०२ ॥
एतत् कारुण्यपुञ्जं कतिदिनकलितस्वाश्रयप्रौढि राधा
कृष्णांघ्रिद्वंद्वगूढप्रणयमयरसास्वाञ्जितो साधुदृष्टैः ।
श्रीमद्वृन्दावनं ये निजमहितपराकारिरूपेन सान्द्रा
नन्दौघस्य दिवाप्रोच्चलितमधुरिमैकार्नवेनाविरास्तां
कदा सुदृढभावनोदितनिजेष्टरूपो [॥ १०३ ॥]
मनागपि स्मृतशरीरकोनहिरसेप्रविष्टोद्भुते ।
क्षणं किमुमुहुर्तकं किमथवानमेवास्थितो
वहिर्दृगपि मुग्धवद्वा वहुविहरामि वृन्दावने ॥ १०४ ॥
नान्यद्वदामि न शृणोमि न चिन्तयामि
नान्यद्व्रजामि न भजामि न चाश्रयामि ।
पश्यामि जाग्रति तथास्वपनेपिनान्यत्
श्रीराधिकारतिविनोदवनं विनाहं ॥ १०५ ॥
किं मां खेदयसे विमुंच वसनं तल्पोत्तमेस्मिन् सुखे
नागत्य स्वपिहि त्यज त्यजभुजं श्लिष्यामि कान्तेसकृत् ।
आः किं निर्दयमुंच मुंच नकिमप्यापीडये राधिका
कृष्णालापमिमं कदानु शृणुयां वृन्दाटवीकीरतः ॥१०६॥
कदा वास्वच्छन्दं दिनरजनिवृन्दावरवने
चरन्नेकान्तः स्वस्तुत नवनिजकुञ्जानि प्रविशन् ।

अकस्मादेकस्मौकिरमधुरकैशोरसुधया
इतो न त्वं याया इति मृदुगिरा वारयति मां ॥ १०७ ॥
कदा वा तुष्णीकः शिथिलितसमस्तव्यवहृतिस्
त्यजन् दीर्घश्वासं कथमपि गृहीतैककवलः ।
सदा जाग्रत्प्रायक्षणमुदिततन्द्रोतिमधुरं
तदालोके वृन्दावनभुवि निजप्राणमिथुनं ॥ १०८ ॥
अकस्मादेकस्मान्नवललित[illegible]ञ्जादत वहिर्
भवत् स्मित्वा नव्यं तरुणमिथुनं लौ[illegible]मिव ।
गतो दूरं दृष्ट्वा पुनरथ निवृत्य स्वदयितौ
वितर्क्य स्यां वृन्दावनभुवि महाप्रेमविकलः ॥ १०९ ॥
कदा पूर्णज्योत्स्नाधवलरजनौ वासवलये
चरन्नेको वृन्दावनप्रतिविलासस्मृतिपरः ।
अकस्मादानन्दाम्बुधिलहरिकोलाहलमिव
ध्वनिं दिव्यं वेणोर्वलयरसनादेश्च शृणुयां ॥ ११० ॥
कदा वा कस्यापि स्फुटनवकदम्बस्य विटपे
स्फुरद्गोपीभर्तुः किमपि कवये स्मेरवदनं ।
कदा श्रीराधायाः कुसुमचयलोलांचललितं
करं वृक्षे वृन्दावनभुवि लतासु क्वचिदपि ॥ १११ ॥
इदं मे किं भावि स्रुतकनकगौरच्छवि हरिन्
मणिश्यामं धामद्वयमिह मिथो मेर्पितभुजं ।
निरीक्षे तत्स्मेरं वहुविध महाप्रेमविहृतिं
सितं पश्चाच्छायाद्वयमथ पुरो मूर्छयति मां ॥ ११२ ॥

अपि प्रेमौतकण्ठ्यात्क्षितिषु विलुठत् स्वं वपुरिदं
करेण स्पृष्ट्वा मामनुचरयते राधा प्रिययुता ।
अहो वृन्दारण्येऽद्भुतमहिमसीमन्यापि सुदुर्
घटाशा काप्येका समुदयति हा किं न भविता ॥ ११३ ॥
कदा वा कालिन्दीतटनिकटवृन्दावनलता
निकुञ्जान्तः सुप्तं तदतिसरसं प्रेष्ठमिथुनं ।
मिथो गाढाश्लिष्टं मृदु मृदु मया लालितपदं
मुदा वीक्षे स्वप्नेप्यहह सुखनिद्रागतमहं ॥ ११४ ॥
महाश्चर्यानन्तस्वमहिमवलादेव सकला
धमस्याप्याशानां व्यतिकरमसम्भाव्यमपि मे ।
कदा वृन्दारण्यं स्ववसतिकथामाचनिवहत्
कृपापूरं संपूरयतु परतोप्यर्वुदजनैः ॥ ११५ ॥
स्वकर्मस्रोतोभिः सततमभितश्चालितः मुं
प्रभो जीवं यच क्वचिदपि न यात्यन्तविवशं ।
परन्त्वेतावन्मे भवतु भवदुःखार्दितहृदो
ऽप्यविश्रान्तं वृन्दावनपदपरे वास्तु रसना ॥ ११६ ॥
न सत्याख्ये लोके स्पृहयति मनो ब्रह्मपदवीं
न वैकुण्ठे विष्णोरपि मृगयते पार्षदतनुं ।
अपि श्रीवृन्दावनसरसभावोत्सवरतां
निवासे धन्यानां सुवहुकृमिजन्मापि मनुते ॥ ११७ ॥
श्रीमद्वृन्दाविपिनकुसुमामोदवाही समीरो
यस्मिन् देशे सरति तदवच्छिन्नकृष्णाह्नतो वा ।

येषां वृन्दावनमनुसक्तज्जीवया संनतं वा
तच्चैवा स्तां मम खलु जनिर्हन्त तेषां गृहेपि ॥ ११८ ॥
ममापि स्यादेतादृशमपि दिनं किन्नु परमं
यदा वृन्दाटव्याः कथमपि कृतस्पर्शनमपि ।
अहोदेहं दूरादपि समवलोक्यापि जनुषां
मुहुर्धन्यं मन्येधरणि पतितः स्यां कृतनतिः ॥ ११९ ॥
यदपि च मम नास्ति श्रीलवृन्दावनीये
महिमनि न समोर्द्धं हन्त विश्वासगन्धः ।
यदपि मम न तस्मिन्नास्ति वासैषनापि
प्रसरतु मम तादृश्येव वाणी तथापि ॥ १२० ॥
अचैतन्यप्रायं जगदिदमहो सर्वविदपि
प्रथीयः श्रीवृन्दावनमहिमबीज[illegible]तिः ।
अहो भ्राम्यदृष्ट्वा विविधसदसद्वर्त्मसु तथा
न पूर्णं स्याच्चित्तं परमिह निषेवे पदरजः ॥ १२१ ॥
हा वृन्दावन हा महारसमय प्रेमैकसम्पन्निधे
हा राधावति नागरस्मरकला साक्षिन्मदेकप्रिय ।
हा रासेश्वरविश्वमूर्छनलतावल्लीखगाद्यद्भुत
श्रीम[illegible]प्रकृतेः [illegible] पर त्वं मे गतिस्त्वंगतिः ॥ १२२ ॥
नमोस्तु वृन्दावनसुन्दराभ्यां
नमोस्तु वृन्दावनविभ्रमाभ्यां ।
नमोस्तु वृन्दावनजीवनाभ्यां
नमोस्तु वृन्दावननागराभ्यां ॥ १२३ ॥

नमोस्तु वृन्दावनसत्कृपाभ्यां
नमोस्तुवृन्दावनसद्रसाभ्यां ।
नमोस्तु वृन्दावनपूर्णताभ्यां
नमोस्तु वृन्दावनगोचराभ्यां ॥ १२४ ॥
वृन्दारण्योत्तमं नास्ति
नास्ति मत्तोधमः क्वचित् ।
राधानाम्नः प्रभावेन
यदि स्यान्मेलनं तयोः ॥ १२५ ॥
श्रीमद्वृन्दावने सर्याः
सकृन्नामैकमङ्गलं ।
सर्वाश्चर्यानन्तशक्ति
मुखे विजयतां मम ॥ १२६ ॥

इति श्रीवृन्दावनशतकं समाप्तं ॥ ० ॥

## वृन्दावनयमकं ।

वरदाय नमो हरये
पतति जनो यं स्मरन्नपि न मोहरये ।
वहुशश्चक्रं दहता
मनसि दितिर् येन दैत्यचक्रं दहता ॥ १ ॥
स्वमिव भुजं गवि शेषं
व्युपधाय स्वपिति यो भुजंगविशेषं ।
नवपुष्करसमकरया
श्रीयोर्मि पंक्तया च सेवितः समकरया ॥ २ ॥
येन च बलिरसुरोधः
समवस्थापितः क्षितेरसुरोधः ।
पृथुकः सन्निभवदनः
चिक्षेप च यः सरोजसन्निभवदनः ॥ ३ ॥

विशेषकं ॥

स्तौमि च लाङ्गलवंतं
देवं यः संयुगे च लाङ्गलवंतं ।

कपिमकरोदसुरहितं
द्विविदं दृढमुष्टिताडनादसुरहितं ॥ ४ ॥
आपानपरंपरया
भेजे यं रेवती जितपरंपरया।
विभ्रतमालानाभौ
बाहूमग्नकुसुमाश्च माला नाभौ ॥ ५ ॥
यो रूढमदारुणया
तन्वा प्रणतं प्रतिद्विषमदारुणया।
कर्षितदानवकुलया
विबभौ गंधविजितेभदानवकुलया ॥ ६ ॥
ग्रहपतिरिव हिमहीनः
कांत्याभूदुग्रसेन इति हि महीनः।
प्रकृतिभिरविरहितीह
स्वयं वृत्तः संहताभिरविरहितीहः ॥ ७ ॥
बलभिदरीभागानां
जेता विंध्यर्क्षवदरीभागानां।
शौकल्य दाशार्हस्य
प्रभवो यशसः समश्च दाशार्हस्य ॥ ८ ॥
यो भोक्तेव सुधायाः
वर्णकविः शशिता च वसुधायाः।
यस्य परामुदधीनां
तटेषु दत्तिं प्रचक्षते मुदधीनां ॥ ९ ॥

भरत इव विभावसवः
सर्वेषां प्राणिनाम विभावसवः ।
यस्मिन्वसुधामवति
स्थिरा बभुबुः समाश्च वसुधामवति ॥ १० ॥
अनुकृत्य रघो राज्ञः
प्रत्याख्याताशनः प्रभुरघो राज्ञः ।
योगिभिरित्यस्तमितः
केशवमाप्नोमि नाथमस्तमितः ॥ ११ ॥
तस्येयमकार्येभ्यश्
च्युतेन तनयेन रचितयमकार्येभ्यः ।
दत्ता वाक् स्वाकृतिना
मानांकेन हरिसंश्रया स्वाकृतिना ॥ १२ ॥
अथ जग्मतुरुरुमत्तौ
वयसा वृन्दावनांतरं रुरुमत्तौ ।
हरिराहितकुमुदसितः
स्निग्धतराङ्गस्तथा हली कुमुदसितः ॥ १३ ॥
उदधिपयोनिर्घोषं
तच निवेश्याच्युतोऽपयोनिर्घोषं ।
अविचिंतितकं सबलश्
चचार भेजे च यामुनकं सबलः ॥ १४ ॥
प्रियसुहृदामोदरयोर्
ललतो रथरौहिणेयदामोरयोः ।

क्षतपशुवृन्दावनयोर्
घर्मः क्षयमापदयितवृन्दावनयोः ॥ १५ ॥
क्षोभमगादभ्राणां
स्तनितैर्विद्युत्वतामगादभ्राणां ।
मुनिरपि नीरागमनाः
सरितश्वासंप्रवृत्तनीरागमनाः ॥ १६ ॥
रौद्रं कन्दर्पस्य
प्रथमो हेतुर् वभूव कन्दर्पस्य ।
स्त्रीहृदयान्यभिदनतः
सशरैः प्राप्य सुहृदो घनानभिदनतः ॥ १७ ॥
विद्युद्गौरी हावान्
अकृतेव घनेष्वभूच्च गौरीहावान् ।
सुलभवलाकायेषु
ग्लपितचिरप्रोषितवलाकायेषु ॥ १८ ॥
जात्या सज्जालकया
यूथिकया चाप्तयुवतिसज्जालकया ।
कमलानि ससर्जाभ्यां
भ्रमरः कृष्णो वलादिव ससर्जाभ्यां ॥ १९ ॥
व्याप्य दिशो दश निभृतः
क्षणमपि तस्थौ शासनादसनिभृतः ।
संसमितागवलस्य
ध्वनत् घनौघसमप्रभोगवलस्य ॥ २० ॥

भ्रमर दश कदम्बरजः
त्वमितीव वदन् स्वनादशकदम्बरजः।
हंतुं विभ्रमरहितां
नलिनीं पथिकाङ्गनाश्च विभ्रमरहितां ॥ २१ ॥
ज्योत्स्नालं घनमलिना
न वभौ क्रियते स्म कुटजलंघनमलिना ।
वलवानवपूरोहन्
हृद्यास नदीतटांश्च नवपूरोऽहन् ॥ २२ ॥
शिखिषु समुत्सु कमनसो
गतिहरमुञ्चति च खे समुत्सुकमनसः ।
व्यमुञ्चन्नपवनजवना
वापीहंसाश्च न पवनजवनाः ॥ २३ ।
शब्दो नादेयानां
कलुषतया नो शशाम नादेयानां ।
फेनो वा नीराणां
आक्रष्टोभयतटान्तवानीराणां ॥ २४ ॥
प्राप्य सखद्योतायां
निशि विद्युज्जितमरुत्सखद्योतायां ।
प्रियतमसदनं गेहा
दवला भयमुत्ससर्ज सदनंगेहा ॥ २५ ॥
पर्वतकटकेशानां
नीपरजःकपिलकुम्भकटकेशानां ।

कुञ्जनदीनगजानां
हर्षो जज्ञे महान्नदीनगजानां ॥ २६ ॥
विविधोपलराशिखरं
पिदधे गोवर्द्धनं [illegible] ।
कालोऽगन्धाराव न्
अकरोत्कुजटशिखिनांच गन्धारावान् ॥ २७ ॥
कणिकाभिरपां सुखरा
वृन्दावनमारुता ववुरपांशुखरा ।
यमुना नवमुदकपटं
भेजे ब्रजलोकमाश्रिता मुदकपटं ॥ २८ ॥
[illegible]तपनवसुदे वसुतौ
ब्रजस्य साभ्रे ततोऽह्नि वसुदेवसुतौ ।
अमृतसमधुनीपवनं
वृन्दावनमविशतां समधुनीपवनं ॥ २९ ॥
शिखिसर्वस्वधरस्य
द्वे प्रियतां जग्मतुर्हरेः स्वधरस्य ।
भ्रमरकदम्बकरवहा
वेणुः प्रावृट् तथा कदम्बकरव[illegible]ा ॥ ३० ॥
अंशादामोदस्य
स्थानमवभ्रंशि नीपदामोदस्य ।
श्रीर्ललितमथो ब्रजतः
कापि वभूवास्य मृष्टिकमयो ब्रजतः ॥ ३१ ॥

धृतकामधुरैर् मधुरैर्
भ्रमरेभ्यो मुदितवल्लवकुलैर्वकुलैः ।
क्षतकेशिशिराः शिशिराः
स्थलीर्युताः प्रायसोऽस्तसुरभीः सुरभीः ॥ ३२ ॥
ता वृषभरणाभरणा
स्तेनयुताः स्वयमिवांजनभसा नभसा ।
रेजुः सुतरां सुतरां
यमुनामभितः सवंजुललता ललता ॥ ३३ ॥
श्रेष्टपदारोहिण्याः
सुतोप्यलंघ्यमहिमा पदारोहिण्याः ।
प्राप्य शरीरं रंतुं गां
द्युतिश्च स इवागतः शरीरं तुंगां ॥ ३४ ॥
निचुलवतीं ककुभानां
समो मतिक्षांतिकान्तिभिः ककुभानां ।
अंशेन स्वनवद्यां
अजं वहन्नपिवदलिकुलं स्वनवद्यां ॥ ३५ ॥
दृष्ट्योद्वलासितया
लिम्पन्निव दिङ्मुखानि धवलासितया ।
वहुधा पवनेच्छायां
प्रावृषि मेघानुयातपवनेच्छायां ॥ ३६ ॥
अथ स वलक्षोभानां
पतिरिव कर्तारमरिवलक्षोभानां ।

मुसलीदं तुरगहनं
वीक्ष्य गिरिं प्राह कुटजदन्तुरगहनं ॥ ३७ ॥
विदधच्छन्नः छन्नः
कुटजैः स्मरति प्रगीतगोपो गोपः ।
प्रश्वनदभ्रो दभ्रः
सृष्टिविशेषो यमतुलधातुर् धातुः ॥ ३८ ॥
पश्य श्यामा श्यामा
वनस्थली भाति वल्लवदृ ःया दृश्या ।
प्रदरा धारा धारा
धुन्वन्ति मेघाश्च शिरसि हंते हंते ॥ ३९ ॥
अस्मासु कंदलदशनैर्
रुद्धमति दरीमुखैश्च कंदलदशनैः ।
दीयतोच्युत हेममयः
तव च रवीन्दोरिवाचलो हेममयः ॥ ४० ॥
शकुनिपताकाशवलं
घनवृ-- चक्षुषा पताकाशवलं ।
रूपं हारीतानां
श्रियं वनानां च मत्तहारीतानां ॥ ४१ ॥
पूर्वं स्म हरे शेषे
यान्मेघान् वीक्ष्य भूश्रम ॰रे शेषे ।
जनितरतिरसावसितैर्
आदाय तडिद्गुणार्णवरसावसितैः ॥ ४२ ॥

कार्मुकवलयमनूनं
दिशसि यत्तोषितोसि वलयमनूनं ।
इत्याशामुखरतया
घनराज्या हरिरिवोच्यते मुखरतया ॥ ४३ ॥
न तवोपरिवर्हेण
ग्रथिताभरणस्य गोपपरिवर्हेण ।
छायामसितापघनः
सुरचापांकः परै कासितापघनः ॥ ४४ ॥
हृतगिरिधातुरसङ्गा
रुध्वा तव भुजसमोर्मिधातुरसङ्गा ।
कुलानि खनद्यमुना
वहति जलमसौ विसर्पति खनद्यमुना ॥ ४५ ॥
पवनैरजसा ध्वस्तं
विभ्राणां नीपमात्मरजसा ध्वस्तं ।
पश्यैकान्ततरलतां
स्थलीमितां वर्हियोगकान्ततरलतां ॥ ४६ ॥
वसने संस्तवन नवा
जेतुमलममोघ संस्तवन नवा ।
मधुकरविश्वसितानि
स्मितमिह कुटजानि जनितविश्वसितानि ॥ ४७ ॥
मारुतवेगाद्भुवनवशाखण्डानां
शुक्लापांगविडम्बितनवशाखण्डानां ।

संघाः शिखिनां प्राप्ताः शङ्के कायन्ते
स्थलघनमिति मन्वानाः शंके कायन्ते ॥ ४८ ॥
पश्य शिलाः शैलेस्मिन्नुच्चावचसानौ
यांत्युन्मुखवर्[illegible]णतामुच्चावचसानौ ।
अमुना शमितरिपुस्त्रीश्टंगारोहित्वं
याचित इवांबुदैः श्टंगारोहित्वं ॥ ४९ ॥
नदति जलदैर्निदाघे सारंगोपास्ते
विभ्रति केतकमवनेः सारङ्गोपास्ते ।
संप्रत्युद्यमकालो न वाहिनीपानां
त्वन्मुखसुरभीनां च श्रीर्नवा हि नीपानां ॥ ५० ॥
इत्याह पीतवाससमायतनेचस्तं
कंसासुरात्पशुमतामायतनेचस्तं ।
हसितानां विमलतया स हली लाजानां
छायां विकिरन्दशनैः सह लीलाजानां ॥ ५१ ॥

इति श्रीवृन्दावनं नाम यमककाव्यं
मानाङ्ककृतं समाप्तं ॥

# रामकृष्णविलोमकाव्यं ।

तं भूसुतामुक्तिमुदारहासं
वन्दे यतो भव्यभवं दयाश्रीः ।
श्रीयादवं भव्यभतोयदेवं
संहारदा मुक्तिमुतासुभूतं ॥ १ ॥
चिरं विरंचिर्न चिरं विरंचिः
साकारता सत्यसतारका सा ।
साकारता सत्यसतारका सा
चिरं विरंचिर्न चिरं विरंचिः ॥ २ ॥
तामसीत्यसति सत्यसीमता
माययाक्ष्मसमक्ष्ययायमा ।
माययाक्ष्मसमक्ष्ययायमा
तामसीत्यसति सत्यसीमता ॥ ३ ॥
का तापघ्नी तारकाद्या विपापा
वेधा विद्या नोष्णकृत्यं निवासे ।
सेवा नित्यं कृष्णनोद्या विधावे
पापाविद्याकारताघ्नी पताका ॥ ४ ॥

श्रीरामतो मध्यमतोदि येन
धीरोऽनिशं वश्यवतीवराद्वा ।
द्वारावती वश्यवशं निरोधी
नयेदितो मध्यमतोऽमरा श्रीः ॥ ५ ॥
[illegible] [illegible] सि क्षरव्रती
योऽददाद् द्वितनयस्वमातुरं ।
न्तुमास्वयन तद्विदादयो
तीव्ररक्षसि पतच्चिकेशिकौ ॥ ६ ॥
लम्बाधरोरु चयलम्बनासे
त्वं याहि याहि क्षरमागताज्ञा ।
ज्ञातागमा रक्ष हि याहि या त्वं
सेना वलं यच रुरोध बालं ॥ ७ ॥
लङ्कायना नित्यगमा धवाशा
साकं तयानुन्नयमानुकारा ।
राकानुमा यन्नन् यातकंसा
शावाधमागत्य निनाय कालं ॥ ८ ॥
गाधिजाध्वरवैरा ये तेऽतीता रक्षसा मताः ।
तामसाक्षर[illegible] ये रावैरध्वजाधिगाः ॥ ९ ॥
तावदेव दया देवे यागे यावदवासना ।
नासवादवया गेया वेदे यादवदेवता ॥ १० ॥
सभास्वये भग्नमने- चापं
कीनाशता [illegible] शिलाशेः ।

शैलाशिपारुद्धनताशनाकी
पञ्चानने मग्नभयेस्वभासः ॥ ११ ॥
न वेद यामक्षरभामसीतां
का तारका विष्णुजिते विवादे ।
देवाविते जिष्णुविकारता का
तां सीमभारक्षम यादवेन ॥ १२ ॥
तीव्रगोरन्वयचार्यो वैदेहीमनसो मतः ।
तमसो न महीदेवैर्योचायन्वरगो व्रती ॥ १३ ॥
वेद या पद्मसदनं साधारावततार सा ।
सारता नव राधा सा नन्दसद्मप यादवे ॥ १४ ॥
शैवतो हननेऽरोधी यो देवेषु नृपोत्सवः ।
वत्सपो नृषु वेदे यो धीरो नेन हतो वशैः ॥ १५ ॥
न गोपगोसि स्मर मे पिनाके
नापो जने धर्मधनेन दानं ।
नन्दानने धर्मधने जपो ना
के नापि मे रक्षसि गोपगोनः ॥ १६ ॥
ततान दाम प्रमदा पदाय
नेमे रुचामस्वन सुन्दराक्षी ।
क्षीरादसुं न स्वमचारु मेने
यदापदाम प्रमदा न तातः ॥ १७ ॥
तामितो मत्तसूचामा शापादेष विगानतां ।
तां नगाविषदे पाशा माचा सूत्तमतो मिता ॥ १८ ॥

नासावधापचपाज्ञाविनोदी
धीरो नुत्या सस्मितोऽद्याविगीत्या ।
त्यागी विद्यातोस्मि सत्यानुरोधी
दीनो विज्ञापाचपधावसाना ॥ १९ ॥
संभावितं भिक्षुरगादगारं
याताधिराप स्वनघाजवंशः ।
शवं जघान स्वपराधिता या
रंगादगारक्षुभितं विभासं ॥ २० ॥
तपातितारः स्वनयागतं मा
लोकापवादद्वितयं पिनाके ।
केनापि यं तद्विदवाप कालो
मातङ्गयान स्वरतातिपातः ॥ २१ ॥
शवेऽविदा चिचकुरङ्गमाला
पञ्चावटीनर्म न रोचते वा ।
वाते चरो नर्म नटीव चापं
लामागरं कुर्चचिदाविवेश ॥ २२ ॥
नेह वा क्षिपसि पक्षिकन्धरा
मालिनी स्वमतमत्त दूयते ।
ते यदूत्तम तमस्वनीलिमा
राधकं क्षिपसि पक्षिवाहने ॥ २३ ॥
वनान्तयान स्वणुवेदनासु
योषामृते रत्रापगजाविरोधी ।

धोरो विजागपरा रते मृषा यो
सुनादवेणुस्वनया तनां वः ॥ २४ ॥
किन्नु तोयरसापंपा न सेवा नियतेन वैः।
वैनतेयनिवासेन पापं सारयतो नु किं ॥ २५ ॥
स न तातपहा तेने स्वं शेनाविहितागसं।
सङ्गताहि विनाशे स्वं नेतेहापततान सः ॥ २६ ॥
कपितालविभागेन योषादो नुनयेन सः।
सनयेन नु दोषायो नगेभा विलतापिकः ॥ २७ ॥
ते सभा प्रकपिवर्णमालिका
नाल्पकप्रसरमभ्रकल्पिता।
ताल्पिकभ्रमरसप्रकल्पना
कालिमार्णवपिक प्रभासते। २८ ॥
रावणोऽक्षिपत न चपानते
नाल्पकभ्रमणमक्रमातुरं।
रन्तुमाक्रमणमभ्रकल्पना
ते न पाच नतपक्षिणो वराः ॥ २९ ॥
दैवे योगे सेवादानं शङ्कानापे लङ्कायाने।
नेया कालं पेनाकाशं नन्दावासे गेयो वेदैः ॥ ३० ॥
शङ्का वन्नानुत्व नुन्नावकाशं
याने नद्यामुद्याननेयाः।
याने नद्यामुद्याननेया
शङ्कावन्नानुत्वनुन्नावकाशं ॥ ३१ ॥

वादिदेश द्विसोतापं पम्पाथोयनसेतवे ।
वेतसेन यथो पापं पन्तासीद्विशदे दिवा ॥ ३२ ॥
वायुजोनुमतो मेने संग्रामे रवितोऽह्नि वः ।
वह्नितो विरमे ग्रासं नेमेऽतोऽमनुजो युवा ॥ ३३ ॥
क्षतायमा यत्र रघोरितायु
रंकानुगानल्पवयोऽयनानि ।
निनाय योवल्पनगानुकारं
युतारिघोर त्रयमायताक्षः ॥ ३४ ॥
तारके रिपुराप श्रीरुचा दाससुतान्वितः ।
तन्वितासु सदाचारु श्रीपरा पुरिके रता ॥ ३५ ॥
लङ्कारङ्कागाराध्यासं याने मेया काराव्यासे ।
सेव्या राका यामे नेया संध्या रागाकारं कालं ॥ ३६ ॥
गोदावरी ब्रह्मगिरेः शकाशात्
संप्रापिता प्रागुदधिं प्रयत्नात् ।
येनर्षिणा सोपि पुनः प्रतीम
मानेतुमद्रिं प्रभवेत्किमेतां॥ ३७ ॥
एवं विलोमाक्षरकाव्यकर्तुर्
भूयः सभायां समवेक्ष्य तज्ज्ञाः ।
जानंत्विमां चित्रकवित्वसीमां
दैवज्ञसूर्याभिधसंप्रदिष्टां ॥ ३८ ॥

इति श्रीदैवज्ञपण्डितसूर्यकविविरचितं
विलोमाक्षररामकृष्णकाव्यं समाप्तं ॥

# गङ्गाष्टकं ।

यद्वधि तव नीरं पातकी नैति गङ्गे
तद्वधि मलजालैर् नैव मुक्तः कलौ स्यात् ।
तव जलकणिकालं पापिनां पापशुध्यै
पतितपरमदीनान् त्वं हि पासि प्रपन्नान् ॥ १ ॥
तव शिवजललेशं वायुनीतं समेत्य
सपदि निरयजालं शून्यतामेति गङ्गे ।
समलगिरिसमूहाः प्रस्फुटंति प्रचण्डास्
त्वयि सखि विशतां नः पापशंका कुतः स्यात् ॥ २ ॥
तव शिवजलजालं निःसृतं यर्हि गङ्गे
सकलभुवनजालं पूतपूतं तदाभूत् ।
यमभटकलिवार्ता देवि लुप्ता यमोपि
त्वयि कृतवरदेहाः पूर्णकामाः सकामाः ॥ ३ ॥
मधुमधुवनपूगरत्नपूगैर्न्दपूगैर्
मधुमधुवनपूगैर्देवपूगैः सुपूगैः ।
पुरहरपरमाङ्गे भासि मायेव गङ्गे
शमयसि विषतापं देवदेवस्य वंद्ये ॥ ४ ॥

चलितशशिकुलाभरुत्तरङ्गैस्तरङ्गैर्
अमितनदनदीनामंगसङ्गैरसङ्गैः ।
विहरसि जगदण्डे खण्डयन्ती गिरीन्द्रान्
रमयसि निजकान्तं सागरं कान्तकान्ते ॥ ५ ॥
तव परमहिमानं चित्तवाचाममानं
हरिहरविधिशक्रा नापि गङ्गे विदन्ति ।
श्रुतिकुलमभिधत्ते शंकितं तं गुणान्तं
गुणगणसुविलापैर् नेति नेतीति सत्यं ॥ ६ ॥
तव नुतिनतिनामान्यप्यघं पावयन्ति
ददति परमशान्तिं दिव्यभोगान् जनानां ।
इति पतितशरण्ये त्वां प्रपन्नोस्मि मातर्
ललिततरतरङ्गे चांगगङ्गे प्रसीद ॥ ७ ॥
शुभतरकृतयोगाद्विश्वनाथप्रसादाद्
भवहरवरविद्यां प्राप्य काश्यां हि गङ्गे ।
भगवति तव तीरे नीरसारं निपीय
मुदितहृदयकञ्जे नन्दसूनुं भजेहं ॥ ८ ॥
गङ्गाष्टकमिदं कृत्वा भुक्तिमुक्तिप्रदं नृणां ।
सत्यज्ञानानन्दतीर्थयतिना स्वर्पितं शिवे ॥ ९ ॥
तेन प्रीणातु भगवान् शिवो गङ्गाधरो विभुः ।
करोतु शंकरः काश्यां जनानां सन्ततं शिवं ॥ १० ॥

इति सत्यज्ञानानन्दतीर्थयतिना विरचितं
गङ्गाष्टकं सम्पूर्णं ॥

## मणिकर्णिकामहिमा ।

अनेकजन्मसाहस्रतपोध्यानशिवार्चनैः ।
अद्वैतानंदसङ्गेन लब्धवेदान्तिसत्पदः ॥ १ ॥
सदाशिवसुतः शान्तः
काश्यां गङ्गाधरः कविः ।
सर्वतीर्थवरां देवीं
स्तौति श्रीमणिकर्णिकां ॥ २ ॥
आनन्दकाननमिदं सुखदं पुरैव
तत्रापि चक्रसरसि मणिकर्णिकाथ ।
स्वःसिन्धुसङ्गतिरथो परमास्पदश्च
विश्वेशितुः किमिह तन्न विमुक्तये यत् ॥ ३ ॥
गर्जन्ति सर्वतीर्थानि
स्वस्वधिष्ण्यगतान्यहो ।
केवलं बलमासाद्य
सुमहन्माणिकर्णिकं ॥ ४ ॥
शिवाद्या देवसंघाश्च
सनकाद्या महर्षयः ।

ते सर्वे स्नातुमायान्ति
मध्याह्ने मणिकर्णिकां ॥ ५ ॥
इच्छन्ति मरणं तत्र
मुक्तये चामरा अपि ।
अतश्च स्वकृतैः श्लोकैस्
तां देवीं प्रार्थयेऽन्वहं ॥ ६ ॥

## मणिकर्णिकाष्टकं ।

विष्णोः सुतप्ततपसां चलितोत्तमाङ्ग
विश्वेशितुस्तडिदिवाम्बरतः सुकर्णात् ।
या चक्रतीर्थसलिले ललितापपातः
सा मे सदा शिवकरी मणिकर्णिकास्तु ॥ ७ ॥
चिन्तामणिस्तनुभृतां सहसान्तकाले
तत्तारकं व्यपदिशत्य्थ कर्णिकायां ।
यस्यां मृतो न भवमेति भवप्रसादात्
सामेसदा शिवकरी मणिकर्णिकास्तु ॥ ८ ॥
चन्द्रांसुका सुनयना धवला कुमारी
वेदैश्च पा[illegible]लैर्वरमौक्तिकान्त्या ।
या दृश्यते सुकृतिभिर्वरकाशिकायां
सा मे सदा शिवकरी मणिकर्णिकास्तु ॥ ९ ॥
मालां सुपङ्कजमयीं करकण्ठयोर् या
धत्ते वरोद्यतकरे शुभमातुलाङ्गं ।

बद्धञ्च पाणियुगलं शुभपश्चिमास्यं
सा मे सदा शिवकरी मणिकर्णिकास्तु ॥ १० ॥
दानावगाहसुरपूजनतर्पणादि
यस्यामनन्तफलदं भवति प्रसंगात् ।
भक्त्या कृतं यदि सएव जगत्पुनाति
सा मे सदा शिवकरी मणिकर्णिकास्तु ॥ ११ ॥
स्वर्गस्तृणं भवति चीरधरोपि राजा
मृत्युः सखा सुखहरोपि शवः शिवः स्यात् ।
पातोपि यच सुरसंमत उत्तम द्या
सा मे सदा शिवकरी मणिकर्णिकास्तु ॥ १२ ॥
सुप्तोपि योगिसमतां समुपैति यच
मग्नः स्मरेद्यदि शिवं सतु कालकालः ।
यद्धानतोप्यभयमेति च दूरवासी
सा मे सदा शिवकरी मणिकर्णिकास्तु ॥ १३ ॥
यत्सङ्गिवायुरपि दूरगतः सुसूक्ष्मः
पातालगं सुरगतं विधिगं करोति ।
जन्तून् पुनाति सकलानपि गां गता या
सा मे सदा शिवकरी मणिकर्णिकास्तु ॥ १४ ॥
संसारचिन्तामणिरच यस्मात्
तत्तारकं सज्जनकर्णिकायां ।
शिवोऽभिधत्ते सहसान्तकाले
तद्गीयतेऽसौ मणिकर्णिकेति ॥ १५ ॥

मोक्षलक्ष्मीमहापीठमणिस्तच्च णाभयोः ।
कर्णिकेति ततः प्राहुर् यां जना मणिकर्णिकां ॥ १६ ॥
मणिकर्ण्याः स्तोत्रमिदं भुक्तिमुक्तिप्रदम्बरं ।
पठतां शृण्वताञ्चास्तु प्रसन्ना मणिकर्णिका ॥ १७ ॥

इति श्री गङ्गाधरकवि विरचितं
श्रीमणिकर्णिकास्तोत्रं
सम्पूर्णं ॥ ० ॥

## काशीस्तोत्रं ।

सत्यज्ञानानन्दतीर्थं प्राप्तोहं यत्प्रसादतः ।
तं गुरुं परमं हंसं विश्वेश्वरमजं भजे ॥ १ ॥
विश्वेशं माधवं ढुंढिं दण्डपाणिञ्च भैरवं ।
वन्दे काशीं गुहां गङ्गां भवानीं मणिकर्णिकां ॥ २ ॥
अखण्डः सच्चिदानन्दः शिवो देवो महेश्वरः ।
तस्य तां परमां शक्तिं काशीं स्तौमि सदुक्तिभिः ॥ ३ ॥
श्यामां षोडशवार्षिकीं सकरुणां मूर्तिं दधानां वरां
हस्ताभ्यामभयं च विश्वजननीं विद्येति या गीयते ।
या दृष्टा स्मरणं गतापि सततं या कीर्तिता संस्तुता
या स्पृष्टा प्रणता श्रुता प्रकुरुते नृणां परं मङ्गलं ॥ ४ ॥
भूमिष्ठापि न यात्र भूस्त्रिदिवतोप्युच्चैरधवस्थापि या
या बद्धा भुविमुक्तिदा स्युरमृतं यस्यां मृता जन्तवः ।
या नित्यं त्रिजगत्पवित्रतटिनीतीरे सुरैः सेव्यते
सा काशीत्रिपुरारिराजनगरी पायादपायाज्जगत् ॥ ५ ॥
पूर्वजन्मशतकोटिसञ्चितं
पापराशिमतलं विनाशयेत ।

काशिका परपदप्रकाशिका
दर्शनश्रवणकीर्तनादिभिः ॥ ६ ॥
यः काशीं स्तौति मेधावी यः काशीं हृदि धारयेत् ।
तेन तप्तं तपस्तीव्रं तेनेष्टं क्रतुकोटिभिः ॥ ७ ॥
वाराणसीति काशीति महामन्त्रमिमं जपन् ।
यावज्जीवन् त्रिसंध्यं तु जन्तुर्जातु न जायते ॥ ८ ॥
यस्तु काशीति काशीति द्विस्त्रिर्जपति पुण्यवान् ।
अपि सर्वपवित्रेभ्यः स पवित्रतरो महान् ॥ ९ ॥
मुने न मे प्रियस्तद्वद्[illegible]क्तो मम पूजकः ।
याद्दक् प्रियतरः सत्यङ्काशी[illegible]लालसः ॥ १० ॥
वरङ्काशीपुरीवासो मासोपवसनादिभिः ।
विचित्र छत्रसुच्छायं राज्यं नान्यत्र नीरिपु ॥ ११ ॥
काशीवासी क्षुत्कृशः पुष्कसोपि
श्रेष्ठो राजन् मुक्तिकन्यावृतो यत् ।
अन्यत्र स्थः सार्वभौमः स्वधर्मो
न स्याच्छ्रेयान् गर्भवासैकयोग्यः ॥ १२ ॥
जडेषु सर्वेष्वपि मज्जमानेषु
इयं चिदानन्दमयी न मज्जति ।
स्वयं [illegible] कथमु[illegible]रेत्परान्
लोके च वेदे च विचार्यमेतत् ॥ १३ ॥
सर्ववाङ्मनसातीतं भावाभावविवर्जितं ।
चिन्मात्रं यत्परं ब्रह्म पञ्चक्रोशात्मकं स्थितत् ॥ १४ ॥

तदेतत्क्षेत्रमापूर्य स्थितं सर्वगमप्यहो ।
अनुग्रहार्थं लोकानामिति वेदविदो विदुः ॥ १५ ॥
शम्भोः शक्तिरियं काशी तदभिन्ना परा चितिः ।
शिवएव हि जानाति काशिकायाः परं सुखं ॥ १६ ॥
शिवस्यापि परं सौख्यं काशिका वेत्ति तत्परा ।
निर्विशेषा च शुद्धा च जडा सेति त्रिधा मता ॥ १७ ॥
क्षेत्ररूपा जडा काशी मोचयेत्सर्वदेहिनः ।
मूर्तिरूपा तु या काशी शुद्धा सा चिन्मयी सती ॥ १८ ॥
पूर्णरूपा स्वमाहात्म्यं स्वयमेव विचारयेत् ।
निर्विशेषा तु मुक्तानां शिवस्य च परा गतिः ॥ १९ ॥
कोटिजन्मसहस्रेषु तपोध्यानसमाधिभिः ।
प्रसादितो शिवो येन स एवं वेत्ति काशिकां ॥ २० ॥
यस्याः प्रसादादहमेव शम्भुर्
जानामि शम्भुं सकलात्मभूतं ।
स्मरामि शम्भुं प्रणवं शिवञ्च
शिवप्रियां तां प्रणमामि काशीं ॥ २१ ॥
प्रकाशयेत् याशु परात्मतत्वं
प्रकाशतेऽस्यामिति वाथ काशी ।
चिन्मात्ररूपापि च गीयते या
तां ब्रह्मविद्यां प्रणमामि काशीं ॥ २२ ॥
यस्यां वसन् जन्तुरुपैति धर्मं
भक्तिं च विश्वेश्वरमार्यसङ्गं ।

गङ्गां सुविद्यां परमाङ्गतिं च
सा काशिका मेऽस्तु गतिर्मुमुक्षोः ॥ २३ ॥
सर्वाणि तीर्थानि वसन्ति यस्यां
वेदाः सदेवा मुनयश्च मुक्त्यै ।
विभूषिता या परया द्युनद्या
सा काशिका मेऽस्तु गतिर्मुमुक्षोः ॥ २४ ॥
शवः शिवः स्यादशिवोपि यस्याम्
अभद्रमुक्तं मरणञ्च भद्रं ।
दरिद्रापि श्रीपतितुल्य आस्ते
तां काशिकां को न भजेत्सुबुद्धिः ॥ २५ ॥
विरक्तियोगादिभवा हि विद्या
सुदुर्लभा नास्ति कलौ विमुक्तिः ।
यस्यां मृतस्तां समुपैति जन्तुः
शिवप्रसादादेति निश्चितं हि ॥ २६ ॥
अतः सदा सैव निषेवितव्या
मुमुक्षुभिः शङ्कर राजधानी ।
स्वधर्मनिष्ठैः कलिकाल एका
ध्येया च वंद्या परिकीर्तनीया ॥ २७ ॥
ये पुण्यशीलाः परिकीर्तयन्ति
काशीं सदैव प्रणमन्ति भक्त्या ।
तेषामहम्पादरजो बिभर्मि
शोचामि नित्यं दयया तदन्यान् ॥ २८ ॥

वसन्ति पापा नहि काशिकायां
वसन्ति चेदत्र मृतिर्न जायते ।
मृतिर्भवेच्चेन्नहि यातनाख्यस्
तथापि चान्ते परिमुच्यतेऽसौ ॥ २९ ॥
आदौ काश्यां धर्ममार्गेण वासः
पापत्यागः काशिमाहात्म्यदृष्टिः ।
देहङ्गेहं पुत्रमित्रादि यस्य
सर्वन्तुच्छं सोधिकारी महात्मा ॥ ३० ॥
वासः काश्यां सज्जनानां प्रसङ्गो
गङ्गास्नानं पापकर्मारुचिश्च ।
पुण्ये प्रीतिः स्वेच्छया लाभसौख्यं
दानं शक्त्या न प्रतिग्राह्यमन्नं ॥ ३१ ॥
अष्टावेते यस्य सन्त्येव योगा
योगाभ्यासैस्तस्य किङ्काशिकायां ।
एवं ज्ञात्वा यो वसेत् काशिकायां
सद्यो मुक्तोऽसौ भवेन्नैव चान्यः ॥ ३२ ॥
काश्यां कृतातिपापस्य दारुणा रुद्रयातना ।
अहो रुद्रपिशाचत्वं नरकेभ्योपि दुःसहं ॥ ३३ ॥
तस्मात्पापं न कर्तव्यं मनागपि विभोः पुरे ।
जातं यत्तत्प्रमादेन प्रायश्चित्तेन नश्यति ॥ ३४ ॥
स्थापनं शिवलिङ्गानां पञ्चक्रोशप्रदक्षिणा ।
स्नानं दानं दया खेदः प्रायश्चित्तं महत्स्मृतं ॥ ३५ ॥

पापमेवहि कर्तव्यं मतिरस्ति यदीदृशी ।
सुखेनान्यच कर्तव्यं मही ह्यस्ति महीयसी ॥ ३६ ॥
यथा कामातुरो जन्तुरेकां रक्षति मातरं ।
तथा पापकृता काशी रक्षितव्या मुमुक्षुणा ॥ ३७ ॥
काश्यां मृतानां मुक्तिः स्यान्नवेति विवदन्ति ये ।
नरकं यान्ति ते पापाः काका गृध्रा भवन्त्यथ ॥ ३८ ॥
तस्मात्सर्वं परित्यज्य श्रोतव्याः काशिसत्कथा ।
न विना श्रवणम्पुण्यं पापं वा वेत्ति कोपि हि ॥ ३९ ॥
काश्यां वासः सतां सङ्गो गङ्गाम्भः शिवपूजनं ।
ध्यानं नारायणस्यैतत्सारात्सारं विदुर्बुधाः ॥ ४० ॥
कलौ विश्वेश्वरो देवः कलौ वाराणसी पुरी ।
कलौ भागीरथी गङ्गा दानङ्कलियुगे महत् ॥ ४१ ॥
गङ्गा विश्वेश्वरः काशी जागर्ति त्रितयं यतः ।
तत्र नैश्रेयसी लक्ष्मीर्लभ्यते चित्रमत्र किं ॥ ४२ ॥
न विश्वेशसमं लिङ्गं न काशी सदृशी पुरी ।
मणिकर्णिसमं तीर्थं नास्ति ब्रह्माण्डगोलके ॥ ४३ ॥
काश्यां लिङ्गान्यनेकानि काश्यां तीर्थान्यनेकशः ।
तथापि सेव्यो विश्वेशः स्नातव्या मणिकर्णिका ॥ ४४ ॥
यथाभूमितले विप्र पूर्यः सन्ति सहस्रशः ।
तथाकाशी न मन्तव्या का[illegible]त्वयं ॥ ४५ ॥
अन्यानि मुक्तिक्षेत्राणि काशीप्राप्तिकराणि हि ।
काशीं प्राप्य विमुच्येत नान्यथातीर्थकोटिभिः ॥ ४६ ॥

तीर्थार्थं न वहिर्गच्छेद्देवार्थं वा कदाचन।
सर्वतीर्थानि देवाश्च वसन्त्यत्राविमुक्तके ॥ ४७ ॥
शशकैर् मशकैः काश्यां यत्पदं हेलयाप्यते।
तत्पदं नाप्यतेन्यत्र योगयुक्त्यापि योगिभिः ॥ ४८ ॥
मध्यमेश्वरमारभ्य यावद्देहलिविघ्नपं।
सूत्रं संस्थाप्यतद्दिक्षु भ्रामयेन्मण्डलाकृति ॥ ४९ ॥
तत्र या जायते रेखा तन्मध्ये क्षेत्रमुत्तमं।
काशीति यद्विदुर्वेदास्तत्र मुक्तिः प्रतिष्ठिता ॥ ५० ॥
पूर्वतोजाह्नवी पश्चात्पाशपाणिर्गणेश्वरः।
असीवरणयोर्मध्ये शुभा वाराणसीमता ॥ ५१ ॥
विश्वेश्वराच्चतुर्दिक्षु धनुःशतं युगोन्मितं।
अविमुक्तमितिप्रोक्तमन्तर्गृहं मथ शृणु ॥ ५२ ॥
गोकर्णेशः पश्चिमे पूर्वतश्च
गङ्गामध्यश्चोत्तरे भूरिभूतः।
ब्रह्मेशानो दक्षिणे संप्रदिष्टस्
तत्तुप्रोक्तं भवनं विश्वभर्तुः ॥ ५३ ॥
इत्थं चतुर्विधं क्षेत्रं प्रशस्तञ्चोत्तरोत्तरं।
पञ्चक्रोशात्मकं लिङ्गं यो वेद स परः शिवः ॥ ५४ ॥
य इदं काशिकास्तोत्रं भक्त्यासङ्कीर्तयेत्सदा।
स सर्वपापनिर्मुक्तः सद्योमोक्षमवाप्नुयात् ॥ ५५ ॥
गुणानामेकदेशोयं काशिकायाः प्रकीर्तितः।

तेनप्रीणातुभगवान् विश्वेशः काशिकाप्रियः ॥ ५६ ॥

इति श्रीपरमहंसपरिव्राजकाचार्य श्रीरामकृष्णतीर्थ
पादकिङ्करशिष्य श्रीसत्यज्ञानानन्दतीर्थयति
विरचितं काशिकास्तोत्रं
सम्पूर्णं ॥ ० ॥

## महापद्यं ।

अस्थिवद्दधिवच्चैव शंखवद्दकवत्तथ ।
राजन् तव यशो भाति पुनः संन्यासिदन्तवत् ॥ १ ॥
कालिदास इमं श्लोकं स्वकवित्वस्य गोपकं ।
लिखित्वा प्रददौ पत्रं कवये शङ्कराय वै ॥ २ ॥
पठित्वा शङ्करः श्लोकं प्रहसन् कौतुकाय तत् ।
पत्रं करे समादाय सानन्दस्त्वरया तदा ॥ ३ ॥
कालिदासेन सहितो भोजराजसभां ययौ ।
अथ दृष्ट्वा स [illegible]षं प्रजगाद ह ॥ ४ ॥

---

राजन् अभ्युदयोस्तु शङ्करकवे किं पत्रिकायामिदं
पद्यं कस्य तवैव कीर्तिरचना तत् पठ्यतां पठते ।
किन्त्वासामरविन्दसुन्दरदृशां द्राक् चामरान्दोलनाद्
उद्वेल्लद्भुजवल्लीकङ्कणझनत्कारः क्षणं वार्यतां ॥ ५ ॥
महाराज श्रीमन् जगति यशसा ते धवलिते
पयः पारावारं परमपुरुषोयं मृगयते ।
कपर्दी कैलाशं करिवरमथोयं कुलिशभृत्
कलानाथं राहुः कमलभवनोहंसमधुना ॥ ६ ॥

नीरक्षीरे गृहीत्वा सकलखगपतीन् यातिनालीकजन्मा
तक्रं धृत्वाकराब्जेसकलजलनिधीन् चक्रपाणिर्मुकुन्दः ।
सर्वानुद्धृत्यशैलान्दहति पशुपतिर्भाल नेत्रेण पश्यन्
व्याप्तात्वत्कीर्तिकान्ता सकलवसुमतीं भोजराज क्षितीन्द्र
श्रीमद्राजशिखामणे तुलयितुं धातात्त्वदीयं यशः [॥७॥
कैलाशञ्च निरीक्ष्यतत्र लघुतां तत्पूर्तये पर्यधात् ।
उक्षाणं तदुपर्युमासहचरं तन्मूर्ध्निगङ्गाझरं
त त्राग्रे फणिपुङ्गवं तदुपरि स्फारं सुधादीधितीं ॥ ८ ॥
अपायि मुनिना पुरा पुनरमायि मर्यादया
अतारि कपिना पुरा पुनरदाहि लङ्कारिणा ।
अमन्थिमुरवैरिणा पुनरवन्धि लङ्कारिणा
क्वन म वसुधापते तव यशोम्बुधिः क्वाम्बुधिः ॥ ९ ॥
स्वस्ति श्रीभोजराज त्रिभुवनविजयी धार्मिकः सत्यवादी
पित्रा ते मे गृहीता नव नवतियुता रत्नकोटिर्मदीया ।
तां त्वं मे देहि शीघ्रं सकलवुधजनैर्ज्ञायते सत्यमेतन्
नोवाजानन्ति केचिन्नवकृतमिति ेद् देहि लक्षं ततोमे
मागाः प्रत्युपकारकातरधिया वैमुख्यम।कर्णमे [॥ १० ॥
श्रीकर्णाटवसुन्धराधिपसुधासिक्तानि सूक्तानिमे ।
वर्ण्यन्ते कति नाम नार्णवनदीभूगोलविन्ध्याटवी-
झंझामारुतचन्द्रमःप्रभृतयस्तेभ्यः किमाप्तं मया ॥ ११ ॥

इति श्रीमहाकवि कालिदासकृतं महापद्यषट्कं
समाप्तं ॥ ० ॥

## साधनपञ्चकं ।

वेदो नित्यमधीयतां तदुदितं कर्म स्वनुष्ठीयतां
तेनेशस्य पिधीयता मपचितिः कामे मतिस्त्यज्यतां ।
पापौघः परिधूयतां भवसुखे दोषोनुसन्धीयताम्
आत्मेच्छाव्यवसीयतां निजगृहात्तूर्णं विनिर्गम्यतां ॥ १ ॥
सङ्गः सत्सु विधीयतां भगवतो भक्तिर्दृढा धीयतां
शान्त्यादिः परिचीयतां दृढतरं कर्माशु संत्यज्यतां ।
सद्विद्वानुपसर्प्यतां प्रतिदिनं तत्पादुका सेव्यतां
ब्रह्मैकाक्षरमर्थ्यतां श्रुतिशिरो वाक्यं समाकर्ण्यतां ॥ २ ॥
वाक्यार्थश्च विचार्यतां श्रुतिशिरः पक्षः समाश्रीयतां
दुस्तर्कात् सुविरम्यतां श्रुतिमतस्तर्कोनुसन्धीयतां ।
ब्रह्मैवास्मि विभाव्यतामहरहर्गर्वः परित्यज्यतां
देहेऽहम्मतिरुज्झ्यतां बुधजनैर्वादः परित्यज्यतां ॥ ३ ॥
क्षुद्व्याधिश्च चिकित्स्यतां प्रतिदिनं भिक्षौषधं भुज्यतां
स्वाद्वन्नं नतु यत्यतां विधिवशात् प्राप्तेन सन्तुष्यतां ।
शीतोष्णादि विसह्यतां नतु वृथावाक्यं समुच्चार्यताम्
औदासीन्यमभीप्स्यतां जनकृपानैष्ठुर्यमुत्सृज्यतां ॥ ४ ॥

एकान्ते सुखमास्यतां परतरे चेतः समाधीयतां
पूर्णात्मा सुसमीक्ष्यतां जगदिदं तद्व्यापितं दृश्यतां ।
प्राक्कर्मप्रविलाप्यतां चितिबलान्नाप्युत्तरैः श्लिष्यतां
प्रारब्धं त्विह भुज्यतामथ परब्रह्मात्मना स्थीयतां ॥ ५ ॥
यः श्लोकपञ्चकमिदं पठते मनुष्यः
सञ्चिन्तयत्यनुदिनं स्थिरतामुपेत्य ।
तस्याशु संसृतिदवानलतीव्रघोर
तापः प्रशान्तिमुपयाति चितिप्रसादात् ॥ ६ ॥
इति श्रीशङ्कराचार्यविरचितं साधनपञ्चकं
समाप्तं ॥ ० ॥

# यतिपञ्चकं ।

वेदान्तवाक्येषु सदा रमन्तो
भिक्षान्नमात्रेण च तुष्टिमन्तः ।
विशोकमन्तःकरणे रमन्तः
कौपीनवन्तः खलु भाग्यवन्तः॥ १ ॥
मूलं तरोः केवलमाश्रयन्तः
पाणिद्वयं भोक्तुममन्त्रयन्तः ।
कन्थामिव श्रीमपि कुत्सयन्तः
कौपीनवन्तः खलु भाग्यवन्तः ॥ २ ॥
देहादिभावं परिवर्तयन्त
आत्मानमात्मन्यवलोकयन्तः ।
नान्तं न मध्यं न वहिः स्मरन्तः
कौपीनवन्तः खलु भाग्यवन्तः॥ ३ ॥
स्वानन्दभावे परितुष्टिमन्तः
सुशान्तसर्वेन्द्रियतुष्टिमन्तः ।
अहर्निशं ब्रह्मसुखे रमन्तः
कौपीनवन्तः खलु भाग्यवन्तः॥ ४ ॥

पञ्चाक्षरं पावनमुच्चरन्तः
पतिं पशूनां हृदि भावयन्तः ।
भिक्षाशिनो दिक्षु परिभ्रमन्तः
कौपीनवन्तः खलु भाग्यवन्तः ॥ ५ ॥

इति श्रीपरमहंसकाचार्य शङ्करभगवत्
पूज्यपादकृतं यतिपञ्चकं
समाप्तं ॥ ० ॥

# आत्मबोधः ।

तपोभिः क्षीणपापानां शान्तानां वीतरागिणां ।
मुमुक्षूणामपेक्षोयमात्मबोधो विधीयते ॥ १ ॥
बोधोऽन्यसाधनेभ्यो हि साक्षान्मोक्षैकसाधनं ।
पाकस्य वह्निवज्ज्ञानं विना मोक्षो न सिध्यति ॥ २ ॥
अविरोधितया कर्म नाविद्यां विनिवर्तयेत् ।
विद्याविद्यां निहन्त्येव तेजस्तिमिरसंघवत् ॥ ३ ॥
परिच्छिन्न इवाज्ञानात्तन्नाशे सति केवलः ।
स्वयं प्रकाशते ह्यात्मा मेघापायेंशुमानिव ॥ ४ ॥
अज्ञानकलुषं जीवं ज्ञानाभ्यासाद्विनिर्मलं ।
कृत्वा ज्ञानं स्वयं नश्येज्जलं कतकरेणुवत् ॥ ५ ॥
संसारः स्वप्नतुल्योहि रागद्वेषादिसङ्कुलः ।
स्वकाले सत्यवद्भाति प्रबोधेऽसत्यवद्भवेत् ॥ ६ ॥
तावत्सत्यं जगद्भाति शुक्तिकारजतं यथा ।
यावन्न ज्ञायते ब्रह्म सर्वाधिष्ठानमद्वयं ॥ ७ ॥
सच्चिदात्मन्यनुस्यूते नित्ये विष्णौ प्रकल्पितः ।
व्यक्तयो विविधाः सर्वा हाटके कटकादिवत् ॥ ८ ॥

यथाकाशो हृषीकेशो नानोपाधिगतो विभुः ।
तद्भेदाद्भिन्नवद्भाति तन्नाशादेकवद्भवेत् ॥ ९ ॥
नानोपाधिवशादेवं जातिनामाश्रयादयः ।
आत्मन्यारोपितास्तोये रसवर्णादिभेदवत् ॥ १० ॥
पञ्चीकृतमहाभूतसम्भवं कर्मसञ्चितं ।
शरीरं सुखदुःखानां भोगायतनमुच्यते ॥ ११ ॥
पञ्चप्राणमनोबुद्धिदशेन्द्रियसमन्वितं ।
अपञ्चीकृतभूतोत्थं सूक्ष्माङ्गं भोगसाधनं ॥ १२ ॥
अनाद्यविद्या निर्वाच्या कारणोपाधिरुच्यते ।
उपाधित्रितयादन्यमात्मानमवधारयेत् ॥ १३ ॥
पञ्चकोशादियोगेन तत्तन्मयइव स्थितः ।
शुद्धात्मा नीलवस्त्रादियोगेन स्फटिको यथा ॥ १४ ॥
वपुस्तुषादिभिः कोशैर्युक्तं युक्त्यावघाततः ।
आत्मानमान्तरं शुद्धं विविच्यात्तण्डुलं यथा ॥ १५ ॥
सदा सर्वगतोप्यात्मा न सर्वत्रावभासते ।
बुद्धावेवावभासेत स्वच्छेषु प्रतिबिम्बवत् ॥ १६ ॥
देहेन्द्रियमनोबुद्धिप्रकृतिभ्यो विलक्षणं ।
तद्वृत्तिसाक्षिणं विद्यादात्मानं राजवत्सदा ॥ १७ ॥
व्यावृत्तेष्विन्द्रियेष्वात्मा व्यापारीवाविवेकिनां ।
दृश्यतेऽभ्रेषु धावत्सु धावन्निव यथा शशी ॥ १८ ॥
आत्मचैतन्यमाश्रित्य देहेन्द्रियमनोधियः ।
स्वकीयार्थेषु वर्तन्ते सूर्यालोकं यथा जनाः ॥ १९ ॥

देहेन्द्रियगुणान् कर्माण्यमले सच्चिदात्मनि ।
अध्यस्यतेऽविवेकेन गगने नीलतादिवत् ॥ २० ॥
अज्ञानान्मानसोपाधेः कर्तृत्वादीनि चात्मनि ।
कल्प्यन्तेऽम्बुगते चन्द्रे चलनादिर् यथाम्भसः ॥ २१ ॥
रागेच्छासुखदुःखादि बुद्धौ सत्यां प्रवर्तते ।
सुषुप्तौ नास्ति तन्नाशे तस्माद् बुद्धेस्तु नात्मनः ॥ २२ ॥
प्रकाशोऽर्कस्य तोयस्य शैत्यमग्नेर् यथोष्णता ।
स्वभावः सच्चिदानन्दनित्यनिर्मलतात्मनः ॥ २३ ॥
आत्मनः सच्चिदंशश्च बुद्धेर्वृत्तिरिति द्वयं ।
संयोज्य वाविवेकेन जानामीति प्रवर्तते ॥ २४ ॥
आत्मनो विक्रिया नास्ति बुद्धेर्बोधो न जात्विति ।
जीवः सर्वमलं ज्ञात्वा ज्ञाता द्रष्टेति मुह्यति ॥ २५ ॥
रज्जुसर्पवदात्मानं जीवो ज्ञात्वा भयं वहेत् ।
नाहञ्जीवः परात्मेतिज्ञानश्चेन्निर्भयो भवेत् ॥ २६ ॥
आत्मावभासयत्येको बुद्ध्यादीनीन्द्रियाणि हि ।
दीपो घटादिवत्स्वात्मा जडैस्तैर्नावभास्यते ॥ २७ ॥
स्वबोधे नान्यबोधेच्छा बोधरूपतयात्मनः ।
न दीपस्यान्यदीपेच्छा यथा स्वात्मप्रकाशने ॥ २८ ॥
निषिध्य निखिलोपाधीन्नेति नेतीति वाक्यतः ।
विद्यादैक्यं महावाक्यैर् जीवात्मपरमात्मनोः ॥ २९ ॥
आविद्यकं शरीरादि दृश्यं बुद्बुदवत् क्षरं ।
एतद्विलक्षणं विद्यादहं ब्रह्मेति निर्मलं ॥ ३० ॥

देहान्यत्वान्नमे जन्मजराकार्श्यलयादयः ।
शब्दादिविषयैः सङ्गो निरिन्द्रियतया न च ॥ ३१ ॥
अमनस्त्वान्नमे दुःखरागद्वेषभयादयः ।
अप्राणोह्यमनाः शुभ्रइत्यादि श्रुतिशासनात् ॥ ३२ ॥
निर्गुणो निष्क्रियो नित्यो निर्विकल्पो निरञ्जनः ।
निर्विकारो निराकारो नित्यमुक्तोस्मि निर्मलः ॥ ३३ ॥
अहमाकाशवत्सर्ववहिरन्तर्गतोऽच्युतः ।
सदा सर्वसमः शुद्धो निःसङ्गो निर्मलोऽचलः ॥ ३४ ॥
नित्यशुद्धविमुक्तैकमखण्डानन्दमद्वयं ।
सत्यं ज्ञानमनन्तं यत्परं ब्रह्माहमेव तत् ॥ ३५ ॥
एवं निरन्तरं कृत्वा ब्रह्मैवास्मीति वासना ।
हरत्यविद्याविक्षेपान् रोगानिव रसायनं ॥ ३६ ॥
विविक्तदेश आसीनो विरागो विजितेन्द्रियः ।
भावयेदेकमात्मानं तमनन्तमनन्यधीः ॥ ३७ ॥
आत्मन्येवाखिलं दृश्यं प्रविलाप्य धिया सुधीः ।
भावयेदेकमात्मानं निर्मलाकाशवत्सदा ॥ ३८ ॥
रूपवर्णादिकं सर्वं विहाय परमार्थवित् ।
परिपूर्णचिदानन्दस्वरूपेणावतिष्ठति ॥ ३९ ॥
ज्ञातृज्ञानज्ञेयभेदः परात्मनि न विद्यते ।
चिदानन्दैकरूपत्वाद्दीप्यते स्वयमेव हि ॥ ४० ॥
एवमात्मारणौ ध्यानमथने सततं कृते ।
उदितावगतिर्ज्वाला सर्वाज्ञानेन्धनं दहेत् ॥ ४१ ॥

आरुणेनैव बोधेन पूर्वं सतमसे हृते ।
तत आविर्भवेदात्मा स्वयमेवांशुमानिव ॥ ४२ ॥
आत्मा तु सततं प्राप्तोप्यप्राप्तवदविद्यया ।
तन्नाशे प्राप्तवद्भाति स्वकण्ठाभरणं यथा ॥ ४३ ॥
स्थाणौ पुरुषवद्भ्रांत्या कृता ब्रह्मणि जीवता ।
जीवस्य तात्त्विके रूपे तस्मिन् दृष्टे निवर्तते ॥ ४४ ॥
तत्त्वस्वरूपानुभवादुत्पन्नं ज्ञानमंजसा ।
अहं ममेति चाज्ञानं बाधते दिग्भ्रमादिवत् ॥ ४५ ॥
सम्यग्विज्ञानवान्योगी स्वात्मन्येवाखिलञ्जगत् ।
एकं च सर्वमात्मानमीक्षते ज्ञानचक्षुषा ॥ ४६ ॥
आत्मैवेदं जगत् सर्वमात्मनोन्यन् न किंचन ।
मृदो यद्वद् घटादीनि स्वात्मानं सर्वमीक्षते ॥ ४७ ॥
जीवन्मुक्तिस्तु तद्विद्वान् पूर्वोपाधिगुणांस्त्यजेत् ।
सच्चिदानन्दरूपत्वाद्भजेद्भ्रमरकीटवत् ॥ ४८ ॥
तीर्त्वा मोहार्णवं हत्वा रागद्वेषादिराक्षसान् ।
योगी सर्वसमायुक्त आत्मारामो विराजते ॥ ४९ ॥
बाह्यानित्यसुखासक्तिं हित्वात्मसुखनिर्वृतः ।
घटस्थदीपवत् स्वच्छदन्तरेव प्रकाशते ॥ ५० ॥
उपाधिस्थोपि तद्धर्मैर्निर्लिप्तो व्योमवन्मुनिः ।
सर्वविन्मूढवत्तिष्ठेदसक्तः वायुवच्चरेत् ॥ ५१ ॥
उपाधिविलयाद्विष्णौ निर्विशेषं विशेन्मुनिः ।
जले जलं वियद् व्योम्नि तेजस्तेजसि वा यथा ॥ ५२ ॥

यल्लाभान्नापरो लाभो यत्सुखान्नापरं सुखं ।
यज्ज्ञानान्नापरं ज्ञानं तद्ब्रह्मेत्यवधारयेत् ॥ ५३ ॥
यद्दृष्ट्वा नापरं दृश्यं यद्भूत्वा न पुनर्भवः ।
यज्ज्ञात्वा नापरं ज्ञेयं तद् ब्रह्मेत्यवधारयेत् ॥ ५४ ॥
तिर्यगूर्ध्वमधःपूर्णसच्चिदानन्दमद्वयं ।
अनन्तं नित्यमेकं यत् तद् ब्रह्मेत्यवधारयेत् ॥ ५५ ॥
अतद्व्यावृत्तिरूपेण वेदान्तैर्लक्ष्यतेऽद्वयं ।
अखण्डानन्दमेकं यत् तद् ब्रह्मेत्यवधारयेत् ॥ ५६ ॥
अखण्डानन्दरूपस्य तस्यानन्दलवाश्रिताः ।
ब्रह्माद्यास्तारतम्येन भवन्त्यानन्दिनो लवाः ॥ ५७ ॥
तद्युक्तमखिलं वस्तु व्यवहारस्तदन्वितः ।
तस्मात्सर्वगतं ब्रह्म क्षीरे सर्पिरिवाखिले ॥ ५८ ॥
अनण्वस्थूलमह्रस्वमदीर्घमजमव्ययं ।
अरूपगुणवर्णाख्यं तद् ब्रह्मेत्यवधारयेत् ॥ ५९ ॥
यद्भासा भास्यतेर्कादिर् भास्यैर्यत्तु न भास्यते ।
येन सर्वमिदं भाति तद् ब्रह्मेत्यवधारयेत् ॥ ६० ॥
स्वयमन्तर्बहिर्व्याप्य भासयेन्निखिलं जगत् ।
ब्रह्म प्रकाशते वह्निप्रतप्तायसपीण्डवत् ॥ ६१ ॥
जगद्विलक्षणं ब्रह्म ब्रह्मणोन्यन् न किञ्चन ।
ब्रह्मान्यद्भासते मिथ्या यथा मरुमरीचिका ॥ ६२ ॥
दृश्यते श्रूयते यद्यद्ब्रह्मणोन्यन्न विद्यते ।
तत्वज्ञानाच्च तद्ब्रह्म सच्चिदानन्दमद्वयं ॥ ६३ ॥

सर्वगं सच्चिदात्मानं ज्ञानचक्षुर् निरीक्ष्यते ।
अज्ञानचक्षुर्नेक्षेत भास्वतम्भानुमंधवत् ॥ ६४ ॥
श्रवणादिभिरुद्दिप्तो ज्ञानाग्निपरितापितः ।
जीवः सर्वमलान्मुक्तः स्वर्णवद्द्योतते स्वयं ॥ ६५ ॥
हृदाकाशोदितो ह्यात्मा वोधभानुस्तमोपहृत् ।
सर्वव्यापी सर्वधारी भाति सर्वं प्रकाशते ॥ ६६ ॥
दिग्देशकालाद्यनपेक्षसर्वगं
शीतादिहृन्नित्यसुखं निरञ्जनं ।
यः स्वात्मतीर्थं भजते विनिष्क्रियः
स सर्ववित्सर्वगतोऽमृतो भवेत् ॥ ६७ ॥

इति श्रीमत्परमहंसपरिब्राजकाचार्य श्रीमत्
शङ्कराचार्य विरचितमात्मबोधप्रकरणं
सम्पूर्णं ॥ ० ॥

# अपराधभञ्जनस्तोत्रं ।

शान्तं पद्मासनस्थं शशधरमुकुटं
पञ्चवक्त्रं त्रिणेत्रं ।
शूलं वज्रञ्च खड्गं परशुमपि वरं
दक्षिणाङ्गे वहन्तं ॥
नागं पाशञ्च घण्टां डमरुकसहितं
चाङ्कुशं वामभागे ।
नानालङ्कारदीप्तं स्फटिकमणिनिभं
पार्वतीशं भजामि ॥ १ ॥
वन्दे देवमुमापतिं सुरगुरुं वन्दे जगत्कारणं
वन्दे पन्नगभूषणं मृगधरं वन्दे पशूनां पतिं ।
वन्दे सूर्यशशाङ्कवह्निनयनं वन्दे मुकुन्दप्रियं
वन्दे भक्तजनाश्रयञ्च वरदं वन्दे शिवं शङ्करं ॥ २ ॥
आदौ कर्मप्रसङ्गात् कलयति कलुषं
मातृकुक्षौ स्थितः सन् ।
विन्मूत्रामेध्य मध्ये व्यथयति नितरां
जाठरो जातवेदाः ॥

यद्यद्वा तत्र दुःखं विषयति विषमं
शक्यते केन वक्तुं ।
क्षन्तव्यो मेऽपराधः शिव शिव शिव भोः
श्रीमहादेव शम्भो ॥ ३ ॥
बाल्ये दुःखातिरेको मललुलितवपुः
स्तन्यपाने पिपासा ।
नो शक्यं चेन्द्रियेभ्यो भवगुणजनिता
जन्तवो मां तुदन्ति ॥
नानारोगोत्थदुःखादुदरपरिवशः
शङ्करं न स्मरामि ।
क्षन्तव्यो मेऽपराधः शिव शिव शिव भोः
श्रीमहादेव शम्भो ॥ ४ ॥
प्रौढोऽहं यौवनस्थो विषयविषधरैः
पञ्चभिर्मर्मसन्धौ ।
दष्टो नष्टो विवेकः सुतधनयुवती
स्वादुसौख्ये निषण्णः ॥
शैवे चिन्ताविहीनं मम हृदयमहो
मान गर्वाधिरूढं ।
क्षन्तव्यो मे ऽपराधः शिव शिव शिव भोः
श्रीमहादेव शम्भो ॥ ५ ॥
वार्द्धक्ये चेन्द्रियाणां विगतगतमतेर्
आधिदैवादितापैः ।

पापै रोगैर् वियोगैर् अशहृशवपुषं
प्रौढहीनञ्च दीनं ॥
मिथ्यामोहाभिलाषैर् भ्रमति मम मनो
धूर्जटेर्ध्यानशून्यं ।
क्षन्तव्यो मेऽपराधः शिव शिव शिव भोः
श्रीमहादेव शम्भो ॥ ६ ॥
नो शक्यं स्मार्तकर्म प्रतिपदगहनं
प्रत्यवायाकुलाख्यं ।
श्रौते वार्ता कथं मे द्विजकुलविहिते
ब्रह्ममार्गे च सारे ॥
नष्टो धर्मो विचारः श्रवणमननयोः
को निदिध्यासितव्यः ।
क्षन्तव्यो मेऽपराधः शिव शिव शिव भोः
श्रीमहादेव शम्भो ॥ ७ ॥
स्नात्वा प्रत्यूषकाले स्नपनविधि विधौ
नाहृतं गाङ्गतोयं ।
पूजार्थं वा कदाचिद् बहुतरगहनात्
खण्डविल्वैकपत्रं ॥
नानीता पद्ममाला सरसि विकपिता
गन्धपुष्पे त्वदर्थं ।
क्षन्तव्यो मेऽपराधः शिव शिव शिव भोः
श्रीमहादेव शम्भो ॥ ८ ॥

दुग्धैर्मध्वाज्ययुक्तैर्घटशतसहितैः
स्नापितं नैव लिङ्गं ।
नोलिप्तं चन्दनाद्यैः कनकविरचितैः
पूजितं न प्रसूनैः ॥
धूपैः कर्पूरदीपैर् विविध-रसयुतैर्
नैव भक्ष्योपहारैः ।
क्षन्तव्यो मे ऽपराधः शिव शिव शिव भोः
श्रीमहादेव शम्भो ॥ ९ ॥
नग्नो निःसङ्गशुद्धस्त्रिगुणविरहितो
ध्वस्तमोहान्धकारो ।
नासाग्रे न्यस्तदृष्टिर् विहरभवगुणैर्
नैव दृष्टं कदाचित् ॥
उन्मत्तावस्थया त्वां विगतकलिमलं
शङ्करं न स्मरामि ।
क्षन्तव्यो मेऽपराधः शिव शिव शिव भोः
श्रीमहादेव शम्भो ॥ १० ॥
ध्यानं चित्ते शिवाख्यं प्रचुरतरधनं
नैव दत्तं द्विजेभ्यो ।
हव्यं ते लक्षसंख्यं हुतवहवदने
नार्पितं वीजमन्त्रैः ॥
नो जप्तं गाङ्गतीरे व्रतपरिचरनै
रुद्रजप्यैर् न वेदैः ।

क्षन्तव्यो मेऽपराधः शिव शिव शिव भोः
श्रीमहादेव शम्भो ॥ ११ ॥
स्थित्वास्थाने सरोजे प्रणवमयमरुत्
कुम्भके सूक्ष्ममार्गे ।
शान्ते स्वान्ते प्रलीने प्रकटितगहने
ज्योतिरूपे पराख्ये ॥
लिङ्गं त्वद्ब्रह्मवाच्यं सकलमभिमतं
नैव दृष्टं कदाचित् ।
क्षन्तव्यो मेऽपराधः शिव शिव शिव भोः
श्रीमहादेव शम्भो ॥ १२ ॥
आयुर्नश्यति पश्यतां प्रतिदिनं याति क्षयं यौवनं
प्रत्यायान्ति गताः पुनर्न दिवसाः कालो जगद्भक्षकः ।
लक्ष्मीस्तोयतरङ्गभङ्गचपला विद्युच्चलं जीवनं
तस्मान्मां शरणागतं शरणद त्वं रक्ष रक्षाधुना ॥ १३ ॥
चन्द्रोद्भासितशेखरे स्मरहरे गङ्गाधरे शङ्करे
सर्पैर्भूषित कण्ठकर्णविवरे नेत्रोत्थवैश्वानरे ।
दन्तित्वक्स्वतिसुन्दराम्बरधरे त्रैलोक्य सारे हरे
मोक्षार्थं कुरु चित्तवृत्तिममलामन्यैस्तु किं कर्मभिः ॥१४॥
किं दानेन धनेन वाजिकरिभिः प्राप्तेन राज्येन किं
किंवा पुत्रकलत्रमित्रपशुभिर्देहेन गेहेन किं ।
ज्ञात्वैतत् क्षणभङ्गुरं सपदि रे त्याज्यं मनोदूरतः
स्वात्मार्थं गुरुवाक्यतो भज भज श्रीपार्वतीवल्लभं ॥ १५ ॥

करचरणकृतं वा कायजं कर्मजं वा
श्रवणनयनजं वा मानसं वापराधं ।
विदितमविदितं वा सर्वमेतत् क्षमस्व
जय जय करुणाब्धे श्रीमहादेव शम्भो ॥ १६ ॥
गात्रं भस्मसितं स्मितञ्च हसितं हस्ते कपालं सितं
खट्टाङ्गञ्च सितं सितश्च वृषभः कर्णे सिते कुण्डले ।
गङ्गाफेनसितं जटा पयसितं चन्द्रः सितो मूर्द्धनि
सोऽयं सर्वसितो ददातु विभवं पापक्षयं शङ्करः ॥ १७ ॥

इति श्रीपरमहंसपरिव्राजकाचार्य श्रीशङ्कराचार्य
भगवत्कृतमपराधभञ्जनस्तोत्रं
समाप्तं ॥ ० ॥

# नीतिरत्नं ।

चतुर्मुखमुखाम्भोजशृङ्गाटकविहारिणीं ।
नित्यप्रगल्भवाचालामुपतिष्ठे सरस्वतीं ॥ १ ॥
इतरपापफलानि यथेच्छया
वितर तानि सहे चतुरानन ।
अरसिकेषु कवित्वनिवेदनं
शिरसि मालिख मालिख मालिख ॥ २ ॥
संसारविषवृक्षस्य द्वे फले अमृतोपमे ।
काव्यामृतरसास्वाद आलापः सज्जनैःसह ॥ ३ ॥
पण्डितेषु गुणाः सर्वे मूर्खे दोषाश्च केवलाः ।
तस्मान्मूर्खसहस्रेभ्यः प्राज्ञ एको विशिष्यते ॥ ४ ॥
पुरो रेवापारे गिरिरतिदुरारोहशिखरो
धनुर्बाणैः पश्चात् सवरकवरो धावति मृगं
सरः सव्येऽसव्ये दवदहनदाहव्यतिकरो ।
न गन्तुं न स्थातुं हरिणशिशुरेवं विलपति ॥ ५ ॥
छेदश्चन्दनचूतचम्पकवने रक्षा करीरद्रुमे
हिंसा हंसमयूरकोकिलकुले काकेषु लीलारतिः ।
मातङ्गेन खरक्रयः समतुला कर्पूरकार्पासयोर्
एषा यत्र विचारणा गुणिगणे देशाय तस्मै नमः ॥ ६ ॥

भिनत्ति भीमं करिराजकुम्भं बिभर्ति वेगं पवनादतीव।
करोतिवासं गिरिगह्वरेषु तथापि सिंहः पशुरेव नान्यः ७॥
काकस्य चञ्चुर् यदिस्वर्णयुक्ता माणिक्ययुक्तौचरणौच तस्य।
एकैकपक्षे गजराजमुक्ता तथापि काको नच राजहंसः ॥८॥
दिव्यं चूतरसं पीत्वा न गर्वं याति कोकिलः।
पीत्वा कर्दमपानीयं भेको मकमकायते ॥ ९ ॥
अगाधजलसञ्चारी न गर्वं याति रोहितः।
अङ्गुष्ठोदकमात्रेण सफरी फर्फरायते ॥ १० ॥
भद्रं कृतं कृतं मौनं कोकिलैर्जलदागमे।
दर्दुरा यत्र वक्तारस्तत्र मौनं हि शोभनं ॥ ११ ॥
मणिर्लुठति पादेषु काचः शिरसि धार्यते।
यथैवास्ते तथैवास्तां काचः काचो मणिर्मणिः ॥ १२ ॥
काकः कृष्णः पिकः कृष्णः को भेदः पिककाकयोः।
वसन्ते समुपायाते काकः काकः पिकः पिकः ॥ १३ ॥
वरं वने व्याघ्रगजेन्द्रसेवितं द्रुमालयं पत्रफलाम्बुभोजनं।
तृणानि शय्या वसनंच वल्कलं न बन्धुमध्येधनहीनजीवनं
सा[illegible] दयितविरहे मानिनां मानभङ्गे [ ॥ १४ ॥
स[illegible]नाम[illegible] जनरवे निग्रहे पण्डितानां।
अन्योद्रेके कुटिलमनसां निर्गुणानां विदेशे
भृत्याभावे भवति मरणं किन्तु सम्भावितानां ॥ १५ ॥

इति श्रीमहाकविवररुचिविरचितं
नीतिरत्नं सम्पूर्णं ॥ ० ॥

## नीतिसारं ।

गिरौ कलापी गगणे पयोदा
लक्षान्तरेऽर्कश्च जलेषु पद्माः ।
इन्दुर्द्विलक्षं कुमुदस्य वन्धुर्
यो यस्य मित्रं नहि तस्य दूरं ॥ १ ॥
माता निन्दति नाभिनन्दति पिता भ्राता न सम्भाषते
भृत्यः कुप्यति नानुगच्छति सुतः कान्ता च नालिङ्गते ।
अर्थप्रार्थनशङ्कया न कुरुतेऽप्यालापमात्रं सुहृत्
तस्मादर्थमुपार्जयस्व च सखे स्वार्थस्य सर्वे वशाः॥ २॥
धनैर्निष्कुलीनाः कुलीना भवन्ति
धनैरापदं मानवा निस्तरन्ति ।
धनेभ्यः परो वान्धवो नास्ति लोके
धनान्यर्जयध्वं धनान्यर्जयध्वं ॥ ३ ॥
अर्थस्य पुरुषो दासो दासस्त्वर्थो न कस्यचित् ।
इति सत्यं महाराज वद्धोऽस्म्यर्थेन कौरवैः ॥ ४ ॥
त्रिविक्रमोऽभूदपि वामनोऽसौ
स शूकरश्चेति स वै नृसिंहः ।
नीचैरनीचैरतिनीचनीचैः

सर्वैरुपायैः फलमेव साध्यं ॥ ५ ॥
चलच्चित्तं चलद्वित्तं चलज्जीवनयौवनं ।
चलाचलमिदं सर्वं कीर्तिर्यस्य स जीवति ॥ ६ ॥
स जीवति यशो यस्य कीर्तिर्यस्य स जीवति ।
अयशोऽकीर्तिसंयुक्तो जीवन्नपि मृतोपमः ॥ ७ ॥
वृद्धस्य वचनं ग्राह्यमापत्काले ह्युपस्थिते ।
सर्वत्रैवं विचारेण नाहारे नच मैथुने ॥ ८ ॥
क्वचिद्रुष्टः क्वचित्तुष्टो रुष्टस्तुष्टः क्षणे क्षणे ।
अव्यवस्थितचित्तस्य प्रसादोपि भयङ्करः ॥ ९ ॥
निमित्तमुद्दिश्य हि यः प्रकुप्यति
ध्रुवं स तस्यापगमे प्रसीदति ।
अकारणद्वेषि मनस्तु यस्य
कथं जनस्तं परितोषयिष्यति ॥ १० ॥
दश व्याघ्रा जिताः पूर्वं सप्त सिंहास्त्रयो गजाः ।
पश्यन्तु देवताः सर्वा अद्य युद्धं त्वया मया ॥ ११ ॥
सिंहउवाच ॥
गच्छ शूकर भद्रन्ते ब्रूहि सिंहो मया जितः ।
पण्डिता एव जानन्ति सिंहशूकरयोर्बलं ॥ १२ ॥
उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीर्
दैवेन देयमिति कापुरुषा वदन्ति ।
दैवं निहत्य कुरु पौरुषमात्मशक्त्या
यत्ने कृते यदि न सिद्ध्यति को ऽत्र दोषः ॥ १३ ॥

एका भार्या प्रकृतिमुखरा चञ्चला च द्वितीया
पुत्रस्त्वेको भुवनविजयी मन्मथो दुर्निवारः ।
शेषः शय्या शयनमुदधौ वाहनं पन्नगारिः
स्मारं स्मारं स्वगृहचरितं दारुभूतो मुरारिः ॥ १४ ॥
अतिदूरपथश्रान्ताश्छायां यान्ति च शीतलां ।
शीतलाश्च पुनर्यान्ति का कस्य परिदेवना ॥ १५ ॥
अपमानं पुरस्कृत्य मानं कृत्वा च पृष्ठके ।
स्वकार्यमुद्धरेत् प्राज्ञः कार्यध्वंसोहि मूर्खता ॥ १६ ॥
एको हि दोषो गुणसन्निपाते
निमज्जतीन्दोरिति योऽवभाषे ।
नूनं न दृष्टं कविनापि तेन
दारिद्र दोषो गुणराशिनाशी ॥ १७ ॥
कृतस्य करणं नास्ति मृतस्य मरणं तथा ।
गतस्य शोचना नास्ति ह्येतद्वेदविदाम्मतं ॥ १८ ॥
नाकाले म्रियते जन्तुर्विद्धः शरशतैरपि ।
कुशकंटकविद्धोपि प्राप्तकालो न जीवति ॥ १९ ॥
निमग्नस्य पयोराशौ पर्वतात् पतितस्य च ।
तक्षकेनापि दष्टस्य आयुर्मर्माणि रक्षति ॥ २० ॥
करोतु नाम नीतिज्ञो व्यवसायमितस्ततः ।
फलं पुनस्तदेवस्याद् यद्विधेर्मनसि स्थितं ॥ २१ ॥

इति श्रीमहाकविघटकर्परविरचितं
नीतिसारं समाप्तं ॥ ० ॥

## धर्मविवेकः ।

श्रद्धाबीजो विप्रवेदाम्बुसिक्तः
शाखा विद्यास्ताश्चतस्रो दशापि ।
पुण्यान्यर्थो द्वे फले स्थूलसूक्ष्मे
मोक्षः कामो धर्मवृक्षोयमीड्यः ॥ १ ॥
यातः क्ष्मामखिलां प्रदाय हरये पातालमूलं बलिः
शक्तुप्रस्थविसर्जनात् स च मुनिः स्वर्गं समारोपितः ।
आबाल्यादसती सती सुरपुरीं कुन्ती समारोहयत्
हा सीता पतिदेवतागमदधो धर्मस्य सूक्ष्मा गतिः ॥ २ ॥
कानीनस्य मुनेः स्वबान्धववधूवैधव्यविध्वंसिनो
नेतारः खलु गोलकस्य तनयाः कुण्डाः स्वयं पाण्डवाः ।
तेऽमी पञ्च समानयोनिरतयः तेषां गुणोत्कीर्तनात्
अक्षय्यं सुकृतं भवेदविकलं धर्मस्य सूक्ष्मा गतिः ॥ ३ ॥
आहारे शुचिता ध्वनौ मधुरता नीडे पराधीनता
बन्धौ निर्ममता वने रसिकता वाचालता माधवे ।
यस्यैते गुणराशयः पिकवरं त्यक्त्वा किमेते जना
वन्दन्ते खलुखञ्जनं कृमिभुजं चित्रा गतिः कर्मणां ॥ ४ ॥
कान्तं वक्ति कपोतिकाकुलतया नाथान्तकालोऽधुना
व्याधोधो धृतचापशानितशरः श्येनः परिभ्राम्यति ।
इत्थं सत्यहिना स दष्ट इषुणा श्येनोपि तेनाहतस्

तुर्णं तौ तु यमालयम्प्रति गतौ दैवी विचित्रा गतिः ॥५॥
शृङ्गयोः खुरयोर्विचार्य मनसा कल्काशनं यन्मया
प्रोक्तं तद्विपरीतकं कृतमहो गोःखूरमात्रं ददौ ।
नार्थो मूर्खजनालये न च सुखं नोवा यशो लभ्यते
सद्वैद्ये कविभूपतौ हरिहरे लाभः परं गोवधः ॥ ६ ॥
पञ्चास्यस्य पराभवाय भषको मांसेन गोर्भूयसा
दध्यन्नैरपि पायसैः प्रतिदिनं सम्वर्द्धितो यो मया ।
सोयं सिंहरवाद्गुहान्तरगमभीत्याकुलः सम्भ्रमाद्
हन्ताशा विलयं गता हतविधेर्लाभः परं गोवधः ॥ ७ ॥
पारीन्द्रस्य पराभवाय सुरभीमांसेन दुर्मेधसा
पुष्यन्ते किल पीवराः कटुगिरः श्वानः प्रयत्नादमी ।
नत्वेतन्मदमत्तवारणचमूविद्रावणः केशरी
जेतव्यो भवता किरातनृपते लाभः परं गोवधः ॥ ८ ॥
एका भूरुभयोरैक्यमुभयोर्दलकाण्डयोः ।
शालिश्यामाकयोर्भेदः फलेन परिचीयते ॥ ९ ॥
जातः सूर्यकुले पिता दशरथः क्षौणीभुजामग्रणीः
सीता सत्यपरायणा प्रणयिणी यस्यानुजो लक्ष्मणः ।
दोर्दण्डेन समो नचास्तिभुवने प्रत्यक्षविष्णुः स्वयं
रामो येन विडम्बितोपि विधिना चान्ये परे काकथा ॥१०॥
एका भार्या प्रकृतिमुखरा चञ्चला च द्वितीया
पुत्रस्त्वेको भुवनविजयी मन्मथो दुर्निवारः ।
शेषः शय्या शयनमुदधौ वाहनं पन्नगारिः

स्मारं स्मारं स्वगृहचरितं दारुभूतो मुरारिः ॥ ११ ॥
असारे खलु संसारे सारं श्वशुरमन्दिरं ।
हरो हिमालये शेते विष्णुः शेते महोदधौ ॥ १२ ॥
असारे खलु संसारे सारमेतच्चतुष्टयं ।
काश्यां वासः सतां सङ्गो गङ्गाम्भः शम्भुसेवनं ॥ १३ ॥
आपदर्थं धनं रक्षेद्दारान् रक्षेत् धनैरपि ।
आत्मानं सततं रक्षेद्दारैरपि धनैरपि ॥ १४ ॥
चिन्ता ज्वरो मनुष्याणां वस्त्राणामातपो ज्वरः ।
असौभाग्यं ज्वरः स्त्रीणामश्वानां मैथुनं ज्वरः ॥ १५ ॥
यदि कृष्णपदे चिन्ता भक्तिस्तत्पदपङ्कजे ।
विषमे दुर्गमे वापि का चिन्ता मरणे रणे ॥ १६ ॥
देवे तीर्थे द्विजे मन्त्रे दैवज्ञे भेषजे गुरौ ।
यादृशी भावना यस्य सिद्धिर्भवति तादृशी ॥ १७ ॥
न माता शपते पुत्रं न दोषं लभते मही ।
न हिंसां कुरुते साधुर् न देवः सृष्टिनाशकः ॥ १८ ॥
जल्पन्ति सूरयः सर्वे धर्मो रक्षति धार्मिकं ।
एतज्ज्ञातव्यमद्यैव किमद्य च भविष्यति ॥ १९ ॥
जयोस्तु पाण्डुपुत्राणां येषां पक्षे जनार्दनः ।
यतः कृष्णस्ततो धर्मो यतो धर्मस्ततो जयः ॥ २० ॥

इति श्रीमहाकविहलायुधविरचितं
धर्मविवेकवाक्यं समाप्तं ॥ ० ॥

# शृङ्गाररसाष्टकं ।

अविदितसुखदुःखं निर्गुणं वस्तु किञ्चित्
जडमतिरिह कश्चित् मोक्ष इत्याचचक्षे ।
मम तु मतमनङ्गस्मेरतारल्यघूर्णन्
मदकलमदिराक्षीणीविमोक्षो हि मोक्षः ॥ १ ॥
कदा कान्तागारे परिमलमिलत्पुष्पशयने
शयानः कान्तायाः कुचयुगमहं वक्षसि वहन् ।
अये कान्ते मुग्धे कुटिलनयने चन्द्रवदने
प्रसीदेति क्रोशन् निमीषमिव नेष्यामि दिवसान् ॥ २ ॥
सायं नायमुदेति वासरमणिश्चन्द्रो न चण्डद्युतिर्
दावाग्निः कथमम्वरे किमशनिः स्वच्छान्तरीक्षे स्थितः ।
हन्तेदं निरणायि पान्थरमणीप्राणानिलाशाशया
धावद्घोरविभावरी विषधरी भोगस्य भीमो मणिः ॥ ३ ॥
आयाति याति पुनरेव जलं प्रयाति
पद्माङ्कराणि विधुनोति धुनोति पक्षौ ।
उन्मत्तवद्भ्रमति कूजति मन्दमन्दं
कान्तावियोगविधुरो निशि चक्रवाकः ॥ ४ ॥
भंक्त्वा भोक्तुं न भुंक्ते कुटिलविसलता
खण्डमिन्दोर्वितर्कात ।

ताराकारास्तृषार्तो न पिबति पयसां
विप्रुषः पत्रसंस्थाः ॥
छायामम्भोजिनीनामलिकुलसबलां
वीक्ष्य संध्यामसंध्यां ।
कान्ताविश्लेषभीरुर्दिनमपि रजणीं
मन्यते चक्रवाकः ॥ ५ ॥
गन्धाढ्यासौ भुवनविदिता केतकी स्वर्णवर्णा
पद्मभ्रान्त्या चपलमधुपः पुष्पमध्ये पपात ।
अन्धीभूतः कुसुमरजसा कंठकैर्लूनपक्षः
स्थातुं गन्तुं द्वयमपि सखे नैव शक्तो द्विरेफः ॥ ६ ॥
तं वीक्ष्य वेपथुमती सरसाङ्गयष्टिर्
निक्षेपएव पदमुद्धृतमर्पयन्ती ।
मार्गाचलव्यतिकराकुलितेव सिन्धुः
शैलाधिराजतनया न ययौ न तस्थौ ॥ ७ ॥
का कावला निधुवनश्रमपीडिताङ्गी
निद्रां गता दयितबाहुलतानुबद्धा ।
सा सा तु यातु भवनं मिहिरोद्गमोयं
सङ्केतवाक्यमिति काकचया वदन्ति ॥ ८ ॥

इति महामहाकविकालिदासविरचितं
शृङ्गाररसाष्टकं समाप्तं ॥ ० ॥

## वेदसारशिवस्तवः ।

पशूनां पतिं पापनाशं परेशं
गजेन्द्रस्य कृत्तिं वसानं वरेण्यं ।
जटाजूटमध्ये स्फुरद्गाङ्गवारिं
महादेवमेकं स्मरामि स्मरारिं ॥ १ ॥
महेशं सुरेशं सुरारातिनाशं
विभुं विश्वनाथं विभूत्यङ्गभूषं ।
विरूपाक्षमिन्द्वर्कवह्नित्रिणेत्रं
सदानन्दमीडे प्रभुं पञ्चवक्त्रं ॥ २ ॥
गिरीशं गणेशं गले नीलवर्णं
गवेन्द्राधिरूढं गुणातीतरूपं ।
भवं भास्वरं भस्मना भूषिताङ्गं
भवानीकलत्रं भजे पञ्चवक्त्रं ॥ ३ ॥
शिवाकान्त शम्भो शशाङ्कार्द्धमौले
महेशान शूलिन् जटाजूटधारिन् ।
त्वमेको जगद्व्यापको विश्वरूप
प्रसीद प्रसीद प्रभो पूर्णरूप ॥ ४ ॥
परात्मानमेकं जगद्बीजमाद्यं
निरीहं निराकारमोङ्कारवेद्यं ।

यतो जायते पाल्यते येन विश्वं
तमीशं भजे लीयते यत्र विश्वं ॥ ५ ॥
न भूमिर्नचापो न वह्निर्न वायुर्
न चाकाशमास्ते न तन्द्रा न निद्रा ।
न ग्रीष्मो न शीतं न देशो न वेशो
न यस्यास्ति मूर्तिस्त्रिमूर्तिं तमीडे ॥ ६ ॥
अजं शाश्वतं कारणं कारणानां
शिवं केवलं भासकं भासकानां ।
तुरीयं तमःपारमाद्यन्तहीनं
प्रपद्ये परं पावनं द्वैतहीनं ॥ ७ ॥
नमस्ते नमस्ते विभो विश्वमूर्ते
नमस्ते नमस्ते चिदानन्दमूर्ते ।
नमस्ते नमस्ते तपोयोगगम्य
नमस्ते नमस्ते श्रुतिज्ञानगम्य ॥ ८ ॥
प्रभो शूलपाने विभो विश्वनाथ
महादेव सम्भो महेश त्रिनेत्र ।
शिवाकान्त शान्त स्मरारे पुरारे
त्वदन्यो वरेण्यो न मान्यो न गण्यः ॥ ९ ॥
शम्भो महेश करुणामय शूलपाणे
गौरीपते पशुपते पशुपाशनाशिन् ।
काशीपते करुणया जगदेतदेकस्
त्वं हंसि पासि विदधासि महेश्वरोसि ॥ १० ॥

त्वत्तो जगद्भवति देव भव स्मरारे
त्वय्येव तिष्ठति जगन्मृड विश्वनाथ ।
त्वय्येव गच्छति लयं जगदेतदीश
लिङ्गात्मके हर चराचरविश्वरूपिन् ॥ ११ ॥

इति श्रीमद्भगवच्छङ्कराचार्यविरचितं
वेदसारशिवस्तोत्रं सम्पूर्णं ॥ ० ॥

# मुकुन्दमाला ।

वन्दे मुकुन्दमरविन्ददलायताक्षं
कुन्देन्दुशंखदशनं शिशुगोपवेशं ।
इन्द्रादिदेवगणवन्दितपादपीठं
वृन्दावनालयमहं वसुदेवसूनुं ॥ १ ॥
श्रीवल्लभेति वरदेति दयापरेति
भक्तिप्रियेति भवलुण्ठनकोविदेति ।
नाथेति नागशयनेति जगन्निवासेत्य्
आलापिनं प्रतिदिनं कुरु मां मुकुन्द ॥ २ ॥
जयतु जयतु देवो देवकीनन्दनोयं
जयतु जयतु कृष्णो वृष्णिवंशप्रदीपः ।
जयतु जयतु मेघश्यामलः कोमलाङ्गो
जयतु जयतु पृथ्वीभारनाशो मुकुन्दः ॥ ३ ॥
मुकुन्द मूर्द्ध्ना प्रणिपत्य याचे
भवन्तमेकान्तमियन्तमर्थं ।
अविस्मृतिस्त्वच्चरणारविन्दे
भवे भवे मेऽस्तु तव प्रसादात् ॥ ४ ॥
श्रीगोविन्दपदाम्भोजमधुनो महदद्भुतं ।
यत्पायिनो न मुह्यन्ति मुह्यन्ति यदपायिनः ॥ ५ ॥

नाहं वन्दे तव चरणयोर्द्वन्द्वमद्वन्द्वहेतोः
कुम्भीपाकं गुरुमपि हरे नारकं नापनीतुं ।
रम्या रामा मृदुतनुलता नन्दने नापि रन्तुं
भावे भावे हृदयभवने भावयेयं भवन्तं ॥ ६ ॥
नास्था धर्मे न वसुनिचये नैव कामोपभोगे
यद्भाव्यं तद्भवतु भगवन् पूर्वकर्मानुरूपं ।
एतत्प्रार्थ्यं मम बहुमतं जन्मजन्मान्तरेऽपि
त्वत्पादाम्भोरुहयुगगता निश्चला भक्तिरस्तु ॥ ७ ॥
दिवि वा भुवि वा ममास्तु वासो
नरके वा नरकान्तक प्रकामं ।
अवधीरितशारदारविन्दौ
चरणौ ते मरणे विचिन्तयामि ॥ ८ ॥
सरसिजनयने सशंखचक्रे
मुरभिदि मा विरमेह चित्त रन्तुं ।
सुखतरमपरं न जातु जाने
हरिचरणस्मरणामृतेन तुल्यं ॥ ९ ॥
मा भैर्मन्दमनो विचिन्त्य बहुधा यामीश्चिरं यातना
नैवामी प्रभवन्ति पापरिपवः स्वामी ननु श्रीधरः ।
आलस्यं व्यपनीय भक्तिसुलभं ध्यायस्व नारायणं
लोकस्य व्यसनापनोदनकरो दासस्य किं न क्षमः ॥ १० ॥
भवजलधिगतानां द्वन्द्ववाताहतानां
सुतदुहितृकलत्रत्राणभारार्दितानां ।

विषमविषयतोये मज्जतामप्लवानां
भवति शरणमेको विष्णुपोतो नराणां ॥ ११ ॥
रजसि निपतितानां मोहजालावृतानां
जननमरणदोलादुर्गसंसर्गगानां ।
शरणमशरणानामेकएवातुराणां
कुशलपथनियुक्तश्चक्रपाणिर्नराणां ॥ १२ ॥
अपराधसहस्रसंकुलं पतितं भीमभवार्णवोदरे।
अगतिं शरणागतं हरे कृपया केवलमात्मसात्कुरु ॥ १३ ॥
मा मे स्त्रीत्वं मा च मे स्यात् कुभावो
मा मूर्खत्वं मा कुदेशेषु जन्म।
मिथ्यादृष्टिर्मा च मे स्यात् कदाचित्
जातौ जातौ विष्णुभक्तो भवेयं ॥ १४ ॥
कायेन वाचा मनसेन्द्रियैश्च
बुद्ध्यात्मना वानुसृतिप्रभावात् ।
करोमि यद्यत् सकलं परस्मै
नारायणायैव समर्पयामि ॥ १५ ॥
यत् कृतं यत् करिष्यामि तत् सर्वं न मया कृतं ।
त्वया कृतन्तु फलभुक् त्वमेव मधुसूदन ॥ १६ ॥
भवजलधिमगाधं दुस्तरं निस्तरेयं
कथमहमिति चेतो मास्म गाः कातरत्वं ।
सरसिजदृशि देवे तारकी भक्तिरेका
नरकभिदि निषण्णा तारयिष्यत्यवश्यं ॥ १७ ॥

तृष्णातोये मदनपवनोद्भूतमोहोर्मिमाले
दारावर्ते तनयसहजग्राहसंघाकुले च ।
संसाराख्ये महति जलधौ मज्जतां नस्त्रिधामन्
पादाम्भोजे वरद भवतो भक्तिभावे प्रसीद ॥ १८ ॥
पृथ्वीरेणुरणुः पयांसि कणिकाः फल्गुः स्फुलिङ्गो लघुस्
तेजो निःश्वसनं मरुत्तनुतरं रंध्रं सुसूक्ष्मं नभः ।
क्षुद्रा रुद्रपितामहप्रभृतयः कीटाः समस्ताः सुरा
दृष्टे यत्र सतारको विजयते श्रीपादधूलीकणः ॥ १९ ॥
आम्नायाभ्यसनान्यरन्यरुदितं कृच्छ्रव्रतान्यन्वहं
मेदश्छेदपदानि पूर्तविधयः सर्वं हुतं भस्मनि ।
तीर्थानामवगाहनानि च गजस्नानं विना यत् पद
द्वन्द्वाम्भोरुहसंस्तुतिं विजयते देवः स नारायणः ॥ २० ॥
आनन्द गोविन्द मुकुन्द राम
नारायणानन्त निरामयेति ।
वक्तुं समर्थोऽपि न वक्ति कश्चिद्
अहो जनानां व्यसनानि मोक्षे ॥ २१ ॥
क्षीरसागरतरङ्गशीकरा
सारतारकितचारुमूर्तये ।
भोगिभोगशयनीयशायिने
माधवाय मधुविद्विषे नमः ॥ २२ ॥

इति श्रीकुलशेखरेण राज्ञा विरचिता
मुकुन्दमाला समाप्ता ॥ ० ॥

## ब्रजविहारः ।

गायन्तीनां गोपसीमन्तिनीनां
स्फीताकांक्षामक्षिरोलम्बमालां ।
निश्वाञ्चल्यामात्मवक्त्रारविन्दे
कुर्वन्नव्याद्देवकीनन्दनो वः ॥१।
सुपर्णस्वर्नाद्रौ रचितमणिशृङ्गो जलधिजा
मुखाम्भोजे भृङ्गो निगमविलसत्पञ्जरशुकः ।
त्रिलोकीकस्तुरीतिलककमनीयो ब्रजवधू
विहारी श्रीकृष्णो दिशतु भवतां शर्म सततं ॥२॥
कस्त्वं बालबलानुजस्त्वमिह किं मन्मन्दिराशङ्कया
बुद्धं तन्नवनीतकुम्भविवरे हस्तं कथं न्यस्यसि ।
कर्तुं तत्र पिपीलिकापनयनं सुप्ताःकिमुद्बोधिताः
बाला वत्सगतिं विवेक्तुमिति संजल्पन् हरिः पातु वः ॥३॥
जीर्णा तरिः सरिदतीवगभीरनीरा
बाला वयं सकलमित्थमनर्थहेतुः ।
निस्तारबीजमिदमेव कृशोदरीणां
यन्माधवस्त्वमसि सम्प्रति कर्णधारः ॥४॥
श्रीश्रीकृष्णो जयति जगतां जन्मदाता च पाता
हर्ता चान्ते हरति भजतां यश्च संसारभीतिं ।

राधानाथः सजलजलदः श्यामलः पीतवासा
वृन्दारण्ये विहरति सदा सच्चिदानन्दरूपः ॥ ५ ॥
ज्योतीरूपं परमपुरुषं निर्गुणं नित्यमेकं
नित्यानन्दं निखिलजगतामीश्वरं वीश्ववीजं ।
गोलोकेशं द्विभुजमुरलीधारिणं राधिकेशं
वन्दे वृन्दारकहरिहरब्रह्मवन्द्यांघ्रिपद्मं ॥ ६ ॥
येषां श्रीमद्यशोदासुतपदकमले
नास्ति भक्तिर्नराणां ।
येषामाभीरकन्या प्रियगुणकथने
नानुरक्ता रसज्ञा ॥
येषां श्रीकृष्णलीलाललितगुणकथा
सादरौ नैव कर्णौ ।
धिक् तान् धिक् तान् धिगेतान् कथयति नितरां
कीर्तनस्थो मृदङ्गः ॥ ७ ॥
केचिद्वदन्ति धनहीनजनो जघन्यः
केचिद्वदन्ति गुणहीनजनो जघन्यः ।
व्यासो वदत्यखिलवेदविशेषविज्ञो
नारायणस्मरणहीनजनो जघन्यः ॥ ८ ॥
वृन्दावने वृक्षलताप्रतानैर्
वृन्दावनेशस्य विहारहेतोः ।
पुरा विधात्रा रचितान् सुकुञ्जान्
जगाम कृष्णः सह राधया सः ॥ ९ ॥

नवीनमेघोपमनीलदेहः
सुपीतपट्टाम्बरयुग्मधारी ।
स्मिताननः कुण्डलवान् किरीटी
वंशीधरो मालतिमाल्यधारी ॥ १० ॥
नवीननीलाम्बुदकान्तिमद्वपुः
सस्मेरवक्त्राम्बुजवेणुवादनः ।
अनेकरत्नाभरणैर् विभूषितः
ससुन्दराङ्गो महसा माहोज्ज्वलः ॥ ११ ॥
गोपीजनानन्दकरो मुरारिर्
वृन्दावनेन्द्रो वनमाल्यशोभी ।
वंशीनिनादेन व्रजाङ्गणानां
मनांसि सम्मोहितवान् स कामी ॥ १२ ॥
नाशाय वालकगणान् सहि कंसराजः
तां पूतनां मानुषराक्षसीञ्च ।
संप्रेषयामास यदा तदा तां
मायाशिशुः प्राणसमं शुशोष ॥ १३ ॥
जिघांसया समायान्तीं पूतनां राक्षसीवरां ।
क्रोडे कृत्वा स्तन्यदात्रीं जघान वालको हरिः ॥ १४ ॥
गोपीगणो यमिह कामदृशा भजन्ते
यं भक्तिभाज इह केवलभक्तिभावैः ।
यं योगिनो हृदि धिया परिचिन्तयन्ति
तं केवलं कमललोचनमाश्रयेहं ॥ १५ ॥

कृष्णे कारुण्यपूर्णे शशधरवदने पीतकौषेयवस्त्रे
रत्नालङ्कारभूषे सजलजलधरश्यामले सुन्दराङ्गे।
वंशीवाद्यप्रमोदे व्रजजनयुवती जीवने यादवेन्द्रे
भूयाद्भक्तिर्दृढा मे सकलसुरवरैः सेव्यमाने मुरारौ ॥१६॥
वृन्दारण्ये विहरति सदा वासुदेवो दयालुर्
गोपस्त्रीभिः स्मरशरशतैर्भिन्नकृत् कामुकीभिः।
गोपैर्बालैरपि सहचरैः सार्द्धमानन्दयुक्तैर्
योसौ कृष्णः परमक[illegible]स्तं सदा चिन्तयेहं ॥ १७ ॥
वृन्दावनस्थानविहारहेतो
राधासमं कुञ्जगृहप्रवेशं।
चकार गोपीजनवल्लभोसौ
पायादपायादपि मां मुरारिः ॥ १८ ॥
वने वने कुञ्जवने मुरारिर्
भ्रमन् भ्रमन् भ्राजति राधिका च।
सहैव कुञ्जे रमते च राधया
पा[illegible]यादिह कृष्णएकः ॥ १९ ॥
[illegible]नन्तविश्वम्भर वासुदेव
समस्तदेवैरपि वन्द्यपाद।
निरामय त्राणपते मुरारे
हरे हराशेषमहाघसंघं ॥ २० ॥

इति श्रीधरस्वामिना विरचितं
व्रजविहारकाव्यं समाप्तं ॥ ० ॥

## गुणरत्नं ।

सानन्दं नन्दिहस्ताहतमुरजरवाहूतकौमारवर्हि
त्रासान्नासाग्ररन्ध्रं विशति फणिपतौ भोगसङ्कोचभाजि ।
गण्डोड्डीनालिमालामुखरितककुभस्ताण्डवे शूलपाणेर्
वैनायक्यश्चिरं वो वदनविधुतयः पान्तु चित्कारवत्यः ॥१॥
यत्कण्ठे गरलं विराजति सदा मौलौ च मन्दाकिणी
यस्याङ्के गिरिजाननं कटितटे शार्दूलचर्माम्बरं ।
यन्माया हि रुणद्धि विश्वमखिलं पायात् स वः शङ्करः
जम्बुवत् जलविन्दुवत् जलजवत् जम्बालवत् जालवत् ॥२॥
विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं
विद्या भोगकरी यशःशुभकरी विद्या गुरूणां गुरुः ।
विद्या वन्धुजनो विदेशगमने विद्या परं दैवतं
विद्या राजसु पूज्यते नहि धनं विद्याविहीनः पशुः ॥ ३ ॥
गुणी गुणं वेत्ति न वेत्ति निर्गुणो
वली वलं वेत्ति न वेत्ति निर्वलः ।
पिको वसन्तस्य गुणं न वायसः
करी च सिंहस्य वलं न मूषिकः ॥ ४ ॥
गुणा गुणज्ञेषु गुणा भवन्ति
ते निर्गुणं प्राप्य भवन्ति दोषाः ।

सुस्वादुतोयाः प्रभवन्ति नद्यः
समुद्रमासाद्य भवन्त्यपेयाः ॥ ५ ॥
गुणायन्ते दोषाः सुजनवदने दुर्जनमुखे
गुणा दोषायन्ते किमिति जगतां विस्मयपदं ।
यथा जीमूतोयं लवणजलधेर्वारि मधुरं
फणी पीत्वा क्षीरं वमति गरलं दुःसहतरं ॥ ६ ॥
विद्या विवादाय धनं मदाय
शक्तिः परेषां परिपीडनाय ।
खलस्य साधोर्विपरीतमेतत्
ज्ञानाय दानाय च रक्षणाय ॥ ७ ॥
मतिरेव बलात् गरीयसी
तदभावे करिणामियन्दशा ।
इति घोषयतीव डिण्डिमः
करिणो हस्तिपकाहतः क्वनन् ॥ ८ ॥
वरं गर्भस्रावो वरमपि च नैवाभिगमनं
वरं जातप्रेतो वरमपि च कन्याभिजननं ।
वरं वन्ध्या भार्या वरमपि च गर्भेषु वसतिर्
न चाविद्वान् रूपद्रविणगुणयुक्तोऽपि तनयः ॥ ९ ॥
या राका शशिशोभना गतघना सा यामिनी यामिनी
या सौन्दर्यगुणान्विता पतिरता सा कामिनी कामिनी ।
या गोविन्दरसप्रमोदमधुरा सा माधुरी माधुरी
या लोकद्वयसाधनी तनुभृतां सा चातुरी चातुरी ॥ १० ॥

ज्ञातिभिर्वण्ट्यते नैव चौरेणापि न नीयते ।
दाने नैव क्षयं याति विद्यारत्नं महाधनं ॥ ११ ॥
अजरामरवत् प्राज्ञो विद्यामर्थञ्च चिन्तयेत् ।
गृहीतइव केशेषु मृत्युना धर्ममाचरेत् ॥ १२ ॥
गुणेन स्पृहणीयः स्यात् न रूपेण यतो जनः ।
सौगन्ध्यवर्ज्यं नादेयं पुष्पं कान्तमपि क्वचित् ॥ १३ ॥

इति श्रीमहाकविभवभूतिविरचितं
गुणरत्नकाव्यं समाप्तं ॥ ० ॥

# नीतिप्रदीपः ।

रत्नाकरः किं कुरुते स्वरत्नैर्
विन्ध्याचलः किं करिभिः करोति ।
श्रीखण्डखण्डैर्मलयाचलः किं
परोपकाराय सतां विभूतिः ॥ १ ॥
कर्णावघातैरपि ताड्यमाना
दूरीकृताः करिवरेण मदान्धबुद्ध्या ।
तस्यैव गण्डयुगमण्डनहानिरेषा
भृङ्गाः पुनर्विकचपद्मवने चरन्ति ॥ २ ॥
येनाकारि मृणालपत्रमशनं क्रीडा करिण्या सह
स्वच्छन्दं भ्रमणञ्च कन्दरगणे पीतं पयो निर्झरं ।
सोयं वन्यकरी नरेषु पतितः पुष्णाति देहं तृणैर्
यद्दैवेन ललाटपत्रलिखितं तत् प्रोज्झितुं कः क्षमः ॥ ३ ॥
शशिदिवाकरयोर्ग्रहपीडनं
गजभुजंगमयोरपि बन्धनं ।
मतिमताञ्च विलोक्य दरिद्रतां
विधिरहो बलवान् इति मे मतिः ॥ ४ ॥
व्योम्न्येकान्तविहारिणोपि विहगाः संप्राप्नुवन्त्यापदं
बध्यन्ते निपुणैरगाधसलिलात् मत्स्याः समुद्रादपि ।

दुर्नीते हि विधौ किमस्ति चरितं कः स्थानलाभे गुणः
कालो हि व्यसनप्रसावितकरो गृह्णाति दूरादपि ॥ ५ ॥
अपि दलन् मुकुले बकुले यया
पदमधायि कदापि न तृष्णया ।
अहह सा सहसा विधुरे विधौ
मधुकरी बदरीमनुवर्तते ॥ ६ ॥
गतोस्मि तीरं जलधेः पिपासया
स चापि शुष्कश्चुलुकी कृतो मया ।
न दृश्यते दोषलवोपि तोयधेर्
ममैव तत्कर्मफलं विजृम्भते ॥ ७ ॥
सिंहक्षुण्णकरीन्द्रकुम्भगलितं रक्तात्तमुक्ताफलं
कान्तारे बदरीधिया द्रुतमगात् भिल्लस्य पत्नी मुदा ।
पाणिभ्यावगुह्य शुक्लकठिनं तद्वीक्ष्य दूरे जहा-
वस्थाने पततामतीव महतामेतादृशी स्याद्गतिः ॥ ८ ॥
किन्ते नम्रतया किमुन्नततया किन्ते घनच्छायया
किन्ते पल्लवलीलया किमनया चाशोक पुष्पश्रिया ।
यत्त्वन्मूलनिषन्नखिन्नपथिकस्तोमः स्तुवन्नन्वयं
न स्वादूनि मृदूनि खादति फलान्युत्कण्ठमुत्कण्ठितं ॥ ९ ॥
दूरे मार्गान्निवससि पुनः कंटकैरावृतोसि
छायाशून्यः फलमपि च ते वानरैरप्यभक्ष्यं ।
निर्गन्धस्त्वं मधुपरहितः शाल्मले सारशून्यः
सेवास्माकं भवति विफला तिष्ठ निश्वस्य यामः ॥ १० ॥

हंसाः पद्मवनाश्रया मधुलिहः श्रीरम्यलाभाश्रया
पान्थाः स्वादुफलाश्रया बलिभुजो गृध्राश्च मांसाश्रया ।
दूरादुन्नतपुष्परागनिकरैर्निःसारमिथ्योन्नतै
रेरे शाल्मलिपादप प्रतिदिनं केन त्वमावञ्चितः ॥११॥
किन्तेन हेमगिरिणा रजताद्रिणा वा
यत्र स्थिताहि तरवस्तरवस्तएव ।
वन्दामहे मलयमेव यदाश्रयेण
शाकोटनिम्बकुटजान्यपि चन्दनानि ॥१२॥
निर्वाणदीपे किमु तैलदानं
चौरे गते वा किमु सावधानं ।
वयोगते किं वनिताविलासः
पयोगते किं खलु सेतुबन्धः ॥१३॥
शीतेतीते वसनमशनं वासरान्ते निशान्ते
क्रीडारम्भः कुवलयदृशां यौवनान्ते विवाहः ।
सेतोर्बन्धः पयसि गलिते प्रस्थिते लग्नचिन्ता
सर्वञ्चैतद्भवति विफलं स्वस्वकाले व्यतीते ॥१४॥
नवं वस्त्रं नवं छत्रं नव्या स्त्री नूतनं गृहं ।
सर्वत्र नूतनं शस्तं सेवकान्ने पुरातने ॥१५॥
समायाति यदा लक्ष्मीर् नारिकेलफलाम्बुवत् ।
विनिर्याति यदा लक्ष्मीर् गजभुक्तकपित्थवत् ॥१६॥

इति श्रीमहाकविवेतालभट्टविरचितं
नीतिप्रदीपकाव्यं समाप्तं ॥ ० ॥

## पद्यसंग्रहः ।

नत्वा तां परमेश्वरीं शिवकरीं श्रीभारतीं भास्वतीं
गङ्गातीरनिवासिना सुकविना लोकोपकारार्थिना ।
नानापण्डितवक्त्रनिर्गतवतां निर्मीयते केनचित्
पद्यानामिह संग्रहोऽमृतकथाप्रतानविस्तारिणां ॥ १ ॥
काव्ये भव्यतमेपि विज्ञनिवहैरास्वाद्यमाने मुहुर्
दोषान्वेषणमेव मत्सरयुषां नैसर्गिको दुर्ग्रहः ।
कासारेपि विकाशिपङ्कजचये खेलन्मराले पुनः
क्रौञ्चश्चञ्चुपुटेन कुञ्चितवपुः सम्बूकमन्वेषते ॥ २ ॥
अतिरमणीये काव्येऽपि पिशुनो दूषणमन्वेषयति ।
अतिरमणीये वपुषि व्रणमिव मक्षिकानिकरः ॥ ३ ॥
कीर्तिः स्वर्गतरङ्गिणीभिरभितो वैकुण्ठमाप्लावितं
क्षौणीनाथ तव प्रतापतपनैः सन्तापितः क्षीरधिः ।
इत्येवं दयितायुगेन हरिणा त्वं याचितः स्वाश्रयं
हृत्पद्मं हरये श्रिये स्वभवनं कण्ठं गिरे दत्तवान् ॥ ४ ॥
रवेः कवेः किं समरस्य सारं
कृषेर्भयं किं किमदन्ति भृङ्गाः ।
सदा भयं ब्रह्मपदञ्च केषां

भागीरथीतीरसमाश्रितानां ॥ ५ ॥
वासः काञ्चनपिञ्जरे नृपकराम्भोजैस्तनूमार्जनं
भक्ष्यं स्वादुरसालदाडिमफलं पेयं सुधाभं पयः ।
पाठः संसदि रामनाम सततं धीरस्य कीरस्य मे
हाहा हन्त तथापि जन्मविटपिक्रोडं मनो धावति ॥ ६ ॥
उदयति यदि भानुः पश्चिमे दिग्विभागे
विकसति यदि पद्मः पर्वतानां शिखाग्रे ।
प्रचलति यदि मेरुः शीततां याति वह्निर्
न चलति खलु वाक्यं सज्जनानां कदाचित् ॥ ७ ॥
निर्वाणदीपे किमु तैलदानं
चौरे गते वा किमु सावधानं ।
वयोगते किं वनिताविलासः
पयोगते किं खलु सेतुवन्धः ॥ ८ ॥
वरमसिधारा तरुतलवासो
वरमिह भिक्षा वरमुपवासः ।
वरमपि घोरे नरके पतनं
नच धनगर्वितवान्धवशरणं ॥ ९ ॥
कुग्रामवासः कुजनस्य सेवा
कुभोजनं क्रोधमुखी च भार्या ।
मूर्खश्च पुत्रो विधवा च कन्या
विनाग्निना संदहते शरीरं ॥ १० ॥
वरं मौनं कार्यं नच वचनमुक्तं यदनृतं

वरं क्लैव्यं पुंसां नच परकलत्राभिगमनं ।
वरं भैक्ष्याशित्वं नच परधनास्वादनसुखं
वरं प्राणत्यागो नच पिशुनवादेष्वभिरतिः ॥ ११ ॥
निःस्वो वष्टि शतं शती दशशतं लक्षं सहस्राधिपः
लक्षेशः क्षितिपालतां क्षितिपतिश्चक्रेश्वरत्वं पुनः ।
चक्रेशः पुनरिन्द्रतां सुरपतिर् ब्राह्मं पदं वांछति
ब्रह्मा विष्णुपदं हरिः शिवपदं त्वाशावधिं के गताः ॥ १२ ॥
ख्यातः शक्रो भगाङ्को विधुरपि मलिनो माधवो गोपजातो
वेश्यापुत्रो वसिष्ठः सरुजपदयमः सर्वभक्ष्यो हुताशः ।
व्यासो मत्स्योदरीयः सलवण उदधिः पाण्डवा जारजाता
रुद्रः प्रेतास्थिधारी त्रिभुवनवसतां कस्य दोषो न जातः
[॥ १३ ॥
तुरगशतसहस्रं गोगजानाञ्च लक्षं
कनकरजतपात्रं मेदिनीं सागरान्तां ।
विमलकुलवधूनां कोटिकन्याश्च दद्यात्
नहि नहि सममेतैरन्नदानं प्रधानं ॥ १४ ॥
कालिदासकविता नवं वयः माहिषं दधि सशर्करं पयः ।
ऐनमांसमवला च कोमला संभवन्तु मम जन्मजन्मनि
[॥ १५ ॥
नाक्षराणि पठता किमपाठि
पाठितोपि किमु विस्मृतएव ।
इत्थमर्थिजनसंशयदोला
खेलनां खलु चकार नकारः ॥ १६ ॥

लक्ष्मणसेनउवाच ॥

शैत्यंनाम गुणस्तवैव तदनु स्वाभाविकी स्वच्छता
किं ब्रूमः शुचितां भवन्त्यशुचयः स्पर्शेन यस्याः परे।
किञ्चातः परमं तव स्तुतिपदं त्वं जीवनं देहिनां
त्वं चेन्नीचपथेन गच्छसि पयः कस्त्वां निरोद्धुं क्षमः ॥१७॥

वल्लालउवाच ॥

तापो नापगतस्तृषा नच कृशा धौता न धूली तनोर्
न स्वच्छन्दमकारि कन्दकवलः का नाम केलीकथा ।
दूरोत्क्षिप्तकरेण हन्त करिणा स्पृष्टा नवा पद्मिनी
प्रारब्धो मधुपैरकारणमहो झङ्कारकोलाहलः ॥१८॥

तत्पुत्रउवाच ॥

परीवादस्तथ्यो भवति वितथो वापि महताम्
अतथ्यस्तथ्यो वा हरति महिमानं जनरवः ।
तुलोत्तीर्णस्यापि प्रकटितहताशेषतमसो
रवेस्तादृक्तेजो नहि भवति कन्यां गतवतः ॥१९॥

राजोवाच ॥

सुधांशोर्जातेयं कथमपि कलङ्कस्य कणिका
विधातुर्दोषोयं नच गुणनिधेस्तस्य किमपि ।
स किं नात्रेः पुत्रो न किमु हरचूडार्चनमणिर्
न वा हन्ति ध्वान्तं जगदुपरि किं वा न वसति ॥२०॥

इति श्रीकविभट्टकृतः पद्यसंग्रहः समाप्तः ॥ ० ॥